प्रभाप्रकाशनस्य द्वितीयं पुष्पम्

कातन्त्रव्याकरणस्य

शिष्यहितावृत्तिः

लेखकः

उग्रभूतिभट्टः

शारदालिपितः देवनागर्यां लिप्यन्तरणकारः सम्पादकश्च

डॉ॰ रामसागरमिश्रः

व्याकरणाचार्य, एम॰ ए॰ (संस्कृत-हिन्दी)

एम॰ एड॰, पी-एच.डी.

रीडर-व्याकरण

केन्द्रीयसंस्कृतविद्यापीठ

गोमतीनगर, लखनऊ-२२६०१०

प्रभाप्रकाशनम्

१८/५५२, विजय पार्क मौजपुर

दिल्ली-११००५३

कातन्त्रव्याकरणस्य
शिष्यहितावृत्तिः

पुनर्मुद्रणम्–२००० खीष्टाब्दे

© **सम्पादकाधीनम्**

प्राप्तिस्थलम् : १८/५५२, विजय पार्क, मौजपुर, दिल्ली–११० ०५३

प्रतिसंख्या : १०००

मूल्यम् : ३००–००

डी.टी.पी. : श्री यम० वहीद
सी.सी.यस. कम्प्यूटर सेन्टर
गोमती नगर, लखनऊ २२६०१०

मुद्रक : तरुण ऑफसेट प्रिन्टर्स
मौजपुर, दिल्ली-११००५३

Second Publication of Prabha Prakashan

SHISHYAHITA-VRITTI

of Kãtantra Vyakaran

by

Pt. Ugra Bhuti Bhatta

Transcription and Editing by :

Dr. Ram Sagar Mishra

Vyakaranacharya, M.A.
(Hindi & Sanskrit)
M.Ed. Ph.D.
Reader, Kendriya Sanskrit Vidyapeeth,
Gomati Nagar, Lucknow-226 010

Prabha Prakashan

18/552, Vijay Park, Maujpur, Delhi-110 053

SHISHYAHITA-VRITTI

Reprinting : 2000

© **Editor**

Sale Venue : 18/552, Vijay Park, Maujpur, Delhi-53

Number of Books : 1000

D.T.P. : C.C.S. (Computer & Communication Services),
Gomati Nagar, Lacknow-226 001

Printer : Tarun Offset Printers
Maujpur, Delhi-110 053

ग्रन्थार्पणम्

पितृपादाः स्व० पं० मनोदत्तमिश्राः

तत्रोत्तर प्रदेशे हि सुल्तानपुर मण्डले ।
गोमत्या उत्तरे तीरे गव्यूत्यर्धे सुपत्तने ।।१।।
ग्रामो मायंगनामास्ति पत्रालयविभूषितः ।
ततः पत्रालयात्पूर्वं क्रोशैक दूरनिर्मिता ।।२।।
राजते खौशिमिश्राणां वसतिस्तत्र शोभना ।
श्री मनोदत्तमिश्रोऽत्र वसिष्ठगोत्रजः सुधीः ।।३।।
रामसागर नामाऽस्य ज्येष्ठपुत्रः सुधीप्रियः ।
शारदालिपितश्चक्रे शिष्यहिताप्रकाशनम् ।।४।।
स्वर्गस्थ तातपादानां श्रीमनोदत्त शर्मणाम् ।
रामोऽर्पयत्यमुं ग्रन्थं श्रद्धाञ्जलि स्वरूपकम् ।।५।।

डा० कमलाकान्तमिश्रः
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्
(मानवसंसाधनविकास
मंत्रालय, शिक्षा विभाग
भारतसर्वकारस्य तत्त्वावधाने
सञ्चालितम्)

56-57, इन्स्टीट्यूशनल
एरिया, जनकपुरी
नई दिल्ली 110058
तार : संस्थान
फैक्स : 011-5541948
इ.पी.बी.यक्स : 5540993
5540995
दूर०(का०) : 5541949
आ० 6466562, 6463725

प्राक्कथनम्

वेदाः संस्कृतवाङ्मयस्य प्राचीनतमाः ग्रन्थाः। तेषां सम्यगवबोधाय षट् शास्त्राणि वेदाङ्गत्वेन प्रसिद्धानि। तत्र षडङ्गेषु प्रधानं व्याकरणशास्त्रं विद्यत इति भगवता पतञ्जलिना व्याकरणमहाभाष्यस्य पस्पशाह्निके उक्तम्। व्याकरणस्य वेदाङ्गेषु प्रधानत्वात् "मुखं व्याकरणं स्मृतमिति" पाणिनीय शिक्षायामुक्तम्। सम्प्रति प्रचलितेषु संस्कृतव्याकरणेषु कातन्त्रव्याकरणमन्यतममस्ति। मूलरूपेण सूत्रात्मकोऽयं ग्रन्थः ईशवीय प्रथमशताब्द्यां आन्ध्रवंशीयं प्रशासकं सातवाहन नागकं राजानम् अल्पेनैव कालेन सारल्येनोपायेन च संस्कृतभाषां पाठयितुं श्रीमता शर्ववर्मणा भगवतः कार्तिकेयस्य प्रेरणया विरचितः। कालान्तरे अस्य स्वरूपं, वृत्तिं, न्यासादिकं व्याख्यानञ्च निरीक्ष्य स्थानभेदेन इदं व्याकरणं तिसृषु शाखासु विभक्तुं शक्यते। (१). वङ्गशाखा (२). मध्यभारतीयशाखा (३). कश्मीरशाखा। अस्य व्याकरणस्य ऐन्द्र– कातन्त्र– कालाप– काशकृत्स्न– कौमारेति विविधानि नामानि सन्ति। वङ्गप्रदेशे इदं व्याकरणं कालाप इति नाम्ना प्रसिद्धमस्ति। तत्र कातन्त्रसूत्राणामुपरि दुर्गवृत्तिः वङ्गलिप्यां नैकेषु संस्करणेषु प्रकाशितास्ति। मध्यभारतीय क्षेत्रेष्वपि अस्य प्रभूतः प्रचार आसीत्। अत्र कतिपयक्षेत्रेषु वालकानां विद्यारम्भकाले पञ्चपाटी पाठनमिति प्रथामनुसृत्य ओं नमः सिद्धमिति कातन्त्रव्याकरणसूत्राणां प्रथमं सूत्रं पाठ्यते। कश्मीरप्रदेशे तु यद्यपि कातन्त्रसूत्रमधिकृत्य अनेकाः वृत्तयः न्यासग्रन्थाश्च विरचिताः सन्ति। ताः वृत्तयः न्यासाश्च सम्प्रति शारदालिप्यां पाण्डुलिपिरूपेण विभिन्नेषु ग्रन्थागारेषु विद्यन्ते।

तत्र दशमशताब्द्या उग्रभूतिभट्टेन लिखितां कातन्त्रसूत्राणां शिष्यहितावृत्तिमधिकृत्य तेनैव निर्मिता न्यास नाम्नी टीका *डा० राम सागर मिश्रेण* सम्पाद्य प्रकाशिता। सम्प्रति अनेनैव उग्रभूतिभट्टस्यास्य वृत्तिग्रन्थस्य यत् सम्पादनं प्रकाशनञ्च क्रियते तत् संस्कृतानुरागिणां छात्राणां च कृते उपयोगि भविष्यति। अस्मिन् ग्रन्थे सन्धिनामाख्यात कृदिति चतुर्षु प्रकरणेषु संस्कृत व्याकरणमुपनिवद्धम्। सामान्यजनानां कृते सारल्येनोपायेन संस्कृतभाषा–शिक्षणाय अस्य कातन्त्रव्याकरणस्य उपयोगिता विद्यते। उक्तञ्च–

छान्दसाः स्वल्पमतयः शास्त्रान्तररताश्च ये,
वणिक् सस्यादि संसक्ताः लोकयात्रादिषु स्थिताः।
ईश्वराः व्याधिनिरताः तथालस्ययुताश्च ये
तेषां क्षिप्रं प्रवोधार्थमनेकार्थं कलापकम् ।।

संस्कृतभाषायाः पठन–पाठने कातन्त्रव्याकरणस्य महत्त्व–मुद्दिश्य विद्वांसः अस्य ग्रन्थस्य उपयोगं करिष्यन्ति। केचन जैनधर्मावलम्बिनः मुनयस्तु कातन्त्रव्याकरणमाध्यमेनैव स्वशिष्यान् पाठयितुं प्रयासरताः सन्ति।

डा० रामसागरमिश्र-महोदयेन महता परिश्रमेण शारदालिप्यां सन्निवद्धां संस्कृतपाण्डुलिपिरूपेणोपलब्धामेकामेव प्रतिमाश्रित्य अस्याः शिष्यहितायाः वृत्तेः देवनागर्यां सम्पादनं प्रकाशनञ्च सर्वप्रथमं कृत्वा संस्कृतव्याकरणक्षेत्रे स्वकीयं महत्वपूर्णं योगदानं कृतम्। मन्ये, संस्कृतभाषाया अध्ययनाध्यापन क्षेत्रे अनेन महान् लाभो भविष्यति, आशासे च लेखकः अन्यानपि शारदालिपिनिवद्धान् व्याकरणग्रन्थान् सम्पाद्य प्राकाश्यमानेष्यति।

कृष्णजन्माष्टमी

कमलाकान्तमिश्रः

दिनाङ्कः २५.८.१९९७

शुभाशंसनम्

मम प्रेष्ठेन **डा० रामसागरमिश्रेण** स्व शोधकालेऽपरिमेयानि विघ्नानि समुत्तीर्य न केवलं स्वदेशे अपितु विदेशेष्वपि सम्प्राप्तमौलिकपाण्डुलिपिग्रन्थान् शारदालिपेः संस्कृतरूपान्तरणं विधाय पूर्वम् शिष्यहितान्यासस्य समालोचनात्मकं ग्रन्थरत्नं प्रास्तावि। अनन्तरं च सतताध्ययनसंलग्नेन विदुषाऽनेनाधुनाऽस्यैव न्यासस्य मूलरूपायाः शिष्यहितावृत्तेः शारदालिपेः संस्कृतरूपान्तरणं वैयाकरणविदुषां समक्षे प्राकाश्यते। शारदालिपेः रूपान्तरणं व्याकरणमूलज्ञानं विनाऽतीव दुष्करम्। विदुषाऽनेन यद् रूपान्तरणमिदानीं प्रस्तूयते तदस्यैव सततप्रयासबीजस्य मधुरं सुखदं चान्यतमं फलम्।

कातन्त्रव्याकरणस्योपरि विद्यमानायाः शिष्यहितावृत्तेर्न्यासस्य च संस्कृतरूपान्तरणमिदं संस्कृतस्य प्रारम्भिकाध्ययने प्रवृत्तेभ्यः (for the students of Diploma etc.) संस्कृतशिक्षेच्छुभ्यः साधारणेभ्यः विदेशसमागतेभ्यः छात्रेभ्यः कृते च सरलतमं साधनं भविष्यति।

आशासे सतताध्ययन परः **श्रीरामसागरमिश्रः** अन्यान् अन्यान् ग्रन्थान् शारदालिपेः रूपान्तरणं कृत्वा संस्कृतजगति समुपस्थापयिष्यति, येन संस्कृतस्य प्रचारः प्रसारः च स्यात्।

२५.८.१९९७

डा० योगेश्वरदत्तशर्मा
प्राक्तन आचार्यः अध्यक्षश्च
गुरुकुलकांगड़ी विश्व–
विद्यालयः
हरिद्वारः।

शारदालिपिनिदर्शनम्



PREFACE

I felt greatly honoured and at the same time embarrassed, when my senior Dr. R.S.Mishra, asked me to write a few words about the present edition of the Shishyahita Vritti, commentary of Katantra Vyakaran Sutras.

Katantravyakaran is a kind of well developed Sanskrit Grammer at in its own form, It was developed by Acharya Sarv Varma in Ist era of christ century to teach king Shatvahan of Andhra dynesty the general rules of Sanskrit Grammar only in six months. These rules were composed by him in its abridged form in competetion of Acharya Gunadhya, who claimed before king Shatvahan to teach him Sanskrit in twelve years. The rules of Katantra Grammar were bestowed up on him by Lord Kartikeya, the elder son of Lord Shiv in the same way as Lord Shiv did in the case of Panini. Katantra Vyakaran is also known by many other names. Which differ only in number of sutras, a few of them being Aindra, Kalapa, Kaumar and Kashkritshna. As per jain tradition Kaumar Vyakaran was originated by Kumar Rishabh Deo, the first Jain Tirthankar. Consequently Katantra is familiar among the Jain Munis and scholars in India today. The reason of the popularity of this Grammar among leaners of sanskrit is its simplicity as compared to Panini's Vyakaran. It was the simplicity that accounted for its popularity in olden India in Bengal, South India and Kashmir. It is also said to be known in some parts of west Asia and in Tibbat. It was due to the popularity of this growth that several commentaries havebeen written on it by scholars. One such commentry was written by

Acharya Ugra Bhuti Bhatt entitled Shishyahita-Vritti which was available in Sharda manuscript. Dr. Mishra is doing commendable job in bringing out the same in Devanagri script for the first time.

It is hoped that this work will be of great helps to those professional agencies and young scholars which are engaged in popularising the sanskrit language, will also find it of help in achieving their aims. It is hoped that the ShishyahitaVritti will come to be regarded as a landmark in the history of Sanskrit vyakaran as it will play an important role in the understanding of the Katantra Vyakaran. The present work is not only a commentary on Katantra Vyakaran but an original work in itself.

Prior to this, Dr. Mishra who is a great scholar and Pandit of Sanskrit Vyakaran and Sharada script, has already brought out "Shishyahitanyasa" which is a masterly analysis in itself. I hope that this book will be accorded a cordial welcome like his privious one by one and all. It is well known that Dr. Mishra is a recepient of special award by U.P. Sanskrit Academy Lucknow in recognition of his work.

I wish Dr. Mishra long happy and healthy life so that he may contribute to the growth of Sanskrit Language with all his might.

Dr. Vijay Kumar Jain
Head, Dept of Buddhisht
Philosophy,
Kendriya Sanskrit Vidyapeeth
Gomati nagar, Lucknow-226 010

गुरुपूर्णिमा 1997

विषयानुक्रमणिका

विषयः	पृ०संख्या
ग्रन्थार्पणम्	V.
प्राक्कथनम्	VII.
शुभासंशनम्	IX.
शारदालिपि निदर्शनम्	X.
PREFACE	XI.
विषयानुक्रमिणिका	XIII.
आभारज्ञापनम्	XIV.
संम्पादकीयम्	XVI.
कातन्त्रव्याकरणपरिचयः	X.XI
ग्रन्थपरिचयः	XXIII.
ग्रन्थकारपरिचयः	XXIV.
ग्रन्थरचनाकालः	XXIV.
महत्त्वप्रतिपादनम्	XXIV.

अथ मूलपाठः

१. सन्धिप्रकरणे—

संज्ञापादः	१
समानपादः	७
ओदन्तपादः	११
वर्गपादः	१३
पञ्चमःपादः	१७
निपातपादः	२०

२. नामप्रकरणे—

लिङ्गपादः	२५
सन्धिपादः	३७
युष्मत्पादः	५४
कारकपादः	६६
समासपादः	८५
तद्धितपादः	९५
स्त्रीप्रत्ययपादः	११३

३. आख्यातप्रकरणे—

परस्मैपादः	१२६
द्वितीयःपादः	१३७
तृतीयःपादः	१५८
चतुर्थपादः	१७३
पञ्चमःपादः	२०१
षष्ठःपादः	२१५
इडागमःसप्तमःपादः	२४२
अष्टमःपादः	२५३

४. कृत् प्रकरणे—

इज्वत्पादः प्रथमः	२६३
द्वितीयःपादः	२८६
तृतीयःपादः	३०२
चतुर्थःपादः	३१६
पञ्चमःपादः	३३३
षष्ठःपादः	३५३

सूत्रानुक्रमणिका— ३७६ – ४२४

आभार ज्ञापन

इस सारस्वत उपासना की तरफ उन्मुख होना बिना सरस्वती माँ की कृपा के सम्भव नही है। अतः सर्वप्रथम मैं उन्हीं के चरणों में अपना सादर नमन प्रस्तुत करता हूँ। इस कार्य में जिन्होंने सर्वाधिक आशीर्वाद प्रदान किया है उनमें से दिल्लीविश्वविद्यालय के संस्कृत विभाग के आचार्य स्वर्गीय प्रो० ब्रजमोहन चतुर्वेदी जी का प्रमुख स्थान है। अतः इस अवसर पर उन्हें श्रद्धाञ्जलि प्रदान करते हुए उनके प्रति कार्तज्ञ ज्ञापन करता हूँ। गुरूकुलकांगड़ीविश्वविद्यालय हरिद्वार के प्राक्तन आचार्य डा० योगेश्वरदत्तशर्मा का अत्यन्त आभारी हूँ जिनके आशीर्वाद से यह कार्य अपना मूर्तरूप प्राप्त कर सका है। राष्ट्रियसंस्कृतसंस्थान के निदेशक डा० कमलाकान्तमिश्र के प्रति अपना कार्तज्ञ ज्ञापन प्रस्तुत करता हूँ जिन्होंने अपना अमूल्य समय प्रदान कर इस ग्रन्थ का प्राक्कथन लिखा तथा जिनके आशीर्वाद के बिना इस कार्य का सम्पादन कर पाना सम्भव नही था। इस ग्रन्थ के सम्पादन में गणिनी आर्यिका ज्ञानमती जी के ग्रन्थ कातन्त्रव्याकरण एवं डा० जानकीप्रसादद्विवेदी के ग्रन्थ कलापव्याकरण से सूत्रपाठ निर्धारण में सहायता ली है। अतः इन पूज्यजनों के प्रति कार्तज्ञ ज्ञापन करता हूँ। केन्द्रीय संस्कृतविद्यापीठ लखनऊ के बौद्धदर्शनविभाग के अध्यक्ष डा० विजयकुमारजैन एवं शासकीयमहाविद्यालय पन्ना, मध्यप्रदेश में असिस्टेन्ट प्रोफेसर पद पर कार्यरत डा० राकाजैन के प्रति हार्दिक धन्यवाद ज्ञापन करता हूँ जिनसे कातन्त्रव्याकरण सम्बन्धी अनेक जानकारियाँ प्राप्त कर अपने कार्य को

सुगम बना पाया हूँ। इनमें जिन नवोदित विद्वानों ने अपना योगदान दिया है। उनमें से श्रीमती इन्दिरागाँधी कलाप्रतिष्ठान नई दिल्ली के डा० कीर्तिकान्त शर्मा, श्री विद्यासागर मिश्र, श्री विजयजी प्रमुख हैं। जिन्होंने मुझे शिष्यहितावृत्ति के पाण्डुलिपि के सम्बन्ध में महत्त्वपूर्ण जानकारी प्रदान किया है। इस अवसर पर इन सभी के प्रति धन्यवाद प्रस्तुत करना मेरा परम कर्तव्य है। ऐसे अवसर पर अपने शिष्य तथा केन्द्रीय संस्कृतविद्यापीठ लखनऊ के शोधछात्र विजयकुमारदुबे व्याकरणाचार्य को धन्यवाद देता हूँ। जिन्होने प्रूफ रीडिंग में अपना महत्त्वपूर्ण योगदान दिया है। तथा केन्द्रीयसंस्कृतविद्यापीठ, लखनऊ के प्राचार्य डा० उमारमणझा, अपने वरिष्ठ सहयोगियों डा० शिवकुमारचतुर्वेदी, डा० आजादमिश्र, डा० यस० यन० झा, अन्य सहयोगी अध्यापक बन्धुओं, एवं समस्त विद्यापीठ परिवार द्वारा इस कार्य में सहयोग एवं आशीर्वाद प्रदान करने के लिए इन सबके प्रति हार्दिक आभार ज्ञापित करता हूँ। संस्कृतजगत् के उन सभी विद्वज्जनों का आभारी हूँ, जिनसे जाने–अनजाने इस सारस्वत उपासना में मुझे सहयोग प्राप्त हुआ है। अन्त में सी०सी०यस० कम्प्यूटर सेन्टर गोमती नगर लखनऊ के प्रभारी श्री यम०वहीद का आभारी हूँ जिन्होंने अपने कुशल अनुभवों से इस ग्रन्थ की डी०टी०पी० प्रस्तुत किया है।

डा० रामसागर मिश्र

सम्पादकीयम्

गुरूर्ब्रह्मा च विष्णुस्तत्कमलनयनं नुमः ।
कृपया यस्यसम्प्राप्तं ज्ञानं किमपि मादृशैः।।
अमेठीतिसुराज्ये वै पुण्यभूमि विराजिते ।
ध्यात्वा परमहंसं हि टीकराश्रमवासिनम् ।।
तत्र गुरूमहं वन्दे श्रीगिरिधर नामकम्।
तथा च खलु संपूज्यम् सत्यदेवत्रिपाठिनम्।।
उग्रभूतिभट्टेन टीका शिष्यहिताकृता।
तस्यास्सम्पादनं कुर्मः एतेषां कृपयाऽधुना ।।

कातन्त्रव्याकरण अपने आप में महत्त्वपूर्ण होते हुए भी कुशल पारखियों के अभाव में उपेक्षित रहा है। फिर भी कुछ वैयाकरण विद्वान् ऐसे हैं जिन्हें इसके बारे में चिन्ता लगी रहती है। ऐसे विद्वानों में ही दिल्ली विश्वविद्यालय के संस्कृत विभाग के प्राक्तन आचार्य एवं अध्यक्ष डा० सत्यव्रत शास्त्री हैं। इन्हीं के दिल्ली विश्वविद्यालय के संस्कृत विभाग के अध्यक्षपद पर कार्यरत रहते हुए मैने पी-एच०डी० उपाधि प्राप्ति हेतु अपना शोधकार्य सम्पन्न किया।मुझे अपना शोधकार्य आंशिक रूप से समय लगाकर करना था क्योंकि मैं जीविकोपार्जन क्रम में दिल्लीके शिक्षाविभाग के अन्तर्गत अध्यापन कार्यरत था। ऐसी स्थिति में कोई सामान्यविषय मुझे प्राप्त होना चाहिए था। किन्तु मुझे व्याकरणाचार्य होने के कारण अध्यक्ष जी की कुशल पारिखी बुद्धि ने बख्शा नहीं, अपितु कातन्त्रव्याकरण पर कार्य करने के लिए प्रेरणा दी तथा शिष्यहितान्यास ग्रन्थ के सम्पादन का विषय स्वीकृत किया। यह एक ऐसा विषय था जिसके बारे में कहीं भी किसी को सामान्य रूप से कुछ भी ज्ञात नहीं था। वाराणसेय संस्कृतविश्वविद्यालय वाराणसी के शोधस्नातक डा० जानकी प्रसाद द्विवेदी ने कातन्त्रविमर्श के नाम से एक सर्वेक्षणात्मक ग्रन्थ शोधप्रबन्ध के रूप में प्रस्तुत किया था जिसके आधार पर कान्तत्रव्याकरण की तीन मुख्य शाखाओं का पता चला था। पहली– वङ्गशाखा, दूसरी– कश्मीरशाखा, तीसरी– मध्यदेशीयशाखा एवं दक्षिण भारतीय शाखा। इनमें से वङ्ग शाखा के प्रमुख विद्वान् वैयाकरण नवीं शती के आचार्य दुर्ग के द्वारा कातन्त्रसूत्रों पर लिखा गया दुर्गवृत्ति नामक ग्रन्थ है जिसका प्रकाशन वंगीय लिपि में कालापव्याकरण

नाम से कई संस्करणों में हुआ है तथा एशियाटिक सोसायटी आफ बंगाल ने नागरी लिपि में किया है जिसके सम्पादक प्रो० जुलियस इग्लिन हैं।

कश्मीरशाखा में मेरे इस विषय पर शोध कार्य करने के पूर्व कोई भी ग्रन्थ प्रकाश में नहीं आया था किन्तु भिन्न-भिन्न ग्रन्थागारों में अनेकानेक पाण्डुलिपियों के उपलब्ध होने की सूचना है।

दक्षिणभारतीय एवं मध्यभारतीय शाखा का कोई प्रमुख ग्रन्थ नहीं है किन्तु आचार्य भावसेनत्रैविद्य द्वारा सम्पादित तथा जैनाचार्य श्रीमच्छर्ववर्म विरचित कातन्त्रसूत्रों पर कातन्त्ररूपमाला नाम से प्रकाशित ग्रन्थ उपलब्ध है।

जिस विषय पर शोध कार्य करने हेतु मुझे अनुमति प्राप्त हुई उसका शीर्षक 'शिष्यहितान्यासस्यसम्पादनमध्ययनञ्च' है। शिष्यहितान्यास एक पाण्डुलिपि ग्रन्थ है अभी तक न्यास नाम से पाणिनीयव्याकरण सूत्रों पर काशिकावृत्ति पर उल्लिखित न्यासही एक मात्र न्यास ग्रन्थ के नाम से जाना जाता रहा है। इस कारण से जिन-जिन वैयाकरणों से सम्पर्क किया गया वे सभी इसी काशिका न्यास के अतिरिक्त अन्य न्यास ग्रन्थों से अनभिज्ञ रहे। ऐसी स्थिति में कैटालोगसकैटालोग्रुम का आश्रय लेने पर वाडलियनलाइब्रेरी आक्सफोर्ड लन्दन के ग्रन्थागार में शिष्यहितान्यास नामक ग्रन्थ होने का पता चला तथा भण्डारकर ओरियन्टल रिसर्च इन्स्टीट्यूट पूना में भी इसके उपस्थित होने की सूचना कालान्तर में प्राप्त हुई। अत्यन्त जीर्ण-शीर्ण होने के कारण पूना से इसे उपलब्ध कर पाना असम्भव था केवल वहाँ जा कर देखा जा सकता था। किन्तु वाडलियन पुस्तकालय से पत्र व्यवहार करने पर उसके माइक्रोफिल्म रूप में प्रेषित किए जाने की सूचना मिली। तदनुसार विभागीय संस्तुति के आधार पर दिल्लीविश्वविद्यालय के पुस्तकालय को उसे मंगवाने का भार दे दिया गया। उस समय सन् ७४ में केवल दो पौण्ड का मूल्य विश्वविद्यालय के पुस्तकालय द्वारा भेजा जाना था। उसे भेजने में एक वर्ष से अधिक समय बिता दिया उसके बाद कहीं दूसरा वर्ष बीतते-२ यह पाण्डुलिपि ग्रन्थ माइक्रोफिल्म के रूप में प्राप्त हुआ तथा उसे फिल्मरीडर की सहायता से देखने पर पता चला कि वह सम्भवतः शारदालिपि में है। इसके पढ़ने में संस्कृतविभाग के अभिलेख विशेषज्ञ आचार्यों की सहायता विफल रही। दिल्ली में ग्रीनपार्क स्थित कश्मीरीपण्डित के घर गया। उन्होंने इतना रूखा उत्तर दिया कि उनसे कार्यसम्पादन की आशा ही नहीं रही। अतः विवश

होकर पुस्तकालयाध्यक्ष से निवेदन किया कि आप उसे मुझे दे दें, जिससे कि पुस्तकालय से बाहर ले आकर किसी विद्वान् की सहायता ले सकूँ। उस समय के पुस्तकालयाध्यक्ष ने भी अनसुनी कर बाहर ले जाने की अनुमति नहीं दिया उसे महत्त्वपूर्ण बतला कर मुझे देने से मना कर दिया। जब मैने कहा कि वाडलियन लाइब्रेरी मुझे व्यक्तिगत रूप से भेजने का पत्र दिया था केवल विदेशी मुद्रा के लिए ही आप से सहायता लेनी पड़ी तो परिणाम यह हुआ कि उन्होने सहायता करने को स्पष्ट रूप से मना कर दिया। मैं अध्यापक होने के कारण परिस्थितियों के जाल में फँस जाने के कारण इस विवाद को आगे नहीं ले जाकर उनके सामने विवश हो गया। इस असफलता के कारण मैं संस्कृत विभाग में पुनः आवेदन किया कि विषय बदल दिया जाए किन्तु कोई परिणाम नहीं निकला। पुनः मैने वाडलियनलाइब्रेरी को सीधे पत्र व्यवहार प्रारम्भ किया जिसके फलस्वरूप उन्होने मुझे व्यक्तिगत बाण्ड पर उस पाण्डुलिपि का जीराक्सप्रति मुझे ३६ या ४० डालर के मूल्य पर प्रेषित करने का वादा किया और उन्हीं के सुझाव के कारण शिक्षा मन्त्रालय से युनेस्को बुककूपन्स प्राप्ति हेतु आवेदन किया, बड़ी दौड़–धूप के फलस्वरूप ६–७ माह बाद बुककूपन को प्राप्त कर वाडलियन लाइब्रेरी आक्सफोर्ड लन्दन को प्रेषित किया तथा वहाँ से २–३ माह बाद उक्त पाण्डुलिपि की जीराक्स प्रति प्राप्त हुई। इसी दौरान निराश होकर संस्कृतविभाग के तत्कालीन आचार्य एवं अध्यक्ष डा० जोशी को आवेदन किया कि विषय बदल दीजिए। परन्तु उन्होने भी विषय बदलने के बजाय उसी पर कार्य करने की प्रेरणा दी।

इस प्रकार इस जीराक्स के मिलने पर यह स्पष्ट हो गया कि पाण्डुलिपिग्रन्थ शारदालिपि में है जिसका पढ़ना अत्यन्त कठिन है। किन्तु व्याकरण का छात्र होने के कारण इस समस्या से हार मानना मेरे लिए बड़ा कठिन था। मैने डा० सत्यव्रतशास्त्री से पुनः अनुरोध किया तथा इस बार उन्होंने उसमें रूचि लेते हुए एक ऐसा अनूदित अंश दिया जो था तो ८–१० पृष्ठ का ही किन्तु उसके आधार पर उस स्थल को खोज कर वर्णो के संयोजन तथा संयुक्त वर्णो की प्रक्रिया को समझते–समझते शारदालिपि पढ़ने का पर्याप्त अभ्यास हो गया। इसमें मुझे सरलता इसलिए हुई कि मै व्याकरण की शब्दावली से परिचित था किन्तु यह शब्दावली पाणिनीयव्याकरण परम्परा की न हो कर कातन्त्र परम्परा की होने के कारण मुझे शब्दों के वास्तविक स्वरूप निर्धारण में पर्याप्त कठिनाई हुई। इस प्रकार उत्साहित होकर प्रथम बार में निरन्तर ६–७ घंटे की बैठक के

बाद प्रारम्भ कर आधा पृष्ठ पढ़ा। उस समय ऐसा अनुभव हुआ कि आँखे भविष्य में काम ही नहीं कर पायेगीं। मेरे इस अथक प्रयास के कारण ग्रह कार्य लगभग दो वर्षो में पूरा हुआ। इस प्रकार कुल ७ वर्ष लगाकर मैं अपना शोध कार्य पूरा किया। इसके दौरान अनुभव किया कि शोध कार्य को बढ़ावा देने में विदेशी अधिक सहायक हैं बनिस्पत स्वदेशी लोगों के। इसीलिए ही भारत के स्नातक विदेश से ही शोध करने में रूचि रखते हैं।

कातन्त्रव्याकरण के ऊपर इस दुरूह कार्य के सम्पादन के बाद कातन्त्र सूत्रों पर इस शिष्यहितान्यास का प्रकाशन कर व्याकरण के ऐतिहासिक क्रम को चुनौती देना था कि शिष्यहितावृत्ति के लेखक दुर्ग हैं तथा शिष्यहितान्यास उग्रभूति भट्ट द्वारा विरचित है। तथ्य यह है कि दसवीं शती के उत्तरार्ध में भारत के पश्चिमोत्तर प्रान्त 'वैहिन्द' क्षेत्र जो कि सम्प्रति अफगानिस्तान का अङ्ग है, में शाह आनन्दपाल राजा राज्य करते थे उनके गुरू आचार्य उग्रभूति भट्ट ने कातन्त्र सूत्रों पर वृत्ति लिखी तथा स्वयं ही उस पर न्यास ग्रन्थ लिखा। तथा कश्मीर प्रान्त में कातन्त्रव्याकरण डा० कीथ के अनुसार १३वीं शती के स्थान पर १०वीं शती के उत्तरार्ध में ही प्रचलित हुआ।

न्यासग्रन्थ की पाण्डुलिपि को खोजते–खोजते राष्ट्रिय संग्रहालय नई दिल्ली गया वहाँ बड़ी कठिनता के बाद यह अवसर मिला कि मुझे वहाँ के निदेशक की अनुमति से एक पाण्डुलिपि ग्रन्थ की छायाप्रति दी गयी जो शारदा लिपि में थी देखने से पता चला कि यह न्यास नही अपितु शिष्यहितावृत्ति थी। फिर भी प्रतिदिन जाकर एक घण्टा समय देकर लगभग एक माह में सभी ७० या ७२ पृष्ठ को देवनागरी में अनूदित कर लिया। इस आशय से कि यह अपूर्ण है फिर भी शायद कभी काम आ जाए। इसी न्यास के शोधकार्य के प्रसङ्ग में पूना स्थित प्राच्यविद्याशोधसंस्थान गया तथा वहाँ पर मिलान करके देखा कि पाण्डुलिपि के प्रारम्भ का २० पृष्ठ फट गया है एवं मध्य का भी लगभग २० पृष्ठ अनुपलब्ध है तथा अपूर्ण है फिर भी वहाँ निदेशक से प्रार्थना कर उसकी छायाप्रति माइक्रोफिल्म के रूप में ले लिया। कालान्तर में जब १९८० में मेरा शोधकार्य पूरा हो गया, थोड़ी राहत मिली तब चिन्ता हुई कि न्यास ग्रन्थ का प्रकाशन किया जाए तथा बाद में ३–४ वर्षो के प्रयास के बाद १९९० में उसका प्रकाशन मैने स्वयं किया क्योंकि इस व्याकरण ग्रन्थ के प्रूफ पढ़ने में बड़ी सावधानी रखनी थी। जिसे कोई अन्य प्रकाशक नहीं कर सकता था तथा रूचि भी नहीं लेता। ३–४ वर्षो के अथक प्रयास के

बाद ऐसी परिस्थिति में आया कि कार्य कुछ सरल हो गया तथा उसी के फलस्वरूप यह अमूल्य व्याकरण ग्रन्थ विद्वज्जनों के समक्ष प्रस्तुत कर पाया हूँ। राष्ट्रिय संग्रहालय से प्राप्त अंश एवं पूना प्रति में प्राप्त बाद के अंश मिला कर कुल एक प्रति ही सम्पादन हेतु उपलब्ध है। उसमें भी अत्यन्त जीर्ण–शीर्ण होने के कारण कुछ अंश अनुपलब्ध हैं तथा बीच–बीच में से कुछ पृष्ठ नष्ट हो गये हैं। उसकी जगह अध्ययन में तारतम्य बनाये रहने के लिए मैने कातन्त्र सूत्रों पर दुर्ग वृत्ति का उल्लेख कर दिया है। दूसरी प्रति के उपलब्ध न होने से मैने अपने व्याकरण सम्बन्धी अल्पज्ञान के ऊहा के आधार पर पाठ निर्धारण किया है। मुझे इस बात का सन्तोष है कि मै बहुत कुछ अंश में सफल रहा हूँ। फिर भी विद्वानों का मूल्याङ्कन समादरणीय है।

इस ग्रन्थ के सम्पादन में केवल एक ही पाण्डुलिपि के उपलब्ध होने एवं अत्यन्त जीर्ण–शीर्ण तथा बीच–बीच से कुछ पत्र अनुपलब्ध होने के कारण शुद्ध–शुद्ध पाठों के निर्धारण में अत्यन्त कठिनाई का अनुभव हुआ है। केवल अनुभव,तर्क,कल्पना,औचित्य एवं व्याकरण–प्रयोगों के सादृश्य चिन्तन के आधार पर पाठ निर्धारण का प्रयास किया गया है। शारदालिपि में कुछ संयुक्त वर्णों तथा अन्य वर्णों का निर्णय करना कठिन है। उनमें से प,य,म,स,ष,थ र्थ, क्ष, च्च,श्च,द्य एवं आ की मात्रा आदि प्रमुख हैं। जहाँ भ्रष्ट पाठ है उन्हे बिन्दु रेखाङ्कित कर छोड़ दिया गया है। बीच से क्रमशः २०–२० एवं २५–२५ आदि की संख्या में सूत्रों पर शिष्यहितावृत्ति का पाठ अनुपलब्ध है। ऐसे स्थल पर केवल पाठकों की सुविधा हेतु कातन्त्रव्याकरण के सूत्रों के साथ–साथ मात्र दुर्गवृत्ति का ही उल्लेख किया गया है। जिससे कि पाठक वृन्द के अध्ययन में बाधा न पहुँचे। समयाभाव के कारण धातुपाठ का पृथक् उल्लेख नही कर पा रहा हूँ। आशा है भविष्य में कातन्त्रव्याकरण के अन्य पाण्डुलिपि ग्रन्थों का सम्पादन करते समय इन सबका समुचित उल्लेख कर सकूँगा।

दिनाङ्क २४.७. १९९७.   डा० रामसागर मिश्र

कातन्त्र व्याकरण का संक्षिप्त परिचय

संस्कृतवाङ्मय के विभिन्न व्याकरणों की परम्परा में कातन्त्र व्याकरण का नाम जैनव्याकरण परम्परा से जुड़ा हुआ है। जैनाचार्य श्रीमच्छर्ववर्म रचित सूत्रों पर एक लघुवृत्ति वाले ग्रन्थ का सम्पादन श्री मद्भावसेनत्रैविद्य द्वारा तथा प्रकाशन वीरप्रेस जयपुर द्वारा वीरनिर्वाण संवत् २४८१ में किया जा चुका है। कातन्त्रव्याकरण के उद्भव एवं विकास के बारे में अल्वेरूनी के भारतनामकग्रन्थ में उल्लेख है कि आन्ध्रप्रदेश के राजा शातवाहन (शालिवाहन) को अल्पावधि एवं सरलतम ढंग से संस्कृत भाषा का ज्ञान कराने के लिए तत्कालीन आचार्यशर्ववर्माद्वारा व्याकरण के कुछ सिद्धान्तों का प्रतिपादन किया गया जो आकार में अत्यन्त संक्षिप्त है तथा इसी कारण यह कातन्त्र अर्थात् कातन्त्रव्याकरण के नियमों द्वारा ईषद् अर्थ में 'का' प्रत्यय करके तन्त्र शब्द जोड़ कर इसका अर्थ लघु व्याकरण मानते हुए ईषत् तन्त्रं कातन्त्रम् अर्थात् जो व्याकरण छोटा है वह कातन्त्र व्याकरण है। इसके मूल उद्भावक कौन थे? यह विवादास्पद है। यहाँ पर 'छोटा व्याकरण' यह अर्थ इस भ्रम को पैदा करता है कि किसकी अपेक्षा छोटा?इसके समाधान में दो बातें सामने आती हैं कि या तो यह व्याकरण किसी एक विस्तृत व्याकरण परम्परा का लघु रूप है, अतः यह कातन्त्र है।अथवा पाणिन्यादि व्याकरण की अपेक्षा लघु कलेवर का होने से कातन्त्र है, यह विद्वानों के शोध का विषय है। कुछ लोग पहला वाला अर्थ स्वीकार कर इसे जैनतीर्थंकर भगवान ऋषभदेवद्वारा मूल रूप में उद्भावित मानते हुए इसके कातन्त्र रूप का प्रवर्तक आचार्यशर्ववर्मा को मानते हैं। वास्तविकता यही है कि आज भी जैन साधु एवं साध्वियों को व्याकरण सिखाने के लिए कतिपय जैन मुनियों एवं संस्थाओं द्वारा कातन्त्रव्याकरण का उपयोग किया जा रहा है। कातन्त्रव्याकरण के स्वरूप के व्यापक परिप्रेक्ष्य में देखने पर पता चलता है कि कातन्त्रव्याकरण भारतवर्ष के अतिरिक्त, पश्चिम एशिया के कुछ भागों में तथा तिब्बत आदि प्रदेशों में भी प्रचलित रहा है। यह व्याकरण ऐन्द्र, काशकृत्स्न, कालाप, कौमारादि नामों से भी जाना जाता है। इनका विशेष परिचय शिष्यहितान्यास ग्रन्थ में दे चुका हूँ। भारतवर्ष में इसके अध्ययन अध्यापन की तीन परम्परायें प्रचलित हैं। इनमें से प्रथम–वंगीयपरम्परा, द्वितीय–कश्मीरीपरम्परा, तृतीय–मध्यदेशीयपरम्परा कही जा सकती है।

प्रथम परम्परा–

इस परम्परा में बङ्गप्रदेश आता है। यहाँ पर कातन्त्र व्याकरण का पठन–पाठन कालापव्याकरण के उपनाम से बहुतायत से प्रचलित था तथा श्रीमद्गुरूनाथ विद्यानिधिभट्टाचार्य द्वारा वंगीयलिपि में आचार्यदुर्गसिंह की वृत्ति एवं अन्य छोटी–छोटी वृत्तियों एवं टीकाओं को मिला कर कालापव्याकरण के नाम से एक ग्रन्थ का प्रकाशन करदिया गया है। पाणिनीयव्याकरण की सुदृढ़ परम्परा के बावजूद इस कातन्त्रव्याकरण के पठन–पाठन के कारण ही कालापव्याकरण के शकाब्द १८२४ से १८५५ के बीच आठ संस्करण वंगलिपि में प्रकाशित हो चुके हैं।

द्वितीय परम्परा– यह कश्मीरी परम्परा है–

इस परम्परा के तीन–चार ग्रन्थ शारदालिपि में उपलब्ध हैं जिनका प्रकाशन अभी नहीं हुआ है। १०वीं शती के पश्चिमोत्तर प्रान्त के श्री उग्रभूतिभट्ट द्वारा कातन्त्र सूत्रों पर विरचित वृत्ति एवं न्यास ग्रन्थ शारदालिपि में उपलब्ध हैं जिनमें न्यासग्रन्थ का सम्पादन एवं प्रकाशन मैने वाडलियनपुस्तकालयआक्सफोर्ड, लन्दन से पाण्डुलिपि मंगा कर किया है तथा उन्ही में से एक ग्रन्थ शिष्यहितावृत्ति का सम्पादन एवं प्रकाशन प्रस्तुत कर रहा हूँ। कालान्तर में बालबोधिनी वृत्ति एवं बालबोधिनीन्यास ग्रन्थों का भी सम्पादन चाहता हूँ जो कि शारदालिपि में उपलब्ध हैं। इनका उपलब्धि स्थान भण्डारकरओरियण्टलरिसर्च इन्स्टीट्यूट पूना अथवा जम्बू एवं कश्मीर प्रदेश है।

तृतीय परम्परा–

इस परम्परा में जो पाण्डुलिपिग्रन्थ हैं, वे नागरीलिपि में मारवाड़प्रदेश के कुछ पुस्तकालयों में हैं तथा सन् १८७८ में दुर्गसिंह वृत्ति का प्रकाशन अंग्रेज सम्पादक प्रो० इग्लिन, इडेनबर्ग विश्वविद्यालय के द्वारा देवनागरी लिपि में किया गया है। कातन्त्र पर रूपावतार एवं रूपमाला नाम से दो और ग्रन्थ प्रकाशित हैं। अभी हाल ही में भारतीय विद्याप्रकाशन ने डा० रणजीतसैनी द्वारा सम्पादित दुर्गवृत्ति का नागरी लिपि में तथा हस्तिनापुर (मेरठ) स्थित जैन साध्वी गणिनी आर्यिका ज्ञानमती जी द्वारा कातन्त्रव्याकरण (कातन्त्ररूपमाला) के नाम से प्रकाशन किया है।

ग्रन्थ परिचय–

शिष्यहितावृत्ति कातन्त्र सूत्रों पर लिखा गया एक वृत्तिग्रन्थ है। व्याख्यानं वृत्तिः अर्थात् काशिका आदि वृत्तिग्रन्थों की तरह यह एक व्याख्या ग्रन्थ है जिसमें कातन्त्र सूत्रों पर वृत्ति लिखी गयी है अर्थात् सन्धिप्रकरण, नामप्रकरण, आख्यातप्रकरण एवं कृत्प्रकरण।

१. सन्धि प्रकरण–इसमें सन्धि के नियमों का विवेचन किया गया है जो पाणिनीय व्याकरणनियमों की अपेक्षा भिन्न है। ऐसा ज्ञात होता है कि इसे सरल बनाने की दृष्टि से इसमें प्रत्याहार प्रणाली का अनुसरण नहीं किया गया है। इसमें सन्धि के साथ–साथ आदि में संज्ञा पाद एवं अन्त में निपात पाद का भी विवेचन है। इसमें कुल ६ पाद एवं ८७ सूत्र हैं।

२. नाम प्रकरण– इसमें पाणिनीय के षड्लिङ्ग की तरह शब्द रूपों का विवेचन है। साथ में कारक, समास, तद्धित आदि के शब्दों की सिद्धि का विवेचन है। दुर्गवृत्ति की अपेक्षा इसमें स्त्रीप्रत्यय का पृथक् विवेचन है। दुर्गवृत्ति में यह स्त्रीप्रत्ययपाद पृथक् रूप में नहीं है। इसमें कुल ७ पाद एवं ३६१ सूत्र हैं।

३. आख्यात प्रकरण–इसमें धातु रूपों का विवेचन है तथा आत्मनेपद परस्मैपद तथा इट् आगम का भी वर्णन है। इसमें कुल ८ पाद एवं ४५२ सूत्र हैं।

४. कृत् प्रकरण–इसमें कृत प्रत्ययों का विवेचन है जिनमें कुल ६ पाद एवं ५२० सूत्र है। कहा जाता है कि यह प्रकरण प्रारम्भिक तौर पर कातन्त्रव्याकरण में नहीं था। क्योंकि प्राचीन कातन्त्र वैयाकरणों के अनुसार कृदन्त के प्रयोग वृक्ष आदि शब्दों की तरह रूढिवाची है। अतः प्रकृति–प्रत्यय निर्धारण करने की आवश्यक्ता नहीं है। आचार्य दुर्ग ने इस विषय में कहा भी है–

वृक्षादिवदमी रूढाः कृतिना न कृतः कृताः।

कात्यायनेन ते सृष्टाः विबुद्धि प्रतिवृद्धये।।

अर्थात् वृक्षादि की तरह कृदन्त शब्दों का निर्माण कातन्त्रकार ने नहीं किया किन्तु पश्चवर्ती विद्वान् कात्यायन ने विशेष ज्ञान वर्धन के लिए कृत् प्रकरण का निर्माण कर उसके साथ जोड़ दिया।

ग्रन्थकारपरिचय–इस शिष्यहितावृत्ति के रचनाकार उग्रभूति भट्ट हैं, ये १०वीं शती के राजा आनन्दपाल के गुरू थे। इनका स्थान वैहिन्द क्षेत्र है (सम्प्रति अफगानिस्तान में) जिसे उद्भाण्डपुर भी कहा जाता था। इस ग्रन्थ की रचना कर उग्रभूति भट्ट जी ने कश्मीरी विद्वानों में पठन–पाठन प्रचार हेतु भेजा, किन्तु विद्वानों ने ध्यान नहीं दिया, तब उनकी प्रेरणा से उनका शिष्य शाह आनन्दपाल जी २० हजार दिरहन मुद्रा एवं इतने का ही सामान कश्मीरी पण्डितों में वितरण हेतु भेज दिया, तब कश्मीरी पण्डितों ने इसका पठन–पाठन शुरू कर दिया।

ग्रन्थ रचना काल–इस ग्रन्थ का रचना काल १०वीं शती है जिसका उल्लेख अल्वेरूनी के भारत नामक ग्रन्थ में है। अल्वेरूनी ने अपने इस ग्रन्थ में भारतीय धर्म एवं दर्शन, पुराण, इतिहास एवं रीति–रिवाजों का विवेचन किया है। मुहम्मदगौरी अपने भारतवर्ष पर आक्रमण के दौरान अल्वेरूनी को भी अपने साथ भारत लाया था जो कि ११वीं शती का प्रारम्भिक काल था।

महत्त्व–इस ग्रन्थ के महत्त्व के बारे में कहा जा चुका है कि सरलतम ढंग से साधारण आदमी को संस्कृतभाषा का ज्ञान कराने के लिए इस महत्त्वपूर्ण ग्रन्थ की रचना हुई जिससे समाज के प्रायः सभी वर्ग के लोग अपने–अपने व्यवसाय के लिए उपयोगी संस्कृत भाषा का ज्ञान प्राप्त कर सकें। इस ग्रन्थ में दिये गये उदाहरण एवं प्रयोगों द्वारा भारतवर्ष की प्राचीन संस्कृति एवं परम्परा के बारे में भी जाना जा सकता है।

ओऽम् नमः सरस्वत्यै

कातन्त्रव्याकरणे शिष्यहितावृत्तिः

सन्धिप्रकरणे प्रथमः पादः

श्रीकण्ठाय महामोहध्वान्तविध्वंसभानवे।
भुवनारम्भसंहारकारणाय नमो नमः।।

शब्दानुशासनम्।

● सिद्धोवर्णसमाम्नायः १/१/१

षिधु संराद्धौ, सिध्यतिस्म, गत्यर्थाकर्मकेति क्तः। वर्णानाम् अकारादीनाम्। वर्ण वर्णने, चुरादित्वादिन्, वर्णयन्ति कथयन्ति तांस्तानर्थविशेषानिति, पचादित्वादच्, कारित लोपः, समाम्नायः समाम्नानम्। म्ना अभ्यासे समाङ्पूर्वः, भावेघञि, आयिरादेशः। सिद्धशब्दोऽत्र नित्यार्थः निष्पन्नार्थो वा गृह्यते, वर्णसमाम्नायः अकारादीनां वर्णानाम् पाठक्रम इत्युच्यते। प्रयोजनं तु स्वरादि संज्ञा सिद्धिः।

● तत्र चतुर्दशादौ स्वराः १/१/२

तत्रेति। मान्तमव्ययं लुप्तप्रथमैक वचनम्। चत्वारश्च दश च ते चतुर्दश। तत्र प्रसिद्धे वर्ण समाम्नाये, आदौ ये चतुर्दश वर्णास्ते स्वर संज्ञाः भवन्ति। स्वराः अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ। स्वर संज्ञायाः क्व प्रयोजनम्, रो रे लोपं स्वरश्च पूर्वो दीर्घमित्यादिषु। इन्दू रमते, इदि परमैश्वर्ये, तनादेरूः, अनिदनुबन्धेति नकरागमः, सि, रमु क्रीडायाम्, ते, अन्वि। अग्नी रक्षति। अगि रगि गत्यर्थः, निङ्, सि, रक्ष पाति, अन्वि वर्णसमाम्नाय-स्योत्तरत्रानुवृत्त्यर्थम् तत्र ग्रहणम्।

● दशसमानाः १/१/३

आदावित्यनुवर्तते, वर्ण समाम्नाये आदौ ये दश वर्णास्ते समानसंज्ञाः भवन्ति। समानाः अ आ, इ ई, उ ऊ, ऋ ॠ, ऌ ॡ। समान संज्ञायाः क्व प्रयोजनम् ? समानस्सवर्ण इत्यादिषु। रामायतनम्।

● तेषां द्वौद्वावन्योन्यस्य सवर्णौ १/१/४

द्वौद्वावित्येकं पदम्, णं चाभीक्ष्ण्ये द्विश्चपदमिति वचनाद् द्वावित्येतद् द्विरूच्यते। तेषां दशानां समानानां मध्यादयौ द्वौ द्वौ वर्णौ, तावन्योऽन्यस्य परस्परं सवर्ण संज्ञौ भवतः। अकारस्याकारस्सवर्णः, एवं सर्वत्र। सवर्ण संज्ञाया क्व प्रयोजनम्? समानस्सवर्ण इत्यादिषु। रूद्रायुधम्, रूदिर् अश्रु विमोचने, रूदेरक्, युध सम्प्रहारे, मूलविभुजादिभ्यश्चेतिकः प्रत्ययः। तदायुधम्, प्रथमैकवचनम्, सि, नपुंस्कात्सिलोपः। आयुध्यतेऽनेनेत्यायुधम्। कृष्णाग्रम्। कृष विलेखने, नक्। गङ्गायतनम्। गम्लृ गतौ, गन्, लृकारः, पुषादलृकारेत्यर्थः। आमिनुस्वारः। वर्ग्येवर्गान्तः।

नन्वनुवर्तमानयोर्हस्वदीर्घयोरनेन सवर्णसंज्ञा क्रियते। तत्कथं द्वयोर्हस्वयोर्दीर्घयोश्चस्यात्। उच्यते– सनिचानिटि तृतीयादौ तु परादिरित्यस्माज्ज्ञापकाद्भविष्यति वर्ग्योवर्गेण सवर्ण इति वचनाद्व्यञ्जनानामपि सवर्ण संज्ञा वक्तव्या, चवर्गस्यकिरसवर्णे इति ज्ञापकात्। तेन क ख ग घ ङ, इत्येते परस्परं सवर्ण संज्ञाः। एवमन्येऽपि। ऋकारलृकारयोस्सवर्ण संज्ञा वक्तव्या, होतुः लृकारः होत्लृकारः। समानस्सवर्ण इति दीर्घः।

● पूर्वोर्हस्वः १/१/५

सवर्णग्रहणमितत्रानुवर्तते, उत्तरत्र च सवर्णयोर्यः पूर्वः सो ह्रस्व संज्ञो भवति। ह्रस्वाः पञ्च, अ इ उ ऋ लृ। ह्रस्वसंज्ञायाः क्व प्रयोजनम्? ह्रस्वोऽम्वार्थानामित्यादिषु। हे अम्ब ! पूर्वस्य लघु संज्ञापि वक्तव्या। लघवः पञ्च, अ इ उ ऋ लृ। क्व प्रयोजनम् ! नामिनश्चोपधायाः लघो इत्यादिषु। वेदिता, विदज्ञाने, श्वस्तनी ता, इट्, नामिनश्चोपधायाः लघो इति गुणः।

● परोदीर्घः १/१/६

सवर्णयोर्यः परः स दीर्घसंज्ञोभवति। दीर्घाः पञ्च। आ ई ऊ ॠ, लॄ। दीर्घ संज्ञायाः क्व प्रयोजनम्? अकारो दीर्घः घोषवतीत्यादिषु, देवाय। परस्य गुरू संज्ञापि वक्तव्या। गुरवः पञ्च। आ ई ऊ ॠ लॄ। गुरू संज्ञायाः क्व। प्रयोजनम्! गुरोश्चनिष्ठायां सेट् इत्यादिषु। धातो अ प्रत्ययः। ईहा। ईह चेष्टायाम्। ईहनमीहा। गुरोश्च निष्ठायां सेट् इत्यकार प्रत्ययः, आप्। पूर्व ह्रस्व शब्दाभ्यां पर दीर्घ शब्दयोस्सम्बन्धिशब्दत्वादाक्षेपेऽपि विना वचनमाक्षेपमात्रात्तयोस्संज्ञा संज्ञिलक्षण सम्बन्धो नोपलभ्यत इति योगारम्भः।

● स्वरोऽवर्णवर्जो नामी १/१/७

वृजेश्चुरादित्वादिन्, गुणः, वर्जित इति वर्जः, स्वरोवृद्गमिग्रहामित्यल्। कारितलोपः। अवर्णो वर्जो यस्मिन्स्वर इति विग्रहः। अवर्ण अकार आकारौ, स्वरास्सवर्णस्य ग्राहका इति वचनात्। इत्थं वर्ण ग्रहणेन सर्वत्र द्वयोर्ग्रहणम्। अवर्णवर्जस्स्वरो नामि संज्ञो भवति। नामिनः द्वादश – इ ई, उ ऊ, ऋ ॠ ऌ ॡ , ए ऐ, ओ औ, । नामि संज्ञायाः क्व प्रयोजनम्? नामिनस्स्वर इत्यादिषु दधिनी।

● एकारादीनिसन्ध्यक्षराणि १/१/८

एकार आदिर्येषां वर्णानामिति विग्रहः। एकारादीनि वर्णानि सन्ध्यक्षर संज्ञानि भवन्ति, सन्ध्यक्षराणि चत्वारि– ए ऐ ओ औ। सन्ध्यक्षर संज्ञाया क्वप्रयोजनम्? सन्ध्यक्षरान्तानामाकारो विकरण इत्यादिषु। दाता, देङ् रक्षणे, श्वस्तनीता, चतुर्णामियं संज्ञा, स्वरग्रहणानुवृत्तेः। ननु उपलक्षणत्वादेकारस्य संज्ञा कथं स्यात्? सत्यम्, ह्वावामाश्चेत्यत्र ह्वेञस्सन्ध्यक्षरान्तानामाकारो विकरण इत्यात्व विधानाद् भविष्यति। औकारस्य सन्ध्यक्षर संज्ञायाः क्व प्रयोजनम्? डुढौकेत्यादिषु ह्रस्वार्थम्।

● कादीनिव्यञ्जनानि १/१/९

ककार आदिर्येषां वर्णानामिति विग्रहः। ककारादीनि वर्णानि व्यञ्जन संज्ञानि भवन्ति! व्यञ्जनानि तु– क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व श ष स ह। व्यञ्जन संज्ञायाः क्व प्रयोजनम्? मोऽनुस्वारं व्यञ्जन इत्यादिषु। रूद्रं स्तौमि। उपलक्षणस्यापि ककारस्य व्यञ्जन संज्ञा। यः करोति, स कर्तेत्यत्र विसर्जनीयस्य लोप दर्शनात्।

● ते वर्गाः पञ्च पञ्चशः १/१/१०

पञ्चश इत्यव्ययमेतत् पञ्च पञ्चेति, आख्याताच्च तसादयः इति शस्, ते कादयः पञ्चशः पञ्च पञ्च भूत्वा वर्ग संज्ञाः भवन्ति। तास्तु संज्ञाः पञ्च। कखगघङ, चछजझञ, टठडढण, तथदधन, पफबभम। वर्गसंज्ञायाः क्व प्रयोजनम्? वर्गे वर्गान्त इत्यादिषु। यन्ता, यम उपरमे, श्वस्तनी ता, वर्गे वर्गान्त इति मस्य नः।

● वर्णानां प्रथमद्वितीयाः शषसाश्चाघोषाः १/१/११

वर्णानां ये प्रथमद्वितीयाः शषसाश्च ते अघोषसंज्ञाः भवन्ति। अघोषाः त्रयोदश–क ख च छ ट ठ त थ प फ श ष स। अघोष संज्ञाया क्व प्रयोजनम्? अघोषे प्रथम इत्यादिषु। इच्छति, ज्ञानभुत्सु, इषु इच्छायाम्, वर्तमाना ति, अन्वि, गमिष्यमां छ इति षस्य छः, द्विर्भावः, अघोषेष्वशिटामिति छस्य चः। बुध अवगमने, ज्ञानशब्दपूर्वः ज्ञानं बुध्यत इति क्विप् ; तस्य लोपः। हचतुर्थेति बस्य भः।

● घोषवन्तोऽन्ये १/१/१२

अघोषेभ्यो येऽन्ये वर्णाः ते घोषवत्संज्ञकाः भवन्ति। घोषवन्तः विंशतिः– ग घ ङ ड ढ ण ज झ ञ द ध न ब भ म य र ल व ह। घोषवत् संज्ञायाः क्व प्रयोजनम्? घेषवत्स्वर पर इत्यादिषु। अग्निर्गच्छति। ननु अन्य इति वचनात् स्वराणमपि संज्ञा स्यात्, न भविष्यति, व्यञ्जनग्रहणानुवृत्तेः।

● अनुनासिका ङञणनमाः १/१/१३

ङ ञ ण न माः वर्णाः अनुनासिक संज्ञाः भवन्ति, अनुनासिकाः पञ्च– ङञणनम। अनुनासिक संज्ञायाः क्व प्रयोजनम्? अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्येत्यादिषु। यंयम्यते, यम उपरमे, अत्यर्थम् यच्छति पुनः पुनर्वा, धातोरेकस्वरादिति य शब्दः, यण्परोक्षेति द्विर्व, अभ्यासस्यादिर्व्यञ्जनमिति मलोपः, अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्येत्यत्रानु स्वारागमः, ते अन्वि, असन्ध्यक्षर लोपः।

● अन्तःस्था यरलवाः १/१/१४

य र ल वाः वर्णाः अन्तस्थ संज्ञाः भवन्ति, अन्तस्थाः चत्वारः, यरलव। अन्तस्थ संज्ञायाः क्व प्रयोजनम्? सपरस्वरायास्सम्प्रसारणमन्तस्थाया इत्यादिषु। गृह्यते, ग्रह उपादाने वर्तते, सार्वधातुके यण्, ग्रहिज्यावयीति सम्प्रसारणे, रेफस्य ऋकारः।

● ऊष्माणः शषसहाः १/१/१५

शषसहाः वर्णाः ऊष्मसंज्ञाः भवन्ति, ऊष्माणः चत्वारः शषसह। ऊष्म संज्ञायाः क्व प्रयोजनम्? मनोरनूष्मण्यनुस्वार इत्यस्यानर्थकत्वादूष्मसंज्ञायाः प्रयोजनं नास्तीति योगारम्भो निरर्थक इत्याहुः।

● अः इति विसर्जनीयः १/१/१६

अ इति लुप्त प्रथमैक वचनम्, लोपस्त्वादि लोपोऽन्तलोपश्चेति पूर्वाचार्य वचनात्। अकारात्परं विन्दु द्वयं विसर्जनीय सज्ञं भवति। विसर्जनीय संज्ञायाः क्व प्रयोजनम्? विसर्जनीयश्चे छे वा शमित्यादिषु। कश्चरति, कश्छादयति, छद संवरणे, अस्योपधाया इति दीर्घः, ति, अन्वि, गुणः, ए अय्, इति शब्दोऽकारस्य संज्ञा निवृत्त्यर्थः, उच्चारणार्थस्त्वकारः। एवमुत्तर सूत्रेष्वपि वोद्धव्यम्।

● क इति जिह्वामूलीयः १/१/१७

ककारात्पूर्वो वर्णो जिह्वामूलीय संज्ञो भवति, जिह्वामूलीय संज्ञायाः क्व प्रयोजनम्, कखयोर्जिह्वामूलीयं नवेत्यत्र, क करोति, क खनति, डुकृञ्, खनु अवखनने, वर्तमाना ति, अन्वि, तनादेर्गुणः।

● प इत्युपध्मानीयः १/१/१८

पकारात्पूर्वो वर्ण उपध्मानीय संज्ञो भवति, उपध्मानीय संज्ञायाः क्व प्रयोजनम्, पफयोरूपध्मानीयं नवेत्यत्र, क पचति, क फलति।

● अं इत्यनुस्वारः १/१/१६

अं इति लुप्त प्रथमैक वचनम्, अं इत्यत्र यो विन्दुस्सोऽनुस्वार संज्ञोभवति अनुस्वार संज्ञायाः क्व प्रयोजनम्? मोऽनुस्वारं व्यञ्जन इत्यादिषु। त्वं स्मरसि, त्वं रमसे, स्मृचिन्तायां, वर्तमाना, सि, गुणः, रमु क्रीडायाम्, वर्तमाना, सि।

● पूर्वपरयोरर्थोपलब्धौ पदम् १/१/२०

पूर्वस्य लिङ्गस्य परस्य च स्यादेः तथा पूर्वस्य धातोः परस्य च त्यादेर्यस्समुदाय एकीभावस्तस्य पद संज्ञा भवति अर्थोपलब्धौ सत्याम्। पद संज्ञायाः क्व प्रयोजनम्? युष्मदस्मदोः पदं पदात्षष्ठी चतुर्थी द्वितीयासु वस्नसावित्यादिषु। ग्रामो वः स्वम्, यजतेऽत्र, यजादेः वर्त....., अन्ते, तेष्वेतदकारतामित्येतद् अकारादेशः। ननु पूर्व परौ यत्र विद्येते तत्रावश्यमर्थ उपलभ्यत इति किमर्थमर्थोपलब्धिग्रहणेन? सत्यम् परस्य विभक्तिसंज्ञकस्य परिग्रहार्थमर्थोपलब्धि ग्रहणम्। तेन विभक्त्यन्तस्यैव पद संज्ञा न त्वन्यप्रत्ययान्तस्य, किं च स्यात्। ज्ञान बुधावित्यत्र ज्ञानबुध इत्येतस्य क्विबन्तस्य पदस्य, पदान्ते घुटां प्रथम इति धस्य प्रथमो भवेत्।

यद्येवमर्थ इति क्रियतामुपलब्धिग्रहणं त्वनर्थकंस्यात्। ब्रूमः, यत्र पूर्व परौ न स्तः, अर्थश्चोपलभ्यते, तत्रापि पद संज्ञा यथा स्यादिति उपलब्धि ग्रहणम्, तेन व्यतिसे, दधिसे, देहि इत्यादावपि पदत्वं सिद्धम्। व्यति पूर्वादस्तेः से प्रत्ययः, अस्तेरादेरित्यकार लोपः। अस्तेरादाविति स लोपः, दधि इत्यत्र नपुंस्कात्स्यमोर्लोप इति सि लोपः।

● अनतिक्रमयन्विश्लेषयेत् १/१/२१

अतिपूर्वात्क्रमेः अतिक्रमणमिति भावे घञ्। न सेटोऽसन्तस्येति इज्वद्भावनिषेधाद्दीर्घाभावः, ततः अतिक्रमं कुर्वन्निति इन्कारितं च धात्वर्थ इति इन्, इनिलिङ्गस्येत्यन्त्यस्य अकारस्य लोपः। ततो वर्तमाने शन्तृङ्ङति शन्तृङ्, अन्वि, गुणः, असन्ध्यक्षरलोपः। न अतिक्रमयन् अनतिक्रमयन्। व्यञ्जनाच्चेति सि लोपः, संयोगान्त लोपः, विपूर्वात् श्लिषेः विश्लेषणमिति भावे घञ्। ततो विश्लेषं कुर्यादिति पूर्ववदिन्, सप्तमीयात्, अन्वि गुणः, या शब्दस्य च सप्तम्या इति इत्वम्, परिभाषेयम्। अनियमे नियमः परिभाषा, वर्णानामेकत्र युक्तानामतिक्रमं व्यभिचारमकुर्वन्विश्लेषं कुर्यात्, येनैव क्रमेण वर्णास्संयुज्यन्ते तेनैव क्रमेण वर्णाः विश्लिष्यन्ते इति परिभाष्यते। दधि अत्र दध्यत्र धिकारादिकारो विश्लिष्य तेन पूर्वत्र बालानां मोहनिवृत्त्यर्थम् वचनम्।

● व्यञ्जनमस्वरं परं वर्णं नयेत् १/१/२२

णीञ् प्रापणे, णोनः, सप्तमी य, नाम्यन्तयोरिति गुणः, अन्वि, य शब्दस्य च सप्तम्या इतीत्त्वम्। आद्यं पदचतुष्टयम् द्वितीयान्तम्। विध्यर्थमिदम्, व्यञ्जनयदस्वरं तत्परं वर्णम्नयेत्, त्वमत्र, उपध्मानीयजिह्वामूलीययोरसत्यामपि व्यञ्जनसंज्ञायां परनयनं भवति। शेषाः कर्मकरणेति ज्ञापकात्।

● लोकोपचारात् ग्रहणसिद्धिः १/१/२३

लोकाः पूर्वाचार्याः, उपचरन्ति, व्यवहरन्ति येनेत्युपचारः, शास्त्रम्। व्यञ्जनाच्चेति घञ्, लोकानामुपचारः लोकोपचारः, गृह्यत इति ग्रहणम्। कृत्य युटोऽन्यत्रापि इति युट्, लोकोपचारात्पूर्वाचार्यशास्त्रादनुक्तस्य ग्रहणस्य कार्यस्य सिद्धिर्निष्पत्तिर्भवति लुग्लोपलुप्तादयो लोकोपचारादनुसरणीयाः। यत्र तु ज्ञापक योगविभागादिना सिद्धिरस्ति, तत्र किं लोकोपचारानुसरणेन।

भट्टोग्रभूति कृतायां शिष्याहितायां वृत्तौ सन्धि प्रकरणे संज्ञापादः प्रथमः।

सन्धिप्रकरणे द्वितीयः पादः

● समानःसवर्णे दीर्घीभवति परश्च लोपम् १/२/१

दीर्घी इत्यव्ययं लुप्तप्रथमैक वचनम्। अदीर्घः दीर्घी भवति इति आख्याताच्च तसादय इति च्विः, निर्देश सामर्थ्यात् च्वौ परे अवर्णस्य ईत्वम्, च्वेश्च लोपः, समानस्सवर्णे परे दीर्घी भवति, परश्च सवर्णो लोपमापद्यते, माषाढकम्। दधीहते, मधूहनम्, होतृषिः, सवर्ण इति किम्? दध्यत्र, मध्वानय, लृकारस्य कृतदीर्घस्य प्रयोगाभावान्नास्त्युदाहरणम्। ननु सवर्णे परे दीर्घस्समानस्यैव सम्भवतीति किं समान ग्रहणेन? उच्यते– यत्रानेन दीर्घो न क्रियते, स्वभावदीर्घत्वात्, लक्षणान्तरेण वा दीर्घत्वप्रतिपत्तेः, तत्रापि दीर्घात परस्य सवर्णस्य लोपो यथा स्यादिति समानग्रहणम्। तेन कुमारीयं वृद्धा इत्यत्र पर लोपस्सिद्धः। ननु पर लोपार्थम् दीर्घस्यैव दीर्घम् करिष्यामः, नैवं शक्यम्, दीर्घीति च्विनायं निर्देशः, तेन दीर्घः ह्रस्वस्थानित्वेनाक्षिप्तो न तु दीर्घः, तत्कथं दीर्घस्यैव दीर्घस्स्यात्। च्विप्रत्ययनिर्देशस्तर्हि न करिष्यत इति चेत्, वैचित्र्यार्थम् च्विना निर्देशकरणम्। शकन्ध्वादीनां पर लोप एव वक्तव्यः, येषां शब्दानां शिष्टप्रयोगानुसारेण पर लोप एव दृश्यते, न तु दीर्घः। ते शकन्ध्वादयः। शक अन्धुः शकन्धुः, कुल अटा कुलटा, सीमन् अन्तः सीमन्तः, केशविषय एवायं प्रयोगः, अन्यत्र सीमान्तः।

● अवर्ण इवर्णे ए १/२/२

अच्चासौ वर्णश्च असौ अवर्णः, एवं सर्वत्र परश्च लोपमित्येव, अवर्ण अकार आकारौ इवर्णे इकारे ईकारे च परे एकारो भवति, परश्चलोपमापद्यते, तवेदम्, सेयम्, उपेयते। सूत्रे सन्धिर्नकृतः, सन्देहो हि स्यात्, एवमुत्तर सूत्रेष्वपि बोद्धव्यम्।

● उवर्णे ओ १/२/३

अवर्ण उवर्णे उकारे ऊकारे च परे ओकारो भवति, पर लोपश्च। तवोदकम्, गङ्गोदकम्, तवोहते।

● ऋवर्णे अर् १/२/४

अवर्ण ऋवर्ण ऋकारे ॠकारे च परे अर् भवति, परलोपश्च, तवर्णम्, सर्द्धिः, तवर्कारः। ऋण प्रवसन वत्सर कम्बल दशानामवर्णस्य ऋण शब्दे परे आरादेशो भवति, परलोपश्च, अरोऽपवादः, ऋणार्णम्, प्रार्णम्, वसनार्णम्, वत्सतरार्णम्, कम्बलार्णम्, दशार्णम्। अवर्णस्य ऋत शब्दे परे तृतीया समासे सत्यारादेशो वक्तव्यः, परलोपश्च। शीतेन ऋतः शीतार्तः, एवं सुखार्तः, दुःखार्तः। तृतीयेतिकिम्? परमश्चासौ ऋतः परमर्तः। उपसर्गावर्णस्य धात्वकारे परे आरादेशो वक्तव्यः परलोपश्च। प्र ऋच्छति प्रार्च्छति, नामधातोर्वा, उपर्षभीयति– उपार्षभीयति, ऋषभमिच्छत्यात्मन इति नाम्न आत्मेच्छायां यिन्, यिनृवर्णस्येतीत्वम्।

● लृवर्णे अल् १/२/५

अवर्णः, लृवर्णे लृकारे लृ च परे अल् भवति परलोपश्च, ऋकारलृकारयोस्सावर्ण्यात्पूर्वेणारादेशः प्राप्तः, तवल्कारः, खट्वल्कारः।

● एकारे ऐ ऐकारे च १/२/६

अवर्ण एकारे ऐकारे च परे ऐकारो भवति, परलोपश्च तवैडका, खट्वैतिकायनम्, उमैषा, अवर्णस्य एव शब्दे परे लोपो वक्तव्यः आवश्यकं चेन्नस्यात्, अद्येव। आवश्यके तु अद्यैव। उपसर्गावर्णस्य धात्वेकारेपरे लोपो वक्तव्यः एष, एष्य, इण्, एध इत्येतेषामेकारं वर्जयित्वा। प्र एलयति प्रेलयति। इह तु न भवति प्र एषः प्रैषः, प्र एष्यः प्रैष्यः, प्र एति प्रैति, प्र एधते प्रैधते। कथं तर्हि प्रेषः प्रेष्यः? उच्यते ईष उञ्छे इत्यस्य द्वे रूपे। स्व शब्दाकारस्य ईर ई रिणोः परयोरैत्वं वक्तव्यम्। स्वैरम्, स्वैरी।

● ओकारे औ औकारे च १/२/७

अवर्ण ओकारे च परे औकारो भवति पर लोपश्च, तवौदनः, खट्वौपगवः। उपसर्गावर्णस्य धात्वोकारे परे लोपो वक्तव्यः, प्र ओरवति, प्रोरवति। पूर्व वदवर्ण ओत्वौष्ठयोः परयोस्समासे सति लोपो वा वक्तव्यः, स्थूल ओतुः, स्थूलोतुः, स्थूलौतुः। विम्ब ओष्ठः विम्बोष्ठः, विम्बौष्ठः। अक्षशब्दाकारस्य ऊहिन्यां परतः औत्वं वक्तव्यम्। अक्षौहिणी। प्र शब्दाकारस्य ऊह ऊढ ऊढि इत्येतेषु परेषु औत्वं वक्तव्यम् प्रौहः, प्रौढः, प्रौढिः।

● इवर्णोऽयमसवर्णो न च पर लोप्यः १/२/८

इवर्ण इकार ईकारौ यत्वमापद्येते असवर्णे स्वरे परे परश्च लोप्यो न भवति। दध्यत्र, नद्येषा। असवर्ण इति किम्? दधि, निमित्तं विना यत्वं मा भूत्, व्यञ्जने परे सन्धि कार्यप्रतिषेधस्य वक्ष्यमाणत्वात् स्वरे परे कार्यमत्र प्रकरणे विज्ञायते।

● वमुवर्णः १/२/६

असवर्ण ग्रहणमिहोत्तरत्र च निमित्त संसर्पणार्थमनुवर्तते। उवर्णः उकार ऊकारौ वत्वमापद्येते असवर्णे परे, परश्च लोप्यो न भवति, मध्वत्र वध्वाख्या। असवर्ण इति कि मधूदकम्।

● रमृवर्णः १/२/१०

ऋवर्णः ऋकार ॠकारौ रत्वमापद्येते, असवर्णे परे, परश्च लोप्यो न भवति, मात्रर्थः, पित्रर्थः ऋइत्यस्याकृतिः राकृतिः। असवर्ण इति किम् ? ऋकार युक्त ऋषभः ऋषभः

● लम्लृवर्णः १/२/११

लृ वर्णः लृकार लॄकारौ लत्वमापद्येते, असवर्णे परे परश्च लोप्यो न भवति, लृकारोऽनुबन्धो यस्य स लनुबन्धः। लृ इत्यस्याकृतिः लाकृतिः।

● ए अय् १/२/१२

एकारः अय् भवति, स्वरे परे, अग्नयः बुद्धयः।

● ऐ आय् १/२/१३

ऐकारे आय् भवति स्वरे परे, रायौ, रायः।

● ओ अव् १/२/१४

औकार अव् भवति स्वरे परे धेनवः, पटवः। गोशब्दस्य अव आदेशोऽकारान्तः। स्वरादावुत्तरे पदे परे वा वक्तव्यः। गवाग्रम्। गवाजिनम् । पक्षे गोऽग्रम्, गोऽजिनम्। इह तु नित्यमिष्यते, गवेन्द्रः, गवाक्षः। गोऽग्रमित्यत्रान्तर्वर्तिनीं विभक्तिमाश्रित्य एदोत्परः पदान्ते लोपमकार इत्यकार लोपः।

● औ आव् १/२/१५

औकार आव् भवति स्वरे परे। ताविह नाविह।

● अयादीनां य व लोपः पदान्ते न वा लोपे तु प्रकृतिः १/२/१६

ए अय् ऐ आय् ओ अव् औ आव् एते अयादयः। पदस्यान्ते स्थितानामयादीनां यौ यकार वकारौ, तयोर्लोपो भवति, न वा– विकल्पेन, लोपे तु प्रकृतिर्यथा स्वरूपं भवति, सन्धि कार्यम् न भवतीत्यर्थः। के आसते, क आसते, कयासते। कस्मै इदम्, कस्मा इदम्, कस्मायिदम्। इन्दो इति इन्द इति, इन्दविति, असौ इह, असा इह, असाविह। अयादीनामिति किम्? गौर्यत्र, मध्वत्र। पदान्त इति किम् ? चयनम्, लवनम्, चिञ् चये, लूञ् छेदने चितिः चयनम्, लूनिः लवनम्, युट्चेति युट्, यु वु झामित्यनादेशः, गुणः।

● एदोत्परः पदान्ते लोपमकारः १/२/१७

एत्च ओत्च तौ एदोतौ, एदौद्भ्यां परः एदोत्परः, पदान्ते यावेदोतौ ताभ्यां परः अकारः लोपं प्राप्नोति, अयवोर्बाधः। अग्नेत्र, वायोत्र। एदोत्परः इति किम्? नद्यत्र, मध्वत्र, पदान्त इति किम्? चयनम्, लवनम्, पुनः पदान्त ग्रहणात्क्वचिन्न भवति नोऽत्र।

● न व्यञ्जनेस्वरास्सन्धेयाः १/२/१८

व्यञ्जने परे स्वरास्सन्धेयाः–सन्धातव्याः न भवन्ति। यत्वादयस्सामान्येन विधीयमानाः व्यञ्जनेऽपि परे प्राप्नुवन्तीति निषिध्यन्ते, गौरीगृहम् मधुचषकम्, मन्तृमण्डलम्। पित्र्यमित्यत्र रत्वमिष्यते, पितुरागतं पित्र्यम्, यदुगवादित इति योगविभगाद्यत्। गोर्यूतौ परे अवादेश इष्यते। अध्वपरिमाणेऽर्थे गव्यूतिः, अन्यत्र गो यूतिः।

भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तौ सन्धिप्रकरणे समानपादो द्वितीयः

सन्धिप्रकरणे तृतीयः पादः

● ओदन्ता अ इ उ आ निपाताः स्वरे प्रकृत्या १/३/१

ओदन्तो येषां निपातानामिति विग्रहः। अ इ उ आ इति द्वन्द्वः। ओदन्ताः ओकारान्ताः ये निपातास्तथा अ इ उ आश्च एते स्वरे परे प्रकृत्या यथा स्वरूपेण भवन्ति, प्राप्तं सन्धिकार्यम् न भवतीत्यर्थः। नो इति, अहो आश्चर्यम् अ अपेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ, आं एवं नु मन्यसे, आ एवं नु किलतत्। निपात इति किम् ? पराविह। अ इ आ इति किम्? ईजतुः, ऊहतुः। यज दे......, वह प्र........, परोक्षा, स्वपियजीतिसम्प्र......., चण् परोक्षेति, द्विर्व...... प्रकृतिभावस्याभावात् समान दीर्घः। येन विधिस्तदन्तस्येत्यन्त ग्रहणेन लब्धे पुनरन्त ग्रहणमोकारस्यैवान्तत्व प्रतिपत्त्यर्थम्, तेन अ इ उ आ इत्येतदन्तानां प्रकृत्यभावः। चेति, इतीह, नन्विदम्, वेति। स्वर ग्रहणं विस्पष्टार्थम्। स्वरे एव हि सन्धिकार्यम् प्राप्तम्।

● द्विर्वचनमनौ १/३/२

अनाविति लुप्तप्रथमैकवचनम्, अनौ यद् द्विर्वचनं तत्प्रकृत्या भवति स्वरे परे। अग्नी अत्र, पटू आनय, शाले अत्र, माले आनय। अनाविति किम्? वृक्षाविह। इहकस्मान्न प्रकृतिर्भवति–वृक्षयोरिदम्, वृक्षाभ्यामत्रेति? ब्रूमः?, अनाविति नायं प्रसज्यप्रतिषेधः, किन्तु पर्युदासोऽयम्। तेन औकारसदृशस्य द्विर्वचनस्य वर्णमात्रस्य प्रकृतिर्नान्यस्य, न च ओस्भ्यामौ तथा भूताविति नास्ति तयोः प्रकृतिः। यदि तु प्रसज्य प्रतिषेधस्स्यात् तदा सर्वस्य द्विर्वचनस्य औकार रहितस्य प्रकृतिर्भवतीति ओस्भ्यामोरपि सा भवेत्। किं पुनस्तदद्विर्वचनम्, यदौकारेण सदृशम्? उच्यते–औरीम्, औकारः पूर्वमिति लक्षणद्वयेन य औकारस्यविकारस्तद् द्विर्वचनम् औकारेण सदृशम्। ननु तल्लुप्तं परश्च लोपमितिवचनात्, अस्त्येतत्, तत्रापि परनिमित्तक आदेशः पूर्वस्मिन्स एव बोद्धव्य इत्यस्त्येव द्विर्वचन रूपत्वम्। अथ पर्युदास प्रसज्यप्रतिषेधयोः कोभेदः? ब्रूमः, यत्र समासे विधेः प्राधान्यम्, प्रतिषेधस्यत्वप्राधान्यं नञ उत्तर पदेन सम्बन्धः स पर्युदासः। यथा अब्राह्मणमानयेति। अत्र हि ब्राह्मण सदृशस्य क्षत्रियादेरानयनं प्रतीयते नेतरस्य। यत्र तु प्रतिषेधस्य प्राधान्यं विधेस्त्वप्राधान्यं

क्रिया पदेन सार्धम् नञस्सम्बन्धस्स प्रसज्यप्रतिषेधः। यथा । अश्राद्धभोजीति। अत्रहि श्राद्धं न भुङ्क्ते इत्यर्थोऽवगम्यते।

● बहुवचनममी १/३/३

अमी इति लुप्त प्रथमैकवचनम्, अमीत्येतद्वहुवचनं प्रकृत्या भवति, स्वरे परे। अमी आदित्याः, अमी अश्वाः। अदस्, जस्, त्यदाद्यत्वम्, जस्सर्वईस्, अवर्ण इवर्णे ए, अदसःपदेम इतिदस्य मः, एद्बहुत्वे त्वी। बहुवचनमितिकिम्? अम्यत्र, अमोऽस्यास्तीति, तदस्यास्तीति मन्त्वाद् य, इतीन्, सि, इन्हन्पूषेति दीर्घः।

● अनुपदिष्टाश्च १/३/४

अनुपदिष्टास्साक्षान्नोक्ताः ये वर्णसमाम्नाये प्लुतास्ते प्रकृत्या भवन्ति स्वरे परे। देवदत्त३ इह, यज्ञदत्त३ इह तिष्ठ, लोकोपचाराद् दूराद्धूते चेत्यनेन प्लुताः त्रिमात्राः। सम्बुद्धावोदन्तस्येति शब्दे परे प्रकृतिर्वा वक्तव्या। भानो इति, भानविति। सम्बुद्धाविति किम्? गवित्ययमाह। अत्रानु कार्यानुकरणयोर्भेदस्याविवक्षितत्वादशक्त्यर्थत्वे गो शब्दाद्विभक्तिर्न भवति। समान संज्ञकस्य ऋकारे परे च देव ऋषिः देवर्षिः, माला ऋषिः मालर्षिः। याकारौ स्त्रीकृतौ ह्रस्वाविति मालाशब्दस्य ह्रस्वः।

इति भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तौ सन्धिप्रकरणे ओदन्तपादस्तृतीयः।

सन्धिप्रकरणे चतुर्थः पादः

● वर्गप्रथमाः पदान्तास्स्वरघोषवत्सु तृतीयान् १/४/१

वर्गाणां प्रथमाः, वर्गप्रथमाः। वर्गाणां प्रथमाः ये क च ट तपाः पदान्ताः पदस्यान्तभूतास्ते स्व वर्गात्प्रत्यासत्तेस्तृतीयानादेशानापद्यन्ते स्वरेषु परेषु घोषवत्सु च। स्वरेषु तावत्–वागत्र, सिजद्यतन्याम्, षडानय, त्रिष्टुबियम्। घोषवत्सु च वाग्गतिः सिज्गतिः, षड्गच्छन्ति, त्रिष्टुब्गायत्री। वर्गस्य प्रथमा इति किम्? भवानाह। पदान्तइति किम्? विद्युतौ। स्वरघोषवत्स्विति किम्? वाक्पुनाति।

● पञ्चमे पञ्चमांस्तृतीयान्नवा १/४/२

पदान्त ग्रहणमनुवर्तते, नोऽन्तश्चछयोश्शकारमित्यतः प्राक् वर्गप्रथमाः पदान्तास्स्ववर्गात्प्रत्यासत्तेः पञ्चमानापद्यन्ते तृतीयान्वा पञ्चमे परे। वाङ्मधुरः, वाग्मधुरः। षण्नयनमः, षड्नयनम्। तन्नीतिः तद्नीतिः। त्रिष्टुम्मिनोति त्रिष्टुब्मिनोति। पञ्चमे तं वेति कर्तव्ये गुरूसूत्र करणात्क्वचिद्वर्गप्रथमस्य नित्यं पञ्चमो भवति पञ्चमादौ प्रत्यये परे। वाचो विकारो वाङ्मयम्। त्वङ्मयम्। आख्याताच्चतमादय इतिमयट् प्रत्ययः। तत्प्रमाणमस्येति तन्मात्रम् एवं यन्मात्रम्, एतावन्मात्रम्। पूर्ववन्मात्र प्रत्ययः।

● वर्गप्रथमेभ्यश्शकारस्स्वरयवरपरच्छकारं नवा १/४/३

स्वरश्च यश्च वश्च रश्चते स्वरयवराः ते परे यस्माच्छकारादिति विग्रहः। वर्ग प्रथमेभ्यः पदान्तेभ्यः परश्शकारस्स्वरयवरपरः, स्वर परः, य परः व परः रेफ परश्च छकारमापद्यते न वा। वाक्छूरः, वाक्शूरः। षट्छ्यामाः, षट्श्यामाः। तत्छ्वेतम्, तच्श्वेतम्। चंशे इति तस्य चः। त्रिष्टुप्छ्रूयते, त्रिष्टुप्श्रूयते। वर्ग प्रथमेभ्य इति किम्? प्रत्यङ्शेते। वर्ग प्रथमग्रहणं विस्पष्टार्थम्। स्वर यवरपर इति किम्? वाक्श्योतति। लानुनासिक परस्यापि शकारस्य वा छत्वमिष्यते। पुनर्नवा ग्रहणात् तच्छ्लाघ्यम्, तच्श्लाघ्यम्, तच्छ्मशानम्, तच्श्मशानम्।

● तेभ्य एव हकारः पूर्वचतुर्थम् नवा १/४/४

तेभ्यो वर्ग प्रथमेभ्यः पदान्तेभ्यः परो हकारः पूर्वस्य वर्णस्य चतुर्थमापद्यते

न वा। वाग्घीनः वाग्हीनः। षड्ढलानि, षड्हलानि। तद्धितम्, तद्हितम् त्रिष्टुब्भुतम्, त्रिष्टुब्हुतम्। तेभ्यइति किम्? प्रत्यङ्हसति।

● पररूपं तकारो लचटवर्गेषु १/४/५

चश्च टश्च चटौ, चटयोः वर्गौ, चटवर्गौ लश्च चटवर्गौच ते लचटवर्गाः। तेषु तकारः पदान्तः पररूपम्, परस्य वर्णस्य यद्रूपं तदापद्यते लकारे, च वर्गे, टवर्गे च परे। तल्लुनाति, तच्चिनोति, तच्छादयति, तज्जपति, तज्झुषति, तञ्ञकारः, तट्टीकते, तट्ठाकुरः। अघोषे प्रथमः, तस्य टः। उड्डीनः, तड्ढौकते, धुटांतृतीयः तस्य डः। तण्णकारः। तकार इति किम्? वाक्चरति। लचट वर्गेष्विति किम्? तत्पचति।

● चं शे १/४/६

तकारः पदान्तः, शे शकारे चत्वमापद्यते। तच्श्लाघ्यम्, तच्श्मशानम्। यत्र पक्षे शकारस्य छत्वं नास्ति। तत्रानेन चत्वं विधीयते छत्व पक्षे हि सूत्रमपार्थकं स्यात्, पररूपे कृते प्रयोगानां सिद्धत्वात्।

● ङणनाः ह्रस्वोपधाः स्वरेद्विः १/४/७

ह्रस्व उपधा येषां ङणनानामिति विग्रहः। स्वरो ह्रस्व इति योगविभागा दुपधाशब्दस्य ह्रस्वः, द्वौ वारौ द्विः। आख्याताच्चतमादय इति सु प्रत्ययः, अव्ययं चैतत्। ङणनाः पदान्ताः ह्रस्वोपधाः स्वरे परे द्विर्भवति, उदङ्ङत्र, सुगण्णाह, पचन्निति, ङणना इति किम् ? त्वमिह। पदान्ता इति किम् ? पूषणो। ह्रस्वोपधा इति किम् ? भवानाह। स्वर इति किम् ? सुगण्गतः।

● नोऽन्तः चछयोश्शकारमनुस्वारपूर्वम् १/४/८

अनुस्वारः पूर्वो यस्मात् शकारादिति विग्रहः। नकारः पदान्तश्चछयोः परयो रनुस्वारः पूर्वम् शकारमापद्यते। भवांश्चिनोति, भवांश्छादयति। चछयोरिति किम्? भवान् करोति। प्रशान्शब्दस्य नेष्यते, प्रशान्चिनोति, प्रशान्छादयति, एवमुत्तर सूत्रयोरपि बोद्धव्यम्।

● टठयोष्षकारम् १/४/९

नकारः पदान्तः टठयो परयोरनुस्वार पूर्वम् षकारमापद्यते। भवांष्टीकते। भवांष्ठाकुरः । इह तु न भवति। प्रशान्टीकते, प्रशान्ठाकुरः।

● तथयोस्सकारम् १/४/१०

नकारः पदान्तस्तथयोः परयोरनुस्वारः पूर्वमृसकारमापद्यते। भवांस्तनोति भवांस्थुडति। इह तु न भवति। प्रशान्तनोति, प्रशान्थुडति।

● ले लम् १/४/११

नकारः पदान्तो ले लकारे लत्वमापद्यते। भवांल्लुनाति, भवांल्लिखति।

● जझञशकारेषु ञकारम् १/४/१२

नकारः पदान्तो ञकारमापद्यते जकारे झकारे ञकारे शकारे च परे। महाञ्जयति, महाञ्झषति महाञ्ञकारः, महाञ्शेते।

● शिञ्चौवा १/४/१३

नकारः पदान्तः शे शकारे परे ञ्चत्वमापद्यते समुच्चये वा शब्दः। महाञ्च्छूरः ञ्च इति समुदायादेशः यदि पुनः द्वावादेशौ स्याताम् तदा ञ्कारादेश विधानमनर्थकं स्यात्। द्विवचन निर्देशो वैचित्र्यार्थः।

● डढणपरस्तु णकारम् १/४/१४

डश्च ढश्च णश्चैते डढणाः:, डढणाः परे यस्मान्नकाराद्रिति विग्रहः, नकारः पदान्तः डपरः ढपरः णपरः णकारमापद्यते महाण्डीनः, महाण्ढौकते, महाण्काकः, डढणेष्विति किं न कृतम् , वैचित्र्यात्।

● मोऽनुस्वारं व्यञ्जने १/४/१५

मकारः पदान्तोऽनुस्वारमापद्यते व्यञ्जने परे। त्वं हससि, त्वं रमसे, मकार इति किम्? भवान्रमते, पदान्त इति किम्? गम्यते। व्यञ्जन इति किम्? त्वमत्र। समो मकारस्य राजृ दीप्तावित्यस्मिन्क्विबन्ते परे अनुस्वारो नेष्यते। सम्राट्। राजृदीप्तौ, सं पूर्वः, सं राजत इति किम्? हशषच्छेति जस्य डः। वा विराम इति डस्य टः, क्विबन्त इति किम्? संराजिता।

● वर्ग्ये तद्वर्ग पञ्चमं वा १/४/१६

वर्ग्ये भवः वर्ग्यः, यदुगवादित इति योग विभागा दयत्। तस्य वर्गः तवर्गः। तवर्गस्य पञ्चमः, तवर्गपञ्चमः। मकारः पदान्तः, वर्ग्ये परे, तस्य

वर्गस्य सम्बन्धी यो वर्गः तस्य पञ्चमं वापद्यते। नित्यं पूर्वेणानुस्वारः प्राप्तः। त्वङ्करोषि, त्वं करोषि, त्वञ्चरसि, त्वं चरसि। मकारस्यान्तस्थायां परस्यां मोऽनुस्वारः परसवर्णो वा वक्तव्यः। सँय्यंन्ता, सय्यन्ता। तँल्लोकम् तं लोकम्, सँव्वत्सरः, संवत्सरः।

भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तौ सन्धि प्रकरणे वर्गपादश्चतुर्थः।

सन्धिप्रकरणे पञ्चमः पादः

● विसर्जनीयश्चेछेवाशम् १/५/१ (दुर्ग वृत्तिः)

विसर्जनीयश्चे वा छे वा परे शमापद्यते। कश्चरति। कश्छादयति।

● टे ठे वा षम् १/५/२ (दु. वृ.)

विसर्जनीयष्टेवा ठे वा परे षमापद्यते। कष्टीकते, कष्ठकारेण। प्रत्येकं वात्र समुच्चये बालाववोधनार्थम्।

● ते थे वा सम् १/५/३ (दु. वृ.)

विसर्जनीयस्ते वा थे वा परे समापद्यते। कस्तरति, कस्थुडति। कारस्करादयः इति संज्ञा शब्दाः लोकतः सिद्धाः।

● क ख योर्जिह्वामूलीयं न वा १/५/४ (दु. वृ.)

विसर्जनीयः क ख योः परयो जिंह्वामूलीयमापद्यते न वा। क करोति, कः करोति क खनति, कः खनति।

पफयो उपध्मानीयं न वा १/५/५ (दु. वृ.)

विसर्जनीयः पफयोः परयोरूपध्मानीयभापद्यते न वा। क पचति, कः पचति। क फलति, कः फलति। व्यवस्थित विभाषया अघोषे अशिट् परे न शादयः। पुरूषः त्सरूकः, वासः क्षौमम्, अद्भिः प्सातम्।

शे षे से वा वा पर रूपम् १/५/६

विसर्जनीयः शे वा, षे वा, से वा, परे पररूपमापद्यते न वा। कश्शेते, कः शेते। कष्षण्ठः, कः षष्ठः। कस्साधुः, कः साधुः। चटता नित्य करणाद विसर्जनीया देशस्याघोषे प्रथमो न स्यात्। कश्चरतीत्यादिष्विप्येवम्।

उमकारयोर्मध्ये १/५/७ (दु. वृ.)

द्वयोरकारयोर्मध्ये विसर्जनीयः उत्वमापद्यते। कोऽत्र, कोऽर्थः। पुनरत्रेति र प्रकृतिरिति परत्वाद् र एव स्यात्।

● अघोषवतोश्च १/५/८ (दु. वृ.)

अकार घेषवतोर्मध्ये विसर्जनीयः उत्वमापद्यते। को गच्छति, को धावति। अघोषवतोरिति किम्? कः शेते।

● अपरो लोप्योऽन्यस्वरे यं वा १/५/९ (दु. वृ.)

अकारात् परे विर्जनीयो लोप्यो भवति। उक्तादन्यस्वरे यं वा आपद्यते। क इह, कयिह। क उपरि। अपर इति किम् ? अग्निरत्र। वात्र समुच्चये। ईषत्स्पृष्टतरोऽत्रयकारः।

● आभोभ्यामेवमेव स्वरे १/५/१० (दु. वृ.)

आकारः भो शब्दाभ्यां परो विसर्जनीय एवमेव भवति स्वरे परे। देवा आहुः, देवायाहुः, भो अत्र, भो यत्र। भो इत्यामन्त्रणौकारोपलक्षणम्, तेन केचित् भगो अत्र, भगो यत्र। अघो अत्र, अघो यत्र। आदीषत्स्पृष्टतरश्चौ कारादीषत्स्पृष्टतर एवात्र यकारः। एवमेव ग्रहणं नित्यलोप निरासार्थम्।

● घोषवति लोपम् १/५/११ (दु. वृ.)

आकार ओ शब्दाभ्यां परो विसर्जनीयो लोपमापद्यते घोषवति परे। देवा गताः, भो यासि, भगो व्रज, अघो यज। लोप ग्रहणं यं वेति निवृत्त्यर्थम्।

नामिपरोरम् १/५/१२ (दु. वृ.)

नामिनः परो विसर्जनीयो रमापद्यते निरपेक्षः। सुपीः सुतूः। इरूरर्थवचनमिदम्।

घोषवत्स्वरपरः १/५/१३ (दु. वृ.)

नामिनः परो विसर्जनीयो घोषवत्स्वरपरो रमापद्यते। अग्निर्गच्छति, अग्निरत्र, पटुर्वदति, पटुरत्र।

● र प्रकृतिरनामि परोऽपि १/५/१४ (दु. वृ.)

रेफ प्रकृतिर्विसर्जनीयो नामिनः परोऽनामिनः परोऽपि घोषवत् स्वर परोऽघोषपरोऽपि रमापद्यते। गीर्पतिः, गीः पतिर्वा, धूर्पतिः धूः पतिर्वा। स्वरः घोषवतोर्नित्यम्, पितरत्र, पितर्यातः। अरेफ प्रकृतिरपि, हे प्रचेता राजन्,

हे प्रचेता राजन्नितिवा। ऊषर्बुध: अहोरेफः अहर्पतिः, अहर्गणः, अहरत्र। रेफे तु अहोरात्रम्, अहोरूपम्, अहोरथन्तरं साम।

● एषसपरो व्यञ्जने लोप्यः १/५/१५ (दु. वृ.)

एषसाभ्यां परो विसर्जनीयो लोप्यो भवति व्यञ्जने परे। एष चरति, स टीकते, एष शेते, स पचति। परत्वात् पूर्वान् बाधते। अप्यधिकारात् सरूप ग्रहणाद् वा– एषकः करोति, सकः करोति, अनेषो गच्छति, असौ गच्छति, अकि नञ् समासे न स्यात्।

● न विसर्जनीयलोपे पुनः सन्धिः१/५/१६ (दु. वृ.)

विसर्जनीय लोपे कृते पुनः सन्धिर्न भवति, अन्यलोपे तु भवत्येव। क इह, देवा आहु, भो अत्र। विसर्जनीयाधिकारे पुनः विसर्जनीयग्रहणमुत्तरत्र विसर्जनीयाधिकारनिवृत्यर्थम्, तेन एषच्छात्रेण द्विर्भावः सिद्धः।

● रो रे लोपं स्वरश्च पूर्वो दीर्घः १/५/१७ (दु. वृ.)

रो रे परे लोपमापद्यते, स्वरश्च पूर्वो दीर्घो भवति। अग्नी रथेन, पुना रात्रिः उच्चै रौति।

● द्विर्भावं स्वरपरश्छकारः १/५/१८ (दु. वृ.)

स्वरात्परच्छकारो द्विर्भावमापद्यते। वृक्षच्छाया, इच्छति, गच्छति। अप्यधिकारात् दीर्घात् पदान्ताद् वा। कुटीच्छाया, कुटीछाया। आङ्माङ्भ्यां नित्यम् आच्छाया, माच्छिदत्।

इति दौर्गसिंह्यां वृत्तौ पञ्चमः पादः समाप्तः

(शिष्यहितायां वृत्तौ पञ्चमः पादोऽनुपलब्धः, अतः दुर्गवृत्तेरेवोल्लेखः कृतः)

षष्ठः पादः

• च वा हा १/६/१

ब्राह्मणो क्षत्रियो वा इत्येवमादिप्रयोगस्थानां चादीनामनुकरणभूताश्चादय इह संज्ञित्वेन निर्दिश्यन्ते तेभ्योऽनुकार्येणार्थेनार्थवत्वात्प्रत्येकं (सञ्जातस्य प्रथमैकवचने स्यादि) लोपः। निपातशब्दोऽधिकरणघञन्त इत्युक्तं प्राक्। ननु विपूर्वादिणो न व्येतीत्यव्ययमिति पचादित्वादच् प्रत्ययः। नाम्यन्तयोरित्यादिना गुणे कृते विशब्देकारस्य यत्वम्। ननु कथमेतत्, यावता पूर्वम् धातुरूपसर्गेण युज्यते पश्चात् साधनेनेति गुणात्पूर्वम् विशब्देकारस्य समानदीर्घत्वं प्राप्नोति। कृते तु तस्मिन्परनिमित्त आदेश इति वचनादिकारस्य धातुत्वाद् गुणस्स्यात्, ततश्चाव्ययशब्दो न सिध्यति। पूर्वञ्च धातोरूपसर्गेण योगो न्याय्यः। अन्यथा साधनसम्बन्धे सत्यनुभूयत इत्यादावकर्मकत्वाद् भवतेः, कर्मण्यात्मनेपदं न प्राप्नोति। पूर्वम् धातूपसर्गेण योगे सति अकर्मका अपि धातवः सोपसर्गाः अर्थान्तराभिधायित्वे सति सकर्मकाः भवन्तीति कर्मण्यात्मनेपदं सिध्यतीति तस्माद् धातूपसर्गसम्बन्धस्यान्तरङ्त्वात्तन्निमित्तकस्य दीर्घस्य स्यादेव गुणात्पूर्वम् प्रवृत्तिः। अत्रोच्यते—पूर्वम् धातुः साधनेन युज्यते पश्चादुपसर्गेणेति। प्राक्त्वयुक्त उपसर्गेण सम्बन्धः। उपसर्गो हि क्रियाविशेषणत्वेन प्रसिद्धः। न च साधनादवाप्तजन्माक्रिया उपसर्गजनितेन विशेषणेन सम्बन्धमनुभवितुमलमित्युत्पादकेन साधनेन। साध्यस्वभावा सा पूर्वमभिसम्बन्धमपेक्षते। साधनसम्बन्धं तु विरहय्य कीदृशं तस्याः रूपं यद्विशेषणायोपसर्ग उपादीयते तत्तस्मात्पूर्वम् धातोस्साधनेन सम्बन्धः। यद्येवम्, अनुभूयत इत्यादौ का गतिः, उच्यते—अनेकार्थत्वाद् धातूनां भवतेस्सकर्मकादर्थान्तरवृत्तित्वात्कर्मण्यात्मनेपदं भविष्यति। तस्मादिण इणो धातोस्सञ्जाते साधनाभिधायिनि प्रत्यये तन्निमित्ते च गुणे कृते सति सिद्धोऽव्ययशब्दः निपातसंज्ञो भवति। (अव्ययसंज्ञश्चेति)। अथ किमर्थमिमे उभे संज्ञे क्रियेते निपातसंज्ञा क्रियतां तयैव च व्यवहारो भविष्यति किमव्ययसंज्ञया? उच्यते—अव्ययसंज्ञायाः प्रणयनमव्ययमित्यनेनैकदेशेन, "सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। सर्वेषु च वचनेषु यन्न व्येति तदव्ययमिति।" पूर्वाचार्यलक्षणस्य सङ्ग्रहार्थम्। तेन त्रिषु स्त्रीपुंनपुंसकेषु यत्सदृशं लिङ्गविशेषापरिग्रहात्तुल्यं रूपं तथा सर्वासु

च विभक्तिषु विभक्तिनिमित्तेषु च कर्मादिकारकेष्वेकरूपम्। यदपि सर्वेषु वचनेषु एकत्वादिषु न व्येति, नानात्वं न गच्छति) रूपान्तरं न प्रतिलभ्यते तत्सर्वमव्ययम्। तेनानुपात्तानामुच्चैः प्रभृतीनामव्ययसंज्ञा सिद्धा भवति। अपार्थकस्तर्ह्युत्तरो योगः। नापार्थकः, तत्प्रपञ्चार्थत्वात्। यद्येवम्, अव्ययसंज्ञैवास्तु किम् निपातसंज्ञया, अव्ययमिति पूर्वाचार्यसंज्ञा संश्रयणात् सूत्रानुपात्तास्प्यव्ययसंज्ञा विज्ञायते एवं तर्हि निपातसंज्ञयाप्यस्ति एषां चादीनां व्यवहार इति पूर्वाचार्यप्रसिद्धिमुपदर्शयितुं निपात संज्ञा प्रणीयते इति केचन्मन्यन्ते। नो शब्दस्य निपातत्वादोदन्त इत्यादिना प्रकृतिभावः। ब्राह्मणाश्चेति। च शब्दस्याव्ययत्वात् ततः परस्य सेरव्ययाच्चेति लुक्। गुरूसंज्ञाकरणादित्यादि। दा शिडित्यादिवल्लघ्व्यां संज्ञायां कर्तव्यायां यदेतदव्ययमिति गुरूसंज्ञायाः करणं ततो हेतोश्चादीनां समुच्चयादिलक्षणार्थ प्रतिपादनप्रसिद्धव्यापाराणां सतामियमव्ययसंज्ञेष्यते। अर्थमात्रप्राधान्यविवक्षया त्वेषामव्ययत्वं नास्त्येव, तेन किम् सिद्धं भवतीत्याह–तेनेत्यादि। वाक्यान्तरस्थस्य च शब्दस्यानुकरणभूतो स्थानेऽयं च पठित इत्ययं च शब्दः। एवं यस्मादर्थ इत्यव्ययमपि हि शब्दः। तथा चानयोस्समुच्चयादिलक्षणमर्थमप्रतिपादयतोरनुकार्येणार्थेनार्थवत्वेऽप्यव्ययसंज्ञा न भवतीत्यादावित्यादिग्रहणेनोच्चैरतिक्रान्तोऽत्युच्चैः सो अत्युच्चैः स इत्यादावतिक्रान्तस्यार्थस्य प्राधान्ये सत्यप्यव्ययसंज्ञा पूर्ववन्न भवति।

• अन्तर् स्वर् प्रातर् पुनरधोऽप्याहुः १/६/२

पुनरधरिति। र प्रकृतिरिति रत्वम्, अपि समुच्चय इत्युत्तरत्रेति शेषः। किमुत्तरत्रासौ समुच्चिनोतीति चेत्, अव्ययसंज्ञा, इतरथा हि तां येन नाप्राप्तिन्यायेनोपसर्गसंज्ञा बाधेत। SAN

• प्र परा नि १/६/३

491.25

निर्देशे नि–शब्दस्य णत्वं न भवति। स्वरूपभङ्गप्रसङ्गात्। उपपूर्वात् सृजेरुपसृज्यते धात्वर्थेन युज्यत इत्यकर्तरि च कारक इति कर्मणि घञ्। अपोपेत्यतदन्तमिति अपोपेत्येकदेशेन सूत्रमुपलक्ष्यति। पदमिति कृतद्वन्द्वं लुप्तजस्कमिति पूर्ववत्, पूर्वाचार्यसंज्ञाङ्गीकरणं क्रियायोगे सति प्रादीनां संज्ञासम्बन्धप्रतिपत्त्यर्थम्। तेन सेना परा अयत इत्यत्रोत्कृष्टवाचिनः पराशब्दस्य अयतिक्रियासम्बन्धाभावादुपसर्गस्यायताविति लत्वं न भवति, क्रियायोगे चोपसर्गस्मरणादाकार इह

सूत्रे ङनुबन्धविशिष्टः पठितः। क्रियायोगे तथाभूतस्यैव तस्य स्मरणात्। तदुक्तम्–

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित्।।
इति। तथा चाङि युद्ध इति निर्देशं करोति।

• अन्वाद्या कर्मप्रवचनीयाः १/६/४

आदौ भव आद्य इति यदुगवादित इति योगविभागाद् यत्। कर्मप्रोक्तवन्तः कर्मप्रवचनीयाः। अतीते काले कृत्ययुटोऽन्यत्रापीति कर्तरि अनीयः प्रत्ययः। कर्मशब्दः क्रियावचनः। वचिरप्यनेकार्थत्वाद् द्योतने वर्तते। तेन ये प्रयुज्यमानाः क्रियापदे क्रियाविशेषं द्योतितवन्तः, प्रयुज्यमाने तु वक्ष्यमाणस्य सम्बन्धस्य विशेषस्य द्योतकाः ते कर्मप्रवचनीया इत्युक्तं भवति। पूर्वाचार्य संज्ञाङ्गीकरणं तदुक्तं विषयविशेषपरिग्रहार्थम्। तेनानुशब्दो लक्षणेत्थंभूताख्यानभागवीप्सासु सहार्थे हानौ च कर्मप्रवचनीयसंज्ञः। तत्र लक्षणं चिह्नं हेतुर्वा। किञ्चित्प्रकारं प्राप्तः इत्थम्भूतस्याख्यानमित्थम्भूताख्यानं स्वीक्रियमाणोऽसौ भागः। पदार्थन् व्याप्तुमिच्छा वीप्सा। सह लक्षणोऽर्थः सहार्थः। हानिर्न्यूनता। तत्र लक्षणे तावत्–वृक्षमनुविद्योतते विद्युत्। अत्र वृक्षो लक्षणं विद्योतमाना तु विद्युल्लक्ष्या। तयोः वृक्षं प्राप्य विद्युत् विद्योतते इति प्राप्तिक्रियाजनितो यो लक्ष्यलक्षणः सम्बन्धः सोऽनुशब्देन द्योतते। एवं शाकल्यस्य संहितामनु प्रावर्षत्। अत्र संहिता हेतुः, वर्षणं हेतुमत्तया शाकल्यस्य संहितां श्रुत्वा देवः प्रावर्षदिति श्रवणकियाजनित हेतुहेतुमद्भावलक्षणं सम्बन्धमनुशब्दः द्योतयति। इत्थंभूताख्याने–साधुर्देवदत्तो मातरमनु। देवदत्तस्यात्र मातृविषये साधुत्वापत्तिराख्यायते तेन मातरं प्राप्य देवदत्तस्य साधुत्वापत्तिरिति प्राप्तिक्रियाजनितो मातुः साधुत्वापत्तेश्च यो विषयविषयिभावलक्षणसम्बन्धः तस्य द्योतकोऽयमनुशब्दः। भागे–यदत्र मामनु स्यात्तद् दीयताम्। योऽत्र मम भाग आभजति स दीयतामित्याभजनक्रियाजनितस्स्व स्वामिभावलक्षणोऽत्र सम्बन्धः। मामित्यस्मदी द्वितीयैकवचनो त्वन्मदोरेकत्व इति मदादेशः, अन्तलोपः, अमोचाम्। वीप्सायाम्–वृक्षं वृक्षमनुशेते। द्विश्च पदमिति वीप्सायां द्विर्वचनं द्विर्वा, अत्र वृक्षाणां पक्षिशयनक्रियायाश्च यो आधाराधेयसम्बन्धः सोऽनुशब्दद्योत्यः। सहार्थे–पर्वतमनुसम्बद्धा सेना। पर्वतेन सहेत्यर्थः। हानौ–अनुशाकटायनं वैयाकरणाः, शाकटायनं

वैयाकरणमपेक्षयान्ये वैयाकरणाः हीनाः इत्यर्थ। परिशब्दो लक्षणादिषु चतुर्षु वर्जने च कर्मप्रवचनीयसंज्ञः। वृक्षं परि विद्योतते विद्युत्, साधुर्देवदत्तो मातरं परि, यदत्र मां परि स्यात्तद् दीयताम्, वृक्षं वृक्षं परिशेते, परित्रिगर्तेभ्यः वृष्टो देवः, त्रिगार्तान्वर्जयित्वेत्यर्थः। अभिशब्दो लक्षणेत्थम्भूताख्यानभागवीप्सासु। वृक्षमभिविद्योतते विद्युत्, साधुर्देवदत्तो मातरमभि, वृक्षं वृक्षमभिशेते यस्मादधिकं यस्य चेश्वरवचनं तस्य सप्तमी इति स्वस्वामिनोर्द्वयोरपि पर्यायेण सप्तमी भवति। अधि स्व स्वामिसम्बन्धे–अधिब्रह्मदत्ते पाञ्चालाः, अधिपाञ्चालेषु ब्रह्मदत्तः। अत्र कालभावयोः सप्तमीत्यत्र कर्तरि चेति चकारानुवृत्त्या सम्बन्धषष्ठ्यां प्राप्तायां सप्तमी च, सा च कदाचित्स्वामिनो वा ब्रह्मदत्तात्, कदाचिद्वा स्यात् पाञ्चालात्। कथम्? उच्यते–इह सर्वत्र सम्बन्धे किञ्चित्प्रसिद्धमनूद्याप्रसिद्धं विधीयते। अत्र यदा स्वमप्रसिद्धत्वाद्विधीयत तदा स्वामिनोऽनूद्यनमानात्सप्तमी, यदा तु स्वाम्यप्रसिद्धत्वाद्विधीयते तदा स्वानूद्यमानात्सप्तमी। प्रति शब्दो लक्षणादिषु पूर्वोक्तेषु चतुर्षु प्रतिनिधिप्रतिदानविषये च कर्मप्रवचनीयः। मुख्यसदृशः प्रतिनिधिः। दत्तस्य प्रतिनिर्यातनं प्रतिदानम्। वृक्षं प्रति विद्योतते, साधुर्देवदत्तो मातरं प्रति, यदत्र मां प्रति स्यात्तद् दीयताम्, वृक्षं प्रति शेते, अभिमन्युः अर्जुनतः प्रति, माषानस्मै तिलेभ्यः प्रतियच्छति, तिलान्गृहीत्वा माषान्ददातीति ग्रहणादानकियाजनित उत्तमर्णाधमर्णभावलक्षणसम्बन्धोऽत्र प्रतिना द्योतते। पूर्ववदनुकरणः क्रियाजनितोऽनुकार्यानुकरणभावलक्षणः। अर्जुनस्य मुख्यस्य तत्सदृशेनाभिमन्युनानुक्रियमाणत्वात्, पञ्चमी च दिगितरार्थेऽन्यैश्चेति च शब्दत्वात्। आङ् मर्यादाभिविध्योः कर्मप्रवचनीयः। बिना तेन मर्यादा, सह तेनेत्यभिविधिरिति। आपाटलिपुत्राद् वृष्टो देवः, पञ्चमी पर्यपाङ्योगे इत्यनेन। अप शब्दो वर्जनेऽर्थे। अपसाकेतात् वृष्टो देवः, साकेतं वर्जयित्वेत्यर्थः। उप–शब्दो हानावधिकार्थकः सम्बन्धे च। उपार्जुनं योद्धारः, उपखार्याम् द्रोणः, खार्याः द्रोणोऽधिक इत्यर्थः। पूर्वनदत्र सप्तमी। एवमन्येषामपि विषये विशेषकर्मप्रवचनीयत्वमवगन्तव्यम्।

• परकार्ये विकार्यादिः १/६/५

विकारीति। विकार शब्दात्तदस्यास्तीति इन् प्रत्ययः। परिभाषेयम्। विकारित्वं परिभाष्यमाणमादिवर्णः परिभाषणभाक्। परकार्य इति कर्तव्यताविषयः। परस्य कार्ये कर्तव्य इति। क्व च परस्य कार्यम् क्रियते, यत्र पञ्चम्या निर्देशोऽस्ति। यथा ई तस्यास इत्यत्र हि आस इति पञ्चमी

निर्देशात् पञ्चम्या निर्दिष्टे परस्येति परस्य कार्यम् क्रियते। आदिवर्ण इति वर्णाधिकारात्।

• पूर्वे कार्ये त्य इष्यते १/६/६

अन्ते भव अन्त्यः इति। यदुगवादित इति योगविभागाद् यत्। इयमपि परिभाषा। अधिकारित्व परिभाष्यमाणमन्त्यो वर्णः परिभाषणभाक्। पूर्वकार्यम् इति कर्तव्यता विषयः। पूर्वस्य कार्ये कर्तव्य इत्यादि। क्व च पूर्वस्य कार्यम् क्रियते यत्र सप्तम्या निर्देशोऽस्ति यथा त्यदादीनामविभक्तावित्यत्र हि विभक्ताविति सप्तमीनिर्देशात्। सप्तम्या निर्दिष्टे पूर्वस्येति कार्यम् क्रियते।

• क्वचित्पूर्वः परो सर्गो १/६/७

पूर्वेण परिभाषाद्वयेनातिप्रसक्तेऽधिकारित्वे वचनमिदमारभ्यत। इतः इहेति। इदं ङसि, ङि,अस्मादस्मिन्निति विगृहीत पञ्चम्यास्तस्, इदमो ह, तत्रेदमिरिति सर्वस्येदमः इत्वं न त्वन्त्यस्य। अष्टौ तिष्ठन्तीत्यादि। अष्टन्सर्वास्विति आत्वे कृते जश्शसोः सर्वयोरौत्वं न तु तयोरादेः।

• संसार्यम् योगसाधनम् १/६/८

संसरणीयं संसार्यमिति। सर्तेः घ्यण्, युज्यते नानाप्रकारैरर्थैस्सम्बध्यत इति योगः सूत्रमुच्यते। तदाह–योगस्य सूत्रस्येति, लोकोपचारादित्यस्यैवायं प्रपञ्च इति। एतत्सूत्र साध्यस्यार्थस्य लोकोपचाराद् ग्रहणसिद्धिरित्यनेनैव सिद्धत्वादिति भावः।

"**भट्टोग्रभूति कृते शिष्यहितान्यासे शिष्यालोकाभिधाने सन्धिप्रकरणे** निपातपादः षष्ठः। (एषः निपातपादः शिष्यहितावृत्तौ त्रुटितः पाठः पाण्डुलिप्यां सञ्जातः, अतः निपातपादस्य न्यासग्रन्थोऽत्र वृत्तिस्थाने संयोजितः)।

नामप्रकरणे प्रथमः पादः

● धातुविभक्तिवर्जमर्थवल्लिङ्गम् २/१/१ (दुर्ग.वृ.)

अर्थोऽभिधेयम्। धातुविभक्तिवर्जमर्थवल्लिङ्गसंज्ञं भवति। वृक्षः, कुम्भम्, कुमारी, डित्थः, राजपुरुषः, औपगवः, कारकः। धातुविभक्तिवर्जमिति किम्? अहन्, वृक्षान्। अर्थवदिति किम्? वृक्ष इति व् ऋ क षामेकैकशो मा भूत्, राजन्नित्युन्मत्तवचनस्य च। लिङ्ग प्रदेशाः, लिङ्गान्त नकारस्येत्येवमादयः।

● तस्मात्परा विभक्तयः २/१/२ (दु. वृ.)

सि, औ जस्, अम्, औ, शस्; टा, भ्याम्, भिस्, ङे, भ्याम्, भ्यस्, ङसि, भ्याम्, भ्यस्, ङस्, ओस्, आम्, ङि, ओस्, सुप्, तस्माल्लिङ्गात् परास्स्यादयो विभक्तयो भवन्ति। दृशत् (दृषत्) दृशद् दृशदौ, दृशदः। दृशदम्, दृशदौ, दृशदः। दृशदा–दृशद्भ्याम्– दृशद्भिरित्यादि। एवम् कुमारी–कुमार्यौ–कुमार्यः। खट्वा–खट्वे–खट्वाः। अर्थस्य विभञ्जनाद् विभक्तय इति।

● पञ्चादौ घुट् २/१/३ (दु. वृ.)

स्यादीनामादौ पञ्चवचनानि घुटसंज्ञकानि भवन्ति। सि, औ, जस् अम्, औ। घुट प्रदेशाः घुटि चासम्बुद्धावित्येवमादयः।

● जस्शसो नपुंसके २/१/४ (दु. वृ.)

नपुंसकलिङ्गे जस्शसौ घुट संज्ञकौ भवतः। सामानि तिष्ठन्ति, सामानि पश्य। नपुंसके जसेरघुडितिनियमाद् वारिणी, जतूनि।

● आमन्त्रिते सि सम्बुद्धिः २/१/५ (दु. वृ.)

सिद्धस्याभिमुखी करणमामन्त्रितम्। तस्मिन्नर्थे विहितः सि सम्बुद्धि संज्ञो भवति। हे अम्ब, हे वृक्ष,। सम्बुद्धौ चेत्येवमादयः।

● आगम उदनुबन्धः स्वरादन्त्यपरः २/१/६ (दु. वृ.)

प्रकृति प्रत्ययोरनुपघाती आगमः। आगम उदनुबन्धोऽन्त्यात् स्वरात् परः परिभाष्यते। पद्यानि, पयांसि। आगम इति किम्? विद्युत्वान्। उदनुबन्ध आगमस्य लिङ्गम्।

● तृतीयादौ तु परादिः २/१/७ (दु. वृ.)

आगम उदनुबन्धस्तृतीयादौ विभक्तौ परादिर्भवति। सर्वस्यै, सर्वेषाम्, वृक्षाणाम्। तु शब्दस्तृतीयाद्यधिकार निवृत्त्यर्थः।

● इदुदग्निः २/१/८ (दु. वृ.)

इकार उकारश्चाग्नि संज्ञो भवति। अग्निम्, पटुम्। इदुदिति किम्? सेनान्यम्, यवल्वम्। अग्नि प्रदेशाः अग्नेरमोऽकार इत्येवमादयः।

● ईदूत्स्त्र्याख्यौ नदी २/१/९ (दु. वृ.)

ईदूदित्येव, स्त्र्याख्यौ नदी संज्ञौ भवतः। नद्यौ, वध्वै। तपर करणमसन्देहार्थम्, स्त्र्याख्याविति किम्? सेनान्ये, यवल्वे। नदी प्रदेशाः "नद्या ए आसामित्येवमादयः"।

● आश्रद्धा २/१/१० (दु. वृ.)

आकारो यः स्त्र्याख्यः स श्रद्धा संज्ञो भवति। श्रद्धा, माला। स्त्र्याख्य इति किम्? कीलालपाः। श्रद्धा प्रदेशाः– श्रद्धायाः सि लोपमित्येवमादयः।

● अन्त्यात् पूर्व उपधा २/१/११ (दु. वृ.)

लिङ्गस्य धातोर्वा अन्त्याद्वर्णाद्यः पूर्वो वर्णः स उपधा संज्ञो भवति। राजन्–अकारः, मिद्–इकारः, वृत्–ऋकारः। उपधा प्रदेशाः– अस्योपधाया दीर्घोवृद्धिर्नामिनामिनिचट्स्वित्येवमादयः।

● व्यञ्जनान्नोऽनुषङ्गः २/१/१२ (दु. वृ.)

लिङ्गस्य धातोर्वा अन्त्याद् व्यञ्जनाद् यः पूर्वो नकारः सोऽनुषङ्ग संज्ञोभवति। विदुषः, स्रंस्यते। न इति किम्? ऊर्भ्याम्। अनुषङ्गप्रदेशाः अनुषङ्गश्चाक्रुञ्चादेरित्येवमादयः।

● धुड् व्यञ्जनमनन्तःस्थानुनासिकम् २/१/१३ (दु. वृ.)

अन्तःस्थानुनासिकवर्जितं व्यञ्जनं धुट् संज्ञं भवति। पयांसि, अपक्त। अन्तःस्थानुनासिक वर्जमिति किम्? चत्वारि, अमंस्त। धुट् प्रदेशाः–धुटश्च धुटीत्येवमादयः।

● अकारोदीर्घम् घोषवति २/१/१४ (दु. वृ.)

अकारो लिङ्गान्तो घोषवति विभक्तौ दीर्घमापद्यते। आभ्याम्, वृक्षाय, वृक्षाणाम्, घोषवतीति किम्? वृक्षः।

● जसि २/१/१५ (दु. वृ.)

अकारो लिङ्गान्तो जसि परे दीर्घमापद्यते। वृक्षाः। अकारे लोपे प्राप्ते वचनम्।

● शसि सस्य च नः २/१/१६ (दु. वृ.)

अकारो लिङ्गान्तः शसि परे दीर्घमापद्यते, सस्य च नो भवति। वृक्षान्। स्याद्यधिकारः किम्? अल्पशः।

● अकारे लोपम् २/१/१७ (दु. वृ.)

विभक्तौ लिङ्गस्याकारो लोपमापद्यते अकारे सामान्ये। वृक्षः, युष्मत्, यः, सः, उशना।

● भिसैस् वा २/१/१८ (दु. वृ.)

अकारान्तात्लिङ्गात् परो भिसैस् वा भवति। वृक्षैः, वा शब्दः पक्षान्तरं सूचयति एस्, ऐस् वा। ऐस्करणादतिजरसैरिति केचित्।

● धुटि बहुत्वे त्वे २/१/१९ (दु. वृ.)

अकारो लिङ्गान्तो बहुत्वे धुटि परे एकारो भवति। एषु, वृक्षेभ्यः। परत्वादेत्वं स्यात्। धुटीति किम्? वृक्षाणाम्, तु शब्दो विभाषा निवृत्त्यर्थः।

● ओसि च २/१/२० (दु. वृ.)

अकारो लिङ्गान्त ओसि परे एकारो भवति। वृक्षयोः।

● ङसिरात् २/१/२१ (दु. वृ.)

अकारान्तात्लिङ्गात् परो ङसिराद् भवति। वृक्षात्। दीर्घोच्चारणादतिजरसात्।

• ङस् स्यः २/१/२२ (दु. वृ.)

अकारान्ताल्लिङ्गात् परो ङस् स्यो भवति। वृक्षस्य।

• इन टा २/१/२३ (दु. वृ.)

अकारान्ताल्लिङ्गात् परष्टा इनो भवति। वृक्षेण। टेनेति सिद्धे इनोच्चारणमग्रत इन एव। तेनातिजरसिन् कुलेन। पृथग्योगो बालावबोधार्थः।

• ङेर्यः २/१/२४ (दु. वृ.)

अकारान्ताल्लिङ्गात् परस्य ङे वचनस्य य आदेशो भवति। वृक्षाय।

• स्मै सर्वनाम्नः २/१/२५ (दु. वृ.)

अकारान्तात् सर्वनाम्नो लिङ्गात् परस्य ङे वचनस्य स्मै भवति। सर्वस्मै, विश्वस्मै, सर्वेषां नामेति किम्? विश्वो नाम कश्चित्–विश्वाय, विश्वमतिक्रान्ताय अतिविश्वाय। तीयाद्वा वक्तव्यम्– द्वितीयस्मै; द्वितीयाय। तृतीयस्मै–तृतीयाय। किन्तत् सर्वनाम?– सर्व, विश्व, उभ, उभय, अन्य, अन्यतर, इतर, डतर, डतम, वत्, त्व, नेम, सिम, पूर्व परावरदक्षिणोत्तरपराधराणि व्यवस्थायामसंज्ञायाम्, स्वमज्ञाति धनाख्यायाम्, अन्तरं वहिर्योगोपसंव्यानयोः, वृत्, त्यद् तद्, यद्, एतद्, अदस्, इदम्, किम्, एक, द्वि, युष्मत्, अस्मत्, भवन्त्।

• ङसिःस्मात् २/१/२६ (दु. वृ.)

अकारान्तात् सर्वनाम्नो लिङ्गात् परो ङसिः स्माद्भवति। सर्वस्मात्। विश्वस्मात्। अकारान्तादिति किम् ? भवतः।

• ङसि स्मिन् २/१/२७ (दु. वृ.)

अकारान्तात् सर्वनाम्नो लिङ्गात् परो ङिः स्मिन्भवति। सर्वस्मिन्, विश्वस्मिन्। सर्वेषां नाम इति किम्? समे देशे यजति।

• विभाष्येते पूर्वादेः २/१/२८ (दु. वृ.)

पूर्वादेर्गणात् परयोर्ङसिङ्योः स्थाने स्मात् स्मिनौ विभाष्येते। प्राप्ते विभाषा। पूर्वस्मात्, पूर्वात्, पूर्वस्मिन्, पूर्वे। तीयाद्वा वक्तव्यम्

द्वितीयस्मात्–द्वितीयात्। द्वितीयस्मिन्–द्वितीये। तृतीयस्मात्, तृतीयात्। तृतीयस्मिन्–तृतीये।

● सुरामि सर्वतः २/१/२६ (दु. वृ.)

अकारान्तात् सर्वनाम्नो लिङ्गात् सर्वत आमि परे सुरागमो भवति। सर्वेषाम्, यासाम् तासाम्। उकारः परादित्वार्थः। प्रतिपदोक्त ग्रहणात्–त्वाम्, युवाम्।

● जस् सर्व इः २/१/३० (दु. वृ.)

अकारान्तात् सर्वनाम्नो लिङ्गात् परो जस् सर्व इर्भवति। सर्वे, विश्वे, अकारान्तादिति किम्? सर्वाः।

● अल्पादेर्वा २/१/३१ (दु. वृ.)

अल्पादेर्गणात् परो जस् सर्व इर्भवति वा। अल्पे–अल्पाः, प्रथमे–प्रथमाः। उभय इति नित्यं भाषायाम्। अल्प–प्रथम–चरम–तय–अय–कतिपय–नेमअर्द्धाः पूर्वादयश्च।

● द्वन्द्वस्थाच्च २/१/३२ (दु. वृ.)

द्वन्द्वस्थाच्च सर्वनाम्नो लिङ्गादकारान्तात् परो जस् सर्व इर्भवति वा। कतरकतमे–कतरकतमाः; द्वन्द्वकतमे–द्वन्द्वकतमाः।

● नान्यत् सार्वनामिकम् २/१/३३ (दु. वृ.)

चकारोऽनुवर्तते। द्वन्द्वस्थस्य सर्वनाम्नो लिङ्गस्योक्तमन्यच्च सार्वनामिकं कार्यं न भवति। पूर्वापराय पूर्वापरात्, दक्षिणोत्तरपूर्वाणाम्।

● तृतीयासमासे च २/१/३४ (दु. वृ.)

तृतीयायाः समासे असमासे चोक्तमन्यच्च सार्वनामिकं कार्यं न भवति। मासेन पूर्वाय मासपूर्वाय, मासेनावराः मासावराः। श्रुतत्वात् सर्वनाम्नैव समासे इह रयादक्, त्वयकाकृतम्, मयकाकृतम्।

● बहुव्रीहौ २/१/३५ (दु. वृ.)

बहुव्रीहौ समासे सार्वनामिकं कार्यं न भवति– त्वत्कपितृकः, मत्कपितृकः,

अक् न स्यात्। वस्त्रान्तरवसनान्तराः, अप्रधानादेव द्वन्द्वस्थाच्चेति वा न स्यात्।

- **दिशां वा २/१/३६ (दु. वृ.)**

दिशां बहुव्रीहौ समासे सार्वनामिकं कार्यं भवति वा। उत्तरपूर्वस्यै, उत्तरपूर्वायै। दिशां बहुव्रीहौ इति किम्? दक्षिणपूर्वायै मुग्धायै।

- **श्रद्धायाः सिर्लोपम् २/१/३७ (दु. वृ.)**

श्रद्धा संज्ञात् परः सिर्लोपमापद्यते। श्रद्धा, माला। श्रद्धाया इति किम्? कीलालपाः। सिर दिति कृते जरा जरस् स्यात्।

- **टौसोरे २/१/३८ (दु. वृ.)**

टौसोः परयोः श्रद्धाया एत्वं भवति। तुलया, तुलयोः।

- **सम्बुद्धौ च २/१/३९ (दु. वृ.)**

श्रद्धायाः सम्बुद्धौ चैत्वम्भवति। हे श्रद्धे ! हे माले !

- **ह्रस्वोऽम्बार्थानाम् २/१/४० (दु. वृ.)**

अम्बार्थानां श्रद्धासंज्ञकानां सम्बुद्धौ ह्रस्वो भवति। हे अम्ब ! हे अक्क! अम्बार्थानामिति सिद्धे ह्रस्व इति संज्ञापूर्वकत्वात् सुखार्थम्। बहुस्वरत्वात् डलकवतां न स्यात्– हे अम्बाडे ! हे अम्बाले ! हे अम्बिके !

- **औरीम् २/१/४१ (दु. वृ.)**

श्रद्धायाः पर औरीमापद्यते। श्रद्धे, माले। दीर्घ इति किम्? जरसी इति केचित्।

- **ङवन्ति यै यास् यास् याम् २/१/४२ (दु. वृ.)**

श्रद्धायाः पराणि ङवन्ति वचनानि यै–यास्–यास्–याम् इति यथा संख्यं भवति। श्रद्धायै, श्रद्धायाः, श्रद्धायाः श्रद्धायाम्। मालायै, मालायाः, मालायाः, मालायाम्।

- **सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाच्च २/१/४३ (दु. वृ.)**

सर्वनाम्नः श्रद्धायाः पराणि ङवन्ति वचनानि यै, यास्–यास्–यामिति

यथा संख्यं सह सुना भवन्ति, ह्रस्वपूर्वाच्च। उदनुबन्धः परादित्वार्थः। सर्वस्यै, सर्वस्याः, सर्वस्याः, सर्वस्याम्। तु शब्दः स्वागमाधिकार निवृत्त्यर्थः।

● द्वितीयातृतीयाभ्यां वा २/१/४४ (दु. वृ.)

अप्राप्ते विभाषा। द्वितीयातृतीयाभ्यां पराणि भवन्ति वचनानि यै–यास्–यास्–यामिति यथासंख्यं सुना भवन्ति ह्रस्वपूर्वाच्च वा। द्वितीयस्यै– द्वितीयायै, तृतीयस्यै– तृतीयायै। तीयाद्वेति सिद्धे द्वितीयातृतीयाभ्यामिति स्पष्टार्थम्।

● नद्या ऐ आसासाम् २/१/४५

ससवो ह्रस्वपूर्व इति निवृत्तम्। नद्याः परेषां वचनानां यथासंख्यम् ऐ, आस् आस् आम् इत्येते आदेशाः भवन्ति। नद्यै, नद्याः, नद्याः, नद्याम्, वध्वै, वध्वाः, वध्वाः, वध्वाम्। नद्या इति किं तृतीयैः।

● सम्बुद्धौ ह्रस्वः २/१/४६

नद्याः सम्बुद्धौ परस्यां ह्रस्वो भवति, हे नदि ! हे वधु ! सम्बुद्धाविति किम्? गौरीवधुः।

● अम्शसोरादिलोपम् २/१/४७

नद्याः परयोरम्शसोरादिर्लोपं प्राप्नोति। नदीम्, नदीः, वधूम्, वधूः। अम्शसोरिति किम्? नद्यौ, वध्वौ।

● ईकारान्तात् सिः २/१/४८

नदी संज्ञकादीकारान्तात्परस्मिन्लोपं प्राप्नोति। नदी, गौरी, मही। नदी संज्ञकादिति किम्? ग्रामणीः। ईकारान्तादिति किम्? वधूः। लक्ष्म्यादिभ्यस्सेर्लोपो नेष्यते। लक्ष्मीः, तन्त्रीः।

● व्यञ्जनाच्च २/१/४९

व्यञ्जनान्ताल्लिङ्गात्परस्मिन्लोपं प्राप्नोति। वाक्, विद्युत्, राजा। ननु सि प्रत्यय सकारस्य संयोगान्तलोप इत्यनेन सिद्धो लोपः, तत्किमनेन योगेन? असदेतत्, लिङ्गस्य यस्संयोगस्तस्यान्त लोपः। न तु सि प्रत्ययान्तं लिङ्गम्।

● अग्नेरमोऽकारः २/१/५०

अग्नेः परस्य अमः अकारलोपं प्राप्नोति। अग्निम्, पटुम्, धेनुम्।

● औकारः पूर्वम् २/१/५१

अग्नेः परः औकारः पूर्ववर्णमापद्यते।

● शसोऽकारः सश्चनोऽस्त्रियाम् २/१/५२

शसस्सकारस्य नत्वं भवति। अस्त्रियाम् स्त्रीविषयं वर्जयित्वा। अग्नीन् वायून्। अस्त्रियामिति किम्? बुद्धीः, धेनूः।

● टा ना २/१/५३

अस्त्रियामित्यनुवर्तते। उत्तर सूत्रेऽपि। अग्नेः परः टा प्रत्ययो नाभावं प्राप्नोति। अस्त्रियाम्, स्त्रीविषयं वर्जयित्वा। अग्निना, भानुना। अस्त्रियामिति किम्? बुद्ध्या, धेन्वा।

● अदोऽमुश्च २/१/५४

टा इत्यनुवर्तते, अदस् शब्दस्य टा प्रत्यये परे अमु आदेशो भवति। अस्त्रियाम् च शब्दाट्टाप्रत्ययस्य नाभावः। अमुना, अस्त्रियामिति किम्? अमुया, अदस्, टा त्यदाद्यत्वम्। स्त्रियामादाप्, टौ सौ रे इति एत्वम्, ए अय्, अदसः पदेमः, उत्वमादित्युत्वम्।

● इरेदुरोज्जसिः २/१/५५

अग्नेः इ एद् भवति, उ ओद् भवति जसि परे। अग्नयः, पटवः, बुद्धयः, धेनवः।

● सम्बुद्धौ च २/१/५६

अग्नि संज्ञकस्य लिङ्गस्य इ एद्भवति, उ ओद् भवति, सम्बुद्धौ परस्याम्। हे अग्ने! हे पटो! हे वुद्धे! हे धेनो! हे सखे! हे वायो! अग्नि संज्ञकादिति किम्? हे नदि ! हे वधु! इत्यत्र एदोतौ न भवतः, ह्रस्व विधान सामर्थ्यात्।

● ङे च २/१/५७

अग्नेः इ एद् भवति, उ ओद् भवति ङे प्रत्यये परे। अग्नये, पटवे, बुद्धये, धेनवे।

● ङसिङसोरलोपश्च २/१/५८

अग्नेः इ एद् भवति, उ ओद् भवति ङसिङसोः परयोः। तयोश्च अकार लोपः। अग्नेः, अग्नेः, पटोः, पटोः, बुद्धेः, बुद्धेः, धेनोः, धेनोः।

● गोश्च २/१/५६

गोशब्दात्परयोः ङसिङसोरकारलोपो भवति, गोः, गोः। द्यो शब्दादपीष्यते द्योः, द्योः।

● ङिरौसपूर्वः २/१/६०

सह पूर्वेण वर्णेन वर्तते योङिस्सः सपूर्वः। अग्ने परः यो ङिस्सपूर्वेण स्वरेण सह औत्वं प्राप्नोति। अग्नौ, पटौ, वुद्धौ, धेनौ, ङेराविति कृते विंशताविति न सिध्येत्, तेर्विंशतेरपीत्यनेन हि ति शब्दे लुप्ते विंशाविति स्यात्।

● सखिपत्योर्ङिः २/१/६१

सि पूर्व इति निवृत्तम्, पुनर्ङि ग्रहणात् सखि पति सम्बन्धि यो ङिस्स औत्वं प्राप्नोति, सख्यौ पत्यौ।

● ङसिङसोरुमः २/१/६२

सखिपत्योर्यौ ङसिङसौ तयोरकार उत्वं प्राप्नोति सख्युः सख्युः पत्युः पत्युः। यथासंख्यं न भवति, सख्युश्चेति ज्ञापकात्। यथासंख्यमनु देशस्समानाम्।

● ऋदन्तात्सपूर्वः २/१/६३

ऋदन्ताल्लिङ्गात् परयोः ङसिङसोरकारपूर्वेण वर्णेन सह उत्वं प्राप्नोति। पितुः–पितुः, मातुः–मातुः, भ्रातुः–भ्रातुः, कर्तुः–कर्तुः, नुः–नुः। तपरकरणमसन्देहार्थम्।

● आ सौ सिलोपश्च २/१/६४

ऋृदन्तस्य लिङ्गस्य सौ, सिकारे परे अन्त्यस्यात्वं भवति सेश्च

लोपः। यस्मिन् प्राप्ते योविधिरारभ्यते त तस्य वाधको भवति इत्यनेन अरारौ वाध्येते। पिता, माता, भ्राता, कर्ता स्वसा। सेर्डा इति न कृतम्, वैचित्र्यार्थम्।

● अग्निवच्छसि २/१/६५

अग्निना तुल्यम् अग्निवत्, उपमानेवति इति वति प्रत्ययः। ऋदन्तं लिङ्गं शसि परे अग्निवद्भवति, अग्नेः परस्य शसो यदुक्तं कार्यम् तदृकारान्तादपि भवतीत्यर्थः। पितॄन्, मातॄन्। स्त्रियां नत्वं न भवति। मातॄः स्वसॄः।

● अर्डौ २/१/६६

पदान्तात्सपूर्व इत्यतस्सूत्रादृकारमात्रमपेक्षते। लिङ्गस्यान्ते य ऋकारस्तस्यार्भवति ङौ, ङि प्रत्यये परे। पितरि, मातरि, कर्ता, स्वसरि, नरि। ङाविति किम्? मात्रे।

● घुटि च २/१/६७

ऋकारस्य घुटि परे अर्भवति, पितरौ, पितरः, पितरम्, पितरौ, मातरौ, मातरः मातरम्, मातरौ। घुटीति किम्? पित्रा, मात्रा। अर्ङि घुटोरिति कर्तव्ये योगविभागः उत्तरार्थः।

● धातोस्तृशब्दस्यार् २/१/६८

तृ चासौ शब्दः तृशब्दः। घातोः परस्य तृ शब्दस्य य ऋकारस्तस्य आर्भवति घुटि परे। अरोबाधः। कर्तारौ, कर्तारः, कर्तारम्, कर्तारौ, वक्तारौ, वक्तारः वक्तारम्, वक्तारौ। डुकृञ् करणे वच भाषणे वुण्तृचावितितृच्, गुणः, चवर्गस्य किः। धातोरिति किम्? याता, यातरौ, यती प्रयत्ने यतत इति, यण्, यत, ता।

यतेर्वृद्धिश्चेति ऋन् प्रत्ययः। अकारस्य वृद्धिराकारः। भवत्ययं तृ शब्दः न तु धातोः परस्य। तृ शब्दस्येति किम्? नरौ, नरः। णीञ् प्रापणे, नयतीति ना, नयतेः द्विश्चेति ऋन् प्रत्ययः, स च द्विश्चेति वचनात्, डानुबन्धः, तेन डानुबन्धेऽन्त्यस्वरादेरित्यन्त्यस्वरादेर्लोपः। शब्दग्रहणं वैचित्र्यार्थम्।

● स्वस्रादीनाञ्च २/१/६९

स्वसृ इत्यादीनां य ऋकारस्तस्य घुटि परे आर् भवति। स्वसारौ,

स्वसारः। स्वसारम् स्वसारौ, नप्तारौ, नप्तारः नप्तारम् नप्तारौ।

स्वसा नप्ता च नेष्टा च त्वष्टा क्षत्ता तथैव च।
होता पोता प्रशास्ता चेत्यष्टौ स्वस्रादयः स्मृताः।।

ननु नप्त्रादयः तृ प्रत्ययान्ता इति तेषां पूर्वेणैवारादेशस्सिद्धः। अतः स्वस्रिति सूत्रं कर्तव्यम्, किमादि ग्रहणेन? सत्यम्– सिद्धे सत्यारम्भो नियमार्थ इति नप्त्रादीनां नियमार्थमुपादानम्, तेन उणादि तृ प्रत्ययान्तानां यदा पूर्वेणा– देशस्तदा नप्त्रादीनामेव सप्तानां नान्येषाम्, तेनेह न भवति। पितरौ, पितरः।

● आ च न सम्बुद्धौ २/१/७०

ऋदन्तस्य लिङ्गस्य सम्बुद्धौ परस्यारादेशो न भवति, आत्वं च न भवति पारिशेष्याद् घुटि चेत्यनेन अरेव भवति। हे पितः, हे मातः, हे भ्रातः, हे कर्तः, हे स्वसः, हे नः।

● ह्रस्वनदीश्रद्धाभ्यस्सिर्लोपम् २/१/७१

सम्वुद्धावित्यनुवर्तमानमर्थवशात्प्रथमान्तं जायते, ह्रस्वान्तात् नदी संज्ञकाच्च लिङ्गात्परः सम्बुद्धिसिकारः लोपं प्राप्नोति। हे वृक्ष! हे नदि! हे वधु ! हे गङ्गे! सम्बुद्धाविति क्रिम्? वृक्षः। नदी ग्रहणमुत्तरार्थम्। हे नदीत्यादौ हि कृते ह्रस्वे, ह्रस्वग्रहणादेव सिद्धस्सम्बुद्धि लोपः। ननु सन्निपात परिभाषया कथं ह्रस्वः सम्बुद्धि विघातं कुर्यादिति चेत्, दर्णग्रहणे निमित्तमिति वचनात् करिष्यति। हे श्रद्धे इत्यादौ तु स्वरादेशत्वादेत्वे कृतेऽपि श्रद्धा ग्रहणसामर्थ्यात्स लोपः। उत्तरार्थ ग्रहणं स्यादिति चेत्, तन्न। असति हि प्रयोजने युक्तमुत्तरार्थत्वम्। सम्वुद्धि ग्रहणेऽनुवर्तमाने पुनस्सि ग्रहणं भूतपूर्वाभ्यामिकारोकाराभ्यां सि लोप प्रतिप्रत्त्यर्थम्। तेनेहापिन भवति हे अग्ने! हे वायो !

● आमि च नुः २/१/७२

ह्रस्वनदीश्रद्धाभ्यः परस्मिन्नामि परे नुरागमो भवति। वृक्षाणाम्, पटूनाम्, वायूनाम्, नदीनाम्, वधूनाम्, मालानाम्, गङ्गानाम्। ह्रस्वनदी श्रद्धाभ्य इति किम्? गवाम्। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणमिति वचनात् आमो लाक्षणिकस्य न भवति। नद्याम्, युवाम्।

● त्रेस्त्रयः २/१/७३

आमीत्येव। त्रिशब्दस्यामि परे नुरागमो भवति त्रयादेशश्च। त्रयाणाम्, परमत्रयाणाम्। कर्मधारयोऽयम्. आमीति किम्? त्रिभिः अप्रधानस्य त्रिशब्दस्य न भवति, प्रधाने कार्यसम्प्रत्यय इति वचनात्। तेन प्रियास्त्रयो येषां ते प्रियत्रयः तेषाम् प्रियत्रीणां संख्यावाचकस्य सार्थकस्य त्रिशब्दस्य ग्रहणम्, तेनेह न भवति रात्रीणाम्।

● चतुरः २/१/७४

चत्वार्शब्दात्परस्मिन्नामि परे नुरागमो भवति। चतुर्णाम्, आमीति किम्? चतुर्भिः।

● संख्यायाः ष्णान्तायाः २/१/७५

ष् च न् च तौ ष्णौ, ष्णावन्तौ यस्यास्संख्यायास्सा ष्णान्ता। षकारान्तायाः, नकारान्तायाश्च संख्यायाः परस्मिन्नामि परे नुरागमो भवति। षण्णाम्, पञ्चानाम्, सप्तानाम्, दशानाम्। आमीति किम्? षड्भिः, पञ्चभिः, दशभिः। संख्याया इति किम्? विप्रुषाम्, यज्वनाम्।

● कतेश्चजस्शसोर्लुकि २/१/७६

संख्याया इत्येवं षकारान्तायास्संख्यायास्तथा कति शब्दाच्च परयोः जस् शसो लुंग् भवति। षट्टिष्ठन्ति, षट् पश्य, पञ्च पश्य, कति तिष्ठति, कति पश्य।

● नियोङिराम् २/१/७७

णीञ् प्रापणे इत्यस्मात्क्विबन्तात्परोङिराम्भवति। सेनान्याम्, ग्रामण्याम्, कृते णत्वे एकदेशविकृतमनन्यवदिति वचनादामादेशः।

भट्टोग्रभूति कृतायां शिष्यहितायां वृत्तौ नामप्रकरणे

लिङ्गपादः प्रथमः।

नामप्रकरणे द्वितीयः पादः

● न सखिष्टादावग्निः २/२/१

टा आदिर्यस्य विभक्तिगणस्येति विग्रहः, सखि शब्दोऽग्नि संज्ञो न भवति। टादौ विभक्तिगणे परे। सख्या सख्ये, ना भाव एत्वञ्च न भवति। टादाविति किम्? सखीन्। उत्तर सूत्रादसमासग्रहणं सिंहावलोकित न्यायेन सम्बध्यते, तेन समासे प्रतिषेधो न भवति। सुसखिना, सुसखये।

● पतिरसमासे २/२/२

पति शब्दोऽग्निसंज्ञो न भवति टादौ विभक्तिगणे परे, असमासे समासविषयं वर्जयित्वा। पत्या, पत्ये। असमास इति किम्? नरपतिना नरपतये। टादाविति किम्? पतीन्।

● स्त्री नदीवत् २/२/३

स्त्री शब्दो नदीवद्भवति। स्त्रीणाम्, स्त्रियै, स्त्रियाः, स्त्रियाम्, नदी संज्ञायाम् सिद्धायाम् योगारम्भो वक्ष्यमाणेन योगद्वयेन विकल्पनिवृत्त्यर्थः।

● स्त्र्याख्यावियुवामि २/२/४

नदीवदित्येव, स्त्र्याख्यौ स्त्री वाचकौ यौ इयुवौ, तयोः इय् उव् इत्येतावा देशौ दृष्टौ तावामि परे नदीवद् वा भवतः। श्रीणाम्–श्रियाम्, भ्रूणाम्–भ्रुवाम्। नदीवद्भाव पक्षेनुरागमः। स्त्रियामिति कर्तव्ये आख्या ग्रहणं नित्यं स्त्री विषयस्य नदीवद्भावार्थम्। तनेह न भवति। यवक्रियाम्, कटप्रुवाम्, भृणाम्। इयुवाविति किम्? शस्त्रीणाम्, जम्बूनाम्।

● ह्रस्वश्च ङवति २/२/५

स्त्र्याख्यावित्येव। अग्निग्रहणमिह मण्डूकप्लुतिन्यायेनानुवर्तते। स्त्र्याख्यौ, स्त्री वाचकौ यौ इयुवौ तौ ङवति वचने परे वा नदीवद्भवतः। तथा स्त्री वृत्तिरग्निसंज्ञको ह्रस्वान्तश्च। श्रियै, श्रियाः। श्रियाः श्रियाम्। श्रिये, श्रिय श्रियि। भ्रुवै, भ्रुवाः, भ्रुवाम्, भ्रुवे, भ्रुवः। भ्रुवः भ्रुवि। बुद्ध्यै, बुद्ध्याः, बुद्ध्याः बुद्ध्याम्, बुद्धये, बुद्धेः, बुद्धेः, बुद्धौ। धेन्वै, धेन्वाः, धेन्वाः, धेन्वाम्, धेनवे

धेनोः धेनौ। एवम् मत्यै–मतये इत्यादि। स्त्री वृत्तिरिति किम्? अग्नये। अग्नि संज्ञक इति किम्? मात्रे।

● नपुंसकात्स्यमोर्लोपेऽपि न च तदुक्तम् २/२/६

तयोरूक्तम् तदुक्तम्। नपुंसकलिङ्गात्परयोरस्यमोर्लोपो भवति तयोश्च परयोर्यदुक्तं कार्यम् तन्न भवति, प्रत्ययलोपे प्रत्ययलक्षणमितिवचनात्प्राप्तम्। सुसखि कुलं तिष्ठति, सुसखिकुलं पश्य। शेभनास्सखायो यस्य कुलस्येति विग्रहः। अत्र सख्युश्चेति सावन्नादेशः प्राप्तः। घुटित्वै इत्यैकारः प्राप्तः। सुद्यु अहस्तिष्ठति, सुद्यु अहः पश्य, शोभनो द्यौः यस्मिन्नहनि इति विग्रहः। विरामव्यञ्जनादावित्युत्वम्, अत्र औ सौ वाम्या इत्यौत्वात्वे प्राप्ते। ननु द्यु सखि शब्दयोरप्राधान्यात्स्यमाश्रयं न भवतीति किम्, न च तदुक्तं ग्रहणेन? सत्यम्–प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्यय इत्यनित्यं वचनम्। नित्यं हि सति, प्रियदघ्नेत्यादावन्नादेशो न भवेत्। नपुंसकादिति किम्? कर्ता कर्तारम्, स्यमोरिति किम्? पयसा। नपुंस्कात्स्यमोर्लुगिति न कृतम् वैचित्र्यात्। स्यमाश्रयं कार्यम् न भविष्यति। लुग्लोपे न प्रत्ययकृतामिति प्रतिषेधात्।

● अकारादसम्बुद्धौ मुश्च २/२/७

मुकारादिति षष्ठ्यास्स्थाने पञ्चमी। तेन अकारान्तस्य नपुंसक लिङ्गस्य स्यमोः परयोः मुरागमो भवति, असम्बुद्धौ, सम्बुद्धिविषयं वर्जयित्वा। उकार आगम उदनुबन्ध इत्यर्थः। एममुत्तरत्र। कुण्डम् वनम्, अग्रम्। अकारादिति किम्? दधि। असम्बुद्धाविति किम्? हे कुण्ड ! हे वन !

● अन्यादेस्तु तुः २/२/८

असम्बुद्धाविति निवृत्तम्। अन्यादेर्गणस्य नपुंसकलिङ्गस्य स्यमोः परयोः तुरागमो भवति। अन्यत् तिष्ठति, अन्यत्पश्य, तु शब्दात् हे अन्यत्, अन्य अन्यतर, इतर डतर डतम् इत्येतेऽन्यादयः।

● औरीम् २/२/९

विशेषादिष्टः प्रकृतं न बाधते इति वचनान्नपुंस्कादित्यनुवर्तते। आन्तरतम्यादिश्रयणमेत, नपुंसकलिङ्गात्पर औकार ईत्वं भवति। कुण्डे पयसी।

● जस्शसोश्शिः २/२/१०

नपुंसक लिङ्गात्परयोः जस्शसोः शिरादेशो भवति। कुण्डानि तिष्ठन्ति कुण्डानि पश्य। दधीनि, मधूनि, पयांसि, यशांसि, गोमन्ति। जस्शसोरिति किम्? जसा सहचरितस्य शसो ग्रहणादिह न भवति। शतं शतं ददाति शतशो ददाति। आख्याताच्च तमादय इति शस्।

● धुद्स्वराद् घुटि नुः २/२/११

धुट्च स्वराश्च तद् धुद्स्वरम्। पञ्चमीयम्, षष्ठ्याः स्थाने, तेनेह धुडन्तस्य स्वरान्तस्य नपुंसक लिङ्गस्य घुटि परे नुरागमो भवति। धुडन्तस्य तावत् – शकृन्ति, पयांसि। स्वरान्तस्य– कुण्डानि, वनानि। धुद्स्वरादिति किम्? अहानि, चत्वारि घुटीति किम्? कुण्डे, पयसी।

● नामिनस्स्वरे २/२/१२

नाम्यन्तस्य नपुंसकलिङ्गस्य स्वरेपरे नुरागमो भवति। दधिनी, मधुनी, त्रपुणी, जतुनी। नामिन इति किम्? कुण्डे। स्वरे इति किम्? वारिभिः। यद्यत्र नुस्स्यात्, विभक्त्यवयवत्वादलिङ्गान्तत्वेन नकारस्य कथं लोपः स्यात्।

● अस्थिदधिसक्थ्यक्ष्णामन्नन्तष्टादौ २/२/१३

अस्थि दधि सक्थि अक्षि इत्येतेषामन्तः अन्नादेशं प्राप्नोति, टादौ स्वरे परे नुरागमो प्राप्तः। अस्थ्ना–अस्थ्ने, दध्ना–दध्ने, सक्थना–सक्थने, अक्ष्णा–अक्ष्णे। टादाविति किम्? अस्थीनि, दधीनि। सक्थीनि, अक्षीणि। स्वर इति किम्? अस्थिभ्याम्, दधिभ्याम्, सक्थिभ्याम्, अक्षिभ्याम्।

● भाषितपुंस्कं पुंवद्वा २/२/१४

भाषितः पुमान्येन तद्भाषितपुंस्कम्। समासान्तगतेति ककारः समासान्तः। टादौ स्वरे इति नामिन इति चानुवर्तते। पुमानिव पुंवत्, भाषित पुंस्कं नाम्यन्तम् नपुंसक लिङ्गं टादौ स्वरे परे वा पुवंद्भवति, पुंसि यत्कार्यमुक्तं तद्भासित पुंस्कस्यापि भवतीत्यर्थः। किं च पुंस्युक्तं स्वरो ह्रस्वस्याभावः नामिनस्स्वरे इति नुकारागमस्य च। ग्रामणीः ब्राह्मणः, ग्रामणि कुलम्, ग्रामण्याः कुलेन ग्रामणि कुलेन, ग्रामण्ये कुलाय, ग्रामणिने कुलाय। पुंवद्भाव पक्षे ह्रस्व नुकारागमौ न स्तः। अनेकाक्षरयोस्त्वसंयोगाद्यवाविति यत्वम्।

एवं मृदुः ब्राह्मणः, मृदुःकुलम्, मृदवे कुलाय, मृदुने कुलाय। भाषितपुंस्कमिति किम्? त्रपुणे, जतुने, नाम्यन्तमिति किम्? कीलालपाः ब्राह्मणाः। कीलालपं कुलम्, कीलालपेन कुलेन। यदि पुंवद्भावस्स्यात्। स्वरो ह्रस्व इति ह्रस्वो न भवेत्। नपुंस्कमिति किम्? मृदुः सारकः, मृद्वी स्त्री, मृद्व्यै स्त्रियै। पुंवद्भावे सत्यैभावो न स्यात्। टादाविति किम्? मृदुने वस्त्रे। स्वर इति किम्? ग्रामणिभ्यां कुलाभ्याम्। स्वरो ह्रस्वः। वा शब्दोऽत्र व्यवस्थितविभाषावाची। तेन पीलुः वृक्षः, पीलुःफलम्, पीलुने फलायेत्यादौ न भवति।

● दीर्घमामि सनौ २/२/१५

सहनुना वर्तते य आम् सः सनुः, तस्मिन् सनौ दीर्घशब्दो ह्रस्वं स्थानिनमाक्षिपति, सम्बन्धि शब्दत्वात्। तेन ह्रस्वान्तं लिङ्गं दीर्घमापद्यते आमि सनु कारके प्रत्यये परे। देवानाम्, अग्नीनाम्, पटूनाम्, कर्तॄणाम्। आमीति किम्? वारिणे। सनावित्यामो विशेषणमुत्तरार्थम्। इह तु आम्प्रत्ययो नुकारागमं न व्यभिचरति।

● नान्तस्य चोपधायाः २/२/१६

नान्तस्य लिङ्गस्य उपधाया दीर्घो भवति घुट्यसम्बुद्धौ। आमो सनुकारागमे परे। पञ्चानाम्, दशानाम्। नान्तस्येति किम्? चतुर्णाम्। सनाविति किम्? वर्म्मणाम्।

● घुटिचासम्बुद्धौ २/२/१७

नान्तस्य लिङ्गस्योपधाया दीर्घो भवति, घुट्यसम्बुद्धौ परे। राजा, राजानौ, राजानः, राजानम्, राजानौ, सामानि। नान्तस्येति किम्? योषित्। घुटीति किम्? राजनि। असम्बुद्धाविति किम्? हे राजन्!

● सान्तमहतोर्नोपधायाः २/२/१८

सकारः अन्ते यस्य सः सान्तः सान्तश्च महांश्च तौ सान्तमहतौ। नस्य उपधा नोपधा। घुटीत्यनेन सहासम्बुद्धिस्तु दिव उद्व्यञ्जन इत्यतः प्रागनुवर्तते। सान्तस्य लिङ्गस्य महन्त् इत्यस्य च या नोपधा तस्याः दीर्घो भवति धुट्यसम्बुद्धौ परे। श्रेयान्, श्रेयांसौ, श्रेयांसः। श्रेयांसम्, श्रेयांसि। महान्, महान्तौ, महान्तः। महान्तं, महान्तौ, महान्ति, गोमान्ति। नोपधायाः इति किम्?

जराम्, घुटीति किम्? श्रेयसी। असम्बुद्धाविति किम्? हे श्रेयन्, हे महन्।

● अपश्च २/२/१९

अप् इत्यस्य यो ह्रस्वःतस्य दीर्घो भवति घुट्यसम्बुद्धौ परे। आपः। स्वाम्पि तडाकानि, शोभना आपो येषु तडाकेषु इति विग्रहः। धुट्स्वराद्घुटिनुरिति नुकारागमः1 घुटीति किम्? अपः पश्य। असम्बुद्धाविति किम्? हे बह्वप्, बहवः आपो यस्यां नद्याम् सा बह्वप्। तस्यामन्त्रणमेतत्।

● अन्त्वसन्तस्य चाधातोस्सौ २/२/२०

अन्तुश्च अश्च तावन्त्वसौ तावन्तौ यस्य शब्दस्येति विग्रहः। न धातुरधातुः। अन्त्वसन्तस्य शब्दस्य चाधातोः, धातु व्यपदेश रहितस्य दीर्घो भवति, सावसम्बुद्धौ परे, भवान्, गोमान्, चन्द्रमाः, अप्सराः, शोभन यशोयस्य स सुयशाः। अन्त्याभावे अन्त्यसदेशस्येति वचनात् अन्त्वसोरकारस्य दीर्घो विज्ञायते, उदनुबन्धयुक्तस्य अन्त इत्यस्य ग्रहणम्, तेन ऋकारानुबन्ध ायुक्तस्य न भवति, पचन् पठन्। वर्तमाने शन्तृङानशाविति शन्तृङ्, अन्वि, असन्ध्यक्षर लोपः, अधातोरिति किम्? पिण्डग्रः, ग्रस ग्लसु अदने, पिण्डपूर्वः, पिण्डं ग्रसतीति क्विप्। क्विबन्तो धातुत्वं न जहाति, लिङ्गत्वञ्च प्रतिपद्यत इति क्विबन्तस्य धातुत्वम्। साविति किम्? गोमन्तौ, चन्द्रमसौ, असम्बुद्धाविति किम्? हे! गोमन्, हे चन्द्रमसः।

● इन्हन्पूषार्यम्णां शौ सौ च २/२/२१

इन् हन् पूषन् अर्यमन् इत्येतेषामुपधाया दीर्घो भवति शौ सौचासम्बुद्धौ परतः, बहवो दण्डिनो येषु नगरेषु तानि बहुदण्डीनि, एवं बहुवृत्रहाणि, बहुपूषाणि, बह्वर्यमाणि, दण्डी, वृत्रहा, पूषा, अर्यमा। घुटि चासम्बुद्धाविति दीर्घे सिद्धे योगारम्भो, नियमार्थः। तेन इन्नादीनां शौ सावेव घुटि दीर्घो यथा स्यात्। अन्यस्मिन् घुटि मा भूत्– दण्डिनौ– दण्डिनः, वृत्रहणौ–वृत्रहणः, पूषणौ– पूषणः, अर्यम्णौ–अर्यमणः।

● उशनस्पुरूदंसोऽनेहसां सावनन्तः २/२/२२

उशनस्, पुरूदंशस्, अनेहस् इत्येतेषामन्तः अन्नादेश प्राप्नोति, सावसम्बुद्धौ परे। उशना, पुरूदंसा, अनेहा। अनेन सकारस्य अन्नादेशः।

अकारे लोपम्। घुटिचासम्बुद्धाविति दीर्घः। साविति किम्? उशनसौ, पुरूदंसौ अनेहसौ। असम्बुद्धाविति किम्? हे उशन ! हे पुरूदंस! हे अनेहः! सम्बुद्धि विषये उशनशस्त्रैरूप्यमिष्यते। नान्तम् तथा सान्तम्, अथाप्यदन्तम्। हे उशनन्! हे उशनः, हे उशन। पक्षे अन्नादेशः नकारस्य लिङ्गान्तनकार लोपोऽपि पाक्षिकः। वर्णान्त्यस्य विधिरिति वचनादन्त ग्रहणे लब्धे पुनरन्त ग्रहणमनेकवर्णस्सर्वस्येति वचनात् सर्वेषामुशनसादीनामन्नादेशनिवृत्त्यर्थम्।

● सख्युश्च २/२/२३

सखि शब्दस्य अन्तः अन्नादेशं प्राप्नोति सावसम्बुद्धौ परे, सखा। साविति किम्? सखिभिः। असम्बुद्धाविति किम्, हे सखे!।

● घुटित्वै २/२/२४

सखि शब्दस्यान्तः ऐकारमापद्यते। घुट्यसम्बुद्धौ परे। सखायौ, सखायः, सखायम् सखायौ। घुटीति किम्? सखिभिः। असम्बुद्धाविति किम्? हे सखे।

● दिवउद् व्यञ्जने २/२/२५

दिव् इत्यस्य उत्वं भवति, व्यञ्जने परे द्युभ्याम्, द्युभिः, द्युषु। तपरकरणम् तपरस्तत्कालस्येति वचनादुकारस्यैव ग्रहणार्थम्, अन्यथा स्वरस्सवर्णस्य ग्राहक इति वचनात् ऊकारोऽप्यादेशस्स्यात्। व्यञ्जन इति किम्? दिवौ, दिवः। सु भोरिति व्यञ्जन ग्रहणं सामान्यव्यञ्जनपरिग्रहार्थम्। तेन दिवो भावः द्युता, द्युत्वम्। वाम्येत्यतो वेति सम्बध्यते। सा च व्यवस्थितविभाषा, तेन यकारे तद्धिते भवति, दिवि भवं दिव्यम्। यदुगवादित इति योगविभागाद्यत्।

● औ सौ २/२/२६

दिव् इत्यस्य सौ परे औत्वं भवति। उत्वापवादः। द्यौः। साविति किम्? दिवि,साविति प्रथमैक वचनं गृह्यते, न तु सप्तमीबहुवचनम्, सुपीत्यकरणात्।

● वाम्या २/२/२७

दिव् इत्यस्य आमि परे वा आत्वं भवति द्याम्, इह सन्धिसाम्याद् द्वितीयैक वचनं गृह्यते, न षष्ठी बहुवचनम्, घुटीत्यनुवृत्तेः।

• युजेरसमासेनुर्घुटि २/२/२८

युजिर् योगे इत्यस्य क्विबन्तस्य घुटि परे नुरागमोभवति, असमासे, समासविषयं वर्जयित्वा युङ्, युञ्जौ, युञ्जः। युञ्ज युञ्जौ युनक्तीति किम्? सि अनेन नुरागमः, व्यञ्जनाच्चेति सि लोपः, चवर्गदृगेति गः, वर्ग्येवर्गान्तः, संयोगान्तस्यलोपः इति गलोपः। असमास इति किम्? अश्वयुक्, अश्वयुजौ, अश्वयुजः। अश्वयुजम्,अश्वयुजौ। अश्वान्युनक्तीति क्विप्। घुटीति किम्? युजवेति वर्त्तते, सा च व्यवस्थित विभाषा, तेन युजसमाधावित्यस्य युजेर्नभवति। युजं प्राप्ताः मुनयः, समाधिप्राप्ता इत्यर्थः। योजनमिति कृत्ययुटोऽन्यत्रापीति क्विप्।

• अभ्यस्तादन्तिरनकारो वा नपुंसके २/२/२९

अविद्यमानो नकारो यस्येति विग्रहः। घुटीत्येव। अन्तेरिकार उच्चारणार्थः। अभ्यस्तात् पर अन्त् इत्ययं शब्दः अनकारो लुप्तनकारो वा भवति, नपुंसक विषये घुटिपरे। लोपोऽभ्यस्तादन्तिन इति नित्यं लोपः प्राप्तः। ददति कुलानि, ददन्ति कुलानि। डुदाञ्, वर्तमाने शन्तृङ् इतिशन्तृङ्, अन्वि, जुहोत्यादेश्चिेति लुक्, जुहोत्यादीनां सार्वधातुक इति। द्विर्व, ह्रस्वः, अभ्यस्तानामाकारस्येत्यालोपः। जस्शसोशिशः, अनेन नकार लोपः। एवं जुहोति, जुह्वन्ति। हु दानादानयोः, पूर्ववत् शन्तृङ्,अन्वि, पूर्ववल्लुक्, द्विर्व, हो जः, जुहोतेस्सर्वधातुक इति वत्वम्। जक्षति, जक्षन्ति, जक्ष भक्षहसनयोः। अत्रापि शन्तृङ्, जक्षादिश्चेत्यनेन जक्षेरभ्यस्त संज्ञा। अभ्यस्तादिति किम्? लिहन्ति कुलानि, अन्तिरिति किम्? ददानानि कुलानि। डु दाञ् दाने, आनश्, अन्यत्पूर्ववत्। घुटीति किम्? ददती कुले। औरीमिति ईकारः। अनुषङ्गश्चाक्रुञ्चेरित्यनुषङ्ग लोपः। नपुंसके इति किम्? ददतौ विप्रौ। शाविति कर्तव्ये नपुंसक ग्रहणं वैचित्र्यार्थम्।

• तुदमादिभ्य ईकारे २/२/३०

तुदादिर्येषां ते तुदादयः मा इत्यनेन सदृशाः मादयः। तुदादयः मादयश्च ते तुदमादयः। आदिलोपोऽन्तलोप इति पूर्वस्य शब्दस्य लोपः तुदादिभ्योः धातुभ्यो मादिभ्यश्च परः य अन्त् इत्ययं शब्दः स ईकारे परे लुप्त नकारो वा भवति। ईकारस्य औरीमित्यस्य स्त्रियां कृतस्य दा ग्रहणम् अनुषङ्गश्चाक्रुञ्चेरिति नित्यं लोपः प्राप्तः। तुदती कुले, तुदन्ती कुले, तुदती स्त्री, तुदन्ती स्त्री।

एवं नुदती, नुदन्तीत्यादि। तुद व्यथने, णुद प्रेरणे, पूर्ववत् शन्तृङ्, अन्वि, असन्ध्यक्षर लोपः, तुदादेरनीति गुण प्रतिषेधः। यत्र कुले शब्दस्तत्र औरीमितीकारः। यत्र स्त्रीशब्दः तत्र उदृकारानुबन्धात्त्वी इतीप्रत्ययः। भादिभ्यः–भातीकुले, भान्ती कुले, भाती स्त्री, भान्तीस्त्री। एवं स्नाती, स्नान्ती। भा दीप्तौ, ष्णाशौचे। वर्तमाने शन्तृङिति शन्तृङ्, अन्वि अदादेर्लुक्। भादि शब्दे योऽयमादि शब्दस्सः प्रकारे, प्रकारश्च सादृश्यम्, तेन भा इत्यनेन सदृशाः ये धातव आकारान्तास्ते सर्वे आदि ग्रहणेन गृह्यन्ते। तेन याती, यान्ती। या प्रापणे। तुदादिभ्य इति किम्? भवन्ती, दीव्यन्ती। अनुषङ्गश्चाक्रुञ्चेरित्यनेन तर्हि नित्यं लोपः कस्मान्न भवति? उच्यते–वा ग्रहणं तत्रसम्बध्यते, सा च व्यवस्थित विभाषा, तेन विकरणादनो यनश्चपरस्यान्तेरीकारे परे लोपो न भवति। स्य शब्दात्परस्यान्तेर्नलोपो वा वक्तव्यः ईकारे परे। करिष्यती करिष्यन्ती। डुकृञ् करणे। शन्त्रानौ स्यसंहितौशेषेचेति स्येन संहितः प्रत्ययः। हनृदन्तात्स्य इतीट्।

● हनेर्हेर्घिरुपधालोपे २/२/३१

हन हिंसा गत्योरित्यस्य क्विबन्तस्य यो हकारस्तस्य उपधालोपे कृते सति घत्वं भवति। स्थान्यादेशयोरिकार उच्चारणार्थः। वृत्रघ्नः, वृत्रघ्ना, वृत्रघ्ने, वृत्रं हतवानिति क्विप्, अवमसंयोगादिति अकार लोपः। उपधा लोप इति किम्? वृत्रहणौ, वृत्रहणः। ननु लुप्तोपधस्य चेति अनेन घत्वं सिद्धमित्यपार्थको योगारम्भः। उच्यते–धातोः कार्यमुच्यमानं धातुप्रत्यय एव भवतीति वचनात्। स्यादिषु सत्सु घत्वं न प्राप्नोतीति योगारम्भः। यदि च धातुकार्यं लिङ्गप्रत्ययेऽपि स्यात् गिरौ, गिर इत्यत्र वा स्वर इति लत्वं भवेत्।

● गोरौ घुटि २/२/३२

गो शब्दस्य घुटि परे औत्वं भवति। गौः, गावौ, गावः, घुटीति किम्? गोभिः। द्यौशब्दादपीष्यते। द्यौः, द्यावौ, द्यावः।

● अम्शसोरा २/२/३३

गो शब्दस्य अमि शसि परे आत्वं भवति। गाम्, गाः। द्यौ शब्दादपीष्यते। द्याम् द्याः।

● पथि मथि ऋभुक्षीणां सौ २/२/३४

पन्थाश्च मन्थाश्च ऋभुक्षाश्च ते पथि मथि ऋभुक्षाणः। पथि मथि ऋभुक्षि इत्येतेषां सौ परे आत्वं भवति। पन्थाः, मन्थाः, ऋभुक्षाः। साविति किम्? पथिभिः मथिभिः ऋभुक्षिभिः। व्यञ्जने चैषां निरिति न लोपः।

● अनन्तो घुटि २/२/३५

पथि मथि ऋभुक्षि इत्येतेषामन्तः अन्नादेशः प्राप्नोति घुटि परे। पन्थानौ, पन्थानः पन्थानम्, पन्थानौ। मन्थानौ, मन्थानः, मन्थानम्, मन्थानौ। ऋभुक्षाणौ, ऋभुक्षाणः, ऋभुक्षाणम्, ऋभुक्षाणौ। घुटीति किम्? पथिषु मथिषु, ऋभुक्षिषु।

● अघुट्स्वरे लोपम् २/२/३६

अघुडिति लुप्तसप्तम्येकवचनम्। पथि मथि ऋभुक्षीणामान्तः लोपमापद्यते अघुटि स्वरे परे। पथः, पथा, पथे, पथः। मथः, मथा मथे। ऋभुक्षः, ऋभुक्षा, ऋभुक्षे। स्वर इति किम्? पथिषु मथिषु, ऋभुक्षिषु। अघुट्, ग्रहणमुत्तरार्थम्। इह तु अघुट्येव स्वरे लोपो विज्ञायते। घुटि अन्नादेशस्यविहितत्वात्।

● व्यञ्जने चैषां निः २/२/३७

पन्थ्यादीनां नकारो लोपमापद्यते स्वरे परे व्यञ्जने च। अघुट् ग्रहणमुभयो र्विशेषणम्। निकारे इकार उच्चारणार्थः। पथिभ्याम्, पथिभिः। पथिषु। मथिभ्यां मथिभिः। मथिषु। पथः, पथे। मथः मथे। अघुडिति किम्? पन्थाः पन्थानौ, पन्थानः। मन्थाः मन्थानौ मन्थानः। एषां ग्रहणमविभक्तावपि लोपार्थम्। तेन पथो भावः पथिता, पथित्वम्। मथो भावः मथिता, मथत्वम्। पथयति मथयति। पन्थानमाचष्टे, मन्थानमाचष्टे। इन्कारितं चेतीन्। इनिलिङ्गस्येत्यन्त्यस्वरादेर्लोपः अनेन नकार लोपः।

● अनुषङ्गश्चाक्रुञ्चेः २/२/३८

स्वरे व्यञ्जने। अघुडिति सर्नम् सौनुरित्यत प्रागनुवर्तते। अनुषङ्गो लोपमापद्यते स्वरव्यञ्जनयोरघुटोः परयोः। अक्रुञ्चेः, क्रुञ्चु गति कौटिल्याल्पीभावयोरित्यस्य योऽनुषङ्गस्तं वर्जयित्वा। विदुषः, विदुषा, विदुषे। अघुट्स्वरादावित्युत्वम्। महतः, महता, महते। विद्वद्भ्याम्, विद्वद्भिः, विद्वत्सु।

विरामव्यञ्जनादिष्विति तस्य दः, महद्भ्याम्, महद्भिः, महत्सु। धुटां तृतीय इति तस्य दः। अक्रुञ्चेरितिकिम्? क्रुङ् क्रुञ्च क्रुञ्चे, क्रुङ्भ्याम् क्रुङ्भिः, क्रुङ्सु। क्रुञ्चतीति क्विप्? नन्वन्तरङ्गत्वाद्वर्गेवर्गान्त इति नस्याकारस्य कृते वर्गान्ते अनुषङ्गो नास्तीत्यनर्थकः क्रुञ्चेः प्रतिषेधः। सत्यम्– प्रतिषेधात्तु ज्ञायते, अनित्यो वर्गान्त इति। तेन प्रशान्भ्यामित्यादि स्यादि युटि सिद्धम्। अतएवानिदनुबन्धानामगुणेऽनुषङ्ग लोप इत्यनुषङ्ग लोपोऽपि क्रुञ्चेर्नास्ति। अघुडिति किम्? विद्वान्, विद्वांसौ। महान्, महान्तौ। लक्षणप्रतिपदोक्तवचनादिह न भवति। सुकन्सः,सुकन्भ्याम्, सुकन्भिः। कसि गतिशासनयोः। इकारो नकारा गमार्थः। अनिदनुबन्धानामितिज्ञापकात् नागमः। शोभनं कंस्त इति क्विप्। अन्यत्राप्यनुषङ्गलोपो वक्तव्यः। महतो भावः महत्ता, महत्त्वम्। विद्वत्ता, विद्वत्त्वम्। विदुषः इदं वैदुषम्, तस्येदमित्यण्।

● पुंसोऽन्शब्दलोपः २/२/३९

अञ्चासौ शब्दः, अन्शब्दः, तस्यलोपः, अन्शब्दलोपः। पुमान्स इत्यस्य यो अन्शब्दः, तस्य लोपो भवति, स्वरव्यञ्जनयोरघुटोः परयोः। पुंसः, पुंसा, पुंसे, पुंभ्याम्, पुंभिः, पुंसु । अघुटोरिति किम्? पुमान्, पुमांसौ। शब्द ग्रहणमन्यत्रापि अन्शब्द लोपार्थम्। तेन पुंसो भावः पुंस्ता पुंस्त्वम्, पुंस्यति पुंस्यते।

● चतुरो वाशब्दस्योत्वम् २/२/४०

वाशब्दस्येति कर्मधारयः, चत्वार इत्यस्य यो वा शब्दस्तस्य उत्वं भवति, स्वरव्यञ्जनयोरघुटोः परयोः। चतुरः, चतुर्भिः, चतुर्णाम्, चतुर्षु, त्व प्रत्यय निर्देशादन्यत्राप्युत्वम्। चतुर्णां भावः चातुर्यम्, यण् च प्रकीर्तित इति यण्, चतुर्भस्तरति चातुरिकः, तरतीकण्चरत्यपि इतीकण्। अघुडिति किम्? चत्वारः! प्रियाश्चत्वारो यस्य सः प्रियचत्वाः।

● अनडुहश्च २/२/४१

अनड्वाह इत्यस्य यो वा शब्दस्तस्य उत्वं भवति, स्वरव्यञ्जनयोरघुटोः परयोः अनडुहः, अनडुहा, अनडुहे, आनडुद्भिः, अनडुत्सु। विराम व्यञ्जनादिष्विति हस्य दः। अघुडितिकिम्? अनड्वान्। सौनुरिति नुरागमः। संयोगान्तलोपः, अनड्वाहौ, अनड्वाहः, अनडुहा। स्त्रियां विषये वा शब्दस्योत्वं वा वक्तव्यम्। अनडुही, अनड्वाही। गौरादेरिती प्रत्ययः। अविभक्तावपीष्यते। अनडुहोर्भावः, अनडुत्ता, अनडुत्त्वम्।

● सौ नुः २/२/४२

अनड्वाह इत्यस्य सौ परे नुरागमो भवति अनड्वान्। साविति किम्? अनड्वाहौ।

● सम्बुद्धावुभयोर्ह्रस्वः २/२/४३

उभयोः द्वयोः चतुरनडुहोः सम्बुद्धौ परस्यां ह्रस्वो भवति। प्रियाश्चत्वारो यस्य सः प्रियचत्वाः, तस्यामन्त्रणं हे प्रियचत्वः ! हे अनड्वन् ! सम्बुद्धाविति किम्? प्रयचत्वारौ, अनड्वाहौ ।

● अदसः पदे मः २/२/४४

अदस् इत्यस्य पदे पदकार्ये कृते दकारस्य मत्वम् भवति। अमुष्मै, अमुष्मात्, अमुष्य, अमुष्मिन्, दोऽदेर्म इति सिद्धे मत्वे नियमार्थमिदं वचनम्, तेन पदकार्ये कृते सति पश्चान्मत्वम्, अतो यद्यपि परत्वादन्तरङ्गत्वाच्च मत्वमुत्वञ्च प्राप्नोति तथाप्यादौ पदकार्यं स्मायादि प्रवर्तते ततो मत्वमुत्वञ्च। अथादसोऽन्त्यस्य मत्वं भवतीति कस्मान्न व्याख्यायते। नैवं शक्यम्। पदग्रहणं ह्येवं सत्यपार्थकं स्यात्, प्रयोजनाभावात्।

● अघुट्स्वरादौ सेट्कस्यापि वन्सेर्व शब्दस्योत्वम् २/२/४५

न घुट् अघुट् स्वर आदिर्यस्य प्रत्ययस्येति विग्रहः। ततः कर्मधारयः। सहेटावर्तते, यः व शब्दस्सः सेट्कः। वन्सेः – वन्स इत्यस्य यः व शब्दस्तस्य। सेट्कस्य इट् सहितस्य। अपि शब्दादिड्रहितस्यापि उत्वं भवति, अघुट्स्वरादौ प्रत्यये परे। पेचुषः, पेचुषा, पेचुषे। विदुषः, विदुषा, विदुषे। डुपचष् पाके, क्वन्सु कानाविति क्वन्सुः, परोक्षावद्भावात्। चणपरोक्षेति द्विर्व, अस्यैक व्यञ्जन मध्येति एत्वाभ्यासलोपौ। अर्तीणघसैकस्वरातामिति इट, शस्, टा, ङे, इकार सहितस्य व शब्दस्य उत्वम्, विद् ज्ञाने, वर्तमाने शन्तृङिति शन्तृङ्। वेत्तेश्शन्तुर्वन्सुरिति शन्तृङ् प्रत्ययस्य वन्सुरादेशः। घोषवत्योश्चकृतीतीडभावः। अघुट्स्वरादाविति किम्? पेचिवांसौ, विद्वांसौ, पेचिवद्भ्याम्, विद्वद्भ्याम्, अविभक्तावपीष्यते, विदुष इदं वैदुषम्, पेचुष इदं पैचुषम्। तस्येदमित्यण्, तद्धितेऽपि यकार इष्यते। विदुषोभावः वैदुष्यम्, पैचुष्यम्, यण् च प्रकीर्तित इति यण्, एवमुत्तरत्र।

● श्वयुवमघोनाञ्च २/२/४६

श्वन्, युवन्, मघवन्, इत्येतेषां व शब्दस्य उत्वं भवति। अघुट् स्वरादौ परे। शुनः, शुना, शुने। यूनः, यूना, यूने। मघोनः मघोना, मघोने। अघुट्स्वरादाविति किम्? श्वानौ, श्वाभ्याम्। युवानौ, युवाभ्याम्। मघवानौ, मघवद्भ्याम्। इह कस्मान्न भवति? शुन इदं शौवनम्। तस्येदमित्यण्। न य्वः पदाद्यौरित्यौकारागमः, तथा यूनोभावः, यौवनम्। यण् च प्रकीर्तित ग्रहणादण्, मघोन इदम् माघवनम् इति। उच्यते– अनभिधानात् तद्धिते परे न भवति। यत्रत्वभिधानमस्ति, तत्र भवत्येव। उपशुनम्, समीपं शुन इति। समासान्तर्गतानामित्यकारस्समासान्तः स्त्रियां विषयेऽपीष्यते। शुनी मघोनी ऋन्नेभ्यस्त्वी इती प्रत्ययः। ननु लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमितिवचनादिह कस्मान्न भवति? युवतीः पश्य युवन् शब्दाद् यूनस्तिरिति ति प्रत्ययः, शस्। उच्यते– एतद्वचनमनित्यम्। तेन घुटि त्वै इत्यैकारादेशः सखी शब्दस्य न भवति, सख्यौ, सख्यः।

● वाहेर्वा शब्दस्यौत्वम् २/२/४७

वाहेर्वह प्रापण इत्यस्य विण प्रत्ययान्तस्य यो वा शब्दस्तस्य औत्वं भवति, अघुट्स्वरादौ परे। प्रष्ठौहः, प्रष्ठौहा, प्रष्ठौहे, तुर्यौहः, तुर्यौहा, तुर्यौहे। प्रष्ठं वहति, तुर्यं वहतीति वहश्चेति विण्, णकार इण्वद्भावार्थः, इकार उच्चारणार्थः। वेर्लोपोऽपृक्तस्येति व लोपः। अस्योपधेति दीर्घः, एवं प्रष्ठौही, तुर्यौही। नदाद्यञ्चिवाह्व्यन्स्यन्तृसखीति ई प्रत्ययः। प्रष्ठौहेर्भावः प्राष्ठोह्यम्, अघुट्स्वरादाविति किम्? प्रष्ठवाहौ प्रष्ठवाड्भ्याम्।

● अञ्चेरलोपः पूर्वस्य च दीर्घः २/२/४८

अस्य लोपः, अलोपः, अञ्चुगतिपूजनयोरित्यस्य क्विबन्तस्य यो ऽकारस्तस्य लोपो भवति। पूर्वस्य ह्रस्वस्य च दीर्घो भवति अघुट्स्वरादौ परे प्रतीचः, प्रतीचा, प्रतीचे। मधूचः, मधूचा, मधूचे। प्रति अञ्चतीति, मधु अञ्चतीति क्विप्। अनिदनुबन्धानामिति अनुषङ्गलोपः। एवं प्रतीचीदिक्, पूर्ववदी प्रत्ययः, अघुट्स्वरादाविति किम्, प्रत्यञ्चौ, प्रत्यग्भ्याम्। अत्रैकत्रानुषङ्ग लोपो न भवति, प्रतिषेधो नान्यत्र।

● तिर्यङ्तिरश्चिः २/२/४६

अञ्चतेस्तिरस्पूर्वात्, तिरोऽञ्चतीति क्विप्, निर्देशसामर्थ्यादनुषङ्ग-लोपाभावः। एवमुत्तरत्र सहसन्तिरसामिति तिरसस्तिरि आदेशः, तिर्यञ्च इत्यस्य तिरश्च् आदेशो भवति अघुटस्वरादौ परे। तिरश्चः, तिरश्चा, तिरश्चे। तिरश्ची दिक् पूर्ववदी प्रत्ययः। तिरश्चो भावः तैरश्च्यम्। अघुट्स्वरादाविति किम्? तिर्यञ्चौ, तिर्यङ्भ्याम्।

● उदङ्ङुदीचिः २/२/५०

अञ्चतेरूत्पूर्वादुदञ्चतीति क्विप्, उदञ्च् इत्यस्य उदीच् आदेशो भवति अघुट् स्वरादौ परे। उदीचः, उदीचा, उदीचे। उदीची दिक्, पूर्ववदी प्रत्ययः। उदीचेर्भावमौदीच्यम्। यदुगवादित इति योग विभागाद्यत्, अघुट्स्वरादाविति किम्? उदञ्चौ, उदङ्भ्याम्।

● पात्पदं समासान्तः २/२/५१

पादिति पादशब्दः, लुप्ताकारो गृह्यते। हस्त्यादि वर्जितादुपमानात्परस्य पादशब्दस्य बहुव्रीहावन्त लोप इष्यत इत्यकारलोपः। पादित्ययं शब्दस्समासान्तः। समासस्य अन्तो यदा वर्तते तदा पदादेशं प्राप्नोति, अघुट् स्वरादौ परे, व्याघ्रपदः व्याघ्रपदा, व्याघ्रपदे। व्याघ्रस्येव पादौ यस्येति विग्रहः। पादस्यान्तलोपः, शस्, टा, ङे। अनेन पदादेशः, एवं द्विपदः, द्विपदा, द्विपदे, द्विपदी दिक्। द्वौपादौ यस्येति विग्रहः, अत्र संज्ञा सुशब्दाभ्यां च परस्येति अकारलोपः, पादौ वेति ई प्रत्ययः। व्याघ्रपदोभावः वैयाघ्रपद्यम्। नय्वोः, पदाद्योरित्यैकारागमः, अघुट्स्वरादाविति किम्? व्याघ्रपादौ, पादिति किम्? हस्तिपादान्पश्य, हस्तिन इव पादौ येषां ते हस्तिपादाः, तान्। अत्र हस्त्यादि वर्जितादिति प्रतिषेधादकारलोपाभावः।

● अवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ २/२/५२

वश्च, मश्च, तौ वमौ वमाभ्यां संयोगः वम संयोगः, न वम संयोगः, अवम संयोगः। अतो लोपः अल्लोपः, न लुप्तमलुप्तम्। अलुप्तमिव अलुप्तवत्। पूर्वस्यविधिः पूर्वविधिः, अनः– अन्शब्दस्य अकारलोपो भवति, अघुट्स्वरादौ परे। अवमसंयोगाद्–वमसंयोगान्तपरस्य न भवति, अलुप्तवच्च पूर्वविधौ,

पूर्वस्य वर्णस्य विधौ कार्ये कर्तव्ये अल्लोपः अलुप्तवद्भवति। अकार लोपे कृते यत्कार्य पूर्वस्य प्राप्तं तदलुप्तवद्भावान्नभवतीत्यर्थः। राज्ञः राज्ञा, राज्ञे। अत्र चवर्गदृगादीनाञ्चेति जकारस्य नकारे व्यञ्जने परे गत्वं प्राप्तम्, तदलुप्तवद्भावान्न भवति। अक्ष्णः, अक्ष्णा, अक्ष्णे। अस्थिदधिसक्थ्यक्ष्णामित्यन्नादेशः। अत्र षकारस्य नकारे परे हशषश्छेति डत्वं प्राप्तं तदलुप्तवद्भावान्नभवति। दध्ना, दध्ने। अत्रापि धकारस्यनकारे घोषवति परे धुटां तृतीय इति तृतीयः प्राप्तः, सोऽलुप्तवद्भावान्न भवति। अवमसंयोगादिति किम्? यज्वनः, कर्मणः। अन इति किम्? शरदः। पूर्वाविधाविति किम्? राज्ञः। अत्र परस्य नकारस्य तवर्गश्चटवर्गयोगेचटवर्गाविति ञकारे कर्तव्ये अलुप्तवद्भावो न भवति ! यदि स्यात्, नकारस्य जकारेण योगो न स्यात्। स्वरादेशः परनिमित्तकः पूर्वस्यविधिं प्रतिस्थानिवदितिवचनादल्लोपस्य स्थानिवद्भावो भविष्यतीति किमलुप्तवच्च पूर्वविधावित्येतत् ? स्थानिवद्भावस्यानित्यत्व ज्ञापनार्थं क्रियते, तेन भुञ्जन्ति शिषन्तीत्यादि सिद्धं भवति।

● ईङ्योर्वा २/२/५३

अवमसंयोगात्परस्य अनः अकार लोपो वा भवति ई ङि इत्येतयोः परयोः। अलुप्तवच्चपूर्वविधौ प्राप्त विकल्पोऽयम्। साम्नी, सामनी, साम्नि, सामनि। औरीमितीकारः, राज्ञि राजनि। अवमसंयोगादिति किम्? यज्वनी, कर्मणी सहचरितासहचरितयोस्सहचरिते कार्यसम्प्रत्यय इति वचनाङ्डिप्रत्ययेन सहचरितस्य ईकारस्य औकारादेशस्य ग्रहणम्, तेनेह विकल्पो न भवति। इयं राज्ञी। ऋन्नेभ्यस्त्वी इतीप्रत्ययः।

● आ धातोरघुट्स्वरे २/२/५४

लोप इत्येव, वेति निवृत्तम्, धातोराकारस्य अघुट्स्वरे परे लोपो भवति। कीलालपः, कीलालपा कीलालपे। आ इति किम्? सुपचा, शोभनं पचतीति क्विप्, धातोरिति किम्? मालाः पश्य। अघुट्स्वर इति किम्? कीलालपाः, जस्।

● ईदूतोरियुवौ स्वरे २/२/५५

धातोरित्येव। धातोर्यावीदूतौ तयोर्यथा संख्यम् इय् उव् इत्येतावादेशौ भवतः, स्वरे परे। नियौ, नियः, लुवौ लुवः। धातोरिति किम्? लक्ष्म्यौ, वध्वौ।

ईदूतोरिति किम्, सुपचौ । तपरकरणमसन्देहार्थम्। स्वर इति किम्? नीभ्याम्, लूभ्याम्। पुनस्स्वरग्रहणं सामान्यस्वरपरिग्रहार्थम्।

● सुधीः २/२/५६

ध्यै चिन्तायाम्, सुपूर्वः, शोभनं ध्यायतीति क्विप्, अतएव निर्देशात् सम्प्रसारणम् तद्दीर्घमन्त्यमिति दीर्घः। षष्ठ्येकवचनान्तमेतत्। आदिलोपोऽन्त लोपश्चेति ङसोऽकार लोपः। ईकारोऽनुवर्तते इयादेशश्च। सुधी शब्दस्य य ईकारस्तस्य इयादेशोभवति स्वरे परे, अनेकाक्षरयोरिति यत्वं प्राप्तम्। सुधियौ सुधियः। स्वर इति किम्? सुधीभिः।

● भूरवर्षाभूरपुनर्भूः २/२/५७

अत्र पद त्रयम्। षष्ठ्येक वचनान्तम्। पूर्ववत् ङसोऽकार लोपः। अकारोऽनुवर्तते उवादेशश्च भूशब्दस्य य उकारस्तस्य उवादेशो भवति स्वरे परे। अवर्षाभूरपुनर्भूः। वर्षाभूः पुनर्भूश्शब्दयोस्तु न भवति। अनेकाक्षरयोरिति वत्वं प्राप्तम्। प्रतिभुवौ, प्रतिभुवः, प्रतिभवतीति क्विप्। अवर्षाभूरपुनर्भूरिति किम्? वर्षाभ्वौ, वर्षाभ्वः। पुनर्भ्वौ पुनर्भ्वः। द्विप्रतिषेध करणमिहाप्युवादेशो न भवति। कारभ्वौ कारभ्वः।

● अनेकाक्षरयोस्त्वसंयोगाद् यवौ २/२/५८

न एकमनेकम्। अनेकमक्षरं ययोः शब्दयोः तावनेकाक्षरौ। न संयोगः असंयोगः। ईदूतोरित्येव। अनेकाक्षरयोरनेकस्वरयोः शब्दयोर्यावीदूतौ असंयोगात्परौ तयोर्यथा संख्यं य व इत्येतावादेशौ भवतः स्वरे परे। इयुवोर्बाधः। न क्षरति, चलति परवर्णम् नानुगच्छति इत्यक्षर शब्देन प्राधन्यात्स्वरा उच्यन्ते। प्रध्यौ प्रध्यः। प्रपूर्वाद्ध्यायतेः क्विप्, ग्रामण्यौ ग्रामण्यः। यवल्वौ, यवल्वः। अनेकाक्षरयोरिति किम्? नियौ, लुवौ। असंयोगादिति किम्? यवक्रियौ। डुक्रीञ् द्रव्य विनिमये कटप्रुवौ। प्रूङ् गतौ क्विप्, क्विब्वचिप्रच्छीति दीर्घः। धातोरसंयोगो विशेषयितव्यः, धातोर्यस्संयोग इति तेनेह प्रतिषेधो न भवति। उन्न्यौ, उन्न्यः। सकृल्वौ सकृल्वः। उत्पूर्वात् सकृत्पूर्वात् नयतेः लुनातेश्च क्विप्। स्वर इति किम्? ग्रामणीभ्याम्, यवलूभ्याम्। डुशब्दोऽत्रपठ्यते, सः विशेषं द्योतयति, तेन ईकारोकारान्तस्य धातोरव्ययकारके यदा पूर्वे भवतस्तदा यत्व वत्वे प्रवर्तेते। तेनेह न भवति, परमनियौ परमनियः। नयतीति क्विप् ततः परमशब्देन सह कर्मधारयः।

● भ्रूर्धातुवत् २/२/५९

भ्रू शब्दो धातुवद्भवति स्वरे परे। यथा धातोर्भूकारान्तस्य उवादेश उक्तस्तथा भ्रू शब्दस्यापि भवतीत्यर्थः। भ्रुवौ भ्रुवः स्वर इति किम्? भ्रूभिः भ्रूभ्याम्।

● स्त्री च २/२/६०

स्त्री शब्दो धातुवद्भवति स्वरे परे। यथा धातोरीकारान्तस्य इयादेश उक्तस्तथा स्त्रीशब्दस्यापि भवतीत्यर्थः। स्त्रियौ, स्त्रियः। स्वर इति किम्? स्त्रीभिः। भूस्त्रियौ धातुवदिति कर्तव्ये योगविभाग उत्तरार्थः।

● वाम्शसोः २/२/६१

स्त्री शब्दो वा धातुवद्भवति अमिशसि च परे। स्त्रियम्, स्त्रीम्, स्त्रियः स्त्रीः। धातुवद्भावपक्षे इयादेशः, अन्यत्र अम्शसोरादिर्लोपमित्यकारलोपः।

● भवतो वादेरुत्वं सम्बुद्धौ २/२/६२

वकार आदिर्यस्यावयस्य स वादिः, भवन्त् इत्यस्य यो वादिरवयवः वन्त् इत्ययं वा शब्दस्तस्य वा उत्वं भवति सम्बुद्धौ परतः। हे भोः! हे भवन्। सम्बुद्धाविति किम्? भवान्। भगवन्त्, अघवन्त् इत्येतयोरपिवादेरुत्वं वा वक्तव्यम् सम्बुद्धौ परतः। हे भगो ! हे भगवन् ! हे अघो ! हे अघवन् ! लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति वचनाद्भवतीशब्दस्यापि वा उत्वम्। हे भोः ब्राह्मणि! भवतीशब्दस्य यो वतीशब्दस्तस्य उत्वम्। पक्षे, हे भवति ब्राह्मणि !

● अव्ययसर्वनाम्नस्स्वरादन्त्यात्पूर्वोऽक्कः २/२/६३

अव्ययानि च सर्वनामानि च तदव्यय सर्वनाम्नः। अव्ययानां सर्वनाम्नां च अन्त्यात्स्वरात्पूर्वः अक् प्रत्ययो भवति। अकार उच्चारणार्थः।

> अज्ञाते कुत्सितेऽल्पे तथा ह्रस्वानुकम्पयोः।
> संज्ञायामपि विद्वद्भिः प्रत्ययोऽयं प्रकीर्तितः।।

अज्ञाते तावत् कस्येदमुच्चैः। उच्चकैः। उच्चैः। एवं नीचकैः नीचैः, शनकैः शनैः। कुत्सितमुच्चैः उच्चकैः उच्चैः। सर्वनाम्नः खल्वपि। अज्ञातः

सर्वस्सर्वकस्सर्वः। कुत्सितो यो, यकः, यः एवं सकः, सः। एषकः, एषः। सर्वनामविभक्तेः क्वचिदन्त्यात्स्वरात्पूर्वयोरक्षरयोर्वेष्यते। अज्ञातेन त्वया त्वयका, त्वया। एवं मयका मया। आख्यात विभक्तेरपि– अज्ञातः पचति, पचतकि पक्षे पचति। एवं जल्पतकि, जल्पति। अव्यय सर्वनाम्न इति किम्? वृक्षाः। अज्ञातादिष्वर्थेषु लिङ्गात् क प्रत्ययो वा वक्तव्यः। अज्ञातोऽश्वः अश्वकः, अश्वः। कुत्सितोऽश्वः अश्वकः अश्वः। अल्पं तैलं तैलकम्, तैलम्। ह्रस्वो वृक्षः वृक्षकः वृक्षः। अनुकम्पितो पुत्रः, पुत्रकः, पुत्रः। संज्ञायां देवतत्तः देवदत्तकः।

● केप्रत्यये स्त्रीकृताकारपरे पूर्वोऽकार इकारम् २/२/६४

स्त्रियां कृतः स्त्रीकृतः। स्त्रीकृतश्चासौ आकारस्त्रीकृताकारः स्त्रीकृताकारः परः यस्मात् कात्, असौ स्त्रीकृताकारपरः, स्त्रियां कृत आकारः परोयस्मात्कात् तस्मिन्के ककारे प्रत्यये प्रत्ययस्थे परे पूर्वोऽकार इकारादेशमापद्यते। सर्विका विश्विका। पूर्ववदक् प्रत्ययः। स्त्रियामादाप् अनेन इत्वम्। कारिका, हारिका। डुकृञ् करणे, हृञ् हरणे। वुणतृचाविति वुण्, यु वु झामनेति अक आदेशः। क इति किम्? नन्दना, टुनदिसमृद्धौ अस्मादिन्नन्तान्नन्द्यादेर्युरिति युः। युवुझामनेति अनादेशः। आम्प्रत्ययः। प्रत्ययइति किम्? शका शक्लृशक्तौ। पचादित्वादच्। स्त्रीकृत इतिकिम्? पुत्रकाम्या। काम्यचेति काम्य प्रत्ययः। शन्तृ प्रत्ययाद इत्यकार प्रत्ययः। आकार ग्रहणं किम्? नर्तकी, नृती गात्रविक्षेपे। शिल्पिनिवुष् इति वुष्। षडनुबन्धात्त्वी इती प्रत्ययः। पूर्ववदकादेशः। वेति वर्तते, सा च व्यवस्थित विभाषा। तेन यत्तदोर्न भवति। यका, सका। पूर्वसूत्रेणाक् प्रत्ययः क्वचिद्वा भवति। सूतिका, सूतका। पुत्रिका, पुत्रका। वृन्दारिका, वृन्दारका। ज्योतिष्येवार्थे– तारका, अन्यत्र तारिका, कन्या कुलस्य पित्रादिन एवार्थे अष्टका अन्यत्र अष्टिका।

भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तौ नामप्रकरणे
सन्धिपादो द्वितीयः।।

नामप्रकरणे तृतीयः पादः

● युष्मदस्मदो पदं पदात्षष्ठीचतुर्थीद्वितीयासुवस्नसौ २/३/१

वाम्शसोरित्यतो वेति वर्तते। युष्मदस्मदोस्सम्बन्धि यत्पदम् पदात्परं षष्ठी–चतुर्थी–द्वितीयासु बहुत्वे स्थितं तस्य यथासंख्यं वस्नस् इत्येतावादेशौ वा भवतः। रूद्रो वः प्रभुः, रूद्रो नः प्रभुः, रूद्रो युष्माकं प्रभुः, रूद्रोऽस्माकं प्रभुः। चतुर्थी–रूद्रो वो दास्यति, रूद्रो नो दास्यति, रूद्रो युष्मभ्यं दास्यति, रूद्रोऽस्मभ्यं दास्यति। द्वितीया–शिवो वो रक्षति शिवो नो रक्षति, शिवो युष्मान् रक्षति, शिवोऽस्मान् रक्षति। षष्ठी चतुर्थी द्वितीयास्विति किम्? गृहे यूयम्, वने वयम्,। युस्मदस्मदोरिति किम्? शिवस्तेषां स्वामी। पदादिति किम्? युष्माकम्, अस्माकम्। उत्तरत्र द्वित्वे एकत्वे च आदेशान्तराणां वक्ष्यमाणत्वाद्बहुत्व एव वस्नसौ विज्ञायेते।

● वां नौ द्वित्वे २/३/२

पूर्वसूत्रमनुवर्तते, वस्नसौ तु निवृत्तौ। युष्मदस्मदोस्सम्बन्धि यत्पदं पदात्परं षष्ठी चतुर्थी द्वितीयासु द्वित्वे स्थितं तस्य यथासंख्यं वां नौ इत्येतावादेशौ वा भवतः। शिवो वां स्वामी, शिवो नौ स्वामी, शिवो युवयोस्स्वामी, शिव आवयोस्स्वामी। चतुर्थी– शिवो वां ददाति, शिवो नौ ददाति, शिवो युवाभ्यां ददाति, शिव आवाभ्यां ददाति। द्वितीया–शिवो वां रक्षति, शिवो नौ रक्षति, शिवो युवां रक्षति, शिव आवां रक्षति। युष्मदस्मदोरिति किम्? शिवस्तयोः स्वामी। पदादिति किम्? युवयोः आवयोः। षष्ठी चतुर्थी द्वितीयास्विति किम्? कीदृशौ युवाम्, शोभनौ आवाम्।

● त्वन्मदोरेकत्वे ते मे त्वा मा तु द्वितीयायाम् २/३/३

अत्रैकस्मिन् सूत्रे त्रीणि सूत्राणि त्वन्मदोरित्येकं सूत्रम्। अत्र युष्मदस्मदोरित्यनुवर्तते नान्यत्। त्वन्मदोरिति चेयं षष्ठी प्रथमा द्विर्वचनस्य स्थाने इत्याहुः। तेनायमर्थः। एकत्वे एकस्यार्थस्याभिधाने सति युष्मदस्मदोर्यथा संख्यं त्वत् मद् इत्येतावादेशौ भवतः। त्वाम, माम्, त्वया, मया। एत्वमस्थानिनीत्येत्वम्। त्वत् मत्। एवं त्वयि, मयि। तवायम्, त्वदीयः। ममायं

मदीयः। ईहस्तुहित इति त्व शब्दादीय प्रत्ययः। तव पुत्रः त्वत्पुत्रः। ममपुत्रः मत्पुत्रः। एकत्व इति किम्? युष्माकमयं युष्मदीयः। अस्माकमयमस्मदीयः।

ते मे इति द्वितीयं सूत्रम्। अत्र त्वन्मदोरिति निवृत्तम्। एकत्वे इति वर्तते। षष्ठी चतुर्थीग्रहणञ्च युष्मदस्मदोः पदं पदादित्यतश्च वेति संबध्यते, तेनायमर्थः– युस्मदस्मदोस्सम्बन्धि यत्पदं पदात्परं षष्ठीचतुर्थ्योरेकत्वे स्थितं तस्य यथा संख्यं ते मे इत्येतावादेशौ भवतः। रूद्रस्ते स्वामी, रूद्रो मे स्वामी। रूद्रस्तवस्वामी, रूद्रो ममस्वामी। चतुर्थी– रूद्रस्ते दास्यति, रूद्रो मे दास्यति। रूद्रस्तुभ्यं दीयते, रूद्रो मह्यं दीयते। युष्मदस्मदोरिति किम्? रूद्रस्तस्यदीयते। पदादिति किम्? तव मम। त्वा मा तु द्वितीयायामिति तृतीयं सूत्रम्। अत्र युष्मदस्मदोः पदं पदादेकत्वे वेति च सम्बध्यते। युष्मदस्मदोस्सम्बन्धि यत्पदं पदात्परं द्वितीयायामेकत्वे स्थितं तस्य यथा संख्यं त्वा मा इत्येतावादेशौ वा भवतः। रूद्रस्त्वा रक्षति, रूद्रो मा रक्षति, रूद्रस्त्वां रक्षति, रूद्रो मां रक्षति।

● न पादादौ २/३/४

पादस्यादिः पादादिः। पादस्य श्लोकपादस्य, पदादौ स्थितं युष्मदस्मदोः पदं पदात्परं तस्य वस्नसादय आदेशाः न भवन्ति–

भूयादुमापतिरसौ युष्माकं वरदस्सदा,।
बालेन्दुशेखरश्श्रीमान्नस्माकमरिसूदनः।।
प्रणमामि विभुं देवं युवयोः पापनाशनम्।
तीव्रभक्तिं परिप्राप्यमावयोरपिकान्तिदम्।।
पिनाकपाणि समामुक्तम् युक्तं तव चेतस्सदा नृप।
अतो नाथ भयार्तस्य ममानुग्रहदो भव।।
भक्तानां शरणं नाथ त्वां सदा ब्रुवते जनाः।
विलपन्तमतोदीनं मां समुद्धर बन्धनात्।।
पादादाविति किम्? हरस्य विमलाः वाणाः पान्तुवोविततत्विषः।
येभ्यस्त्रिपुरविश्लेषाद्बिभ्यत्यद्यापि दानवाः।।

आमन्त्रितं पदात्परस्य वस्नसादय आदेशाः नेष्यन्ते। देवदत्त ! युष्माकं ग्रामः देवदत्त ! अस्माकं ग्रामः।

● चादि योगे च २/३/५

चकार आदिर्येषां ते चादयः, तैर्योगः चादियोगः। पदात्परस्य युष्मदस्मदोः, पदस्य चादि योगे सम्बन्धे सति वस्नसादय आदेशाः न भवन्ति। ग्रामो युष्माकं च स्वम्, अस्माकं च स्वम्। ग्रामो युष्मभ्यं वा दीयते, ग्रामोऽस्मभ्यं वा दीयते। शिवो युष्मांश्च रक्षति, शिवो अस्मांश्च रक्षति, ग्रामो युवयोश्च स्वम्, ग्राम आवयोश्च स्वम्। ग्रामो युवाभ्यां च दीयते, ग्राम आवाभ्यां च दीयते। शिवो युवां च रक्षति, शिव आवां च रक्षति, ग्रामस्तव वा स्वम्, ग्रामो मम वा स्वम्। ग्रामस्तुभ्यं वा दीयते। रूद्रस्त्वामेव रक्षति, रूद्रो मामेव रक्षत्ति। च वा हा अह एव इत्येतैरेव चादिभिर्योगे प्रतिषेधस्स्मर्यते नान्यैः। दर्शनार्थे धातुभिर्योगे वस्नसादयो नेष्यन्ते अचक्षुर्विज्ञानेऽर्थे, ग्रामो युष्मान्वीक्षते, ग्रामोऽस्मान्पश्यति, संवाहं करोतीत्यर्थः। अचक्षुर्विज्ञान इति किम्? रूद्रस्त्वा पश्यति, रूद्रो मा पश्यति, चक्षुभिर्वीक्षत इत्यर्थः।

● एषां विभक्तावन्त लोपः २/३/६

युष्मद् अस्मद्, त्वद् मद् एषामन्तस्य लोपो भवति विभक्तौ परस्याम्। युष्मभ्यम्। अस्मभ्यम्। भ्यस्यमोरितिभ्यमादेशः। त्वत्, मत्। अत्पञ्चम्यदित्व इति अत्, विभक्त्यधिकारे विभक्ति ग्रहणं साक्षाद्विभक्तौ लोपार्थम्। तेन प्रत्यय लोपे प्रत्यय लक्षणमिति वचनेन यत्र विभक्तिरस्ति। तत्र लोपो न भवति, युष्माकं पुत्रः, युष्मत्पुत्रः, अस्माकं पुत्रोऽस्मत्पुत्रः। वर्णान्त्यस्यविधिरिति वचनादन्त ग्रहणे लब्धे पुनरन्तग्रहणं विस्पष्टार्थम्।

● युवावौ द्विवाचिनौ २/३/७

द्वावर्थौ ब्रूते इति वाक्ये ब्रुवोवचिरिति वच्यादेशे च सञ्जाते आवश्यकाधमर्ण्ययोर्णिनिरितिणिन्, विभक्ताविति वर्तते, युष्मदस्मदोरितिच द्विवाचिनोर्द्व्यर्थ प्रतिपादकयोर्युष्मदस्मदोर्युव आव इत्येतावादेशौ भवतः विभक्तौ परस्यां युवाम्, आवाम्, युवाभ्याम्, आवाभ्याम्। अथ द्विवाचिष्वितिकस्मान्न पठ्यते? नैवं शक्यम्। इह हि युवावौ न स्याताम्। युवामति क्रान्तैरति युवाभिः, आवामति क्रान्तै रत्यावाभिः। अत्र हि युस्मदस्मदोर्द्विवाचित्वं न तु विभक्तेः। तस्मादयुष्मदस्मदोर्द्विवाचित्वे सति सर्वत्र युवावौ भवतः। त्वम्, अहम्, यूयम्, वयम्, तुभ्यम्, मह्यम्, तव मम इत्येतान्वर्जयित्वा।

तेन युवामतिक्रान्तोऽतित्वम्। आवामतिक्रान्तोऽत्यहम्। युवामतिक्रान्तोऽतियूयम्, आवामतिक्रान्तोऽतिवयम्। युवामतिक्रान्ताय अतितुभ्यम्, आवामतिक्रान्ताय अतिमह्यम्। युवामतिक्रान्तस्य अतितव, आवामति क्रान्तस्य अतिमम।

● अमौचाम् २/३/८

युष्यदस्मद्भयां परयो अम्, औ इत्येतयोः आम् आदेशो भवति। त्वाम् माम्, युवाम्, आवाम्। ननु सहचरितासहचरितयोरित्यादिवचनादौकारस्य द्वितीया द्विवचनस्यैव ग्रहणं स्यात्? सत्यम्, व्याप्तेर्न्यायात् सर्वस्यैव भविष्यति।

● आन्शसः २/३/९

युष्मदस्मद्भ्याम् परस्य शसः आन् आदेशो भवति, युष्मान्ब्राह्मणान्, अस्मान् ब्राह्मणान्। शसि सस्य च न इत्यनेन नास्ति सिद्धिः। युष्मान्कुलानि, अस्मान् कुलानि, इत्यत्र हि जस्शसोश्शिः भावस्स्यात्।

● त्वमहं सौ सविभक्त्योः २/३/१०

सह विभक्त्या वर्तते ये युष्मदस्मदी ते सविभक्तिनी। युष्मदस्मदोस्सौ परे सविभक्तिकयोः त्वमहमित्येतावादेशौ भवतः, त्वम्, अहम्।

● युयं वयं जसि २/३/११

सविभक्त्योरित्यनुवर्तते। उत्तर सूत्रयोश्च युष्मदस्मदोर्जसि परे सविभक्तिकयोः यूयं वयमित्येतावादेशौ भवतः। यूयम्, वयम्।

● तुभ्यं मह्यं ङयि २/३/१२

युष्मदस्मदोर्ङे प्रत्यये परे सविभक्तिकयोः तुभ्यं मह्यमित्येतावादेशौ भवतः तुभ्यम्, मह्यम्।

● तव मम ङसि २/३/१३

युष्मदस्मदोः ङसि प्रत्यये परे सविभक्तिकयोः तव मम इत्यतावादेशौ भवतः। तव, मम।

● अत्पञ्चम्यद्वित्वे २/३/१४

युष्मदस्मद्भ्यां परा पञ्चमी अत् भवति, अद्वित्वे, द्वित्व विषये या

पञ्चमी तां वर्जयित्वा। त्वत्, मत्, युष्मत्, अस्मत्, अद्वित्व इति किम्? युवाभ्याम्, आवाभ्याम्।

● भ्यसभ्यम् २/३/१५

युष्मदस्मद्भ्यामुत्तरं चतुर्थीवहुवचनं भ्यस् भ्यमादेशमापद्यते। युष्मद्भ्यांदीयते, अस्मद्भ्यां दीयते।

● सामाकम् २/३/१६

सेनयुक्तः सयुक्तः, सयुक्त, आम्–साम्। तत्स्थालोप्या इत्यतो प्रत्यय निर्देशाद् युक्त शब्दस्य लोपः। युष्मदस्मद्भ्यां परस्य सामः आकमादेशो भवति। युष्माकम्, अस्माकम्। ननु चाव्यभिचारादामस्समकारस्यैव ग्रहणं भविष्यती त्यनर्थकं मकारोपादानम्? उच्यते– आकमादेशे कृते यस्सकारागमः प्राप्नोति तन्निवृत्त्यर्थम्।

● एत्वमस्थानिनि २/३/१७

स्थितिस्स्थानम्, आदेशस्य स्थानं विद्यते यत्र स स्थानी, अविद्यमानस्स्थानी यस्येति बहुव्रीहिः। युष्मदस्मदोरन्त्यस्य एत्वं भवति, अस्थानिनि, अकृतादेशे विभक्तिवचने परे। त्वया–मया, युवयोः–आवयोः, त्वयि–मयि। स्थानिनि इति किम्? त्वत् मत्, युष्मत्, अस्मत्, अत्पञ्चम्यद्वित्व इति ङसिङसोरत् आदेशः।

● आत्वं व्यञ्जनादौ २/३/१८

अस्थानिनीत्येव, युष्मदस्मदोरन्त्यस्य एत्वं भवति। व्यञ्जनादौ अस्थानिनि विभक्तिवचने परे एत्वस्य बाधः। युवाभ्याम्, आवाभ्याम्। युष्माभिः, अस्माभिः। युष्मासु, अस्मासु। अस्थानिनीति किम्? युष्मभ्यम्, अस्मभ्यम्।

● रैः २/३/१६

रै शब्दस्य आत्वं भवति व्यञ्जनादौ विभक्तौ परतः, राः, राभ्याम्, राभिः। व्यजनादाविति किम्? रायो भावः रैता, रैत्वम्।

● अष्टनः सर्वासु २/३/२०

अष्टन् शब्दस्यात्वं भवति सर्वासु विभक्तिषु परासु, अष्टाभिः, अष्टाभ्यः,अष्टाभ्यः, अष्टानाम्, अष्टासु।

● औ तस्माज्जश्शसोः २/३/२१

तस्मादष्टनःकृताकारात्परयोः जस् शसोरौत्वं भवति। अष्टौ तिष्ठन्ति, अष्टौ पश्य। तस्मादिति किम्? अष्टतिष्ठन्ति, अष्ट पश्य। तस्माद् ग्रहणेनाष्टन् शब्दः कृताकारः परामृश्यते। ननु जश्शसोः परयोः कृताकार एवासौ भवतीति किं तस्माद्ग्रहणेन? उच्यते– एतदेव तस्माद्ग्रहणं ज्ञापयति, अष्टनो विकल्पेनात्वं भवतीति। तेन अष्टभिः अष्टभ्यः, अष्टभ्यः, अष्टनाम्, अष्टसु।

● अर्वन्नर्वन्तिरसावनञः २/३/२२

अर्वन् शब्द अनञः। नञः परो यदा न भवति तदा अर्वन्तिरादेशमापद्यते, असौ–सिकारे परे न भवति। आदेशे इकार उच्चारणार्थः। अर्वन्तौ अर्वन्तः, अर्वन्तम्, अर्वता, अर्वद्भ्याम अर्वद्भिः, अर्वत्सु। अविभक्तावपीष्यते। अर्वन इदमार्वतम्। तस्येदमित्यण्। आर्वती, झ्नेभ्यस्त्वी इतीकारः। आर्वत्यम्, यण् च प्रकीर्तित इति यण्। असाविति किम्? अर्वा। अनञ इति किम्? अनर्वाणौ।

● सौ च मघवन्मघवा वा २/३/२३

मघवन् शब्दस्य मघवन्त आदेशो भवति प्रत्ययान्ते परे सौ, सिकारे च। मघवन्, मघवन्तौ, मघवन्तः, मघवन्तम्, मघवता, मघवद्भ्याम्, मघवत्सु मघवत इदं माघवतम्। मघवतो भावः माघवत्यम्। पक्षे मघवाः, मघवानौ मघवानः। मघोनः, मघोना, मघोने। मघोन इदं माघवतम्।

● जराजरस्स्वरे वा २/३/२४

जराशब्दः जरसादेशो वा भवति स्वरे परे। जरसौ, जरसः, जरसा जरसे। जरामतिक्रान्तानि कुलान्यतिजरांसि। घुट्स्वशदघुटि नुः। सान्तमहतोरिति दीर्घः। पक्षे अति जराणि। स्वरे इति किम्? जरा, जराभिः।

● त्रि चतुरोः स्त्रियां तिसृचतसृ विभक्तौ २/३/२५

वेति निवृत्तम्, स्वर इति च। त्रि चत्वार इत्येतयोः स्त्रियां वर्तमानयोर्यथासंख्यं तिसृ चतसृ इत्येतावादेशौ भवतः विभक्तौ परस्याम्। तिस्रः, चतस्रः,

तिसृभिः, चतसृभिः, तिसृणाम्, चतसृणाम्, तिसृषु, चतसृषु। स्त्रियामिति किम्? त्रयः, चत्वारः। त्रीणि, चत्वारि। विभक्ताविति किम्? तिसृणां पूरणी तृतीया, चतसृणां पूरणीचतुर्थी, अन्तस्थोडेर्षोरिति चतुरस्थकारागमः, नदादित्वादीकारः।

● तौ रं स्वरे २/३/२६

तौ तिसृ चतसृ शब्दौ रत्वमापद्येते स्वरे परे ङि घुटोररादेशः प्राप्तः, शसि अग्निवद्भावः प्राप्तः, ङसिङसोः ऋदन्तात्सपूर्व इत्युकारादेशः प्राप्त, तेन बाध्यन्ते। तिस्रस्तिष्ठन्ति, तिस्रः पश्य, चतस्रस्तिष्ठन्ति, चतस्रः पश्य। प्रियास्तिस्रो ब्राह्मण्यो यस्य सः प्रियतिस्रः। तस्मात् प्रियतिस्र आगतः प्रियचतस्र आगतः, प्रियतिस्रस्स्वम्, प्रियचतस्रस्स्वम्। प्रियतिस्रि, प्रियचतस्रि। स्वर इति किम्? तिसृभिः, चतसृभिः।

● न नामि दीर्घम् २/३/२७

न युक्त आम् नाम्, तस्मिन्नामि, तौ तिसृ चतसृ शब्दौ नुकारागमं युक्ते आमि परे दीर्घम् नापद्येते। दीर्घमामि सनाविति दीर्घः प्राप्तः। तिसृणाम्, चतसृणाम्।

● नृ वा २/३/२८

नृ शब्दस्य नामि परेदीर्घो वा भवति नृणाम् नृणाम् वा।

● त्यदादीनामविभक्तौ २/३/२९

त्यद्, तद्, यद्, एतद्, अदस् इदम् द्वि एषाम् त्यदादीनामन्त्यस्य अकारादेशो भवति विभक्तौ परतः। स्यः, सः, यः, एषः, द्वौ। त्यदादीनामिति किम्? भवन्तौ भवन्तः। पुनर्विभक्तिग्रहणं साक्षाद्विभक्तौ त्यदाद्यत्वार्थम्। तेन प्रत्ययलक्षणेन यत्रास्ति विभक्तिस्तत्र न भवति। तस्य पुत्रः तत्पुत्रः। उत्तराण्यपि कार्याणि त्यदादीनां साक्षाद्विभक्ताविष्यन्ते।

● किं कः २/३/३०

किं शब्दस्य ककारादेशो भवति, विभक्तौ परस्याम्। कः, कौ, केनं, कस्मै।

● दोऽद्वेर्मः २/३/३१

त्यदादीनां दकारस्य मकारादेशो भवति, विभक्तौ परस्याम् अद्वेः, द्वि शब्दस्य दकारं वर्जयित्वा। इमम्, इमौ, इमम्, इमान्, अमीभिः। अद्वेरिति किम्? द्वौ, द्वाभ्याम्।

● सौ सः २/३/३२

त्यदादीनां दकारस्य सौ, सिकारे परे सकारादेशो भवति र एषः।

● इदमियमयं पुंसि २/३/३३

सावित्येव। त्रिचतुरोस्त्रियामित्यतस्त्रियामित्यनुवर्तते, इदं शब्दर विषये इयमादेशो भवति सौ परे पुंसि विषये। अयमादेशश्च। इयं गं रूद्रः। नपुंसकें त्वादेशाभावादिदं शब्द एव, इदं वनम्।

● अद्व्यञ्जनेऽनकः २/३/३४

अविद्यमानोऽक् प्रत्ययः यस्य इदमः असावनकः, इदमित्येव अक प्रत्ययरहितस्य इदमः विभक्ति व्यञ्जने परे अकारादेशो भव आभ्याम्, एभिः, एषु। व्यञ्जन इति किम्? इदं वान्। अनक इ अज्ञातै एभि इमकैः। तन्मध्यपतितस्तदग्रहणेन गृह्यत इत्यक् प्रत्यय स इदमादेशस्स्यात्।

● टौ सोरनः २/३/३५

अनक इत्यनुवर्तते। सावौसिलोपश्चेत्यतः प्राक्। अक् प्रत्यय इदमः अन आदेशो भवति टा ओस् इत्येतयोः परयोः। अनेन, अनये इति किम्? इमकेन इमकयोः। इदम एतदश्चद्वितीया टा ओस् इत्ं एन आदेशो वक्तव्यः अन्वादेश विषये। यत्रैकस्य वस्तुनः किं पुनरन्यद्विधीयते सोऽन्वादेशः। इमं शिष्यं वेदमध्यापय अथो एनं व्याकरणमध्यापय, अनेन शिष्येण श्लोकः पठितः अथो एनेन व्याकरणमप्यधीतम्। अनयोः शिष्ययोः शोभनं शीलम्। अथो एनयोः प्रभूतं स्वम्। एतं शिष्यं वेदमध्यापय। अथो एनं व्याकरणमध्यापय। एतेन शिष्येण श्लोकः पठितः, अथो एनेन व्याकरणमधीतम्। एतयोर्विप्रयोश्शोभनं शीलम्, अथो एनयोः प्रभूतं स्वम्।

● तस्माद्भिर्भिसः २/३/३६

तस्मादिदमः अनकः परस्य भिसः भिरादेशो भवति, अमीभिः। अनक इति किम्? अज्ञातैरमीभिरमुकैः।

● सावौसिलोपश्च २/३/३७

अदसः अन्त्यस्य औत्वं भवति सौ परे सेश्च लोपः। असौ, अमुकौ।

● उत्वम्मात् २/३/३८

अदसस्सम्बन्धी यो मकारस्तस्मात्परस्य वर्णस्य उत्वं भवति। अमुम्, अमून् अमुष्मै, अमुष्य, अमुष्मिन्। यत्र मात्परो वर्णो द्विमात्रस्तत्र द्विमात्र एवादेशः स्थानेऽन्तरतम इति वचनात्। अमूम्, अमू, अमूः। मादिति किम्? अमुकाभ्याम्, कात्परस्य तु वर्णस्य न भवति।

● ए बहुत्वे त्वी २/३/३६

मादित्येव, अदसो यो मकारस्तस्मात्परस्य बहुवचनस्य एकारस्य ईकारो भवति, उत्वं प्राप्तम्, अमी, अमीभ्यः अमीषाम्। बहुत्व इति किम्? अमू, अदस् त्यदाद्यत्वम्। स्त्रियामादाप्, औरीम्, अवर्ण इवर्णे ए, अदसः पदे मः, मत्वे कृत्वे उत्वंमादिति द्विमात्रस्य ऊत्वम्।

● अपांभेदः २/३/४०

अप् इत्यस्य विभक्ति भकारे परे दत्वं भवति, अद्भिः, अद्भ्यः, भ इति किम्? अप्सु। विभक्ति ग्रहणं किम्? अपां भारः अब्भारः।

● विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनाञ्च २/३/४१

व्यञ्जनमादिर्येषां ते व्यञ्जनादयः, ततो द्वन्द्वः, अनड्वांश्च नहिश्च, वन्सि चेत्यपि द्वन्द्वः। अनड्वाह् इत्यस्य अनडुहश्चेत्युत्वम् अनेन ह्रस्यदः, पदान्ते धुटां प्रथम इति दस्य तः। ततः पञ्चमादेशः, अनड्वाह्, नह्, वन्स इत्येतेषां दत्वं भवति। विरामे व्यञ्जनादौ च सति। परवर्णानुपलब्धिर्विरामः। शोभना अनड्वाहो यत्र नगरे तत् स्वनडुत्, स्वनडुद्भ्याम्, स्वनडुत्सु, उपानत्, उपानद्भ्याम्, उपानत्सु,। स्वनडुदित्यत्र विरामव्यञ्जनादावित्युत्वम्। शोभनाः विद्वान्सो यत्र नगरे तत् सुविद्वत्, सुविद्वद्भ्याम्, सुविद्वद्भिः, सुविद्वत्सु।

अनड्वानित्यस्य दत्वं न भवति, मोनुरिति नुकारागमविधानसामर्थ्यात्। विरामव्यञ्जनादिष्विति किम्? अनड्वाहौ, उपानहौ, विद्वांसौ, स्मग्रहणे कर्तव्ये व्यञ्जनग्रहणं सामान्य व्यञ्जनपरिग्रहार्थम्, तेन अनडुत्ता, अनडुत्त्वम्, उपानत्ता, विद्वत्ता, ता त्वौ भावे इति ता त्वौ प्रत्ययौ, कुत्सितोऽनड्वान् अनडुत्पाशः, ईषदसमाप्ता उपानत् उपानत्कल्पा, कुत्सितो विद्वान् विद्वत्पाशः, तमादित्वात्कल्प पाशौ प्रत्ययौ। नृ वेत्यतो वेत्यनुवर्तते, सा च व्यवस्थितविभाषा, तेन यकारे तद्धिते परे न भवति। आनडुह्यम्, औपानह्यम्, वैदुष्यम्, यण्च प्रकीर्तित इति यण् प्रत्ययः। एवमुत्तरत्र।

● स्रसिध्वसोश्च २/३/४२

विराम व्यञ्जनादिष्विति वर्तनेन सम्बुद्धावित्यतः प्राक् स्रस् ध्वस् इत्येतयोः क्विपि सति लुप्तानुषङ्गयोः दत्वं भवति विराम व्यञ्जनादिषु। उखास्रत् उखास्रद्भ्याम्, उखास्रत्ता। पर्णध्वत्, पर्णध्वद्भ्याम्, पर्णध्वत्ता। उखायां स्रंसते पर्णानि ध्वंसत इति क्विप्। अनिदनुबन्धेति न लोपः, विराम व्यञ्जनादिष्विति किम्? उखास्रंसौ, पर्णध्वंसौ।

● हशषच्छान्ते जादीनां डः २/३/४३

हश्च, शश्च, षश्च, छश्च ते हशषच्छाः, हशषच्छा अन्ते येषां ते हशषच्छान्ताः?, इज् आदिर्येषांते इजादयः, यजेस्स्वपिवचीति सम्प्रसारणे कृते इजितियद्रूपंतद् गृह्यते,ततो द्वन्द्वः। अन्तः शब्दः प्रत्येकमभिसम्बध्यते। हकारान्तानां शकारान्तानां षकारान्तानां छकारान्तानां इजादीनां च यज् सृज् मृज राजृ भ्राजृ भ्रस्ज व्रश्च परिव्राज् इत्येतेषां डत्वं भवति विरामव्यञ्जनादिषु। हकारान्तानाम् – मधुलिट् मधुलिड्भ्याम्, मधुलिट्सु, मधुलिट्त्वम्, मधुलिहो भावः, कुत्सितो मधुलिट् मधुलिट्पाशः। लिह् आस्वादन, मधुलेढीति क्विप्। शकरान्तानाम्–सुविट्, सुविड्भ्याम्, सुविट्सु, सुविट्त्वम्, विश् प्रवेशने, शोभनं विशतीति क्विप्। षकारान्तानाम्– सुत्विट् सुत्विट्सु, सुत्विट्त्वम्, त्विष् दीप्तौ, शोभनं त्वेषतीति क्विप्। एवं षट्, षड्भ्याम्,षट्सु, षण्णांभावः षट्त्वम्, हकारान्तानां शब्दप्राट्, शब्दप्राड्भ्याम्, शब्दप्राट्त्वम्। प्रच्छ ज्ञीप्सायाम्, शब्दं पृच्छतीति क्विप्, किब्वचिप्रच्छिश्रिद्रुभ्रू इत्यादिना क्विप्, दीर्घश्च। इजादीनाम्– देवेट्, देवेड्भ्याम्, देवेट्त्वम्, यज देवता, देवताः यजतीति क्विप्, रज्जुसृट्, रज्जुसृड्भ्याम्, रज्जुसृट्त्वम्। सृज विसर्गे। रज्जुं सृजतीति

क्विप्। कंसपरिमृद्, कंसपरिमृड्भ्याम्, कंसपरिमृद्त्वम्। मृजूष् शुद्धौ। कंसं परिमार्ष्टीतिक्विप्। विराट्, विराड्भ्याम्, विराट्त्वम्, राजृदीप्तौ, विराजतीति क्विप्, विभ्राट्, विभ्राड्भ्याम्, विभ्राट्त्वम् भ्राजृदीप्तौ, विभ्राजतीति क्विप्। धानाभृट्, धानाभृड्भ्याम्, धानाभृट्त्वम्, भ्रस्जपाके धानाभ्रज्जतीति क्विप्। स्कोस्संयोगाद्योरिति सिलोपः, ग्रहिज्या वयीति सम्प्रसारणे। मूलवृट्, मूलवृड्भ्याम्, मूलवृट्त्वम्। ओ व्रश्चू छेदने, मूलानि वृश्चतीति क्विप्, पूर्ववत्सम्प्रसारणे, संयोगादेर्धुट् इति श लोपः, परिव्राट् परिव्राड्भ्याम्, परिव्राट्त्वम्। व्रज गतौ परिपूर्वः, परिव्रजतीति क्विप्। विराम व्यञ्जनादिष्विति किम्? मधुलिहौ, देवेटौ। वेति वर्तते, सा च व्यवस्थित विभाषा, तेनेह न भवति। सर्पिष्षु, धनुष्षु, दोष्षु।

● दादेर्हस्य गः २/३/४४

दकार आदिर्यस्यावयवस्य स दादिः। धात्ववयवस्य दादेर्हकारान्तस्य गत्वं भवति विरामव्यञ्जनादिषु, गोधुक्, गोधुग्भ्याम्, गोधुक्त्वम्, दुह प्रपूरणे गां दोग्धीति क्विप्। हचतुर्थान्तस्य धातोरिति दस्य धः, धत्वे कृते अकृतवद्भावादनेन हस्य गः। दादेरिति किम्? मधुलिट् मधुलिड्भ्याम् मधुलिट्त्वम्, विरामव्यञ्जनादिष्विति किम्? गोदुहौ।

● चवर्गदृगादीनाञ्च २/३/४५

चस्य वर्गः चवर्गः, दृगादिर्येषां ते दृगादयः। व्यञ्जनान्तस्य यत्सुभोरिति वचनाद् गत्वम्, ततो द्वन्द्वः। च वर्गान्तस्यशब्दस्य सृदृगादीनां च, दृश्, स्पृश ऋत्विज्, दधृष्, स्रज्, दिश्, उष्णिह् इत्येतेषामन्त्यस्य गत्वं भवति विराम व्यजनादिषु। स्रक्, स्रग्भ्याम्, स्रक्त्वम्, सुयुक्, सुयुग्भ्याम्, सुयुक्त्वम्। युजिर्, योगे, सु पूर्वः, शोभनं युनक्तीति क्विप्। दृगादीनाम्—दृक्, दृग्भ्याम्, दृक्त्वम्, घृतस्पृक्, घृतस्पृग्भ्याम्, घृतस्पृक्त्वम्, दिक्, दिग्भ्याम्, दिक्त्वम्, उष्णिक्, उष्णिग्भ्याम्, उष्णिक्त्वम्, व्यञ्जनादिष्विति किम्? स्रजौ, दिशौ, ऋत्विजौ।

● मुहादीनां वा २/३/४६

मुह, द्रुह, ष्णुह, ष्णिह, इत्येतेषां गत्वं वा भवति विरामव्यञ्जनादिषु द्रुहेर्दादेर्हस्य ग इति नित्यं गत्वं प्राप्तम्, अन्येषां डत्वम् प्राप्तम्। उन्मुक्, उन्मुग्भ्याम्, उन्मुक्त्वम्, पक्षे उन्मुट्, उन्मुड्भ्याम्, उन्मुट्त्वम्। मुह वैचित्ये,

उत्पूर्वः, उन्मुह्यतीति क्विप्। शत्रुध्रुक्, शत्रुध्रुग्भ्याम्, शत्रुध्रुक्त्वम्, पक्षे शत्रुध्रुट्, शत्रुध्रुड्भ्याम्, शत्रुध्रुट्त्वम्, द्रुह जिघांसायाम्। शत्रवे द्रुह्यतीति क्विप्। हचतुर्थान्तस्येति दस्य धः, प्रस्नुक् प्रसनुग्भ्याम्, प्रस्नुक्त्वम्, पक्षे प्रस्नुट्, प्रस्नुड्भ्याम्, प्रस्नुट्त्वम् , ष्णुह उद्गिरणे, प्रच्छतीति क्विप्, प्रस्निका, प्रस्निग्भ्याम्, प्रस्निक्त्वम्, पक्षेः प्रस्निट्, प्रस्नुह्यतीति। प्रस्निड्भ्याम्, प्रस्निट्त्वम्, विराम व्यञ्जनादिष्विति किम्? उन्मुहौ उन्मुहः।

● ह चतुर्थान्तस्य धातोस्तृतीयादेरादिचतुर्थत्वमकृतवत् २/३/४७

हश्च, चतुर्थश्च तौ ह चतुर्थौ, तौ अन्तौ यस्य स हचतुर्थान्तः, तृतीय आदिर्यस्य स तृतीयादिः, आदेश्चतुर्थ आदिचतुर्थः, तस्य भावः आदि चतुर्थ त्वम्, न कृतम् अकृतम्, अकृतमिव अकृतवत्, धात्ववयवस्य हकारान्तस्य चतुर्थान्तस्य च तृतीयादेर्य आदिस्तस्य स्ववर्गात् प्रत्यासत्तेः चतुर्थ आदेशो भवति विरामव्यञ्जनादिषु, तच्चादिचतुर्थत्वमकृतवद्भवति। तेन दादेर्हस्य ग इति यद् गत्वम्, तत्कृतेऽपि चतुर्थत्वे प्रवर्तते। गोधुक्, गोधुग्भ्याम्, गोधुक्त्वम्, दुह् प्रपूरणे, गां दोग्धीति क्विप्, काष्ठधक्, काष्ठधग्भ्याम्, काष्ठधक्त्वम्, दह भस्मी करणे, काष्ठानि दहतीति क्विप्। निघुट् निघुड्भ्याम्, निघुट्त्वम्, गूहूसंवरणे, नि पूर्वः, निगूहतीति क्विप्। अर्थभुत्, अर्थभुड्भ्याम्, अर्थभुड्त्वम्। वुध अवगमने, अर्थं वुध्यत इति क्विप्। विधप्, विधब्भ्याम्, विधप्त्वम्, दम्भु दम्भे, विदभ्नोतीति क्विप्, अनिदनुबन्धानामिति न लोपः। हचतुर्थान्तस्येति क्विप्, सुगण्, सुगण्भ्याम्, सुगण्त्वम्। गणसंख्याने, सु पूर्वः, शोभनं गणयतीति क्विप्। तृतीयादेरिति किम्? विक्रुत्, विक्रुड्भ्याम्, विक्रुत्त्वम् विपूर्वः, विक्रुध्यतीति क्विप्। धात्ववयवस्येति किम्? दामलिट्, लिह् आस्वादने दामलेढीति क्विप्। विरामव्यञ्जनादिष्विति किम्? गोदुहौ। ननु आदिचतुर्थत्वे कृते दादेर्हस्य ग इति सूत्रारम्भसामर्थ्याद् गत्वं भविष्यतीति किमकृतवद् ग्रहणेन? अस्त्येतत्। सूत्रारम्भसामर्थ्यात् तुदादेः धातोरादिचतुर्थत्वमेव न स्यात्।

● सजुषाशिषोरः २/३/४८

सजुष् आशिष् इत्येतयोः रेफो भवति विराम व्यञ्जनादिषु। हशषच्छेति डत्वम् प्राप्तम्, सजूः, सजूर्भ्याम्, सजूस्त्वम्, आशीः, आशीर्भ्याम्, आशीस्त्वम्। विराम व्यञ्जनादिष्विति किम्? सजुषौ, आशिषौ, आशीः, शब्दस्य आङ्

उपसर्गो न प्रधानम्, तेन मित्रशीः, आर्यशीः मित्रं शास्ति, आर्यम् शास्तीति क्विप्।

● इरुरोरीरूरौ २/३/४६

धातोरित्येव धातोर्यौ इरूरौ तयोर्यथा सङ्ख्यं ईर् ऊर् इत्येतावादेशौ भवतः विरामव्यञ्जनादिषु, गीः, गीर्भ्याम्, गीर्भिः, गीर्भ्यः गीर्षु, गीस्ता, गीस्त्वम्, धूः, धूर्भ्याम्, धूर्भिः, धूर्भ्यः, धूर्षू, धूस्ता, धूस्त्वम्, गॄ निगरणे, धुर्वी हिंसायाम्, गरणं गीः, धूर्वणं धूः इति कृत्ययुटोऽन्यत्रापीति किम्। ऋदन्तस्येति इट्, राल्लोप्याविति व लोपः। धातोरिति किम्? सर्पिर्भ्याम्, धनुर्भ्याम्, इसुस्दोषामिति रः, विराम व्यञ्जनादिष्विति किम्? गिरौ, गिरः, धुरौ, धुरः।

● अह्नस्सः २/३/५०

अहन् इत्यस्य सत्वं भवति विरामव्यञ्जनादिषु, अहः नपुंसकात्, स्यमोरिति सि लोपः। अहोभ्याम्, अहस्सु, अहस्त्वम्। विरामव्यञ्जनादाविति किम्? अहनी, अहानि।

● संयोगान्तस्य लोपः २/३/५१

संयोगस्य अन्तस्संयोगान्तः। लिङ्गस्य यः संयोगः तस्य योऽन्तः तस्य लोपो भवति विरामव्यञ्जनादिषु। महान्, विद्वान्, पुमान्, पुंभिः, पुंसु। वेति वर्तते सा च व्यवस्थितविभाषा, तेनेह न भवति। ऊर्क्, ऊर्ग्भ्याम्, ऊर्क्सु ऊर्क्ता, ऊर्क्त्वम्। ऊर्ज वल प्राणनयोः, ऊर्जनमिति क्विप् तथा पुंसः शिङ् वर्जिते घोषे परे संयोगान्त लोपोनेष्यते, पुमांश्चासौ कोकिलः, पुंस्कोकिलः एवं पुंश्चकोरः, पुंष्टीटिभः। पुंसः फलनम् पुंस्फलनम्। शिङ्वर्जित इति किम्? पुंसःशरः पुंशरः। अघोष इति किम्? पुंसोदासः पुंदासः।

● संयोगादेर्धुटः २/३/५२

संयोगस्यादिः, संयोगादिः, संयोगादेर्धुटो लोपो भवति विरामव्यञ्जनादिषु। गोरट्, गोरड्भ्याम्, गोरड्भिः, गोरड्भ्यः गोरट्सु, गोरट्ता, गोरट्त्वम्, कुत्सिता गोरट् गोरट्पाशः, रक्षपालने गोशब्दपूर्वः, गोरक्षतीति क्विप्, अनेन ककार लोपः, हशषच्छेति डः, यूपतट्, यूपतड्भ्याम्, यूपतट्त्वम्, यूपतक्षो भावः यूपतट्त्वम् तक्ष त्वक्ष तनू करणे, यूप पूर्वः, यूपं तक्ष्णोतीति क्विप्। विराम व्यञ्जनादिष्विति किम्?गो रक्षौ, गो रक्षः ,यूपतक्षौ, यूपतक्षः।

●स लिङ्गान्तनकारस्य २/३/५३

लिङ्गस्यान्तः, लिङ्गान्तः, ततः कर्मधारयः, लिङ्गस्यान्तो यो नकारस्तस्य लोपो भवति विरामव्यञ्जनादिषु। राजा, राजभ्याम्, राजभिः, राजभ्यः, राजसु, राजता, राजत्वम्। लिङ्गान्तनकारस्येति किम्? अहन्। हन हिंसागत्योः, ह्यस्तनी दि, अड्धात्वादिः, अन्वि, अदादेर्लुक्, व्यञ्जनाताद्दिस्योरिति दि लोपः। लिङ्गग्रहणेऽनुवर्तमाने पुनर्लिङ्गग्रहणमुत्तरत्र क्वचिद्धातोरपिकार्य प्रतिपत्त्यर्थम्, तेन मज्जतिभृज्जतीत्यादिसिद्धम्। विरामव्यञ्जनादिष्विति किम्? राजानौ राजानः।

● न सम्बुद्धौ २/३/५४

लिङ्गान्त नकारस्य सम्बुद्धौ परस्यां न लोपो न भवति। हे राजन्, हे तक्षन् ! नञानिर्दिष्टमनित्यम्, तेन नपुंसकलिङ्गनकारस्य सम्बुद्धौ परस्यां लोपो वा भवति ! हे सामन् ! हे साम ! हे वर्मन् ! हे वर्म ! हे शर्मन् ! हे शर्म ! लिङ्गान्तनकारस्यासम्बुद्धावित्येकोयोगो न कृतः वैचित्र्यात्।

● न संयोगान्तलोपोऽलुप्तवत् २/३/५५

संयोगस्यान्तः संयोगान्तः नश्च संयोगान्तश्च तौ न संयोगान्तौ तयोर्लोपः नसंयोगान्त लोपः, नकारस्य संयोगान्तस्य च यो लोपस्सः अलुप्तवद्भवति, लोपे कृते यत्प्राप्तं तन्न भवतीत्यर्थः, राजभ्याम्, राजभिः, राजसु, अत्र नकार लोपस्य अलुप्तवद्भावादकारो दीर्घो न भवति, राजभिः, ऐस् न भवति। राजसु, एत्वं न भवति। पुमान्, गोमान्, संयोगान्तलोपस्य अलुप्तवद्भावान्नलोपाभावः, सन्धिकार्ये णत्वे च कर्तव्ये अलुप्तवद्भावो नेष्यते। हस्त्यश्वम्, दण्डिषु। स्वामीश्वराधिपतीति, तत्साधुकारिष्विति च ज्ञापकात्।

● इसुस्दोषां घोषवति रः २/३/५६

इस् उस् दोस् इत्येतेषां रेफो भवति घोषवति परे, षत्वस्य बाधः सर्पिर्भ्याम् धनुर्भ्याम्। घोषवतीतिकिम्? सर्पिष्षु, धनुष्षु, दोष्षु।

● धुटां तृतीयः २/३/५७

धुटां तृतीयो भवति घोषवति परे, अग्निमद्भ्याम्, ज्ञानभुद्भ्याम्,मथ विलोडने, बुध अवगमने, अग्निं मथ्नातीति, ज्ञानं बुध्यत इति क्विप्, मज्जति, टुमस्जो शुद्धौ, वर्तमाना ति, अन्वि, लृतुलसाः दन्त्या इति स्थान सावर्ण्यात् सस्य तृतीयो दः, तवर्गश्चटवर्गेति दस्य जः। घोषवतीति किम्? जगत्सु।

● अघोषे प्रथमः २/३/५८

धुटामित्येव। अघोषे परे धुटां प्रथमो भवति, अग्निमत्सु, ज्ञानभुत्सु, विद्वत्सु, उपानत्सु, इच्छति। अघोष इति किम्? ज्ञानबुधौ।

● वा विरामे २/३/५९

विरामे अवसाने धुटां प्रथमो वा भवति, तृतीयग्रहणानुवृत्त्या च पक्षे तृतीयः, ज्ञानभुत्, ज्ञानभुद्, अग्निमत् अग्निमद्।

● रेफसोर्विसर्जनीयः २/३/६०

रेफ सकारयोर्यथादर्शनं विसर्जनीयं भवति, गीः, धूः, पयः, यशोभिः, पयोभिः।

● विरामव्यञ्जनादावुक्तं नपुंस्कात्स्यमोर्लोपेऽपि २/३/६१

विरामे व्यञ्जनादौ च यत्कार्यमुक्तम्, तन्नपुंसकलिङ्गात्परयोस्स्यमोः लोपेऽपि कृते सति भवति नपुंसकस्यैव। शोभना द्यौर्यस्मिन्नहनि तत्सुद्यु। अत्र दिव उत्वम्, शोभनाः पन्थानो यत्र नगरे तत्सुपथि। अत्रापि पथि शब्दस्य न लोपः। म्भग्रहणेकर्तव्ये व्यञ्जनग्रहणं व्यञ्जन शब्दोच्चारणेन विहितस्य कार्यस्य प्रतिपत्त्यर्थम्। तेन यत् तत् इत्यत्र त्यदाद्यत्वं न भवति। यद्येवम् इदं कुलमित्यत्राद्व्यञ्जनेऽनक इत्यकारादेश प्राप्नोति, सत्यम्, अपि शब्दोऽत्र पठ्यते, तेन न भवति।

भट्टोग्रभूति कृतायां शिष्यहितायां वृत्तौ नामप्रकरणे युष्मत्पादः तृतीयः।

नामप्रकरणे चतुर्थः पादः

● अव्ययीभावादकारान्ताद्विभक्तीनाममपञ्चम्याः २/४/१

अकारान्तादव्ययीभावात्परासां विभक्तीनाममादेशो भवति, अपञ्चम्याः, पञ्चमीविभक्तिं वर्जयित्वा। समीपं कुम्भस्य उपकुम्भम्, उपकुम्भं तिष्ठति, उपकुम्भं पश्य, उपकुम्भं देहि, उपकुम्भं स्वम्। अव्ययीभावादिति किम्? राज्ञः पुरुषः राजपुरुषः, अकारान्तादिति किम्? समीपं वध्वाः उपवधु। स्वरो ह्रस्व इति ह्रस्वः। अन्यस्माल्लुगिति सेर्लुक्। विभक्तीनामिति किम्? उपकुम्भस्य भावः उपकुम्भता, उपकुम्भत्वम्, अपञ्चम्या इति किम्? उपकुम्भात्।

● वा तृतीयासप्तम्यौ २/४/२

अकारान्तादव्ययीभावात् परयोस्तृतीयासप्तम्योर्वा अमादेशो भवति प्राप्तविकल्पोऽयम्। उपकुम्भं कृतम्, उपकुम्भेन कृतम्, उपकुम्भं स्थापय, उपकुम्भे स्थापय।

● अन्यस्माल्लुक् २/४/३

अन्यस्मादनकारान्तादव्ययीभावात्परासां विभक्तीनां लुग्भवति, समीपं वध्वाः उपवधु, उपवधुकृतम्, उपवधुस्वम्, समृद्धिः कर्तृणां सुकर्तृ, सुकर्तृकृतम्, सुकर्तृस्वम्, स्त्रीषु कथा वर्तते, अधिस्त्रि, एवम् अधिकुमारि। अन्यस्मादिति किम्? उपकुम्भात्, उपकुम्भेन, उपकुम्भे।

● अव्ययाच्च २/४/४

अव्ययात्परासां विभक्तीनां लुग्भवति, च, वा, हा, अह, एव, यदि, एतासां लुक्क्रियते। किं ताभिरुत्पन्नाभिः? उच्यते– पद, संज्ञा यथा स्यात्। सत्यां तस्यां वस्नसादयो भवन्ति, ग्रामश्च ते स्वम्, नगरं च मे स्वम्।

● रूढानां बहुत्वेऽस्त्रियामपत्य प्रत्ययस्य २/४/५

अपत्ये प्रत्ययः अपत्यप्रत्ययः। ये शब्दाः देशस्य राज्ञां च वाचकाः ते रूढाः। रूढानां सम्बन्धिनोऽपत्यप्रत्ययस्य बहुत्वे उत्पन्नस्य लुग् भवति, अस्त्रियाम्, स्त्रीविषयं वर्जयित्वा। अङ्गस्यापत्यानिबहूनि अङ्गाः।

वाणपत्य इत्यण्, तस्य लुक्, लुग्लोपेन प्रत्ययकृतमिति वचनाद् वृद्धेरभावः। एवं वङ्गाःकलिङ्गाः। रूढानामिति किम्? पुरोरपत्यानि बहुनि पौरवाः, अण्, उवर्णस्त्वौत्वमापाद्य इत्यौत्वम्। बहुत्व इति किम्? अङ्गस्यापत्यमाङ्गः, एवं वाङ्गः, कालिङ्गः। अस्त्रियामिति किम्? अङ्गस्यापत्यानि बह्व्यः स्त्रियः आङ्ग्यः एवं वाङ्ग्यः, कालिङ्ग्यः, अङ्गवङ्ग कलिङ्गेभ्योऽण्। अण्येकादिती प्रत्ययः, ईकारे स्त्रीकृतेऽल्लोप्य इत्यलोपः जस्, यत्वम्, अपत्यप्रत्ययस्येति किम्? पाञ्चालानामिमे शिष्याः पाञ्चालाः। तस्येदमित्यण्।

● गर्गयस्कविदादीनां च २/४/६

द्वन्द्व गर्भो बहुव्रीहिः। गर्गादीनां यस्कादीनां विदादीनां च सम्बन्धिनः अपत्यप्रत्ययस्य बहुत्व उत्पन्नस्य लुग्भवति, अस्त्रियाम्। अरूढार्थं वचनम्। गर्गस्यापत्यानि बहूनि गर्गाः, वत्साः, वङ्गाः। ण्यगर्गादेरिति ण्य प्रत्ययः। तस्य लुक्, जस्, यस्कस्यापत्यानि बहूनि यस्काः, लह्याः, द्रुह्याः। अणो लुक् जस्, विदस्यापत्यानि बहूनि विदाः, उर्वाः, भरद्वाजाः। अणो लुक्। बहुत्व इति किम्? गर्गस्यापत्यं गार्ग्यः, यास्कः, वैदः। अस्त्रियामिति किम्? गर्गस्यापत्यानि स्त्रियो गार्ग्यः। गर्गशब्दाण्यः। इवर्णावर्णे लोपः, ण्यादितीकारः। यस्यापत्यस्येति य लोपः। जस्, यत्वम्। एवं यास्क्यः , वैद्यः। यस्कविदाभ्यामण् अण्येकादितीकारः, जस्। अपत्यप्रत्ययस्येति किम्? गर्गस्य इमे शिष्याः गार्गाः, यास्काः, वैदाः, तस्येदमित्यण्। गर्ग, वत्स, वाजासे, संकृति, व्याघ्रपात्, अज, विदभृत्, इत्यादयो गर्गादयः। यस्क, लह्य, द्रुह्य, अयस्थूण, भलन्दन इत्यादयो यस्कादयः। विद, उर्व, भरद्वाज, कूचवार, उपमन्यु, कश्यप, इत्यादयो विदादयः।

● भृग्वत्र्यङ्गिरस्कुत्सवसिष्ठगोतमेभ्यश्च २/४/७

भृगु, अत्रि, अङ्गिरस्, कुत्स, वसिष्ठ, गोतम इत्येतेभ्यः परस्यापत्य प्रत्ययस्य बहुत्व उत्पन्नस्य लुग्भवति, अस्त्रियाम्। भृगोरपत्यानि बहवः, भृगवः, अत्रयः आङ्गिरसः, कुत्साः, वसिष्ठाः, गोतमाः। अत्रिशब्दात् स्त्र्यत्र्यादेरेयण्, शिष्टेभ्यो वाणपत्ये इत्यण्।

● यतोऽपैति भयमादत्तेवा तदपादानम् २/४/८

अप एति इति द्वे पदे, तथा आदत्त इति च, यतः अपैति यस्माद्विश्लेष

प्राप्नोति, यतो भयम्, यतश्च आदत्ते गृह्णाति, तत्कारकमपादान संज्ञं भवति। ग्रामादागच्छति, ग्रामादागमिष्यति, अधर्मान्निवर्तते, अश्वात्पतितः चौरेभ्यो विभेति, उपाध्यायाद्विद्यामादत्ते। कोष्ठागाराद्धान्यं गृह्णाति। इह कस्मादपादानसंज्ञा, ग्रामान्नागच्छतीति, अत्र हि प्रतिषिध्यते विश्लेषः? सत्यम्– यावन्न प्रदर्श्यते विश्लेषस्तावत्कस्य प्रतिषेधोऽस्ति, अतो विश्लेषे सत्यपादान संज्ञासत्यां तस्यां प्रतिषेधेन सम्बन्धः। आदत्ते ग्रहणं प्रपञ्चार्थम्, यतोनेतीत्यनेन सिद्धत्वात्। तथा भयग्रहणमपि, तथाहि चौरेभ्यो विभेति। यो विभेति स चौरेभ्यो विश्लेष्यति। अपादान संज्ञाया क्वप्रयोजनम्? शेषाः कर्मकरणसम्प्रदानापादान स्वाम्याद्यधिकरणेष्वित्यादिषु। वक्ष्यमाणाभिश्च संज्ञाभिरत्रैव प्रयोजनम्।

● ईप्सितं च रक्षार्थानाम् २/४/६

रक्षा अर्थो येषां ते रक्षार्थाः, श्रुतानुमिताध्याहारैस्त्रिभिस्सूत्रार्थपरिकल्पनेति वचनाद् योगशब्दस्सप्तम्यन्तोऽध्याह्रियते। तेन रक्षार्थानाम् धातूनां प्रयोगे सति यदभीप्सितमभिप्रेतं तत्कारकमपादानसंज्ञं भवति। च शब्दादनीप्सितमपि। यवेभ्यो गां रक्षति, तिलेभ्यो काकान्वारयति, अहिभ्यः पुत्रं रक्षति, कूपादन्धं वारयति। प्रपञ्चार्थोऽयं योगः। यतोऽपैतीत्यनेन सिद्धत्वात्, अस्ति हि यवादिभ्योगवादीनां विश्लेषः।

● यस्मैदित्सा रोचते धारयते वा तत्सम्प्रदानम् २/४/१०

यस्मै दित्सा दातुमिच्छा, यस्मै रोचते, यस्मै धारयते वा तत्सम्प्रदान संज्ञं भवति। विप्रायं भिक्षां ददाति, उपाध्याय गां ददाति, देवदत्ताय रोचते मोदकः, यज्ञदत्ताय शतं धारयते। दित्सेति किम्? राज्ञो दण्डं ददाति। विशिष्टे विषये संज्ञेयमिष्यते तेन यत्र दाने परस्य स्वाम्यमापद्यते तत्रेयंसंज्ञा। तेनेह न भवति रजकस्य वस्त्रं ददाति।

● य आधारस्तदधिकरणम् २/४/११

आध्रियन्ते व्यवतिष्ठन्ते यस्मिन्स आधारः। अध्यायन्यायोद्यायेति निपातनादघत्वम्, य आधारस्तदधिकरणसंज्ञं भवति, दधिघृतम्, पर्यङ्के शेते, जले मत्स्याः, रवे शकुनयः। यत्राप्याधाराधेय भावो बुद्ध्या विवक्ष्यते तत्रापि अधिकरण संज्ञा भवति। अङ्गुल्यग्रे हस्तियूथशतमास्ते।

● येन क्रियते तत्करणम् २/४/१२

येन क्रियते तत्करणसंज्ञं भवति। दात्रेण लुनाति, परशुना छिनत्ति। यदा तु दात्रादीनां पुरूषव्यापारो नापेक्ष्यते तदा करणसंज्ञा न भवति। दात्रं लुनाति। लुञ् छेदने, ति, ना क्र्यादेः, प्वादीनां ह्रस्वः।

● यत्क्रियते तत्कर्म २/४/१३

यत्क्रियते तत्कर्मसंज्ञं भवति। कटं करोति, डुकृञ् करणे, वर्त, ति, तनादेरूः, करोतेरिति गुणः। ओदनं पचति। डुपचष् पाके, वर्तमाना ति अन्वि। आदित्यं पश्यति। दृशिर् प्रेक्षणे, ति, अन्वि, दृशेः पश्यः, अधिपूर्वाणाम् शीङ्, स्था, आस्, इत्येतेषां प्रयोगे आधारस्य कर्मसंज्ञा वक्तव्या, ग्राममधिशेते। ग्राममधितिष्ठति, ग्राममध्यास्ते। अकर्मकस्य धातोः प्रयोगे काल भावाध्वदेशानां कर्मसंज्ञा वक्तव्या। कालस्य–मासमास्ते, भावस्य–भावो धात्वर्थः, गोदोहमास्ते। अध्वनः–क्रोशमास्ते। देशस्य–कुरून् स्वपिति। क्रिया–विशेषणानां च कर्मकत्वं नपुंसकलिङ्गता च वक्तव्या। शोभनं पचति।

● यः करोति सः कर्ता २/४/१४

यः करोति सः कर्तृ संज्ञो भवति। रूद्रेण कृतम्, विष्णुना कृतम्। कर्तृसंज्ञायाः क्व प्रयोजनम्? कर्तरि चेत्यादिषु।

● कारयति यस्स हेतुश्च २/४/१५

कर्तृ ग्रहणं सम्बध्यते, यत्कर्तारं कारयति स हेतु संज्ञो भवति। च शब्दात्कर्तृ संज्ञश्च। कारयति पाठयति। डुकञ् करणे, पठ व्यक्तायां वाचि, कुर्वन्तं प्रयुङ्क्ते, एवं पठन्तम्। धातोश्च हेतावितीन्, सत्यां कर्तृसंज्ञायामिन्त्र्यजादेरूभयमिति परस्मैपदम्। हेतु संज्ञायाः क्व प्रयोजनम्? धातोश्च हेतावित्यत्र।

● तेषां परमुभयप्राप्तौ २/४/१६

परिभाषेयम्, उभयोः प्राप्तिरूभयप्राप्तिः। यद्यप्युभयशब्दस्समासे श्रूयते, तथाप्युभयशब्देन विग्रहः क्रियते, स्वपदेन द्वित्वविषये उभयशब्दस्य प्रयोगाभावात्। उभयशब्दो ह्येकत्व बहुत्वयोः प्रयुज्यते, द्वित्वे तूभ शब्दः। तेषामपादानादीनां कारकाणां मध्यादुभयोः द्वयोः कारकयोरेकत्र विषये प्राप्तौ सत्यां

यत्परंकारकं तदेव भवति। वृक्षं त्यजति खगः। अत्र वृक्षात् खगो विश्लिष्यतीति वृक्षस्यापादानसंज्ञा प्राप्नोति, वृक्षश्च त्यज्यमानत्वात्कर्म भवतीति कर्मसंज्ञा च स्यात्, परत्वात् कर्म संज्ञैव भवति। त्यजति दण्डं दण्डी, अत्रदण्डिनः दण्डो विश्लिष्यतीत्यपादान संज्ञा प्राप्नोति, दण्ड त्यागे दण्डिनः कर्तृत्वमस्तीति कर्तृसंज्ञा च स्यात्। परत्वात्कर्तृसंज्ञैव भवति। पूर्वोक्त परोक्तयोः परोक्तो विधिर्बलवानिति परिभाषया सिद्धत्वात्। योगारम्भस्तस्या एव प्रपञ्चार्थः।

● प्रथमाविभक्तिर्लिङ्गार्थ वचने २/४/१७

लिङ्गस्यार्थः लिङ्गार्थः। तस्यवचनं लिङ्गार्थवचनम्, लिङ्गार्थस्य वचने अभिधाने सति लिङ्गात् प्रथमा विभक्तिर्भवति। तस्मात्परा इत्यनेन स्यादयस्सिद्धाः। किन्तु प्रकरणमिदं तासामेवार्थ कथनार्थमारभ्यते वृक्षः। कुमारी, द्रोणः, आढकम्, खारी। लिङ्गार्थ इति कर्तव्ये वचनग्रहणम् यत्रैकत्वादयोऽर्थाः प्रकृतिभिरुक्तास्तत्रापि प्रथमाप्रवृत्त्यर्थम्। एकः, द्वौ, बहवः। अत्रैक शब्देनैकत्वमुक्तम्। द्विशब्देन द्वित्वम्। बहुशब्देन बहुत्वम्। विभक्तिग्रहणं न तथा प्रयोजनवदित्याहुः।

● आमन्त्रणे च २/४/१८

आमन्त्रिते अर्थे लिङ्गात् प्रथमाविभक्तिर्भवति। हे वृक्ष ! हे शङ्कर ! हे विष्णो ! ननु पूर्वेण सिद्धिरस्तीति किं योगारम्भेण? असदेतत् – आमन्त्रणाधिको हि लिङ्गार्थोऽत्र प्रतीयत इति शुद्धस्य लिङ्गार्थस्याभावात् सूत्रमिदमारब्धव्यम्।

● शेषात्कर्मकरणसम्प्रदानापादानस्वाम्याद्यधिकरणेषु २/४/१९

स्वामी आदिर्येषां ते स्वाम्यादयः, ततो द्वन्द्वः, स्वाम्यादि शब्दे योग ग्रहण मध्याह्रियते, शेषाद्द्वितीयाद्याः विभक्तयः कर्मणि करणे सम्प्रदाने अपादाने स्वाम्यादियोगे अधिकरणे च भवन्ति। कर्मणिद्वितीया कटं करोति, ओदनं पचति, अभिहिते कर्मणि द्वितीया न भवति उक्तार्थानामप्रयोग इति वचनात्। क्रियते कटः, ह्रियते भारः। आत्मने पदेऽभिहितं कर्म–कृतः कटः। अत्रापि प्रत्ययेन करणे तृतीया – परशुनाच्छिनत्ति। सम्प्रदाने चतुर्थी – विप्राय गां

ददाति। अपादाने पञ्चमी–ग्रामादागतः। स्वाम्यादियोगे षष्ठी–देवदत्तस्य स्वामी, यज्ञदत्तस्य स्वम्, छात्राणां समूहः। अधिकरणे सप्तमी–कटे आस्ते, आसने उपविशति, स्थाल्यां पचति। उभय सर्व इत्येतयोस्तसन्तयोः प्रयोगे द्वितीया वक्तव्या – उभयतो ग्रामं वसति, सर्वतोनगरं वसति। उभयस्मिन्–सर्वस्मिन्नि त्यादिभ्यस्सप्तम्यन्तेभ्यस्तस् वक्तव्य इति तस्। उपरि अधि अधस्, इत्येतेषां प्रयोगेऽपि– उपर्युपरिग्रामम्, अध्यधिग्रामम्, अधोऽधो ग्रामम्। हा धि क् शब्द प्रयोगेऽपि। हा देवदत्तम्, धिग्देवदत्तम्। हा शब्द प्रयोगे प्रथमाऽपि दृश्यते। हा देवदत्तो बुभुक्षितः। अभितः परितस्समया निष्कषा इत्येतेषां प्रयोगेऽपि– अभितो ग्रामं वसति, उभयतो ग्राममित्यर्थः। परितो नगरं वसति, सर्वतो नगरमित्यर्थः। सर्वार्थे उभयार्थे च यथासंख्यं पर्यभिभ्यामिति तस्– समया ग्रामं वसति, निकषा ग्रामंवसति। समया निकषा शब्दौ समीप वाचिनौ अन्तरान्तरेणे त्येतयोः प्रयोगेऽपि– अन्तरा त्वां मां च घटः। अन्तरा मध्ये इत्यर्थः, अन्तरेण पुरूषकारं न किञ्चिल्लभ्यते। विनापुरूषकारमित्यर्थः। प्रकृत्यादिभ्यस्तृतीया वक्तव्या– प्रकृत्या दर्शनीयः, प्रायेण याज्ञिकः, गोत्रेण गार्ग्यः। येभ्यः शब्देभ्यः कर्तृकरणाभ्यां विना तृतीया दृश्यते ते प्रकृत्यादयः। पृथग्विना नानाभिर्योगे द्वितीया तृतीया पञ्चम्यो वक्तव्याः – पृथग्देवदत्तस् पृथग्देवदत्तेन, पृथग्देवदत्तात्, एवं विना नाना शब्दप्रयोगेऽप्युदाहार्यम्। शपेर्धातोः प्रयोगे चतुर्थी वक्तव्या वाचा शरीर स्पर्शनेऽर्थे–देवदत्ताय शपते। स्पृहेर्धातोः प्रयोगे ईप्सितात्– रूद्राय स्पृहयति। तादर्थ्येऽपि वक्तव्या– यूपाय दारू, वैश्रवणाय वलिः। हित योगे च – देवदत्ताय हितम्। यबन्तस्य शब्दस्य लोपे सति कर्माधिकरणयोः पञ्चमी वक्तव्या– प्रासादमारूह्य प्रेक्षते, प्रासादात् प्रेक्षते। आसने उपविश्य वीक्षते आसनाद्वीक्षते। रूह्–बीज जन्मनि, आङ् पूर्वः, विशप्रवेशने, उपपूर्वः, एककर्तृकयोरिति क्त्वा प्रत्ययः, समासे भाविन्यनञः क्त्वो यबिति यबादेशः। लोप्या इत्याह– प्रत्यय निर्देशादारूह्योपविश्यशब्दयोर्लोपः। निमित्तात् कर्मसंयोगे सप्तमी वक्तव्या –

चर्मणि द्वीपिनं हन्ति, दन्तयोर्हन्तिकुञ्जरम्।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः।।

सर्वनाम्नो निमित्त प्रयोगे सर्वा विभक्तय इष्यन्ते– कि निमित्तं वसति, केन निमित्तेन वसति, कस्मै निमित्ताय वसति, कस्मान्निमित्ताद्वसति, कस्य निमित्तस्य वसति, कस्मिन्निमित्ते वसति। निमित्त इत्ययमर्थो गृह्यते। तेन किं कारणं वसति, को हेतुर्वसति, किं प्रयोजनं वसति, इत्याद्यपि भवति।

● पर्यपाङ्योगे पञ्चमी २/४/२०

परिश्च अपश्च आङ्च ते पर्यपाङ्, तैर्योगः पर्यपाङ्योगः। परि अप आङ् इत्येतैर्योगे लिङ्गात् पञ्चमी भवति। कर्मप्रवचनीयैश्चेत्यत्र द्वितीया प्राप्ता, परिश्रुघ्नाद्देवो वृष्टः। अपकान्यकुब्जाद्देवो वृष्टः, आकुरुक्षेत्राद्देवो वृष्टः। पर्यपाङ्भिरिति कर्तव्ये योग ग्रहणं कर्म प्रवचनीयानां पर्यादीनां ग्रहणार्थम्। उपसर्गाणां मा भूत्, तेनेह न भवति परिभ्रमणम्, अपसरणम्, आनयनम्। क्रियायोगे सति पर्यादीनामुपसर्गत्वमित्याहुः। इह कस्मान्न भवति, वृक्षं परि विद्योतते विद्युत्? उच्यते– अपशब्दस्य वर्जनेऽर्थे कर्मप्रवचनीयत्वं स्मर्यते। अतस्तेन वर्जनार्थेन साहचर्यात् परिशब्दस्य वर्जनार्थस्य ग्रहणं न लक्षणार्थस्य, वृक्षं परीत्यत्र च परिशब्दो लक्षणमत्रद्योतयति, वृक्षेण हि विद्युल्लक्ष्यते।

● दिगितरर्तेऽन्यैश्च २/४/२१

दिग्वाचिभिश्शब्दैः तथा इतर, ऋते, अन्य, इत्येतैश्च योगे लिङ्गात् पञ्चमी भवति, पूर्वो ग्रामात्, दक्षिणो नगरात्, इतरो देवदत्तात् पठितः। ऋते शम्भोः कुतो मोक्षः, अन्यो देवदत्तात्। अन्येत्यत्रार्थो गृह्यते तेन विलक्षणो देवदत्तात्, अर्थान्तरं यज्ञदत्तात्।

● द्वितीयैनेन २/४/२२

एनेन एन प्रत्ययान्तेन शब्देन योगे सति लिङ्गाद् द्वितीया विभक्तिर्भवति, दक्षिणेन ग्रामं वसति, उत्तरेण नगरं वसति, दक्षिणस्यां दिशि, उत्तरस्यां दिशि पुरस्तादादयश्चेति निपातनादेन प्रत्यय इवर्णावर्णलोपः। षष्ठ्यपीष्यते–दक्षिणेन ग्रामस्य वसति। उत्तरेण नगरस्य वसति।

● कर्मप्रवचनीयैश्च २/४/२३

अन्वाद्या एकादश ये कर्मप्रवचनीयाः प्रागुक्ताः तैर्योगे लिङ्गाद् द्वितीया विभक्तिर्भवति। वृक्षमनुविद्योतते विद्युत्, वृक्षं परिविद्योतते विद्युत्। एवमभीत्यादौ।

● गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि २/४/२४

गतिरर्थोयेषां धातूनां ते गत्यर्थाः तेषां कर्म, गत्यर्थ कर्म, तस्मिन् गत्यर्थ

कर्मणि, न अध्वा अनध्वा, गत्यर्थानां धातूनां यत्कर्म तस्मिन्कर्मणि अनध्वनि अध्व वर्जिते द्वितीयाचतुर्थ्यौ भवतः चेष्टायां गम्यमानायाम्। चेष्टा, काय परिस्पन्दः। तीर्थम् गच्छति, तीर्थायगच्छति, कुरुक्षेत्रं व्रजति, कुरुक्षेत्राय व्रजति। गत्यर्थग्रहणं किम्? ओदनं पचति। कर्मणीति किम्? अश्वेन व्रजति। चेष्टायामिति किम् ? मनसा वाराणसीं व्रजति। अनध्वनीति किम्? अध्वानं व्रजति। अनध्वनीत्यत्रार्थो गृह्यते, तेन मार्गं व्रजति। उत्पथेन यदा पन्थानं प्राप्तुमिच्छति तदा अध्वने गच्छतीत्याद्यपि भवति। चतुर्थी वेति कर्तव्ये द्वितीयाग्रहणं बाधिकायाष्षष्ठ्याः विषये द्वितीयाचतुर्थ्योःप्रवृत्त्यर्थम्, तेन यत्र कर्तृकर्मणोःकृतीति षष्ठी प्राप्ता तत्र तां बाधित्वा द्वितीयाचतुर्थ्याविव भवतः। ग्रामं गन्ता, ग्रामाय गन्ता। गम्लृ गतौ, वुण्तृचाविति तृच्।

● मन्यकर्मणिचानादरेऽप्राणिनि २/४/२५

मन्यतेरित्यस्यैकदेशो मन्यशब्दो गृहीतः। मन्यतेः कर्म मन्यकर्म, मनज्ञाने इत्यस्य यत्कर्म तस्मिन्कर्मणि अप्राणिवर्जिते परे द्वितीयाचतुर्थ्यौ भवतः अनादरे गम्यमाने, अनादरस्तिरस्कारः। तृणमपि त्वां न मन्ये, तृणाय अपि त्वां न मन्ये, बुधमपि त्वां न मन्ये, बुधाय अपि त्वां न मन्ये। च शब्दोऽत्र पठ्यते, स विशेषं द्योतयति युष्मदस्मदोश्चतुर्थी न भवति, मन्यग्रहणं किम्? तृणं त्वां चिन्तयामि, मन्ये इति यना निर्देशो मनु अवबोधने इत्यस्य मनुतेर्निवृत्त्यर्थः। तेन तृणं त्वां न मनुते। अनादरे इति किम्? सुवर्णं त्वां मन्ये, अप्राणिनीति किम्? न त्वां काकं मन्ये, न त्वां श्वानं मन्ये।

● नमस्स्वस्तिस्वाहास्वधालंवषड्योगे चतुर्थी २/४/२६

नमस्, स्वस्ति, स्वाहा, स्वधा अलम्, वषड् इत्येतैर्योगे सति लिङ्गाच्चतुर्थी भवति। नमस् क्लीवे। नमः, नमसी, नमांसि। स्वस्ति, स्वाहा, स्वधा क्लीवस्त्रियोः। अलं वषट्, क्लीवे एव। नमो रूद्राय, स्वस्ति प्रजाभ्यः, अग्नये स्वाहा, पितृभ्यः स्वधा, अलं मल्लोमल्लाय, वषडिन्द्राय, अलमित्यत्रार्थो गृह्यते। तेन समर्थो मल्लो मल्लाय, शक्तो मल्लोमल्लाय। नमस्, स्वस्ति, स्वाहा, स्वधालंवषड्भिरिति कर्तव्ये योगग्रहणं पर्याप्त्यर्थस्यालंशब्दस्य ग्रहणार्थम्। तेन वारणार्थस्य न भवति। अलं बाले ! रोदनेन। उपपदविभक्तेः कारकविभक्तिर्वलीयसीति वचनादिह न भवति नारायणं नमस्कृत्य इति नमस् शब्द उपपदे या विभक्तिस्सा उपपदविभक्तिः। कर्मादौ कारके या विभक्तिः सा कारकविभक्तिः।

● तुमर्थाच्चभाववाचिनः २/४/२७

तुमा समानार्थस्तुमर्थः, लोप्या इत्यर्हप्रत्ययनिर्देशात् समानशब्दस्य लोपः, भावं वक्तीति भाववाची, वच भाषणे, नाम्न्यजातौ णिनिः, तुमा समानार्थः तुल्यार्थो यः प्रत्ययो भाववाची, भाववाचिनश्चेत्यनेन विहितस्तदन्ताल्लिङ्गाच्चतुर्थी भवति– पाकायव्रजति, पक्तुं व्रजतीत्यर्थः। करणाय व्रजति, कर्तुं व्रजतीत्यर्थः। संस्थितये व्रजति, संस्थातु व्रजतीत्यर्थः आश्रयाय व्रजति, आश्रयितुं व्रजतीत्यर्थः। तुमर्थादिति किम्? पाचनं पाकः त्यजनं त्यागः, भाववाचिन इति किम्? कारको व्रजति। वुण्तुमौ क्रियायां क्रियार्थायामिति वुण्।

● तृतीया सह योगे २/४/२८

सहार्थेन योगः सहयोगः सहार्थेन शब्देन योगे सति लिङ्गात् तृतीया भवति। साकम्, सत्रा, सार्धम्, समम्, सह, सजुः। पुत्रेण सह गतः, पिता पुत्रेण सह स्थूलः, पुत्रेण सहगोमान्, अप्रधानादियं तृतीया स्मर्यते। तेन पितृ शब्दान्न भवति। सहेत्यत्रार्थो गृह्यते, तेन पुत्रेण साकं पठति, पुत्रेण सत्रा यजति, पुत्रेण सार्धं पूजयति। साकम्, सत्रा, समम्, सार्धम्, सह, सजुरसा, इत्यत्रार्थेन। तुल्यार्थैः शब्दैर्योगे लिङ्गात्तृतीयाषष्ठ्यौ वक्तव्ये, तुला उपमा इत्येतौ तुल्यार्थौ वर्जयित्वा। तुल्यो देवदत्तेन, तुल्यो देवदत्तस्य, सदृशो देवदत्तेन, सदृशो देवदत्तस्य, तुला उपमाभ्यां तु योगे षष्ठ्येव वक्तव्या। तुला रूद्रस्य नास्ति, उपमा कृष्णस्य न विद्यते।

● हेत्वर्थे २/४/२९

हेतुश्चासावर्थः हेत्वर्थः, तृतीयानुवर्तते, उत्तरेषु त्रिषु सूत्रेषु च। फल हेतुश्चासावर्थः हेत्वर्थः, तृतीयानुवर्तते, उत्तरेषु त्रिषु सूत्रेषु च। फलसाधन योग्यः पदार्थो हेतुः, हेतावर्थे लिङ्गात् तृतीया भवति। विद्यया यशः, कन्यया शोकः। हेताविति न कृतम् वैचित्र्यार्थम्।

● कुत्सितेऽङ्गे २/४/३०

कुत्सितेऽङ्गे लिङ्गात् तृतीया भवति, अक्ष्णाकाणः, नासिकया चिपटः शिरसा खलतिः, जङ्घया पङ्गुः। कुत्सित इति किम्? मुखेगौरः। अप्रधानादियं तृतीया स्मर्यते, तेनेह न भवति – अक्षिकाणं देवदत्तस्य अत्रापि अक्षिप्रधानम्।

• विशेषणे २/४/३१

विशेष्यते येन तद्विशेषणमुपलक्षणमित्यर्थः, विशेषणेऽर्थे लिङ्गात् तृतीया भवति, जटाभिस्तापसो दृष्टः, खड्गेन भटोदृष्टः।

• कर्तरि च २/४/३२

कर्तरि तृतीया भवति, रूद्रेण त्रिपुरं दग्धम्, विष्णुना बद्धो वलिः।

• कालभावयोस्सप्तमी २/४/३३

काले भावे च लिङ्गात्सप्तमी भवति, काले तावत्– शरदि पुष्यन्ति सप्तच्छदानि। वर्षासु पुष्यन्ति कुटजानि, भावे–भावःसत्ता, भावो धात्वर्थः। देवदत्ते गते यज्ञदत्तो भुङ्क्ते, अग्निहोत्रे गतः। कालभावाभ्यां यदान्यत् किञ्चिल्लक्ष्यते तदा सप्तमी स्मर्यते तेनेह न भवति शरत् देवदत्तः। साध्वसाधुशब्दयोः प्रयोगे सप्तमी वक्तव्या। षष्ठ्याः बाधः। साधुः पितरि असाधुः मातरि।

• स्वामीश्वराधिपतिदायादसाक्षिन्प्रतिभूप्रसूतैः षष्ठी च २/४/३४

स्वामिन्, ईश्वर, अधिपतिः, दायाद, साक्षिन्, प्रतिभू, प्रसूत इत्येतैर्योगे लिङ्गात्सप्तमी भवति षष्ठी च, सम्बन्धे षष्ठी नित्यं प्राप्ता, धने स्वामी, धनस्य स्वामी, धने ईश्वरः धनस्येश्वरः धने अधिपतिः, धनस्य अधिपतिः। धने दायादः धनस्य दायादः, धने साक्षी, धनस्य साक्षी, धने प्रतिभूः, धनस्यप्रतिभूः, गोषु प्रसूतः गवां प्रसूतः। ननु स्वामीश्वराधिपति शब्दाः एकार्थास्ततश्चस्वामिग्रहणं कर्तव्यम् ईश्वराधिपति शब्दयोः ग्रहणेन किम्, स्वामिशब्दग्रहणेन तयोरपिग्रहणात्? उच्यते– यथा ईश्वराधिपति शब्दयोः ग्रहणं तथा प्रभुः इन इत्यादीनामपि स्यात्।

• निर्धारणे च २/४/३५

धृङ् अनवस्थाने निर्पूर्वः अतएव निर्देशात् स्वार्थे इन् वृद्धिश्च निर्धार्यते, पृथक् क्रियते यस्मादिति। कृत्ययुटोऽन्यत्रापीति युट्, अनादेशः कारित लोपः, षष्ठीसप्तम्यावनुवर्तेते। निर्धारणेऽर्थे षष्ठी सप्तम्यौ भवतः। जातिगुण क्रियासंज्ञाभिस्समुदायादेकदेशस्य पृथक्करण निर्धारणम्।

पुरुषाणां क्षत्रियः शूरः पुरुषेषु वा, स्यामा नारीणां दर्शनीया नारीषु वा, धावन्तोऽध्वगानां शीघ्रगः अध्वगेषु वा, ब्राह्मणानां देवदत्तः पाठकः ब्राह्मणेषु वा।

● षष्ठी हेतुप्रयोगे २/४/३६

हेतुश्चासौ प्रयोगः हेतु प्रयोगः, हेतुशब्दस्य प्रयोगे उच्चारणे सति लिङ्गात् षष्ठी भवति, विद्यायाः हेतोः वसति, अन्नस्य हेतोर्वसति।

● स्मृत्यर्थकर्मणि २/४/३७

स्मृतिरर्थो येषां धातूनां ते स्मृत्यर्थाः, स्मृत्यर्थानां कर्म स्मृत्यर्थकर्म, स्मृत्यर्थानां धातूनां यत्कर्म तत्स्मृत्यर्थकर्म तस्मिन् कर्मणि षष्ठी भवति, पितुः स्मरति, मातुः ध्यायति। स्मृत्यर्थानामिति किम्? ओदनं पचति।

● करोतेः प्रतियत्ने २/४/३८

सतो गुणान्तरोत्पादनं प्रतियत्नः, करोतेः यत्कर्म तस्मिन् कर्मणि षष्ठी भवति, प्रतियत्ने गम्यमाने। एधोदकस्योपस्कुरुते। मसिः पत्रस्योपस्कुरुते। वेतिकर्तव्यम्। तेन द्वितीयापि भवति। एधोदकमुपस्कुरुते। मसिपत्रमुपस्कुरुते।

● हिंसार्थानामज्वरेः २/४/३६

हिंसा प्राण्युपघातः, हिंसार्थानां धातूनां यत्कर्म तस्मिन्कर्मणि षष्ठी भवति अज्वरेः। ज्वरो रोगे इत्यस्य यत्कर्म तद्वर्जयित्वा। चौरस्य रूजतिः रोगः, चौरस्यामयतिः, आमयः। चौरस्य तुद्गतिः तोदः। उत्तरत्र नित्यग्रहणादिह विकल्पः। तेन चौरं रूजति रोगः, हिंसार्थानामिति किम्।

एति जीवन्तमानन्दो नरं वर्ष शतादपि

अज्वरेरिति किम्? चौरं ज्वरयति ज्वरः, सं पूर्वस्य तपः संतापे इत्यस्य इन्नन्तस्य प्रयोगे कर्मणि षष्ठी नेष्यते। चौरं सन्तापयति तापः। हिंसार्थानां धातूनां भावे यदा घञादिप्रत्ययः वाच्यः कर्ता भवति तदा षष्ठीस्स्मर्यते, वायुः पुरूषं हिनस्ति, अत्र हिंसार्थस्य वायुः कर्ता।

● कर्तृकर्मणोः कृति नित्यम् २/४/४०

नित्यमिह क्रियाविशेषणत्वाद् द्वितीयान्तं नपुंसकं चैतत्, कर्तरि कर्मणि च नित्यं षष्ठी भवति, कृति, कृत्प्रत्ययान्ते शब्दे प्रयुज्यमाने सति। कर्तरि

तावत्– भवत आसिका, भवतोऽग्रगामिका, आस उपवेशने, गम्लृ गतौ, अग्र पूर्वः। पर्यायार्हणेष्विति वुण्। युवुझामित्यकादेशः, स्त्रियामादाप्, के प्रत्यये इति इत्वम्। कर्मणि– वज्रस्य भर्ता, भुवनस्य रक्षिता। डुभृञ् धारण पोषणयोः रक्ष पालने, वुण्तृचाविति तृच् भृञो नाम्यन्तयोरिति गुणः। वृतो वृङ् वृञ इङभावः। रक्षेरिट्। यवानां लावकः, सक्तूनां पायकः, लूञ् छेदने, पा पाने, वुण् तृचाविति वुण्, अस्योपधेति वृद्धिः, आयिरिच्यादन्तेत्यायिः। कर्तृ कर्मणोरिति किम्? अश्वेन गन्ता, गमस्तृच्। कृत्यप्रत्ययान्तस्य शब्दस्य प्रयोगे कर्तरि षष्ठी वा वक्तव्या। भवतः कटः कर्तव्यः, भवता कटः कर्तव्यः, भवतो ग्रामो गन्तव्यः भवता ग्रामः गन्तव्यः।

● न निष्ठादिषु २/४/४१

निष्ठा, क्वन्सु, कान, शन्तृङ्, आनश्, कित्, उक्, इष्णुक्, क्त्वा, खल् यु, शानङ्, तृन्, वुण्, णिन् इत्येतेषु निष्ठादिषु प्रयुज्यमानेषु सत्सु कर्तृ कर्मणोष्षष्ठी न भवति पूर्वसूत्रेण प्राप्ता। निष्ठा–देवदत्तेन ओदनो भुक्तः, ओदनं भुक्तवान्, भुजपालने। निष्ठेति क्त क्तवन्तू, चवर्गस्य किः। क्वन्सु– ओदनं पेचिवान्, क्वन्सुकानाविति क्वन्सु। परोक्षावद्भावः, चणपरोक्षेति द्विर्वचनम्। अस्यैकव्यञ्जनमध्य इत्यत्वाभ्यासलोपौ, अर्तीणघसैकस्वरातामिड्वन्साविति इट्। कान्–ओदनं पेचानः, क्वन्सुकानाविति कान, अन्यत्पूर्ववत्। शन्तृङ्–ओदनं पचन्, वर्तमाने शन्तृङिति शन्तृङ्, अन्वि, असन्ध्यक्षर लोपः। अधीयन्पारायणम्, इङ् अध्ययने, अधिपूर्वः, इङ्धारिभ्यां शन्तृङिति शन्तृङ्, अन्वि अदादेर्लुक्। स्वरादाविवर्णोवर्णान्तस्येति इय्। आनश् ओदनं पचमानः वर्तमाने शन्तृङ्ङानशाविति आनश्, अन्वि, आत्मोऽन्त आने इति मकारागमः, किः, ददिः गाः, डुदाञ् दाने। आदृवर्णोपधालोपिनां किर्द्वेचेति किप्रत्ययः, द्वेचेति वचनाद् द्विर्वचनम्, ह्रस्वः, आलोपो सार्वधातुके इत्यालोपः। गा इत्यत्र अम्शसोरा इत्यात्वम्। उ– ओदनं बुभुक्षुः। भुजपालने धातोर्वा कर्मण इति सन् चणपरोक्षेति द्विर्व, द्वितीयचतुर्थयोरति भस्य बः, चवर्गस्य किः, षत्वम्, सनन्ताशंसीति उ प्रत्ययः, अस्य च लोपः। उक्–आगामुको ग्रामं देवदत्तः, गम्लृ गतौ, आङ् पूर्वः, स्पृकमगमहनेति उकञ् प्रत्ययः, अस्योपधेति दीर्घः। इष्णुक्– कन्यामलङ्करिष्णुः, डुकृञ्करणे, अलं पूर्वः। भ्राज्यलङ्कृञिति इष्णुः, गुणः। क्त्वा – कटं कृत्वा, एककर्तृकयोरिति क्त्वा। खल्– ईषदाढ्यं भवं भवता। भू सत्तायाम्, ईषदाढ्य शब्दौ पूर्वौ, कर्तृकर्मणोश्च भूकृञोरिति खल्। यु–ईषत्स्थानं भवता। ष्ठागतिनिवृत्तौ,

ईषत्पूर्वः। अकृच्छ्रेण स्थीयते इति, आतो युःदरिद्रातेरिति युः, युवुझामित्यनादेशः। शानङ्– सोमं पवमानः, पूङ् पवने, पूङ्यजोश्शानङ्, अन्विगुणः, आन्मो अन्त इति मकारागमः। तृन् –कर्ता कटान्। करोति तच्छीलः, तृनिति तृन्, गुणः। वुण्– कटं कारको व्रजति, डुकृञ् करणे, वुण् तुमौ क्रियायामिति वुण्। णिन्– शतंदायी। डुदाञ् दाने, आवश्यकाधमर्णयोरिति णिनिः, आयिरिच्यादन्तेत्यायिः। वर्तमाने काले यः क्त प्रत्ययः तेन योगे प्रतिषेधो नेष्यते।राज्ञां ज्ञातः। ज्ञा अवबोधने ञ्यनुबन्धमतिबुद्धीति वर्तमाने काले क्तः। कमेर्य उकञ् प्रत्ययस्तेन योगेऽपि प्रतिषेधो नेष्यते इत्यर्थः। दास्याः कामुकः। वुण् प्रत्ययो भविष्यत् काले विहितो गृह्यते यौ वुण्तुमावित्यनेन विहितस्तेनेह प्रतिषेधो न भवति। यवानां लावकः, सक्तूनां पायकः।

● षडो णो ने २/४/४२

षड् इत्यस्य णत्वं भवति ने नकारे परे। षण्णाम्, षड्भिरधिका नवतिः षण् नवतिः, षण्णां नगरी षण्नगरी। न इति किम्? षड्भिः।

● मनोरनुस्वारो घुटि २/४/४३

मकार न कारयोरनुस्वारो भवति धुटि परे। मकारस्यापदान्तस्य ग्रहणम् पदान्ते सिद्धत्वात्। एवमुत्तरत्र आक्रंस्यते, आरंस्यते, क्रमु पादविक्षेपे, रमु क्रीडायाम् स्यते, आङ्पूर्वः। अनेनानुस्वारः। सर्पींषि, पयांसि, यशांसि, धुटीति किम्? गम्यते, मन्यते।

● वर्ग्ये वर्गान्तः २/४/४४

मकारनकारयोः वर्ग्येपरे वर्गान्तो भवति, पूर्वेणानुस्वारः प्राप्तः, शान्तः शान्तवान्, शमु उपशमे। गत्यर्थाकर्मकेति क्तः, निष्ठेतिकुर्वन्तः, पञ्चमोपधेति दीर्घः। शङ्किता, वङ्किता, शकि शङ्कायाम्, वकिकौटिल्ये। इकारो नकारागमार्थः। अनिदनुबन्धेति ज्ञापकान्नकारागमः, ता, इट्।

● तवर्गश्चटवर्गयोगे चटवर्गौ २/४/४५

तस्य वर्गः तवर्गः, चश्च ट श्च तौ चटौ, चटयोर्वर्गौ चटवर्गौ, चट वर्गाभ्यां योगः चटवर्गयोगः। चटवर्गयोगे सति तवर्गश्चट वर्गावादेशौ प्राप्नोति यथासंख्यम्। तवर्गस्य चवर्ग योगे – राज्ञः, भृज्जति। भ्रस्ज पाके, ति, अन्वि,

ग्रहिज्यावयीति सम्प्रसारणे, लृतुलसाः दन्त्या इति स्थानसावर्ण्यात् धुटां तृतीय इति सस्य दः, अनेन दस्य जः। याच्ञा। डु याचृ याच्ञायाम्। याचिविच्छि प्रच्छीति नङ्, तस्यानेन ञः। तवर्गस्य चटवर्ग योगे, ईट्टे, इड् स्तुतौ वर्तमाना, ते, अन्वि, अदादेर्लुक्, अघोषेष्वशिटामिति डस्य टः, परस्य तकारस्यानेन टः। अड्डति, अड्ड अभियोगे, ति, अन्वि। षण्णाम्। तवर्गश्चटवर्गे टाविति योगे कर्तव्ये गुरू सूत्र करणात् क्वचिन्न भवति, मधुलिट्ता, मधुलिट्त्वम्, मधुलिट्तरः मधुलिट्तमः।

● नामिकरपरः प्रत्ययविकारागमस्थस्सिष्षन्नु – विसर्जनीयषान्तरोऽपि २/४/४६

नामीच, कश्च रश्च ते नामिकराः, नामिकरेभ्यः परः नामिकरपरः, प्रत्ययश्च विकारश्च आगमश्च ते प्रत्ययविकारागमाः तेषुतिष्ठतीति प्रत्यय विकारागमस्थः, नाम्निस्थश्चेति तिष्ठतेः ड प्रत्ययः, नामिकरपरश्चासौ प्रत्ययविकारागमस्थश्चासाविति कर्मधारयः। नुश्च विसर्जनीयश्च षश्च ते नुविसर्जनीयषाः, तैरन्तरं यस्येति बहुव्रीहिः। नामिनः ककारात्, रेफश्चपरः सकारः प्रत्ययस्थः विकारस्थः आगमश्च सः षत्वमापद्यते, नुविसर्जनीयषान्तरोऽपि नु विसर्जनीय ष इत्येतैः व्यवहितोऽपि, अपिशब्दादव्यवहितोऽपि। सिकारादिकारः उच्चारणार्थः। नामिनस्तवात्– अग्निषु, वायुषु। कात् – वाक्षु त्वक्षु। रात् – गीर्षु, धूर्षु। एते प्रत्यय सकाराः। विकारसकारः – एषः। आगमसकारः – सर्वेषाम्, येषाम्, तेषाम्। नु विसर्जनीय षान्तरोऽपि। नु – सर्पींषि धनूंषि। विसर्जनीयः– सर्पिःषु, धनुःषु, ष– सर्पिष्षु, धनुष्षु। ननु परस्य सकारस्यषत्वे कृते विसर्जनीयस्य पररूपे विकल्पे च सति सर्पिष्षु, इति रूपद्वयं विसर्जनीय ग्रहणे एव कृते सिध्यतीति किं ष ग्रहणेन? उच्यते – विसर्जनीयविधौ वानुवृत्तेः। गीर्षु सजुर्ष्वित्यादिवत् सर्पिष्वपि विसर्जनीयप्रवृत्तिपक्षे सस्य षत्वे कृते तद् व्यवधाने च सति परस्य षत्वं न सिध्यतीति ष ग्रहणम्, नामिकर पर इति किम्? असौ। प्रत्ययविकारागमस्थ इति किम्? सुपिसौ। पिसृ पेसृ गतौ, शोभनं पिसतीति क्विप्? सात्प्रत्यय सकारस्य षत्वं नेष्यते – अग्निसात्, दधिसात्, सर्वं वस्त्रमग्नि सम्पद्यते। सर्वं दुग्धं दधि सम्पद्यते। तसादित्वात्सात्प्रत्ययः।

● रषृवर्णेभ्यो नोणमनन्त्यस्स्वरहयवककवर्गपवर्गान्तरोऽपि २/४/४७

रश्च षश्च ऋवर्णश्चेति द्वन्द्वः, न अन्त्यः अनन्त्यः, कस्यवर्गः कवर्गः एवं पस्य वर्गः पवर्गः स्वरहयवककवर्गपवर्गान्ति इति द्वन्द्वगर्भो बहुव्रीहिः। रेफषकारऋवर्णेभ्यः परोनकारः अनन्त्यः अपदान्तः णत्वमापद्यते स्वर हयवककवर्ग पवर्गान्तरोऽपि। स्वरहयवककवर्गपवर्गैः व्यवहितोऽपि। रेफात् तावत्– चतुर्ण्णाम्। षात्– पूष्णाम्, ऋवर्णात्–तिसृणाम्, पितृणाम्। स्वरहयवककवर्गपवर्गान्तरोऽपि पुरूषेण, अर्हेण, आर्येण, सर्वेण, अर्केण, मूर्खेण, गर्गेण, अर्घेण, दर्पेण, रेफेण, दर्भेण, धर्मेण। रषृवर्णेभ्य इति किम्? धनम्। अनन्त्य इति किम्? वृक्षान्, पितॄन्, गिरीन्। रषृवर्णान्नकारश्च यदा भिन्नपदस्थः तदा णत्वं नेष्यते। तेन–अग्निर्नयति, मधुनयति। विसर्जनीयजिह्वामूलीयोपध्मानीयानां व्यवधानेऽपीष्यते। उरः केण, उरःपेण, उर केण, उर पेण। कै गै शब्दे, पा पाने। उरस्पूर्कः, उरःकायति, उरसापिवतीति आतोऽनुपसर्गाड्ङः। क्वचिद्विकल्पेन णत्वं दृश्यते – क्षीरपाणम्, क्षीरपानम्, गिरिणदी, गिरिनदी, वदरीवणम्, वदरीवनम्। क्वचित्तु नैव – देवदारुवनम्, भद्रदारूवनम्। णकारादेर्धातो यो नकारः तस्योपसर्गस्थाद् रषृवर्णात्परस्य णत्वमिष्यते। प्रणयति, प्रणमति। णीञ् प्रापणे, णमु प्रह्वीभावे, ति, अन्वि, गुणः, णकारादेरिति किम्? प्रनन्दति, टुनदि समृद्धौ।

● स्त्रियामादाप् २/४/४८

आत्–अकारान्तात्लिङ्गात् स्त्रियां वर्तमानादाप् प्रत्ययो भवति। पकारो वैचित्र्यार्थः। देवदत्ता, या, सा, का। स्त्रियामिति किम्? देवदत्तः। आत् इति किम्? मतिः।

● नदाद्यञ्च्वाह्व्यन्स्यन्तृ सखि नान्तेभ्यः २/४/४९

नद शब्द आदि येषां ते नदादयः। नकारोऽन्ते येषां ते नान्ताः, ततो द्वन्द्वः। स्त्रियामित्येव, नदादिभ्यः शब्देभ्यः स्त्रियां वर्तमानेभ्यः अन्च्, वाह्, उ, इ, अन्सि, अन्त्, ऋ, सखि नान्त इत्येतेभ्यश्च ई प्रत्ययो भवति। नदादिभ्यस्तावत्– नदी, मही, किशोरी। अन्च् – प्राची, प्रतीची, अन्चु गतिपूजनयोः, क्विप्, अनिदनुबन्धेति न लोपः, अन्चेरलोप इत्यकार लोपः,

पूर्वस्य च दीर्घः। वाह्– पष्ठौही, वह प्रापणे, पष्ठंवहतीति वहश्चेतिविण्, अस्योपधेति दीर्घः। वाहेर्वाशब्दस्यौत्वम्। उ– पट्वी, मृद्वी। अन्स्– पेचुषी, विदुषी। विद्वन्स्, पेचिवन्स्। अनुषङ्गलोपः, अघुट्स्वरादौ सेट्कस्येति उत्वम्। अन्त्–गोमती, धनवती। ऋ–कर्त्री हर्त्री। सखि–सखी। नान्त–दण्डिनी, पद्मिनी, रूद्रादिराकृति गणः। यद्येवम्, अन्चादयो नोपादेयः सिद्धो हि तेभ्यो नदादिभ्यः ई प्रत्ययः, सत्यम्। प्रपञ्चार्थम्।

●ईकारे स्त्रीकृतेऽल्लोपः २/४/५०

स्त्र्यां कृतः स्त्री कृतः, लोपनीयो लोप्यः, अच्चासौ लोप्यः अल्लोप्यः, अकारोलोप्यो लोपनीयो भवति। स्त्रियां कृते ईकारे परे। देवी, नदी। ईकार इति किम्, युवतिः। युवन्शब्दाद् यूनस्तिरिति ति प्रत्ययः, स्त्रीकृत इति किम्? कुण्डे। औरीम्।

●स्वरो ह्रस्वो नपुंसके २/४/५१

नपुंसक लिङ्गविषये योऽन्त्यस्वरस्तस्य ह्रस्वो भवति। सेनानिकुलम्। यवलुकुलम्, सेनां नयति, यवांल्लुनातीति क्विप्, अनेन ह्रस्वः, अतिरिकुलम्, अतिनुजलम्, रायमतिक्रान्तम्, नावमतिक्रान्तमित्यर्थः। अनेन ह्रस्वः, ऐकारस्य इकारः, औकारस्य उकारः, नपुंसक इति किम्? गौः। अयं योगो विभज्यते, तेन स्वरो ह्रस्व इत्येको योगः, तेनानपुंसकेऽपि क्वचिद्ह्रस्वः। पञ्चभिःखट्वाभिः क्रीतः पञ्चखट्वः, निष्क्रान्तः कौशाम्व्याः, निष्कौशाम्विः, चित्रागावो यस्य स चित्रगुः। स्वर ग्रहणमन्त्यस्यैव स्वरस्य ग्रहणार्थम्। तेनेह मा भूत्–सुवाक् कुलमिति। वर्णान्त्यस्यविधिरिति वर्णान्त्यपरिभाषया अन्त्यस्यैव भविष्यतीति चेत्, तर्हि, विस्पष्टार्थम्।

भट्टोग्रभूति विरचितायां शिष्यहितायां वृत्तौ नामप्रकरणे कारकपादश्चतुर्थः।

नामप्रकरणे पञ्चमःपादः

● नाम्ना समासो युक्तार्थः २/५/१

नाम संज्ञां पूर्वाचार्याः लिङ्गस्य विभक्त्यन्तस्य च कृतवन्तः। युक्तश्चासावर्थः युक्तार्थः, नाम्नां यो युक्तार्थस्स समास संज्ञो भवति। एक रूपतामापन्नोऽर्थ युक्त इत्युच्यते। नीलं च तत् उत्पलं नीलोत्पलम्। राज्ञः पुरूषः, राजपुरूषः। युक्तार्थग्रहणं किम्? वस्त्रम्, नीलम्, उत्पलम्, वर्षासु पुष्यति, भार्यः राज्ञः पुरूषो देवदत्तस्य। समास संज्ञायाः क्व प्रयोजनम्? समासान्तगतानां वेत्यादिषु।

● तत्स्था लोप्याविभक्तयः २/५/२

तत्रतिष्ठन्तीति तत्स्थाः। नाम्निस्थाश्चेति डः, लोप मर्हन्तीति लोप्याः, तत्रसाधौ च य इति च शब्दादर्हेऽर्थे यः तद्ग्रहणेन समासः परामृश्यते। समासार्थञ्च वाक्यम् समास शब्देनोच्यते। यथा–इन्द्रार्थाः स्थूणाः इन्द्रशब्देन। तेन समासार्थे वाक्ये स्थिता या विभक्तयस्ता लोप्याः भवन्ति। राज्ञः पुरूषः, राज पुरूषः। शङ्कुलयाखण्डः शङ्कुलाखण्डः। लोप्या, इन्हन्प्रत्ययनिर्देशादन्यस्यापि लोपार्हस्य प्रयोग वशेन लोपः। देवमुखमिव मुखंयस्य स देवमुखः। घृतपूर्णो घटः घृत घटः। अविद्यमानं पापं यस्य स अपापः। अत्र मुख, पूर्ण, विद्यमानानां लोपः। वा तृतीयासप्तम्योरित्यतो वेति वर्तते। सा च व्यवस्थित विभाषा, तेन क्वचिन्न भवति विभक्ति लोपः। कण्ठे कालो यस्य सः कण्ठेकालः। उरसिलोमानि यस्य स उरसि लोमः। तथा आत्मन् शब्दात्परस्याः तृतीयायाः पूरण प्रत्ययान्ते पदे परे लोपो न भवति। जनार्दनस्त्वात्मचतुर्थ एव इत्यत्र त्वात्मा चतुर्थोयस्येति विग्रहः। बहुव्रीहिरयम्।

● प्रकृतिश्चस्वरान्तस्य २/५/३

विभक्ति ग्रहणमनुवर्तते। अर्ह प्रत्ययरहितं लोपग्रहणञ्च, तच्चार्थ वशात् सप्तम्यन्तं विज्ञायते। स्वरान्तस्यशब्दस्य समासे कृते विभक्ति लोपे च सति प्रकृतिः यथास्वरूपं भवति। प्रत्ययलोपे प्रत्ययलक्षणमिति वचनेन प्राप्तं कार्यम् निषिध्यते। मातरिनिपुणः मातृनिपुणः– पितरिसाधुः, पितृसाधुः। अर्णाविति अरादेशः प्राप्तः। सखायं प्राप्तः सखिप्राप्तः। घुटित्वै इत्यैत्वं न भवति।

विभक्ति निमित्तं कार्यं प्रकृतिभावेन निषिध्यते नान्यत्, स्वरान्तस्येति समानदीर्घ करणात्, तेन यवानामाढकं यवाढकमित्यत्र समानदीर्घस्सिद्धः।

● व्यञ्जनान्तस्य यत्सुभोः २/५/४

विभक्ति लोप ग्रहणमनुवर्तते, सकारे भकारे च परे यदुक्तं कार्यं तद्व्यञ्जनान्तस्य समासे कृते विभक्ति लोपे च सति भवति। विदुषः अर्थो विद्वदर्थः। अत्रानुषङ्गलोपो दत्वं च भवति, राज्ञः अर्थः राजार्थः, अत्रनकार– लोपः। दिवं गतो द्युगतः, दिव उत्वम् षण्णामाश्रयः षडाश्रयः। हशषच्छेति षषः डत्वम्। सुभोः युगपद् यदुक्तं तदिह विधीयते अत्र केवल भकारे तन्न, तेन अपांभारः अब्भारः इत्यत्र अपांभेद इति भकारे परे दत्वमुक्तम्, तन्न भवति स्भोरिति न कृतम्, वैचित्र्यार्थम्।

● पदे तुल्याधिकरणे विज्ञेयः कर्मधारयः २/५/५

आद्यं पद द्वयं प्रथमाद्विवचनान्तम् तुल्याधिकरणं, ययोः पदयोः तौ तुल्याधिकरणे। समास इति वर्तते। पद ग्रहणं च, तच्च द्वयमर्थवशात् सप्तम्यन्तं विज्ञायते। यत्र समासे पदे तुल्याधिकरणे तुल्याश्रये एकद्रव्य विषये भवतः, स समासः कर्मधारय संज्ञो ज्ञेयो, ज्ञातव्यः। ब्राह्मणी च दारिका ब्राह्मणदारिका कर्मधारय संज्ञेत्विति पूर्वपदस्य पुंवद्भावः, नीलं च तदुत्पलं नीलोत्पलम्। एवं स्नातानुलिप्तः। तुल्याधिकरण इति किम्? कल्याण्याः दुहिता, कल्याणी दुहिता, रामो जामदग्न्यः, व्यासः पाराशर्य, अर्जुनः कार्तवीर्यः इत्यत्र समासो न भवत्यनभिधानात्। शब्दाभावादित्यर्थः। कर्मसंज्ञायाः क्वप्रयोजनम्, कर्मधारय संज्ञेत्वित्यत्र।

● संख्यापूर्वोद्विगुरिति ज्ञेयः २/५/६

संख्या पूर्वा यस्य समासस्येति विग्रहः, संख्या पूर्वस्समासो द्विगु संज्ञो भवति। तद्धितानां येऽर्थाः तेष्वर्थेषु द्विगुः स्मर्यते, तथा समाहारेऽर्थे उत्तर पदे च। तद्धितार्थेषुतावत् –पञ्चकपालेषु संस्कृतः पुरोडासः पञ्चकपालः। अत्र संस्कृतेऽर्थे एवमादेरणिष्यते इत्यण्, तस्य द्विगोः लुगनपत्य इति लोको पचाराल्लुक् एवं पञ्चानां कपालानामियं पञ्चकपालम्। तस्येदमित्यण् पूर्ववल्लुक्, समाहारे– पञ्चानां नदीनां समाहारः पञ्चनदम्, पञ्चानांगवां समाहारः पञ्चगवम्, समासान्तगतेत्यकारस्समासान्तः, इवर्णावर्णलोपः, पञ्चानां ब्राह्मणानां समाहारः

पञ्चब्राह्मणी, दशग्रामी, पञ्चशती, द्विगुरितीकारः उत्तर पदे–पञ्चगावोधनं यस्य स पञ्चगावधनः। अत्र धनशब्द उत्तरपदे परे पञ्चगव इत्ययं द्विगुः शिष्टस्तु बहुव्रीहिः। गोशब्दादकारस्समासान्तः। द्विगुसंज्ञायाः क्वप्रयोजनम्? द्विगोरित्यादिषु।

● तत्पुरुषावुभौ २/५/७

उभौ द्वौ द्विगु कर्मधारयौ तत्पुरुषसंज्ञौ भवतः, कुत्सितश्चासावश्वः कदश्वः। एवं कदष्ट्रः, कदन्नम्। अत्रकर्मधारयस्य तत्पुरुषत्वात् कदिति क शब्दस्य कदादेशः। पञ्चानां राज्ञां समाहारः पञ्चराज्ञी। एवं पञ्चगवम् । अत्र द्विगोस्तत्पुरुषत्वादकारस्ससासान्तः, स हि राजगोशब्दयोः तत्पुरुषे एव पूर्वाचार्यैः स्मर्यते।

● विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु समस्यन्ते, समासो हि ज्ञेयः तत्पुरुषस्स च २/५/८

आदमिवा आद्या, द्वितीया आद्या यासां विभक्तीनां ताः द्वितीयाद्याः, यत्र समासे द्वितीयाद्या विभक्तयो द्वितीयादिविभक्त्यन्ताश्शब्दाः परपदेन नाम्ना सह समस्यन्ते, एकीभावमापद्यन्ते स समासस्ततपुरुष संज्ञो भवति। द्वितीया– धर्मं श्रितो धर्मश्रितः, मुक्तिं गतः मुक्तिगतः। तृतीया– शङ्कुलयाखण्डः शङ्कुलाखण्डः, दण्डेन हतः दण्डहतः। चतुर्थी– यूपायदारु यूपदारु, वैश्रवणाय वलिः, वैश्रवणवलिः। पञ्चमी– वृकेभ्योः भयम् वृकभयम्। ग्रामान्निर्गतः ग्रामनिर्गतः। षष्ठी– राज्ञः पुरुषो राजपुरुषः। ब्राह्मणानां याजको ब्राह्मणयाजकः सप्तमी– अक्षेषु शौण्डः अक्ष शौण्डः। तीर्थेकाकः तीर्थकाकः। परपदेनेति किम्? गतो ग्रामम्। क्वचिद् द्वितीयान्तं परपदं पूर्वपदेन नाम्ना सह समस्यते सोऽपि तत्पुरुषः। प्राप्तो जीविकां प्राप्तजीविका, स्वरोह्रस्व इति ह्रस्वः एवमतिक्रान्तः खट्वाभति खट्वः। क्वचिद् द्वितीयाद्यभावेऽपि दृश्यते समासः, स्वयम् धौतौ स्वयंधौतौ। मासिभुक्तम् मासिभुक्तम्, अवभुक्तमित्यर्थः। तत्पुरुषसंज्ञायाः क्व प्रयोजनम्? नस्य तत्पुरुषेलोप इत्यत्र।

● स्यातां यदिपदे द्वे तु यदि वा स्युर्बहून्यपि तान्यन्यस्यपदस्यार्थे बहुव्रीहिः २/५/९

यत्रसमासे द्वे पदे अन्यस्य पदस्यार्थे वर्तमाने समस्येते , एकीभावमापद्येते,

वर्तमानानिसमस्यन्ते एकीक्रियन्ते बहूनि व। पदानि, स समासो बहुव्रीहि संज्ञो भवति। दण्डैश्च दण्डैश्च यद् युद्धंतद् दण्डादण्डि, समासान्त गतेति इकारस्समासान्तः, आकारो महतः कार्य इति कार्यग्रहणादात्वम्। अव्ययं चैतत्। सहपुत्रेण विद्यते यस्सः सपुत्रः। स परस्वरायास्सम्प्रसारणमिति ज्ञापकात् सहशब्दस्य स भावः। एवं सभार्यः। विहिता पूजा येन स विहितपूजः, चित्रागावोयस्य स चित्रगुः, स्वरो ह्रस्वइति ह्रस्वः। समीपे दशानाम्, उपदशः। अकारस्समासान्तः। वार्थेऽपि बहुव्रीहिर्वक्तव्यः। त्रयो व। चत्वारो वा त्रि चतुरः द्वित्रयाः, अकारस्समासान्तः, अत्र संशयो वार्थः, न तु विकल्पः, बहूनिवा पदानि। उन्मत्ताः बहवो मातङ्गाः यस्मिन्वने तद् उन्मत्तबहुमातङ्गवनम्। रविकिरणपरिकरेणविकसितानि नलिनी वनानि यत्र सरसि तद्रविकिरणपरिकर विकसितनलिनी वनम्। ननु च अस्ति क्षीरं यस्याः सा अस्ति क्षीराब्राह्मणी इत्यत्र कथं समासो भवति? नाम्नामित्यनुवृत्तेः। सत्यम्—नायमस्ति आख्यातपदम् किं तर्हि तत् सदृशो निपातः। बहुव्रीहि संज्ञायाः क्वप्रयोजनम्? बहुव्रीहौ चेत्यत्र।

● विदिक्तथा २/५/१०

विदिगिति लुप्त सप्तम्येक वचनम्, विदिशि अन्तराले वाच्यायां यो दिग्वाचिनां शब्दानाम् समासस्सबहुव्रीहि संज्ञो भवति, दक्षिणस्याश्च पूर्वस्याश्च दिशो यदन्तरालं विदिक् सा दक्षिणपूर्वा एवं पूर्वोत्तरा पुंवद्भाषित पुंस्केति योग विभागात्पूर्व पदस्य पुंवद्भावः। ऐन्द्रयाश्च कौवेर्याश्च दिशोर्यदन्तरालं विदिगित्यत्र समासो न भवत्यनभिधानात्। ननु पूर्वेण सिद्धत्वादपार्थ को योगारम्भः? उच्यते— दिशां वेत्यत्र एतत्सूत्र विहितस्य बहुव्रीहेर्ग्रहणं यथास्यात् पूर्वसूत्रविहितस्य मा भूत्, किंचस्यात् पूर्वैवोत्तरा यस्याः मुग्धायास्स पूर्वोत्तरा, तस्यै पूर्वोत्तरायै, इत्यत्र विकल्पेन सार्वनामिकं कार्यं भवेत्, तस्माद्विदिशि वाच्यायां यो बहुव्रीहिस्तस्य दिशां वेत्यत्र परिग्रहो यथास्यादन्यस्य च मा भूदिति योगारम्भः।

● द्वन्द्वःसमुच्चयो नाम्नोर्बहूनां वापियो भवेत् २/५/११

यत्रसमासे द्वयोर्नाम्नोर्बहूनां नाम्नां समुच्चयः, इदं च इदंच इत्येवं रूपस्समासो द्वन्द्व संज्ञो भवति, तं च द्वयोरर्थयोःस्मरन्ति इतरेतरयोग समाहारे च यत्रावयवः प्रधान स इतरेतर योगः, यत्र समूहः प्रधानं स समाहारः।

इतरेतर योगे – नर नारायणौ, शुक्रवृहस्पती, भीमार्जुनवासुदेवाः, समाहारे– प्राणितुर्यसेनाङ्गानां द्वन्द्वस्समाहार एव स्मर्यते। पाणिपादम्, शिरोग्रीवम्, मार्दङ्गिकपाणविकम्, रथिकाश्वरोहम्। जातिवाचिनामप्राणिनाञ्च– वदरामलकम्। अप्राणिनामितिकिम्?ब्राह्मणक्षत्रियौ। क्षुद्रजन्तूनाञ्चः–

क्षुद्रजन्तुरनस्थिस्स्यादथवा क्षुद्र एव च।
शतं वा प्रसृतिर्येषां केचिदानकुलादपि।।

क्षुद्रजन्तूनाम्– यूकालिक्षम्, दंशकमषकम्। शाश्वतिको येषां विरोधोऽस्ति तेषाञ्च– अहिनकुलम्। वृक्षमृगतृणधान्य व्यञ्जन पशु शकुनि वाचिनां समाहारे इतरेतरयोगे च– प्लक्षन्यग्रोधम्–प्लक्षन्यग्रोधाः, हरिणवराहम्–हरिणवराहाः, कुशकाशम्–कुशकाशाः। यवमाषम्–यवमाषाः, दधिघृतम्– दधिघृताः। गोमहिषम्, गोमहिषाः। हंसचक्रवाकम्–हंसचक्रवाकाः। अश्ववडवम्–अश्ववडवाः, पूर्वापरम्–पूर्वापराः। अधरोत्तरम्–अधरोत्तराः। एवं समाहारे इतरेतर योगे च लक्ष्यानुसारेण द्वन्द्वो बोद्धव्याः। द्वन्द्व संज्ञायाः क्वप्रयोजनम्? द्वन्द्वस्थाच्चेत्यादिषु।

● अल्पस्वरतरंपूर्वम् २/५/१२

अल्पेस्वराः यस्य लिङ्गस्य तदल्पस्वरम् इदमनयोरल्पस्वरमल्पस्वरतरम्, अतएव निर्देशादाख्याताच्च तमादय इति तर प्रत्ययः, तत्र द्वन्द्वे यदल्प स्वरतरं तत्पूर्वमेव प्रयोक्तव्यम्–धवखदिरम्–प्लक्षन्यग्रोधम्। तण्डुल किण्वे, उलूखलमुसले इत्यादयस्तु प्रमादजाः प्रयोगाः। तरग्रहणाल्लध्वक्षरस्य पूर्वनिपात इष्यते–कुशकाशम्।

● यच्चार्चितं द्वयोः २/५/१३

द्वन्द्वे समाहारे द्वयोः नाम्नोर्मध्याद् यदर्चितं पूजितं नाम तत्पूर्वं प्रयोज्यम्। मातापितरौ। आकारो महतेति कार्य ग्रहणादात्वम्। वासुदेवार्जुनौ, ब्राह्मणक्षत्रियौ। द्वयोरिति किम्? भीमार्जुनवासुदेवाः। ऊनायास्संख्यायाः पूर्व निपातो द्वन्द्वे इष्यते– नवतिशतम्, अष्टोत्तरशतम् अग्निसंज्ञकस्य–पटुगुप्तौ। स्वरादेरकारान्तस्य च– उष्ट्रखरम् सर्वनामसंख्याविशेषणस्य सप्तम्यन्तस्य बहुव्रीहौ– सर्वश्वेतः, द्विशुक्लः, चित्रगुः, कण्ठेकालः। निष्ठायाञ्च– पीतोदकः। प्रियशब्दस्य बहुव्रीहौ प्रियरूद्रः रूद्रप्रियः। काकमयूरौ, शशिभास्करौ इत्यादयस्तु प्रमादजाः प्रयोगाः।

● पूर्ववाच्यंभवेद्यस्य सोऽव्ययीभाव इष्यते २/५/१४

यस्य समासस्य पूर्वं शब्दरूपं वाच्यं प्रधानं भवेत्स समासः अव्ययीभावसंज्ञो भवति, समीपं कुम्भस्य उपकुम्भम्। समीपार्थोऽत्र प्रधानम्, समृद्धिर्मगधानाम्। सुमगधम्, अभावः पापानाम् पापम्, अत्ययः शीतानाम् अतिशीतम्, पश्चाद्रथस्य अनुरथम्, शक्तिमनतिक्रम्य यथाशक्ति। यावच्छब्दोऽवधारणेऽर्थेसमस्यते– यावन्त्यामन्त्राणि यावदामन्त्रं ब्राह्मणाः भोज्यन्ताम्। अप परि वहिस् अन्य इत्येते पञ्चम्यन्तेन नाम्ना सह समस्यन्ते– अपसाकेतात् अपसाकेतम्, परिकुरूक्षेत्रात् परिकुरूक्षेत्रम्, वर्हिग्रमात् वहिर्ग्रामम्, प्राग्ग्रामात् प्राग्ग्रामम्, प्रत्यग्ग्रामात् प्रत्यग्ग्रामम्। व्याप्तिमर्यादयोरर्थयोराङ् शब्दस्य– आपटलि पुत्राद्– आपटलिपुत्रम्, आजन्मतः–आजन्म। पारे मध्ये शब्दौ षष्ठ्यन्तेन नाम्ना सह समस्येते। पारेयमुनायाः पारेयमुनम्, एवं मध्येयमुनम्। स्वरोह्रस्वइति ह्रस्वः। पूर्वपदंषष्ठ्यन्तं प्रति शब्देनाल्पार्थेन समस्यते, अव्ययीभावश्चासौ समासः– सूपस्य स्तोकं सूपप्रति एवं शाकप्रति। अनव्ययपूर्वकत्वादत्राप्राप्तेऽव्ययीभावइष्यते। अव्ययीभावसंज्ञायाः क्व प्रयोजनम्? अव्ययीभावादकारान्तेत्यत्र।

● स नपुंसकलिङ्गस्स्यात् २/५/१५

नपुंसकं लिङ्गं यस्य स नपुंसक लिङ्गः। अव्ययीभाव संज्ञस्समासो नपुंसकलिङ्गो भवति, उक्तान्युदाहरणानि, अव्ययीभावस्याव्ययं पूर्वपदं, तच्च प्रधानम्। न च तस्य लिङ्गं किञ्चदस्तीति लिङ्गशून्योऽव्ययीभावस्स्यादिति नपुंसकत्वमस्य विधीयते, द्वन्द्वस्य तत्पुरूषस्य च यत्परं लिङ्गं तदिष्यते, कुक्कुटमयूर्याविमौ, मयूरीकुक्कुटाविमौ, तत्पुरूषस्य च अर्धं पिप्पल्याः अर्धपिपली इयम्, अत्र अर्ध शब्दः प्रधानमिति तदीयं नपुंसकत्वं समासस्य प्राप्तम्, द्वन्द्वेऽपि पूर्वपदोत्तरपदयोः प्राधान्यात् पर्यायेण तयोस्सम्बन्धिलिङ्गं प्राप्तम्। सेना सुराच्छाया शाला निशा इत्येवमन्तस्तत्पुरूषो नपुंसकलिङ्गो वा वक्तव्याः ब्राह्मणसेनम् ब्राह्मणसेना, यवसुरम्– यवसुरा, वृक्षच्छायम् वृक्षच्छाया, गोशालम्– गोशाला, अश्वशालम्–अश्वशाला, कृष्णनिशम्– कृष्णनिशा च्छायान्तरतत्पुरूषो बाहुल्येन गम्यमाने नित्यम् शलभच्छायम्। समासान्ततत्पुरूषो बहुलम्, ईश्वरसभम्, इनसभम्, रक्षस्सभम्, राजसभा, देवसभा, देवदत्तसभा

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः, क्वचिद्विभाषा क्वचिदन्यदेव
विधेर्विधानं वहुधासमीक्ष्य चतुर्विधं बाहुलकं वदन्ति।।

एत्येवं रूपोऽर्थो बहुलग्रहणस्य वोद्धव्यः। क्रियाविशेषणानां नपुंसकलिङ्गत्वमिष्यते, मृदुपचति असौ, नपुंस्कात्स्यमोरिति लोपः।

● द्वन्द्वैकत्वम् २/५/१६

द्वन्द्वस्य समासस्य यदेकत्वं समाहारस्तन्नपुंसकलिङ्गं भवति, पाणिपादम्, रथिकाश्वरोहम्।

● तथा द्विगोः २/५/१७

द्विगोस्समासस्य नपुंसकत्वं भवति तथा तेन प्रकारेण यथापूर्वसूत्रेण समाहारस्य नपुंसकत्वं तथा इहापि भवतीत्यर्थः। पञ्चगवम्, दशगवम्, पञ्चनदम्। यस्तु समाहारादन्यत्र द्विगुस्तन्नभवति। पञ्चसुकपालेषु संस्कृतः पुरोडासः पञ्चकपालः, अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते, पात्राद्यन्तं वर्जयित्वा। पञ्च ब्राह्मणी, दशग्रामी, दशपुष्पी। इह न भवति, पञ्चानां पात्राणां समाहारः पञ्चपात्रम्। एवं त्रिभुवनम्। पात्रादिराकृतिगणः, येषामकारान्तत्वं नपुंसकत्वञ्च दृश्यते ते पात्रादय इति वचनात्।

● पुंवद्भाषितपुंस्कादनूङ्पूरण्यादिषु स्त्रियां तुल्याधिकरणे २/५/१८

पुमानिव पुंवत्, भाषितः पुमान्येन तद्भाषितपुंस्कम्। अविद्यमानः ऊङ् प्रत्ययो यस्मात् स अनूङ् ततः कर्मधारयः पूरणी आदिर्येषां ते पूरण्यादयः, ततो नञ् समासः, तुल्याधिकरण इति बहुव्रीहिः, भाषितपुंस्कं यच्छब्दरूपं येन प्राक् पुमान् भाषितस्सम्प्रति च स्त्रियां वर्तते, अनूङ्प्रत्यय रहितं तत्पुंद्भवति पूरण्यादि वर्जिते स्त्रीलिङ्गे तुल्याधिकरणे–एकद्रव्याश्रये पदे परतः। पूरण प्रत्ययान्तो यः स्त्रीलिङ्गः स पूरणी शब्देनोच्यते। दर्शनीया भार्या यस्य स दर्शनीयभार्यः, अत्रभार्या दर्शनीय शब्दयोः तुल्याधिकरणम्। उत्तरपदस्य स्वरो ह्रस्व इति ह्रस्वः। एवं सुरूपभार्यः, कल्याणभार्यः। भाषितपुंस्क इति किम्? बलाकाभार्यः। अनूङिति किम्? ब्रह्मवन्धुभार्यः, ब्रह्मवन्धु शब्दात् ऊङ्वा इति ऊङ्, ङकार इहार्थः। पूरण्यादिष्विति किम्? कल्याणी पञ्चमी यासां ताः कल्याणी पञ्चमाः। पञ्चानां पूरणी पञ्चमी। संङ्ख्यायाः पूरणे डमाविति ड प्रत्ययः, नदादित्वादीकारः आदि ग्रहणात् प्रियादिपरेषु न भवत।

कल्याणी प्रिया यस्य सः कल्याणीप्रियः।

प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा समा चपला

स्वसा सचिवा दुहिता कान्ता भक्तिरिति प्रियादयः।।

स्त्रियामिति किम्? कल्याणी प्रमाणं येषां ते कल्याणीप्रमाणाः। तुल्याधिकरण इति किम्? कल्याण्याः माता कल्याणीमाता। द्विगोः पुंवदित्येको योगः कर्तव्यः। तेन यथादर्शनमन्यत्रापि पुंवद्भाव अनुत्तरपदेऽपि। इयमनयोरतिशयेन दर्शनीया दर्शनीयतरा। [2]ईषदसमाप्तौ दर्शनीया दर्शनीयकल्पा, कुत्सिता पट्वी, पटुरूपा, तस्यां वेलायां तदा, ता त्वयोः परयोर्गुणवाचिनः पुंवद्भावः। पट्व्याः पटुता पटुत्वम्। गुण वाचिन इति किम्? पठीता पठीत्वम्, कठीता कठीत्वम्। बह्वर्थस्याधिकार्थस्य च शसिपरे पुंवद्भावः। बह्वीभ्यो देहि, बहुशो देहि। प्रभूताभ्यो देहि प्रभूतशो देहि। एवमल्पाभ्यो देहि, अल्पशो देहि, स्तोकशो देहि। वेति वर्तते, सा च व्यवस्थित विभाषा, तेन द्रोणी, भार्या इत्यादयो न भवन्ति।

● संज्ञापूरणी कोपधास्तु न २/५/१९

ककार उपधा यस्याः स्त्रियः सा कोपधा, ततो द्वन्द्वः। संज्ञायाः पूरण्याः कोपधायाः स्त्रियः पुंवद्भावो न भवति, पूर्वेण प्राप्तः। दत्ता भार्या यस्य स दत्ताभार्यः। एवं पञ्चमीभार्यः, पेचिकाभार्यः, नागरिकाभार्यः। वक्तव्यात् त्व प्रत्ययः। वुण्, प्रत्ययादेशस्य यः ककारः तद्धितश्च, तस्येह ग्रहणम्। तेनेह प्रतिषेधो न भवति– पाकाभार्या यस्य सः पाकभार्यः। भेकाभार्या यस्य सः भेकभार्यः, पाकभेकशब्दावौणादिकौ। पाकशब्दः प्रथम वयो वाची, भेकशब्दो विभेतेः। कः प्रत्ययः अजादित्वादाप्। अन्यस्मादस्यादन्तत्वाज्जातेः पुंवद्भावो नेष्यते। ब्राह्मणीभार्यः, कुक्कुटीभार्यः।

● कर्मधारयसंज्ञेतु पुंवद्भावो विधीयते २/५/२०

कर्मधारय इति संज्ञा यस्य समासस्य स कर्मधारयसंज्ञः। पुमानिव पुंवत्, पुंवदित्यस्य भावः पुंवद्भावः, संज्ञापूरणीकोपधानां कर्मधारये समासे सति पुंवद्भावो भवति। पूर्वेण प्रतिषेधः प्राप्तः तस्य तु बहुव्रीहिविषयः दत्ता चासौ वृन्दारिका दत्तवृन्दारिका, एवं पञ्चम वृन्दारिका, पाचक वृन्दारिका।

---

१. पाणिनिः– प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वसा कान्ता समा चपला दुहिता क्षमा अबला तनया इति प्रियादयः (गण पाठ ८३१)

२. ईषदसमाप्ता

● आकारो महतः कार्यस्तुल्याधिकरणे पदे २/५/२१

महत इत्यस्यात्वं भवति, तुल्याधिकरणे परतः महांश्चासौ देवः महादेवः, महान्कायो यस्य स महाकायः, अनुषङ्ग लोपे, पक्षे आत्वं भवति। तुल्याधिकरण इति किम्? महतः पुत्रः महत्पुत्रः। कार्यग्रहणादन्यस्यापि यथा दर्शनमात्वम्। दण्डादण्डि, दण्डश्चदण्डश्चेति द्वन्द्वः। एकश्चदशच ते एकादश एवं द्वादश। अथास्माद् द्वाविंशतिः, द्वात्रिंशत्, मातापितरावित्यादिष्वपि भवति।

● नस्य तत्पुरूषे लोपः २/५/२२

पद ग्रहणमनुवर्तमानमर्थवतामपि विज्ञास्यते अन्यपदस्य तत्पुरूषे सति लोपो भवति। नकारस्यादिर्वर्णोलुप्यते न त्वन्यः, दरिद्रातेरसार्वधातुक इति ज्ञापकात्। न ब्राह्मणः अब्राह्मणः, न वृषल अवृषलः। पदस्येति किम्? वामनस्य पुत्रः वामनः पुत्रः नकारः पदं भवति। तत्पुरूष ग्रहणं समासस्योप लक्षणार्थम्। तेनेहापि लोपः। अभावो मषकानाम् अमषकम्। न विद्यते पापं यस्य स अपापः।

● स्वरेऽक्षर विपर्ययः २/५/२३

अक्षरञ्च अक्षरञ्च ते अक्षरे, अक्षरयोर्विपर्ययः अक्षरविपर्ययः। नस्य पदस्य ये द्वे अक्षरे नकाराकारौ तयोर्विपर्ययो भवति स्वरे परे। न अश्वः अनश्वः। न विद्यते अश्वो यस्य सोऽप्यनश्वः, अन्स्वरे इति न कृतं वैचित्र्यार्थम्।

● कोः कत् २/५/२४

कुशब्दस्य तत्पुरूषे कदादेशो भवति स्वरे परे। कुत्सितश्चासावश्वः कदश्वः, कदन्नम्। तत्पुरूष इति किम्, कुत्सिता उष्ट्राः यस्मिन्देशे स कूष्ट्रः। स्वर इति किम्? कुत्सितो ग्रामः कुग्रामः। त्रि रथ वद इत्येतेषु कोः कदादेशो वक्तव्यः। कुत्सिताः त्रयः कत्त्रयः, एवं कद्रथः, कुत्सितं वदतीति कद्वदः। पचादित्वादच्।

● कात्वीषदर्थे ऽक्षे २/५/२५

कोस्तत्पुरूष इति वर्तते, स्वर इति निवृत्तम्, ईषदर्थे मन्दार्थे वर्तमानस्य कुशब्दस्य कादेशो भवति, अक्षे शब्दे परे। अनीषदर्थार्थमक्ष ग्रहणम्।

इषन्मधुरं कामधुरम्। एवं कालवणम्, ईषदम्लं काम्लम्। कुत्सितोऽक्षः काक्षः।

● पुरूषे तु विभाषा २/५/२६

कुशब्दस्य तत्पुरूषे समासे सति विभाषया विकल्पेन का आदेशो भवति पुरुष शब्दे परे कुत्सितश्चासौ पुरूषः कापुरूषः, कुपुरूषः। कोः कत् कव क इत्येते आदेशाः भवन्ति उष्णशब्दे परे। कदुष्णम्, कवोष्णम्। मन्दोष्णम्, कोष्णम्।

● याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित् २/५/२७

ई च आकारश्च तौ याकारौ, स्त्रियां कृतौ स्त्रीकृतौ, ईकाराकारौ यौ स्त्रियां कृतौ, तयोः ह्रस्वो भवति पदे परतः क्वचित्, न सर्वत्र। रेवती मित्रं यस्य रेवतिमित्रः। रोहिण्यां दत्तः रोहिणिदत्तः। इष्टकाभिश्चितम् इष्टकचितम्, इक्षुकायाः मूलम् इक्षुकमूलम्। इह न भवति गार्गीपुत्रः, मालाहस्तः।

● ह्रस्वस्य दीर्घता २/५/२८

क्वचिद् ह्रस्वः दीर्घो भवति। द्विगुणौ कर्णौ यस्य स द्विगुणाकर्णः, एवं द्यङ्गुलाकर्णः। इह न भवति– शोभनकर्णः, सिद्धकर्णः।

● अनव्ययविसृष्टस्तुसकारं कपवर्गयोः २/५/२६

न अव्ययम् अनव्ययम्, ततष्षष्ठी समासः, कश्च पश्च तौ कपौ, क पयोः वर्गौ कपवर्गौ, अनव्ययस्य यो विसृष्टो विसर्जनीयः तस्य, न तु उत्तर पदस्थस्य, सत्वं स्मर्यते। कृ कमि कंस कुम्भः पात्र कुश कर्णीत्यादिषु परेषु। अयस्कारः, अयस्कामः, अयस्कंसः, अयस्कुम्भः, अयस्पात्रम्, अयस्कुशा, अयस्कर्णी। न तु उत्तर पदस्थस्येति किम्? परमपयः पात्रम्। आकारादपि परस्य क्वचित्सत्वं स्मर्यते। भास्कर। इस् उस् इत्येतयोः विसृष्टस्य। सर्पिष्करोति, धनुष्करोति, सिरसः पदम् सिरस्पदम्। एवमन्यत्र तमस्काण्डम्, मेदस्पिण्डमित्यादौ सत्वे वोद्धव्यम्। अनव्यय विसृष्ट इति किम्? पुनःकरोति, पुनः पिवति। तुशब्दात्क्वचिदनव्ययविसृष्टस्यापि सत्वम्। नमस्करोति। पुरस्कुरूते, आविष्कृतम्, दुष्कृतम्, दुष्पतिः, दुष्पुत्रः। अनव्ययविसृष्टस्यापि क्वचिन्न भवति। पयः पिवति, यशः पिवति।

भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तौ नामप्रकरणे समासपादः पञ्चमः।

नामप्रकरणे षष्ठः पादः

● वाणपत्ये २/६/१

लिङ्गाद् अण् प्रत्ययोभवति, अपत्यार्थे। ऋष्यन्धकवृष्णिकुरूवाचिभ्यः प्रत्ययमिमं स्मरन्ति। वशिष्ठस्यापत्यं वासिष्ठः। विश्वामित्रस्यापत्यं वैश्वामित्रः। आङ्गिरसः, श्वाफल्गः, वासुदेवः, नाकुलः। विदादिभ्यः वैदः, और्वः, भारद्वाजः। एवं यामुनः चैन्तितः। इत्थमन्यत्र लक्ष्यानुसारेण वोद्धव्यम्। संख्या संभद्र इत्येतत् पूर्वायाः मातुरन्त्यस्य अणि परे तुरादेशो वक्तव्यः। द्वयोः मात्रोरपत्यं द्वैमातुरः एवं षाण्मातुरः, भाद्रमातुरः। कन्याशब्दस्याणि परे कनीन आदेशो वक्तव्यः। कन्याया अपत्यं कानीनः।

● ण्यगर्गादेः २/६/२

वा ग्रहणमनुवर्तते समासान्तगत इत्यतः प्राक् राजादेर्गणादपत्येऽर्थे वा अण् प्रत्ययो भवति। गार्ग्यः, वात्स्यः, पक्षे गर्गस्यापत्यमित्यादि वाक्यं भवति। पौत्र प्रभृति यदपत्यं तत्रापत्ये प्रत्ययोऽयमिष्यते। नत्वन्तरापत्ये, जामदग्नि– पाराशराभ्यः। नन्वन्तरापत्य एव रामो–जामदग्न्यः, व्यासः–पाराशर्यः। एवमपत्य सन्ततेः प्रवर्तयिताराः गर्गादयो, यो लोके प्रसिद्धाः तेभ्यः प्रत्ययोऽयमिष्यते। तेनेह न भवति गर्गोनाम कश्चित् तस्यापत्यं गार्गिः। अयं विशेषो बह्वादेर्यावद् बोद्धव्यः। दित्यदितिपतिशब्दान्ताच्च अपत्येऽर्थे ण्य प्रत्यय इष्यते। दितेरपत्यं दैत्यः। एवम् आदित्यः, प्राजापत्यः, वार्हस्पत्यः। ननु गर्गस्यापत्यं गार्ग्यायण इति भवति, गार्ग्यायणस्यापत्यं गार्ग्यायणिः तस्यापत्यं गार्ग्यायणायणिः। पुनः तस्यापत्यमित्यादिषु वाक्य परम्परायां सत्यां प्रत्यय प्रवृत्तौ गार्ग्यायाणायणिरि त्यनिष्टं प्राप्तम्, एवमनवस्थेयम्? उच्यते– योऽत्र प्रसूतिः यदपत्यं तत्र एक एव प्रत्ययो भवति इत्यादिषु वा ण्यप्रत्ययान्तादायण् भवत्येव। तेन गार्ग्यायणस्यापत्यादि विग्रहे कृते गर्गशब्दात् विहितो ण्य प्रत्ययो भवति। एवमुत्तरत्रापि। ननु यद् गार्ग्यायणस्यापत्यं तत्कथं गर्गस्यापत्यं स्यादित्युच्यते– उत्पादयिता तेनापत्येन युज्यते तथा अपत्यसन्ततेः प्रवर्तयिताः अपि न पतन्ति।

● कुञ्जादेरायनणस्मृतः २/६/३

कुञ्जादेर्गणादपत्येऽर्थे वा आयनण् भवति, स्मृत ग्रहणमायनण् वा ण्य

प्रत्ययप्रवृत्त्यर्थम्। तं च स्वार्थे स्मरन्ति स्त्री विषये च, बह्वर्थे चायमिष्यते नत्वेवमादिभ्योऽप्यायणन्नणन्तेभ्यः क्रौञ्चायिन्यौ, क्रौञ्चायिन्यः, ब्रध्नायिन्यौ ब्रध्नायिन्यः। कौञ्जायनी कौञ्जायनाः, नारायणः चारायणः पौत्रादावपत्ये प्रत्ययोऽयमिष्यते, नत्वन्तरापत्ये। तेन तत्र कौञ्जिरित्यादि भवति, ण्य प्रत्ययान्तं कुञ्जादि मध्ये पठन्ति, तेन गर्गस्यापत्यं गार्ग्यायणः। कुञ्ज, ब्रध्न गण चर लिगु लोहित इत्याद्याः कुञ्जादयः।

● स्त्र्यत्रादेरेयण् २/६/४

स्त्र्यन्तादिरिति बहुव्रीहिगर्भस्समाहारो द्वन्द्वः, स्त्री प्रत्ययान्तेभ्यः अन्त्यादिभ्यश्च अपत्येऽर्थ एयण् भवति। सुपर्णायाः अपत्यं सौपर्णेयः, वैनतेयः नद्या अपत्यं नादेयः, मही–माहेयः, अत्रेरपत्यम् आत्रेयः, वैधेयः, शौद्रेयः। स्त्री ग्रहणेन स्त्रीप्रत्ययान्ताः शब्दाः गृह्यन्ते न तु स्त्रीवाचिनः ये केचित्। तेन आशीः प्रभृतिभ्यः प्रत्ययाभावः। प्रत्यासत्त्या च स्त्रीप्रत्ययाः गृह्यन्ते, ये स्त्रियामित्यत्र प्रकरणे विहिताः नतु स्त्रियां क्तिन्नित्यत्र। अत्रि, विधि, शूद्रा, विष्ठ, पूर, कृकिलास इतर इत्याद्याः अत्र्यादयः। कल्याणी, सुभगा, दुर्भगा, शब्दानामन्त्यस्य एयणि परे इण् आदेश इष्यते, कल्याणिनेय, सौभागिनेयः, दौर्भागिनेयः।

● इणतः २/६/५

अतः अकारान्ताद्वा इण् भवति अपत्येऽर्थे। दाक्षिः, देवदत्तिः, इण् प्रत्ययान्तादायणन स्मरन्ति, दाक्षायणः। जातिसंख्यासर्वनामभ्य इण् नेष्यते। काकस्यापत्यम्, एकस्यापत्यम्, सर्वस्यापत्यम्। अणपि न भवत्यनभिधानात्। "कुतश्चरति मायूरिः केन कापिञ्जलिर्कृत" इत्यादयस्तुकादाचित्काः प्रयोगाः।

● बह्वादेश्च विधीयते २/६/६

इणित्येव, बह्वादि गणादपत्येऽर्थे वा इण् भवति, बाहोरपत्यं बाहविः औपबिन्दविः, औपचाकविः। सुधातृ शब्दस्य इण् वक्तव्यः, अन्त्यस्य च अकादेशः। सुधातुरपत्ययं सौधातकिः। बाहु, उपबिन्दु, वलाका, मूषिका पञ्चन् सप्तन्, पुष्करन्, जङ्घा देवशर्मन् इत्याद्याः बाह्वादयः।

● रागान्नक्षत्रयोगाच्च समूहात् सास्य देवता, तद्वेत्त्यधीते वा तस्येदमेवमादेरणिष्यते २/६/७

तदिति द्वितीयैकवचनान्तम्, रज्यते येन स रागः, व्यञ्जनान्ताच्चेति घञ् नक्षत्रेण योगः नक्षत्रयोगः, एवमादिर्यस्य गणस्य स एवमादिः, समूहादिति च पञ्चमीं सप्तम्याः स्थान इत्याहुः, रागादण् प्रत्ययो भवति, तेन रक्तुमित्यत्रार्थे। अयं चार्थो व्याह्वियते नक्षत्रयोगादभावेति, तेन रक्तुमित्यत्रार्थे नक्षत्रयोगादण् भवति। नक्षत्रेण युक्त काल इत्यर्थे नक्षत्र योगादिति यद्यप्युपात्तम् तथापि नक्षत्र योगादयं प्रत्ययः। नह्यन्यस्मात्प्रतीतेः नक्षत्रेण जानाति कालस्य योगस्स्यात्, लिङ्गात् समूहेऽर्थे सास्यदेवतेत्यर्थे प्रत्ययः। तद्वेत्ति तदधीत इत्येतयोरर्थयोस्तस्येदमित्यत्रार्थे एवमादावन्यस्मिन्नप्यर्थे अण् भवति। रागात् तावत्– कुञ्कुमेन रक्तं कौञ्कमम्, हरितालम्, कथं हारिद्रौ कुक्कुटस्य पादाविति? नह्यत्र हरिद्रया रक्तत्वं गम्यते, सत्यम्– हरिद्राविव हारिद्रावित्युपमानादयं प्रयोगः। कोपेन रक्तं मुखम्। रूपेण रक्ताकान्ता, इत्यत्र न भवत्यनभिधानात्। लाक्षारोचनाशकलकर्दमेभ्य इकण् वा वक्तव्यः। लाक्षयारक्तम् लाक्षिकम्, एवं रौचनिकम्। शाकलिकम् कार्दमिकम्। नील शब्दादणो लुग् वक्तव्यः। नीलेन रक्तं नीलं वस्त्रम्, पीतात्क प्रत्ययो वक्तव्य।ः, पीतेन रक्तं पीतकम्। नक्षत्रप्रयोगे–पुष्येण युक्तः पौषः, वक्तव्याद्यलोपः। मघाभिः युक्तः माघः। यदा पुष्यादिभिः कालसामान्यस्य योगस्तदा प्रत्ययस्य लुकं स्मरन्ति। अद्य पुष्यः, अद्य मघा, यदा तु अहरादिलक्षणस्य कालविशेषस्य, तदा पौष इत्यादि भवति। समूहे– हंसानां समूहः हांसम्। ग्रामजनगजबन्धुसहायेभ्यस्ता प्रत्ययो वक्तव्यः। ग्रामाणां समूहः ग्रामता, जनता, गजता, बन्धुता, सहायता। उक्षन्, उष्ट्र, उरभ्र, राजन्, राजन्य, राजपुत्र, वत्स, मनुष्य, *अण् इत्येतेभ्यः अकण् वक्तव्यः। उक्षां समूहः औक्षकम् नस्य तु क्वचिदिति* न लोपः। एवम् औष्ट्रकम्, औरभ्रकम्, राजकम्, राजन्यकम्, राजपुत्रकम्, वात्सकम्, मानुष्यकम्, आजकम्। केदाराद् यण्वा वक्तव्यः। कैदार्यम्, कैदारकम्। कवचिन शब्दादिकण् वक्तव्यः कवचिनां समूहः कावचिकम्। ब्राह्मण, माणव, बारधेभ्यः य प्रत्ययो वक्तव्यः। ब्राह्मणानां समूहः ब्राह्मण्यम्, माणव्यम्, बारध्यम्। धेनु शब्दात् कमण् वक्तव्यः, धेनूनां समूहः धैनुकम। अचित्तवाचिनो हस्तिन् शब्दाच्चेकण् वक्तव्यः। अपूपानां समूहः आपूपिकम्, हस्तिनां समूहः, हास्तिकम्। पूर्ववन्नलोपः। इवर्णोवर्णलोपः। वाताद्य। वात्यानां समूहः वात्या, सास्यदेवता

शिवादेवता यस्य स शैवः, एवं वैष्णवः, बुद्धो देवता यस्य स बौद्धः उवर्णस्त्वौत्वमापाद्य इत्यौत्वम्। महेन्द्रादियण् वक्तव्यः। महेन्द्रो देवता यस्य स माहेन्द्रियः, पक्ष अण्, माहेन्द्रः। सोमादयण् वक्तव्यः। सोमो देवता यस्य स सौम्यः। ऋतु वायु शब्दाभ्यां य प्रत्ययो वक्तव्यः। ऋतव्यः, वायव्यः। अग्नि शब्दादेयण् वक्तव्यः– आग्नेयः। तद्वेत्ति तदधीते– छन्दो वेत्यधीतेवा छान्दसः। एवं वैयाकरणः। नय्वोः पदाद्योरिति ऐकारागमः। एतयोरर्थयोः क्रम पद शिक्षा मीमांसा शब्देभ्यः अक प्रत्ययो भवति। क्रममधीते वेत्तिवा क्रमकः, पदकः, शिक्षकः, मीमांसकः। लोकायत शब्दात्तथैव इकण् वक्तव्यः। लोकायतं वेत्त्यधीते वा, लौकायतिकः। अजन्ताच्च सूत्रात्– वृत्तिसूत्रमधीते वार्तिसूत्रिकः। तस्येदम्– मृगस्येदं मार्गम्। जन, पर, देव, राजभ्यः कीय प्रत्ययो वक्तव्यः। जनस्येदं जनकीयम्, एवं परकीयम्, देवकीयम्, राजकीयम्। एवमादौ निवासे अण्, निवसन्ति अस्मिन् निवासः। मधुरा निवासो यस्य माधुरः। तत आगतः– मथुरायाः आगतः माथुरः। तत्रभवः– मथुरायां भवः माथुरः। तत्रजातः– मथुरायां जातः माथुरः। तेन निवृत्तः– नगरैः निवृत्तः नागरः। एवमन्यत्राप्यर्थवसादयथाप्रयोगमण् बोद्धव्यः।

● तेन दीव्यति संसृष्टं तरतीकण् चरत्यपि पण्यच्छिल्पान्नियोगाच्च क्रीतादेरायुधादपि २/६/८

नियुज्यन्ते यस्मिन्निति नियोगः, व्यञ्जनान्ताच्चेति घञ्। तेन इत्येतत्पदं दीव्यति, संसृष्टं, तरति, चरति, क्रीतमित्येतैस्सम्बध्यते। क्रीतादेरिति पञ्चमी सप्तम्यास्स्थाने। तेन दीव्यति, तेन संसृष्टम्, तेन तरति, चरति इत्येतेष्वर्थेषु लिङ्गात् इकण् भवति पण्यार्थे, तदस्य पण्यमित्यत्रार्थे। शिल्पात्–तदस्य शिल्पमित्यत्रार्थे। नियोगात्– तत्र नियुक्त इत्यत्रार्थे इकण् भवति। तेनदीव्यति– अक्षैर्दीव्यति आक्षिकः, शालाकिकः। तेनसंसृष्टम्– दध्ना संसृष्टं दाधिकम्, लावणिकम्। लोलुनातीति लवणम्। शूलादिन् वक्तव्यः– शूलेन संसृष्टः शूलिन्यः धानाः। मुद्गादण् वक्तव्यः – मुद्गैः संसृष्टं मौद्गम्। तेनतरति–वेणुदारेण तरति वेणुदारिकः। द्विस्स्वरादिक् प्रत्ययो वक्तव्यः– घटेन तरति घटिकः। तेन चरति– चर भक्षणे गतौ च वर्तते। श्रृंगवीरेण चरति भक्षति गच्छति शार्ङ्गवीरिकः। शकटेन चरति गच्छति वा शाकटिकः। पण्यार्थे– गन्धः पण्यमस्य गान्धिकः। शिल्पार्थे– मृदंगवादनं शिल्पमस्य मार्दङ्गिकः तद्धितार्थे– मृदङ्गशब्दः स्वभावान्मृदङ्गवादने वर्तते। नियोगात्– द्वारेनियुक्तो दौवारिकः।

नय्वोः पदाद्योःवृद्धिरागम इति आदौ वृद्धेरागमः। अगारशब्दान्नियोगादिक् प्रत्ययो वक्तव्यः। देवागारे नियुक्तः दैवागारिकः, भण्डागारे नियुक्तः भाण्डागारिकः। तेन क्रीतम्– सप्तत्या क्रीतम् साप्ततिकम्, अशीत्या क्रीतम् आशीतिकम्। करणादेव स्मर्यते न तु कर्तुः, तेनेह न भवति देवदत्तेन क्रीतम्। शतशब्दात्क्रीतार्थे य इक् इत्येतौ वक्तव्यौ। शतेन क्रीतम् शत्यम्, शतिकम्। सहस्र वसनाभ्यामण् वक्तव्यः। सहस्रेण क्रीतं साहस्रम्, वसनेन क्रीतं वासनम्। आदि ग्रहणादर्थान्तरेऽपि इकण् वक्तव्यः। तदस्य परिमाणमित्यत्रार्थे। प्रस्थः परिमाणमस्य प्रास्थिको राशिः। तेनखनति– कुद्दालेन खनति कौद्दालिकः। तेन जीवति– वेतनेन जीवति वैतनिकः। आयुधेन जीवति आयुधिकः। उञ्क्षति– वदराणि उञ्छति वादरिकः। शब्दात्– करोतीत्यत्रार्थे इकण भवति शब्दं करोति शाब्दिकः वैयाकरणः। एवमन्यत्र। धर्म शब्दात्करोतीत्यत्रार्थे, धर्मम् करोति इति धार्मिकः। ओजस्, सहस् अम्भस् तेन वर्तत इत्यत्रार्थेऽपि इकण् वक्तव्यः। ओजसा वर्तते औजसिकः शूरः, साहसिकः चौरः, आम्भसिको मत्स्यः। धुर शब्दात् वहतीत्यत्रार्थे य एयण् इत्येतौ वक्तव्यौ। धुरं वहति– धुर्यः, धौरेयः। सर्वधुरा शब्दात्तथैव इण् प्रत्ययो वक्तव्यः– सर्वधुरं वहति सार्वधुरीणः। अस्ति नास्ति शब्दाभ्यां निपाताभ्यां मतिरस्येत्यत्रार्थे क प्रत्ययः वक्तव्यः– अस्ति पर लोके मतिर्यस्य सः आस्तिकः, नास्तिकः, परलोककर्तृके च कृत्यार्थे प्रयोगावेतौ स्मर्येते। आयुधात्– चक्रमायुधं यस्य स चाक्रिकः। धनुः शब्दात् कण् वक्तव्यः। धनुरायुधमस्य धानुष्कः। शकियष्टिभ्यामीकण्वक्तयः– शक्तिरायुधमस्य शाक्तिकः, एवं याष्टीकः।

● नावातार्ये विषाद्वध्ये तुलया सम्मितेऽपिच तत्रसाधौ च यः २/६/६

नौशब्दात्तार्येऽर्थे, विष शब्दाद् वध्येऽर्थे। तुलाशब्दात् सम्मिते परिच्छिन्नेऽर्थे, लिङ्गात्तत्र साधावित्यत्रार्थे य प्रत्ययो भवति। नावातार्यम् नाव्यम्, विषेण वध्यो विष्यः, तुलया सम्मितं तुल्यम्, सभायां साधुः सभ्यः, कर्मण्यः, शरण्यः। भक्ताण्ण प्रत्ययो वक्तव्यः। भक्ते साधुश्शालिः भाक्तः। पथ्यतिथिभ्यामेयण् वक्तव्यः, पथिसाधु पाथेयम्, एवम् आतिथेयम्, च शब्दादर्हेऽर्थे य प्रत्ययो वक्तव्यः। वधमर्हति वध्यः। दण्डमर्हति दण्ड्यः। धर्म पथ्यर्थ न्यायेभ्यः अनपेतेऽर्थे– धर्मादनपेतम् अचलितम् धर्म्यम्। एवं पथ्यम्, अर्थ्यम्,

न्याय्यम्। धर्म शब्दात् प्राप्येचार्थे— धर्मेण प्राप्यं धर्म्यम्। हृदयान्तस्य प्रिय इत्यत्रार्थे य प्रत्ययो वक्तव्यः। हृदादेशश्च, हृदयस्य प्रियं हार्द्यम्।

● ईयस्तुहिते २/६/१०

हितेऽर्थे लिङ्गात् ईय प्रत्ययो भवति। अश्वेभ्यो हितम् अश्वीयमं करभीयम्। हितशब्दात् शरीराद्यवयवार्थे वा इष्यते। दन्तेभ्यो हितं दन्त्यम्। कण्ठ्यम्। लिङ्गस्य सम्बन्धिनो ये स्वरास्तेषां यदा आ ऐ औ इत्येते स्वराः तु भवन्ति तदा भावेऽर्थे ईय प्रत्ययो वक्तव्यः। शालायां भवः शालेयः, माहिष्मत्यां भवः माहिष्मतीयम्, एतिकायनीयः, औपगवीयः। तस्येदमित्यत्रार्थेऽपि — शालायां भवः शालीयः, एवं पूर्वोक्तान्युदाहरणनि। भवच्छब्दात्तस्येदमित्यत्रार्थे कण् ईय इत्येताविष्येते। भवतः इदं भावत्कम्, भवदीयम्। स्वसृ भ्रातृ शब्दाभ्यामपत्येऽर्थे ईय प्रत्ययं स्मरन्ति। स्वसुरपत्यम् स्वस्रीयः, भ्रात्रीयः। आत्मन् शब्दात् हितेऽर्थे ईन् प्रत्यय इष्यते। आत्मने हितमात्मनीनम्।

● यदुगवादितः २/६/११

गो शब्द आदिर्यस्य गणस्य स गवादिः ततः समाहारे द्वन्द्वः अकारान्ताल्लिङ्गात्तथा गवादिभ्यश्च हेत्वर्थे यत् भवति, उकारो वैचित्र्यार्थः। उकारान्तात्— शङ्कुभ्यो हितं शङ्कव्यम्, परशव्यम्। स्वरस्सवर्णम् गृह्णातीतित्युकार ऊकारमपि गृह्णाति। तेन वधूभ्यो हितं वधव्यम्। गवादिभ्यः— गोभ्यो हितम् गव्यम्, हविष्यम्। यत् इत्येको भागः कर्तव्यः, तेन दिश् वर्ग, पन्थि, पक्ष, आदि, अन्त, वेशमुख, न्यायेभ्यः भवेऽर्थे ईय प्रत्ययः इष्यते। दिशि, भवं दिश्यम् एवं वर्ग्यमित्यादि उदाहार्यम्। राजन् शब्दात् क्षत्रिय जाति वाच्यायाम्—राजन्यः। श्वसुर शब्दादपत्येऽर्थे— श्वसुरस्यापत्यं श्वसुर्यः। सम्बन्धि शब्दादयं प्रत्ययः, यस्तु श्वशुरो नाम कश्चित् तस्यापत्यं श्वासुरिः। गोह, विष, मेधा, चर, स्खदा, क्षर, श्वन् इत्येवमादयः गवादयः।

● उपमानेवतिः २/६/१२

उपमीयते येन तदुपमानम्, उपमानेऽर्थे लिङ्गात् वति प्रत्ययो भवति। ब्राह्मण इव अधीते ब्राह्मणवत्,। ब्राह्मणमिव क्षत्रियं पश्यति बाह्मणवत्, मथुरायामिव मथुरावत्।

● ता त्वौभावे २/६/१३

भावेऽर्थेलिङ्गात् ता त्वौ भवतः, भवतः अस्मादभिधान प्रत्ययावितिभावः, यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशः तदभिधाने ता, त्वौ, भवतः। शब्दस्य प्रवृत्तिनिमित्तमिह भाव शब्देनोच्यते। गोः भावः गोता, गोत्वम्। ब्राह्मणता ब्राह्मणत्वम्। देवात् स्वार्थे ता प्रत्ययः वक्तव्यः। देव एव देवता।

● यण् च प्रकीर्तितः २/६/१४

भावेऽर्थे लिङ्गात् यण् च भवति, शुक्लस्यभावः शौक्ल्यम्, कृष्णस्यभावः कार्ष्ण्यम्, जात्यम्, ब्राह्मण्यम्। प्रकीर्तित ग्रहणात् कर्मण्यप्यर्थे यण् भवति। ब्राह्मणस्य कर्म ब्राह्मण्यम्, जात्यम्। भावकर्मणोरर्थयोर्यथादर्शनमणपि दृश्यते, यूनोभावः कर्म वा यौवनम्, मुनि--मौनम्, लघु--लाघवम्, गुरू--गौरवम्, पौरूषम् कौशलम्, नैपुण्यम्, कौतूहलम्, मृदु--मार्दवम्, पृथु मृदु लघु गुरूभ्यः भावेऽर्थे इमन् प्रत्ययोऽपि दृश्यते। पृथोर्भावः प्रथिमा, म्रदिमा, लघिमा, गरिमा। इमन् प्रत्यये परे इवर्णावर्णौ स्वर इति व्युत्क्रम पाठादुकार लोपः। पृथु मृदु शब्दयोरत्वम्, गुरूशब्दस्य च गरादेशः।

● तदस्यास्तीति मन्त्वादयः २/६/१५

आदौभव आद्यः, ततो बहुव्रीहिः, तदस्यास्तीत्यर्थे लिङ्गात् मन्त्वादयः भवन्ति, आदि पदेन वन्तु विन् इन् इत्याद्याः भवन्ति। मन्तु--गावो विद्यते यस्य स गोमान् । वन्तु-- अवर्णान्तात्, अवर्णोपधात् मकारान्तात् मकारोपधात्, धुडन्ताच्च शिड्वर्जितात् वन्तु स्मर्यते, यवादीन्वर्जयित्वा। वृक्षवान्, मालावान्, सुगण्वान्। सुगण् प्रशान् इत्येतौ क्विबन्तौ। किंवान्, दाडिमीवान्। धुडन्तात्--विद्युत्वान्, मरूत्वान्। शिड्वर्जितादिति किम्? आयुष्मान्। यवादिभस्तु न भवति। यवमान्, ऊर्मिमान्। विन्--अयन्ताल्लिङ्गात् माया मेधा स्रज इत्येतेभ्यश्च विन् स्मरन्ति। यशस्वी, तेजस्वी, मायावी, मेधावी, स्रग्वी। एभ्यो वन्तुरपि दृश्यते। इन्--दण्डी, मुसली, शिखा, शिखी, माया, मायी। वन्तुरप्येतेभ्यो दृश्यते। इति शब्दात् तदस्मिन्नस्तीत्यर्थे मन्त्वादयो भवन्ति। शालयो विद्यन्ते यस्मिन् स शालिमान्, गुणवाचिभ्यो मन्त्वादयो नेष्यन्ते। शुक्लो गुणो विद्यते यस्य स शुक्लः पुरः। कथं रूपवती कन्या? गन्धवती पृथिवी? ये गुणाः गुण ग्रहणेन गृह्यन्ते, न तु सर्वदा गुणमात्रवाचिनः रूपादयः तेन तेभ्यः भवन्त्येव

मन्त्वादयः। प्रज्ञा रजस् शब्दाभ्यां ण वलचौ वक्तव्यौ। प्रज्ञा यस्यास्ति स प्राज्ञः। रजोऽस्तीति रजस्वला। तपस् सहस्राभ्यामण् वक्तव्यः। तपो विद्यते यस्य सः तापसः, साहस्रः। मल शब्दात् इन ईयस् इत्येताविष्येते। मलं यस्यास्ति स मनः मलिनः, मलीयसः। तुन्दोदराभ्यामिल इणौ इष्येते– तुन्दिलः, उदरिणः। लिङ्गात् अकार प्रत्यय इष्यते, यप्रत्ययश्च। लक्षणं विद्यते यस्य स लक्षणः, लक्षण्यः। गुणाः विद्यन्ते यस्य सः गुणः, गुण्यः। हिमं यस्यास्ति सः हिमः, हिम्यः। वक्तव्य विषये यथा प्राप्ताः इष्यन्ते च मन्त्वादयः। सुखादिभ्यस्त्विन्नेव दृश्यते, नान्ये प्रत्ययाः– सुखी दुखी। सुख दुख कृच्छ आम्र अलीक प्रतीप करूण कृपण इति सुखादयः। हस्त, दन्त, करेभ्यो जातावर्थे। हस्ती दन्ती करी। गताविति किम्? हस्तवान्, दन्तवान्, करवान्। पद्य, कमल, पुष्करेभ्यः देश विशेषे वाच्ये–पद्मिनी कमलिनी पुष्करिणी। याच्ञा वाचिन अर्थ शब्दात्। अर्थी, याच्ञा वाचिन इति किम्? अर्थवान्। पूरण प्रत्ययान्तात् वयसि गम्यमाने– पञ्चमो मासो यस्यास्ति स पञ्चमी भार्या, दशमी वाला। उन्नतत्व विशिष्टेऽर्थे वर्तमानाद्दन्त शब्दादुरस् प्रत्ययः। उन्नताः दन्ता यस्य सः दन्तुरः। प्रशस्तायां गम्यमानायां वाचः अल अट प्रत्ययौ भवतः। कुत्सितं यो बहुभाषते स वाचालः, वाचाटः। एवमादयोऽन्येऽपि प्रत्ययाः यथा दर्शनमवगन्तव्यम्।

● संख्याया पूरणे डमौ २/६/१६

पूरणेऽर्थे संख्यायाः डमौ भवतः, एकादशानां पूरणः एकादशमः, एकादश संख्या येन पूर्यते स एकादशः। एवं द्वादशः, पञ्चानां पूरणः पञ्चमः, सप्तमः दशमः, नान्तायास्संख्यायाः असंख्यादेः म प्रत्ययं स्मरन्ति, शेषयोस्तु डः।

● द्वेस्तीयः २/६/१७

द्वि शब्दात्पूरणेऽर्थ तीय प्रत्ययो भवति, द्वयोः पूरणः द्वितीयः।

● त्रेस्तृ च २/६/१८

त्रि शब्दात् पूरणेऽर्थे तीय प्रत्ययो भवति, त्रेश्च तृ इत्ययमादेशः। त्रयाणां पूरणः तृतीयः।

● अन्तस्थोडेर्षो २/६/१९

संख्याया इत्येव। रेफान्तायाः, षकारान्तायाश्च संख्यायाः ड प्रत्यये परे थकारागमो भवति। अन्त शब्दः आगमत्वं द्योतयतीत्याहुः। चतुर्णाम् पूरणः चतुर्थः, षण्णां पूरणः षष्ठः। कृते थकारागमेऽन्त्यस्वरादिलोपेन अकारलोपः। प्राक् तु थकारागमादन्त्यस्वरादि लोपो न भवति। विफलोह्येवं सति योगारम्भस्स्यात्।

● कतिपयात्कतेः २/६/२०

थ इत्येव। अन्तग्रहणं निवृत्तम्। कतिपय शब्दात् कतिशब्दाच्च पूरणेऽर्थे थ प्रत्ययोभवति, कतिपयानां पूरणः कतिपयथः, कतिथः।

● विशंत्यादेस्तमट् २/६/२१

विशंत्यादेः संख्यायाः पूरणेऽर्थे तमट् भवति, विंशतेः पूरणः विशतितमः विंशतितमी। षडनुबन्धादिती प्रत्ययः। एकेन अधिका विंशतिः एकविंशतिः तस्याः पूरणः एकविंशतितमः। उत्तरत्र नित्यग्रहणादिह विकल्पः, तेन ड प्रत्ययोऽपि भवति। विंशतेः पूरणः विंशः, त्रिंश इति। त्रिंशत् चत्वारिंशत्, पञ्चाशत्, षष्ठि, सप्तति, असीति, नवतीति विंशत्यादयः।

● नित्यंशतादेः २/६/२२

शतादेस्संख्यायाः पूरणेऽर्थे नित्यं तमट्भवति। शतस्य पूरणः शततमः। सहस्रतमः, कोटितमः। ननूत्तरत्र सूत्रेण शतादेः तमट् सिद्ध इत्यपार्थको योगारम्भः। सत्यम्– अतत्परादित्ययं प्रतिषेधोऽत्र बाधते, तेन यदा संख्यायाः परश्शतादिः तदाप्यनेन नित्यं तमट् भवति। एकशततमः। मासावमास संवत्सरेभ्यः तमट् वक्तव्यः, मासस्य पूरणः मासतमः दिवसः, अवमासतमः, संवत्सरतमः।

● षष्ठ्याद्यतत्परात् २/६/२३

षष्ठिशब्द आदिर्यस्य संख्याशब्दस्य स षष्ठ्यादिः तस्याः परः तत्परः, न तत्परः अतत्परः। षष्ठ्यादिश्चासावतत्परश्चासौ षष्ठ्याद्यतत्परः। षष्ठ्यादेः संख्याशब्दात् अतत्परात् तस्यास्संख्यायाः परः यदा न भवति तदा पूरणेऽर्थे नित्यम् अट् भवति, विंशत्यादेस्तमडिति विकल्पः प्राप्तः। षष्ठितमः सप्ततितमः, अशीतितमः, नवतितमः।

**● विभक्ति संज्ञा विज्ञेया वक्ष्यन्तेऽतःपरस्तु ये
अद्व्यादेस्सर्वनाम्ना किंबहोश्चपरास्स्मृताः २/६/२४**

[१]श्रुतत्वात्सर्वनामकार्यम् प्रत्येव विभक्ति संज्ञा, तेन यदा कदेति घोषवति न दीर्घः। बहु शब्दोऽत्र संख्यावचनः, सर्वनामसाहचर्यात्।

● तत्रेदमिः २/६/२५

[२]तदस्सप्तम्यन्तात् त्रल् विषये समासः। तत्र तेषु विभक्तिसंज्ञा परेषु इदम् शब्दस्य इकारादेशो भवति क्वचिद् पूर्वपरविषये। अस्मात् ततः अस्मिन् इह इदमो ह इति ह प्रत्ययः।

[३]तेषु विभक्ति संज्ञकेषु इदम इकारो भवति। इतः, इह, इदानीम्।

● रथोरेतत् २/६/२६

रेफादौ थकरादौ च प्रत्यये परे इदं शब्दस्य यथाक्रमं एत इत इत्येता वादेशो भवतः अस्मिन्काले एतर्हि, इदमोह्यधुना दानीमिति हि प्रत्ययः। अनेन प्रकारेण इत्थम् इदंकिंभ्यांथमुरिति थमुः।

● तेष्वेतदकारताम् २/६/२७

तेषु विभक्ति संज्ञकेषु परेषु एतद् शब्द अकारतां प्राप्नोति। एतस्मात् अतः, एतस्मिन्, अत्र।

● पञ्चम्यास्तस् २/६/२८

अद्व्यादेस्सर्वनाम्नः किं वहोरिति वर्तते। उत्तरत्र च किं ब्रहुसर्वनामभ्यः पञ्चम्यन्तेभ्यः तस् भवति, द्व्यादीन् वर्जयित्वा। सर्वस्मात्– सर्वतः, यस्मात्–यतः तस्मात्–ततः, अमुष्मात्–अमुतः, कस्मात्–कुतः, बहुभ्यो–बहुतः। अद्व्यादेरिति किम्–द्वाभ्याम्। भवतः। युष्मद् अस्मद्भ्याम् तस् वक्तव्यः त्वत्–त्वत्तः, मत–मत्तः, युष्मत्–युष्मत्तः, अस्मत्– अस्मत्तः। असर्वनाम्नोऽपि पञ्चम्यन्तात् तसिष्यते,

---

१. शिष्य हितायांवृत्तौ त्रुटितपाठत्वात् दुर्गवृत्तिमनु श्रुत्योल्लेखः कृतः।

२. त्रुटित पाठांशः

३. त्रुटित पाठत्वात् दुर्गवृत्तावुल्लिखितस्य वृत्तेरुल्लेखः।

ओहाक्–त्यागे, रूह् व्वीजजन्मनि इत्येतयोः प्रयोगे वर्जयित्वा। ग्रामात्–ग्रामतः। वत्सात्–वत्सतः। इह कस्मान्न भवति? सार्थाद् हीयते, नगराद् अवरोहति अद्व्यादिभ्यस्सप्तम्यन्तेभ्यः तस् वक्तव्यः। आदौ–आदितः, मध्ये–मध्यतः, पार्श्वे, पार्श्वतः। यस्मात् सप्तम्यन्तात् तस् दृश्यते अद्व्यादिभ्यः सर्वार्थे उभयार्थे **च** यथासङ्ख्ये, सर्वार्थे–परितः सर्वतः। उभयार्थे–अभितः उभयत इत्यर्थः।

● त्रसप्तम्याः २/६/२९

[१] किं, वह, सर्वनामन् इत्येतेभ्यः सप्तम्यन्तेभ्यो त्र प्रत्ययो **भवति** द्व्यादीन्वर्जयित्वा।[२] अद्व्यादेः सर्वनाम्नो बहोश्च सप्तम्यन्तात् त्र **प्रत्ययो** भवति वा। सर्वस्मिन्–सर्वत्र, तस्मिन्– तत्र, यस्मिन्–यत्र, बहुषु–**बहुत्र**। अद्व्यादे रिति किम्? द्वयोः, त्वयि, मयि। आद्यादिभ्यस्तस् **वक्तव्यः**! आदौ–आदितः, अन्ते–अन्ततः, पृष्ठे–पृष्ठतः, मध्ये–मध्यतः, **अग्रे–अग्रतः**, पार्श्वे–पार्श्वतः, मुखे–मुखतः। आकृति गणोऽयम्। (दुर्गवृत्ति २/६/२९)

● किमः कुह २/६/३०

[३] किमः सप्तम्यन्ताद् हो भवति वा। कस्मिन्। कुह। **छन्दस्येवेत्यन्ये**।

● अतः क्व च २/६/३१

[४] किमः सप्तम्यन्ताद् 'अत्' भवति क्व आदेशश्च। **कस्मिन्–क्व**।

● तहोः कुः २/६/३२

[५] तकार हकार परयोः किमः कुर्भवति। कुतः, कुह।

● काले किं–सर्व–यदेकान्येभ्य एव दा २/६/३३

[६] एभ्यः काले वर्तमानेभ्यः सप्तम्यन्तेभ्यः दा प्रत्ययो भवति। कस्मिन काले–कदा। एवम्–सर्वदा, यदा, तदा, एकदा, अन्यदा। काल इति किम्? सर्वत्रदेशे।

---

१. शिष्यहिता वृत्तिः।

२,३,४,५,६. शिष्यहितायां वृत्तौ त्रुटित पाठत्वात् दुर्ग वृत्ति मनुश्रत्योल्लेखः कृतः।

● इदमोर्ह्यधुना दादानीमौ २/६/३४

[1]काले वर्तमानादिदमः सप्तम्यन्तात् र्हि, अधुना, दा, दानीमित्येते प्रत्ययाः भवन्ति। अस्मिन्काले एतर्हि, अधुना, इदानीम्। एवम्– दा दानीमौ तदः स्मृतौ, तदा, तदानीम्।

● सद्यआद्याः निपात्यन्ते २/६/३५

काले इति निवृत्तम्, सद्य आद्य शब्दौ निपात्येते। साधुत्वेन कथ्यते, सद्यः। समान शब्दस्य द्यस् प्रत्ययो निपात्यते अकारादेशश्च, समानेऽहनीत्यादिवाक्यम्। परूत्, पूर्व पूर्वतर शब्दयोः उत् आरि इत्येतौ निपात्येते, पर इत्ययमादेशश्च।. ....। अन्यतरस्मिन्संवत्सरे इति वाक्यम्, परेद्युः, विपूर्वशब्दात् एभ्यः द्यु प्रत्ययो निपात्यते। पर इत्ययमादेशश्च। .... पूर्वस्मिन्नहनीति वाक्यम्। अद्य इदं शब्दस्य द्य प्रत्ययो निपात्यते अकारादेशश्च, अस्मिन्नहनीति वाक्यम्। पूर्वेद्युः अन्येद्युः, अन्यतरेद्युः, इतरेद्युः, अपरेद्यु, उभयेद्युः। पूर्व अन्य अन्यतर इतर अपर उभय इत्येतेभ्यः एद्युस् निपात्यते।

● पुरस्तादादयश्च २/६/३६

पुरस्तात् शब्द आदिर्येषां ते पुरस्तादादयश्च, एते निपात्यन्ते। पुरस्तात्, अधस्तात्, अवस्तात्, पूर्वात्, दिशिर्देशे काले वर्तमानेभ्यः, सप्तमी पञ्चमी प्रत्ययान्तेभ्यः।......................। सर्वत्र विग्रहः। पुरः अधः, अवः। पूर्वाधरावरेभ्यः अस् प्रत्ययः निपात्यते, सर्वमन्यत्पूर्ववत्।......................। शब्दस्य रि, रिष्टात् इत्येतौ निपात्येते। उपइत्ययमादेशश्च।......................। रिति विग्रहः। त .... दक्षिणेन। उत्तराधरदक्षिणेभ्य एव प्रत्ययो निपात्यते। उत्तरस्यांदिशि, उत्तरस्मिन् देशे.......... आदिवाक्यम्। (त्रुटितः पाठः)

● प्रकारवचने तु था २/६/३७

प्रकार वचनेऽभिधाने सति सर्वनाम्नः था प्रत्ययो वक्तव्यः। सर्वेण प्रकारेण सर्वथा। एवं यथा, तथा। संख्यायाः धा प्रत्ययो वक्तव्यः। एकेन प्रकारेण एकधा, द्विधा, त्रिधा चतुर्धा। एक शब्दाद् ध्यमणपीष्यते। एकेन प्रकारेण ऐकध्यम्, द्वित्रिभ्याम् एधैधमौ वक्तव्यौ। द्वेधा, त्रेधा, द्वैधम्, त्रैधम्।

---

१. शिष्यहितायां वृत्तौ त्रुटितपाठत्वात् दुर्गवृत्तिमनुसृत्योल्लेखः कृतः।

● इदं किंभ्यां थमुः कार्यः २/६/३८

इदं किमित्येताभ्यां प्रकारवचने सति थमु प्रत्ययो भवति। अनेन प्रकारेण इत्थम् एवं कथम्। तमादयश्च प्रत्ययाः मपर्यन्ताः इदन्तुशब्दः अव्ययमिति प्रसिद्धिः।

● आख्याताच्च तमादयः २/६/३९

लिङ्गात् तमादयः प्रत्ययाः भवन्ति, आख्याताच्च। अयमेषामतिशयेन आढ्यः आढ्यतमः। अयमेतयोरतिशयेन आढ्यः आढ्यतरः। अयमेषामतिशयेन पटुः पटिष्ठः। अयमनयोरतिशयेन पटुः पटीयान्। एवम्, लघिष्ठः, लघीयान्। अतिशयेऽर्थे तर तम इष्ठ ईयस् इत्येते श्रूयन्ते। तत्र बहूनां मध्यादेकस्य अतिशयेऽर्थे तम् इष्ठ इत्येतौ भवतः। द्वयोर्मध्यादेकस्यातिशयेन तर ईयस् इत्येताविष्येते। इष्ठेयसौ तु प्रशस्य वाचिन एव दृश्येते। प्रशस्य अन्तिक अल्प इत्येतेभ्यश्च। अयमेतेषामतिशयेन प्रशस्यः श्रेष्ठः। अयमेतेषामतिशयेन प्रशस्यः श्रेयान्। एवं ज्येष्ठः, ज्यायान्। प्रशस्य श्र ज्या चेति लोकोपचारात्। प्रशस्य शब्दस्य श्र ज्या इत्येतावादेशौ भवतः इष्ठेयन्सोः परयोः। ज्यायानित्यत्र ईकारस्यात्वम्। अयमेषामतिशयेन अन्तिकः, नेदिष्ठः। अयमनयोशतिशयेन अन्तिकः नेदीयान्। अन्तिकवाढयोर्नेदमाविति अन्तिक शब्दस्य नेदादेशः। अयमेषामतिशयेन अल्पः कनिष्ठः, अयमनयोरति शयेन अल्पः कनीयान्। युवाल्पयोः कनन्यतरस्यामिति अल्पशब्दस्य कन् आदेशः, स च वा स्मर्यते। तेन अल्पिष्ठः, अल्पीयान्। आख्यातात्खल्वपि। अयमेतेषामतिशयेन पचति पचतितमः। अयमनयोरतिशयेन पचति पचतितरः। किमः एकारान्तादाख्याताच्च तराम् तमामित्येतावतिशयार्थे भवतः। इदमेषामतिशयेन किम्, किन्तमाम्। इदमनयोरतिशयेन किम्, किन्तराम्। इदमेषामति शयेन पूर्वाह्णे, पूर्वाह्णेतमाम्। पूर्वाह्णेतराम्। इदमेषामतिशयेन उच्चैः, उच्चैस्तमाम्, उच्चैस्तराम्, पचतितमाम्, पचतितराम्। ईषदसमाप्तौसत्यां लिङ्गात् कल्प, देश्य, देशीय इत्येते इष्यन्ते। ईषदसमाप्तः पटुः, पटुकल्पः, पटुदेश्यः, पटुदेशीयः। प्रशंसायामर्थे रूप प्रत्यय इष्यते। प्रशस्तः पुरुषः पुरुषरूपः। भूतपूर्वेऽर्थेचर इष्यते, आढ्यःभूतपूर्वः आढ्यचरः। असहायार्थ वाचिन एक शब्दात् क आकिन् इत्येताविष्येते। असहायः एकः, एककः, एकाकी। तेन प्रख्यात इत्यत्रार्थे चञ्च चणाविष्येते। केशैः प्रख्यातः केशचञ्चः, केशचणः। कुत्सायां पाश इष्यते–कुत्सितः पुरुषः पुरुषपाशः।

तदस्य सञ्जातमित्यत्रार्थे तारकादिभ्य इत् प्रत्यय इष्यते। तारकाः सञ्जातमस्य तारकितं नभः। सुखं सञ्जातमस्य सुखितः, पुष्पितं वनम्। तारक, सुख, दुख, पुष्प, विचार, कुड्मल, स्तवक, मुकुल, कुसुम, किसलय, निद्रा, तन्द्रा, वुवुक्षा, पिपासा, अभ्र, रोग, उत्कण्ठा, श्रद्धा, व्याधि, प्राण, गर्भ, कण्ठ, कखश, एते तारकादयः। प्रमाणेऽर्थे दघ्न द्वयस मात्र इत्येते। उरू प्रमाणमस्य जलस्य उरूदघ्नं जलम् उरूद्वयसम्, उरूमात्रम्। पुरुष हस्तिभ्यां प्रमाणेऽर्थेऽण् प्रत्यय इष्यते। पुरूषं प्रमाणमस्य पौरूषम्, हास्तिनम्। च शब्दात् पुरूषदघ्नम्, हस्तिदघ्नमित्याद्यपि भवति। प्रमाणेऽर्थे यत्तदेभ्यः वन्तुरिष्यते, अन्त्यस्य आकारादेशश्च। यत् परिमाणमस्य यावान्, तावान्, एतावान्। इदं शब्दात् इयन्तुरिष्यते इकारादेशश्च। इदं प्रमाणमस्य इयान्। इकारादेशे कृते इवर्णावर्ण लोप्यः। किं शब्दात् तु इयन्तुरिष्यते। किं परिमाणमस्य कियान्। अवयवे वर्तमानायाः संख्यायाः तय इष्यते। पञ्च अवयवाः यस्य तत् पञ्चतयम्, चतुष्टयम्। द्वित्रिभ्यामय वा इष्यते। द्वावयवौ यस्य तत् द्वयम्, त्रयम्। पक्षे द्वितयम् त्रितयम्। उभशब्दात् अयप्रत्ययो वक्तव्यः। उभावयवौ यस्य तदुभयम्। संख्या प्रश्नेऽर्थे किं शब्दात् कति इष्यते। का संङ्ख्या एषां ब्राह्मणानां कति ब्राह्मणाः। बह्वर्थादल्पार्थाच्च शस् वक्तव्यः। बहूनि ददाति, बहुशो ददाति। एवं भूरिशो ददाति, अल्पशो ददाति, स्तोकशो ददाति। संख्याया एक वचनान्ताच्च ईप्सायां गम्यमानायाम्। द्वौ द्वौ ददाति द्विशो ददाति, पादं पादं ददाति पादशो ददाति। अभूत तद्भावेऽर्थे कृभ्वस्तीनां प्रयोगे च्विरिष्यते। अशुक्लं शुक्लं करोति शुक्लीकरोति, शुक्लीभवति, शुक्लीस्यात्। दीर्घीभवतीति ज्ञापकात् इवर्णस्य ईत्वम, च्वेश्च लोपः कात्स्न्र्ये गम्यमाने सात् प्रत्यय इष्यते। सर्वम् दधि दग्धं सम्पद्यते दग्धसात्। तदधीनेऽर्थे। विप्राधीनं करोति विप्रसात् करोति। वारगणनेऽर्थे कृत्वस् इष्यते। पञ्च वारान्ददाति, पञ्चकृत्वो ददाति। द्वित्रिचतुर्भ्यः सुः इष्यते। उकारः उच्चारणार्थः। द्वौ वारौ भुङ्क्ते द्विःभुङ्क्ते, त्रिःभुङ्क्ते, चतुःभुङ्क्ते। तम तर .... एवमादयः। शिष्ट प्रयोगानुसारेण अन्येऽपि वोद्धव्याः।

● समासान्तगतानां वा राजदन्तादीनामदन्तता २/६/४०

समासस्यान्तः समासान्तः, समासान्तं गताः समासान्तगताः............. सान्ताः समासान्तगतानां समासस्यान्तदेशेस्थितानां राजदन्तादीनां

शब्दानामदन्तता भवति अकार प्रत्ययः अन्तो वा भवतीत्यर्थः। महांश्चासौराजा महाराजः, समासान्ते तु कृते नस्य तु क्वचिदिति न लोपः। परमञ्च ते अहः परमाहः पुल्लिङ्गता च वक्तव्या। विप्राणां मुखम् विप्रमुखम्, राजाहस्सखिभ्यस्तत्पुरूष एव अकारं स्मरन्ति। तेनेह न भवति– महान् राजा यस्य सः। महाराज शब्दादपि तत्पुरूष एव। पञ्चानां गवां समाहारः पञ्चगवम्। तत्पुरूषावुभावित्यनेनात्र तत्पुरूषसंज्ञा। संख्याव्ययादेरङ्गुलिः, द्वे अङ्गुली प्रमाणमस्य द्वयङ्गुलम् दारू। निर्गतमङ्गुलिभ्योः निरङ्गुलम्। अहस्सर्वाभ्याञ्चरात्रेः। अहश्च रात्रिश्च इत्यहोरात्रम्। अह्नस्स इति अहन् शब्दस्य सत्वम्। सर्वाचासौ रात्रिः सर्वरात्रम्। द्वन्द्वः समाहारे चवर्ग दकार षकार हकारान्तानाम्। स्रग्त्वचम्, श्रीस्रजम्, समिदृशदम्, वाग्दृशम्, पीठच्छत्रोपानहम्। समाहार एवायं विधिः तेनेह न भवति। छत्रं.................... परस्य मूर्धन् शब्दे च बहुव्रीहौ.........................पुंसौ, द्वन्द्वे एवायं विधिः, तेनेह न भवति–स्त्रियः पुमान्, वाक् च मनस् च। तेनाक्षिणी च भ्रुवौ च तदक्षिभ्रुवम्, उवादेशो वक्तव्यः। दाराश्च गवाश्चेति दारगवमितिदारपूर्वादपि गोः अकार प्रत्यय इष्यते। नक्तं च दिवाच तत् नक्तंदिवम्, अहनि च दिवा च अहर्दिवम्, अहन्यहनीत्यर्थः। पुरूषस्यायुः पुरूषायुषम्। अह्नः पूर्वो भागः पूर्वाह्णः मध्याहनः, अपराह्णः; अवम संयोगादिति अकारलोपः। रात्रौ च दिवा च तत् रात्रिन्दिवम्, पूर्वपदस्य...... सोवक्तव्यः नञ्, दुर्, सु इत्येतत् परयोः। प्रजा मेधा शब्दयोः अस् प्रत्ययः वक्तव्यः। अविद्यमाना प्रजायस्य स अप्रजाः। एवं दुष्टा प्रजा यस्य स दुष्प्रजाः। एवञ्च अमेधाः, दुर्मेधाः, सुमेधाः। अन्त्वसन्तस्येति दीर्घः। बहुव्रीहावेषविधिः। हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य बहुव्रीहावन्तलोप इष्यते, व्याघ्रस्येव पादावस्य व्याघ्रपात्। हस्त्यादि वर्जितादितिकिम्? हस्तिन इव पादौ यस्य स हस्तिपादः। संख्या सु शब्दाभ्यां परस्य च द्वौ पादौ यस्य स द्विपात्, सुपात्। उपमानात् सु सुरभिभ्यां च गन्धशब्दस्य इकारान्तादेशो वक्तव्यः। चन्दनस्येव गन्धो यस्य स चन्दनगन्धिः। एवं सुगन्धिः। सुरभिगन्धिः। नद्यादृकारान्ताच्च क प्रत्यय इष्यते। बह्व्यः कुमार्यो यस्य स बहुकुमारीकः, बहुसंज्ञकः, बहुकर्तृकः। अनद्या अनृकारान्ताच्च विकल्पेन। बह्व्यः मालाः यस्य स बहुमालाकः बहुमालः। याकारो स्त्रीकृतो ह्रस्वाविति ह्रस्वः। एवमपि समासान्ताः लक्ष्यानुसारेण वोद्धव्याः, वाशब्दोऽत्र व्यवस्थितविभाषा वाची, तेन पूजायां वर्तमानौ सु अति

इत्येतौ समासस्य यदा पूर्वौ भवतः तदा क्वचित्समासान्तो न भवति। शोभनश्चासौ राजा सुराजा, अतिराजा, एवं सुसखा, अतिसखा। क्षेपेऽर्थे यः किं शब्दः तत्पूर्वस्य न भवति समासान्तः। कुत्सितो राजा किं राजा, एवं किं सखा। नञस्तत्पुरूषेऽपि अराजा, असखा।

● डानुबन्धेऽन्त्य स्वरादेर्लोपः २/६/४१

अन्त्यस्स्वर आदिर्यस्यावयवस्येति विग्रहः। वेतिनिवृत्तम्। डानुबन्धे प्रत्यये परेऽन्त्यस्वरादेर्लोपो भवति। एकादशः, द्वादशः, सङ्ख्यायाः पूरणे इति डः, सरसि जातं सरसिजम्। सप्तमी पञ्चम्यन्तेभ्यः जनेर्डः।

● तेर्विंशतेरपि २/६/४२

विंशति शब्दस्य यःतिशब्दः तस्य लोपो भवति, डानुबन्धे प्रत्यये परे विंशतेः पूरणः विंशः।

● इवर्णावर्णौ स्वर प्रत्यये च २/६/४३

इवर्णस्य अवर्णस्य च लोपो भवति स्वरादौ प्रत्यये यकारे च। अत्रेरपत्यम् आत्रेयः, नादेयः, दाक्षिः, बाला, वालेयः, गार्ग्यः। तुलया सम्मितं तुल्यम्। *इवर्णावर्णौ स्वर इति व्युत्क्रमपाठात् क्वचित् वर्णान्तरमपि प्राप्यते*। परीयान्, पितृस्वसुरपत्यं पैतृस्वसेयः। इष्ठेयन्सोः परयोरेकस्वरस्य अवर्णलोपो नेष्यते। श्रेष्ठः, श्रेयान्।

● नस्य तु क्वचित् २/६/४४

नस्य नकारस्य लोपोभवति स्वरादौ प्रत्यये परे, यकारे च, देवशर्मणः अपत्यं दैवशर्मिः। बह्वादेश्च विधीयत इति इण्। राज्ञो भावः राज्यम्। इह न भवति, सामसु साधुः सामन्यः, वेमन्यः।

● उवर्णस्त्वौत्वमापाद्यः २/६/४५

उवर्ण ओत्वमापद्यते स्वरादौ प्रत्यये परे यकारे च। औपगवः, वधूभ्यो हितं वधव्यम्। स्वयम्भू शब्दस्य अणि परे ओत्वं नेष्यते, स्वयम्भुवः अपत्यं स्वायम्भुवः। उवादेशोऽत्र वक्तव्यः।

● एयेऽकद्रवास्तुलुप्यते २/६/४६

उंवर्ण लुप्यते एयण् प्रत्यये परे अकद्रवाः–कद्रु शब्दं वर्जयित्वा। मद्र वाहोरपत्यं माद्रवाहेयः। जम्ब्वा अपत्यं जाम्बेयः। अकद्रवा इति किम्? कद्रवाः अपत्यं काद्रवेयः।

● कार्यावावादेशावोकारौकारयोरपि २/६/४७

ओकारौकारयोर्यथासङ्ख्यम् अव् आव् इत्येतावादेशौ भवतः यकारे प्रत्यये परे। गोभ्यो हितम् गव्यम्, नावातार्यम् नाव्यम्।

● वृद्धिरादौ सणि २/६/४८

सह णकारेण वर्तते यः प्रत्ययः, सहस्य स भावः, अथवा सहसन्तिरसामिति स भावः। स्वर इति वर्तते। तद्धितार्थे प्रत्ययपरे आदिस्वरस्य वृद्धिर्भवति सणि, णकारे प्रत्यये परे। अक्षैर्दीव्यति आक्षिकः, विनताया अपत्यम् वैनतेयः, गोपुच्छे नतरति गोपुच्छिकः। कृपणस्यभावः कार्पण्यम्, ऐ औ आरूत्तरे च वृद्धिः, आ आर् ऐ औ इत्येते वृद्धि संज्ञकाः कथमाकारो वृद्धिसंज्ञस्स्यात्। उच्यते–ज्ञापकात्। यद् यस्यापत्यस्येत्यत्र अकारस्य वृद्धिमाकारं करोति ततो ज्ञायते आकारो वृद्धिसंज्ञ इति। क्वचित्पूर्वपदोत्तरपदयोः वृद्धिरिष्यते। सुहृदयस्यभावः सौहार्दम्। प्रकीर्तित ग्रहणादणि कृते हृदयशब्दस्य हृदादेशः। सुभगस्य भावस्सौभाग्यम्, दौर्भाग्यम्, इहलोके भवः ऐहलौकिकम्।

● न य्वोः पदाद्योः वृद्धिरागमः २/६/४६

पदस्य आदी पदादी, पूर्वसूत्रमनुवर्तते, सूत्रस्यादिशब्दस्समीप वाचकः, पदस्य आदी समीपभूतौ यौ य्वोः यकारवकारौ तयोर्यस्स्वरः तस्य वृद्धिर्न भवति, सणकारके प्रत्यये परे य्वोश्च आदौ वृद्धिरागमो भवति, आन्तरतम्याच्च तालव्यस्येकारस्य तालव्यैकारागमः, दन्त्यौष्ठ्यस्यापि वकारस्य ओष्ठ्य औकारा गमः। व्यसने भवो वैयसनम्, अण्, अत्र व्यसन शब्दे प्रत्यय लक्षणेन अन्तर्वर्तिनीं

● एयेऽकद्र्वास्तुलुप्यते २/६/४६

उवर्ण लुप्यते एयण् प्रत्यये परे अकद्र्वाः–कद्रु शब्दं वर्जयित्वा। मद्र वाहोरपत्यं माद्रवाहेयः। जम्ब्वा अपत्यं जाम्बेयः। अकद्र्वा इति किम्? कद्र्वाः अपत्यं काद्रवेयः।

● कार्यावावादेशावोकारौकारयोरपि २/६/४७

ओकारौकारयोर्यथासङ्ख्यम् अव् आव् इत्येतावादेशौ भवतः यकारे प्रत्यये परे। गोभ्यो हितम् गव्यम्, नावातार्यम् नाव्यम्।

● वृद्धिरादौ सणि २/६/४८

सह णकारेण वर्तते यः प्रत्ययः, सहस्य स भावः, अथवा सहसन्तिरसामिति स भावः। स्वर इति वर्तते। तद्धितार्थे प्रत्ययपरे आदिस्वरस्य वृद्धिर्भवति सणि, णकारे प्रत्यये परे। अक्षैर्दीव्यति आक्षिकः, विनताया अपत्यम् वैनतेयः, गोपुच्छे नतरति गोपुच्छिकः। कृपणस्यभावः कार्पण्यम्, ऐ औ आरूत्तरे च वृद्धिः, आ आर् ऐ औ इत्येते वृद्धि संज्ञकाः कथमाकारो वृद्धिसंज्ञस्स्यात्। उच्यते–ज्ञापकात्। यद् यस्यापत्यस्येत्यत्र अकारस्य वृद्धिमाकारं करोति ततो ज्ञायते आकारो वृद्धिसंज्ञ इति। क्वचित्पूर्वपदोत्तरपदयोः वृद्धिरिष्यते। सुहृदयस्यभावः सौहार्दम्। प्रकीर्तित ग्रहणादणि कृते हृदयशब्दस्य हृदादेशः। सुभगस्य भावस्सौभाग्यम्, दौर्भाग्यम्, इहलोके भवः ऐहलौकिकम्।

● न य्वोः पदाद्योः वृद्धिरागमः २/६/४९

पदस्य आदी पदादी, पूर्वसूत्रमनुवर्तते, सूत्रस्यादिशब्दस्समीप वाचकः, पदस्य आदी समीपभूतौ यौ य्वोः यकारवकारौ तयोर्यस्स्वरः तस्य वृद्धिर्न भवति, सणकारके प्रत्यये परे य्वोश्च आदौ वृद्धिरागमो भवति, आन्तरतम्याच्च तालव्यस्येकारस्य तालव्यैकारागमः, दन्त्यौष्ठ्यस्यापि वकारस्य ओष्ठ्य औकारा गमः। व्यसने भवो वैयसनम्, अण्, अत्र व्यसन शब्दे प्रत्यय लक्षणेन अन्तर्वर्तिनीं

विभक्तिमाश्रित्य यदसन इति पदं तस्य आदौ यो सकारस्तस्य परस्य अकारस्य वृद्धिर्न भवति यकारस्यपूर्वमैकारागमः, एवं व्याकरणं वेत्ति अधीते वा वैयाकरणः। शोभनं चासावश्वः स्वश्वः, तस्यापत्यं सौवश्विः। य्वोरिति किम्? अर्थनास्ति यस्य स नार्थः तस्यापत्यम् नार्थिः। ननु आगमिकायां वृद्धौ कृतायां स्वरादेश परिभाषायाः य्वोस्स्थानिवद्भावादेकारौकारयोरायावौ वा कस्मान्न भवतः? उच्यते– योऽनादिष्टात्स्वरात्पूर्वस्तस्य कार्ये कर्तव्ये य्वोः स्थानिवद्भावो न भवेत्।

भट्टोग्रभूति कृतायां शिष्यहितायां वृत्तौ नामप्रकरणे तद्धितपादः षष्ठः।।

नामप्रकरणे सप्तमः पादः

● स्त्रियाम् २/७/१

अधिकारोऽयम्, यानित्यतः प्रत्ययाननुक्रमिष्यामस्ते स्त्रिया वर्तमानाल्लिङ्गात् भवन्तीति वेदितव्यम्–ज्ञातव्यम्। आपादपरिसमाप्तरेयमधिकारः।

● अजाद्यदन्तादाप् २/७/२

अच् आदिर्यस्य तदजादिः, अत् अन्ते यस्य तदन्तम्, ततो द्वन्द्व. अजादेर्गणाददन्तादकारान्ताच्च लिङ्गात् आप् प्रत्ययो भवति। पकारो वैचित्र्यार्थः। अजा, एडका, चटका, अश्वा, त्रिफला, द्रष्टा, क्रुञ्चा, उष्णिहा, शूद्रा, देवविशा, मूषिका, वाला, वत्सा, ज्येष्ठा, कनिष्ठा, मध्यमा, कोकिला इत्यजादयः, अदन्ताद्–देवदत्ता। ननु अजादेव सिद्धे किमर्थमेतेषां पृथगुपादानम्? असदेतत्– ये तावदनकारान्ता अजादिगणमध्ये पठ्यन्ते तेषामदन्तग्रहणेन कथं सिद्धिस्स्यात्, ये त्वकारान्तास्तेषां पृथगुपादानं बाधक बाधनार्थम्। तत्र अजा, एडका, इत्यादीनां जातिवाचिनां जातेरयोपधादिति ईकारः प्राप्तस्स बाधयते। त्रिफला शब्दाद् द्विगोरिति ई प्रत्ययः प्राप्तः, दंष्ट्रा शब्दात् षडनुबन्धात्त्वी इति ईकारः प्राप्तः। वाला शब्दात् वयसि प्रथम इति ईकारः प्राप्तः। ज्येष्ठा, कनिष्ठा, मध्यमानां पुंयागोदित्यनेन ईकारः प्राप्तः। जाति वाचिनः शूद्र शब्दाद् अमहत् पूर्वात् आप् प्रत्ययो भवति। शूद्रा, जातेरयोपधादिति ईकारः प्राप्तः, जातिवाचिन इति किम्? शूद्रस्य भार्या शूद्री, पुंयोगात्तेन चेदाख्या, इति ई प्रत्ययः। अमहत्पूर्वा किम्? पूर्वम् महाशूद्री। महाशूद्र शब्दोऽयमाभीर जातिमाचष्टे।

● ऋन्नेभ्यस्त्वी २/७/३

ऋतश्च नाश्चते ऋन्नाः ऋकारान्तेभ्यः नकारान्तेभ्यश्च ई प्रत्ययो भवति। कर्त्री, पद्मिनी।

● वनोरच २/७/४

वन्नन्ताल्लिङ्गात् र प्रत्ययो भवति अन्त्यस्य च रेफादेः ई। धीवरः धीवरी, पीवरः, पीवरी।

● न संख्यायाः २/७/५

संख्यावाचिन ई प्रत्ययो न भवति, ऋन्नेभ्य इति प्राप्तः। तिस्रः, चतस्रः पञ्चब्राह्मण्यः, दशब्राह्मण्यः। न इत्येको योगः कर्तव्यः, तेनेहपि न भवति। माता, स्वसा, दुहिता, नानन्दा।

● मनः २/७/६

मन्नन्तात्लिङ्गात् ई प्रत्ययो न भवति। दामा, दामानौ, सीमा, सीमानौ।

● अनश्च बहुव्रीहेः २/७/७

अनः अन्नन्तात्लिङ्गात् ई प्रत्ययो न भवति, शोभनानि पर्वाणि यस्याः सा सुपर्वा, शोभनं शर्म यस्यास्सा सुशर्मा, सुशर्माणौ। बहुव्रीहिरिति किम्? अतिक्रान्ता राजनमति राज्ञी,। तत्पुरूषोऽयम्।

● तयोस्तु डा २/७/८

मन्नन्तस्य अन्नन्तस्य च बहुव्रीहौ डा प्रत्ययो भवति, दामा, दामे, दामाः। सीमा, सीमे, सीमाः। बहवो राजानो यस्यास्सा बहुराजा, बहुराजे, बहुराजाः। विकल्पेनायं विधिरिष्यते। बहुराजानौ, बहुराजानः। तु शब्दो विशेषं द्योतयति, तेन वन्नन्तस्य ई प्रत्ययो वा भवति बहुव्रीहौ र आदेशश्च। बहवो धीवानो यस्यास्सा बहुधीवा, बहुधीवरी।

● उदृकारानुबन्धात्त्वी २/७/९

उच्च ऋकारश्च तावुदृकारौ तावनुबन्धौ यस्य प्रत्ययस्येति विग्रहः। अकारानुबन्धप्रत्ययान्तात्लिङ्गात् च ई प्रत्ययो भवति। गोमती, भवती। भवन्तु शब्द उदनुबन्धः सर्वनाम्नां मध्ये पठ्यते। ऋकारानुबन्धात्–पठन्ती यजन्ती। वर्तमाने शन्तङ्ङिति शन्तृङ्।

● पादौ वा २/७/१०

पादिति पाद शब्दो लुप्ताकारो गृह्यते। पाद् शब्दात् वा ई प्रत्ययो भवति। द्वौ पादौ यस्यास्सा द्विपदी, त्रिपदी, शतपदी। पात् पदं समासान्त इति पद् आदेशः। पक्षे द्विपात्, त्रिपात।

• अनुपसर्जनात् २/७/११

अधिकारोऽयम्। यदितः ऊर्ध्वमनुक्रमिष्यामः, तदनुपसर्जन संज्ञस्स्यात्।. ....(त्रु. पा.) उपसर्जनमप्रधानम्, तस्मादन्यत्र .... (त्रु.पा.)

• नारी २/७/१२

न शब्दस्य ई प्रत्यये, आर आदेश .... (त्रु.पा.) ति. लिङ्गात् नकार .... (त्रु.पा.) अनुपसर्जनादिति .... (त्रु.पा.) अणन्ताल्लिङ्गात् एयण्णन्ताल्लिङ्गात्, इकारान्ताल्लिङ्गात् .... (त्रु.पा.)............

• यूनस्ति २/७/१३

(त्रुटितःपाठः)

• अणेयेकात् २/७/१४

वासिष्ठी, कुम्भकारी, कुम्भं करोतीति कर्मणि अण्, विनताया अपत्यं वैनतेयः, तस्य ई प्रत्यये वैनतेयी। अनुपसर्जनादिति किम्? बहवो वैनतेयो...... (त्रु.पा.)

• ण्यात् २/७/१५

लिङ्गाद् ई प्रत्ययो भवति, गर्गस्यापत्यं स्त्री गार्गी, वात्सीति। योगविभाग उत्तरार्थः।

• प्राचामायन चागमः २/७/१६

ण्य प्रत्ययान्ताल्लिङ्गात् स्त्रियां वर्तमानात् ण्याद् आयन आगमो भवति। प्राचाम्, प्राग्देश वर्तिनामाचार्याणां मते। गर्गस्यापत्यं स्त्री गार्ग्यायणी, वात्स्यायनी। ये चाचार्याः प्राग्देशवर्तिनः भवन्ति तेषां मते गार्गी, वात्सी।

• कौरव्यासुरिमण्डूकात् २/७/१७

कौरव्य आसुरि मण्डूकेभ्यः स्त्रियां वर्तमानेभ्यः आयन आगमो भवति, कौरव्यायणी, आसुरायणी मण्डूकस्यापत्यं स्त्री माण्डूकायनी, प्राचामितिनानुवर्तते कौरव्यशब्दस्य पृथगुपादानात्।

● लोहितादिकतन्ततः २/७/१८

लोहितशब्द आदिर्यस्य स लोहितादिः कतशब्दोऽन्ते यस्य सकतन्तः शकन्ध्वादित्वात्परलोपः, ततः कर्मधारयः। लोहितादिभ्यः कतन्तेभ्यः, कतशब्द पर्यन्तेभ्यः स्त्रियां वर्तमानेभ्यः परे आयन आगमो भवति। लोहितस्यापत्यं स्त्री लोहित्यायनी, संशितः, सांशित्यायनी, (त्रु.पा.), कतः कात्यायनी, सर्वेभ्यः ण्य गर्गादेरिति ण्यः।

● आवट्यादाप् २/७/१६

अवट्य शब्दात् आप् प्रत्ययो भवति, पकारो वैचित्र्यार्थः। अवट्यस्यापत्यं स्त्री आवट्या। गर्गादित्वात् ण्य प्रत्ययान्तः, आवट्यः, पूर्वाचार्याणां मते आवट्य शब्दात् ईकार इष्यते, आयनागमश्च, आवट्यायनी।

● वतण्डी च २/७/२०

अयं शब्दो निपात्यते, वतण्डस्यापत्यंस्त्री वतण्डी, वतण्ड शब्दात्–(त्रु.पा.) दित्वात् ण्य, ण्यादिति ईकारः, यस्यापत्यस्येति य लोपः, वा शब्दस्य ह्रस्वो निपात्यते।

● वयसिप्रथमे २/७/२१

अजाद्यन्तादित्यतः अदन्तादिति वर्तते, यल्लिङ्गमकारान्तं प्रथमे वयसि वर्तते तस्मादी प्रत्ययो भवति, कुमारी, किशोरी, वधूटी। प्रथम इति किम्? अदन्ता स्थविरा, वृद्धा। अदन्ता दिति किम्? शिशुः। प्रथम इति शब्दो व्यवस्थितविभाषावाची तेनेह न भवति, कन्या। कथं वृद्धकुमारी अत्र प्रथमंवयः ? सत्यम्–कुमारी शब्दमादौ संस्कृत्य पश्चात् वृद्धशब्दो निपात्यते। अतो वृद्धशब्देन न वयः गृह्यते।

● द्विगोः २/७/२२

द्विगोस्समासादी प्रत्ययो भवति। पञ्चानां ब्राह्मणानां समाहारः पञ्च–ब्राह्मणी, दशग्रामी।

● षडनुबन्धत्वात्त्वी २/७/२३

षश्चटश्च तौ षडौ, तावनुबन्धौ यस्य प्रत्ययस्येति विग्रहः,

षकारानुबन्धप्रत्ययान्ताल्लिङ्गात् टकारानुबन्ध प्रत्ययान्ताल्लिङ्गाच्च ई प्रत्ययो भवति। नर्तकी, नृती, गात्रनर्तनं शिल्पमस्येति शिल्पिनिवुष्, षकार इहार्थः, युवुझामित्यकादेशः, नामिनश्चोपधेति गुणः, अनेन ईकारः। कुरूचरी, चरेष्टः इति टः, टकार इहार्थः।

● गौरादेः २/७/२४

गौरादेर्गणात् ई प्रत्ययो भवति, गौरी, मत्स्यी, वक्तव्यादय लोपः, गौर, मत्स्य, मनुष्य गवय, हय, मुकय। आकृतिगणोऽयम्।

● बहुव्रीह्यूधसो नश्च २/७/२५

बहुव्रीहीति लुप्त पञ्चमी, ऊधसः, ऊधस् शब्दात् बहुव्रीहेः ई प्रत्ययो भवति नश्च, नकारश्चान्त्यादेशः। कुण्डमिव ऊधो यस्यास्सा कुण्डोध्नी एव घटोध्नी, नत्वे कृते अवमसंयोगादिति अकारलोपः। बहुव्रीहिरिति किम्? प्राप्ताः ऊधः प्राप्तौधाः, तत्पुरूषोऽयम्। अन्त्वसन्तस्येति दीर्घः।

● वासंयोगोपधाच्चाङ्गात् २/७/२६

संयोग उपधा गस्य स्वाङ्गस्य, तत्संयोगोपधम्, स्वरोहस्व इति ह्रस्वः ततो नञा समासः। यत्स्वाङ्गमसंयोगोपधम् तस्माद् ई प्रत्ययो वा भवति। चन्द्र इव मुखं यस्यास्सा चन्द्रमुखी, चन्द्रमुखा, शशिमुखी, शशिमुखा। अतिक्रान्ता केशान् अतिकेशी, अतिकेशा। असंयोगोपधादिति किम्? सुपक्वा, स्वाङ्गादिति किम्? बहुज्ञाना। अङ्ग गात्रान्तादीकारो वा वक्तव्यः। मृदुः अङ्गं यस्यास्सा मृद्वङ्गी, मृद्वङ्गा, सुगात्री, सुगात्रा। अथ स्वाङ्गं किमुच्यते? ब्रूमः—

अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम्।
अतस्थं तत्रदृष्टं च तेनचेत्तत्तथायुतम्।।

प्राणिस्थं स्वाङ्गं कीदृशम्?, अद्रवम्—द्रवरूपभिन्नम्, तेन बहुकफा इत्यत्र प्रत्ययो न, अन्यच्च कीदृशम्?, मूर्तिमत्, तेन बहुज्ञाना इत्यत्र न भवति, प्राणिस्थञ्च स्वाङ्गम्, नत्वन्यत्, तेन दीर्घमुखामाला इत्यत्र न भवति। अन्यच्च कीदृशम्? विकारजम्। विकारो वातादीनां वैषम्यम्, ततो जातं विकारजम्, न विकारजम् अविकारजम् यद्विकारान्न जातम्, तत्त्वस्वाङ्गमुच्यते, तेन शोफा इत्यत्र न भवति, शोफाश्वा यथा दृष्यते। अपरेण श्लोकार्धेन अप्राणिस्थादपि स्वाङ्गत्वमुच्यते, तत्रस्थं तत्रदृष्टञ्चेत्यस्य पदार्थः तदाप्राणिनि यन्नस्थितम्,

तत्र च पूर्वम् दृष्टं तदपि स्वाङ्गम्, तेन दीर्घकेशीरथ्या इत्यादि प्रयोगानाहुः।प्राणिनि पूर्वम् दृष्टम् सम्प्रति रथ्यायां दृश्यन्ते, तेन चेत् तथायुतमित्यस्यायमर्थः। प्राण्यङ्गेन यथा प्राणिनि द्रव्यं, तथा तेनैव प्रकारेण युतं सम्बद्धं यदि भवति यथा प्राणिनि दृष्टम्, तदा तदपि स्वाङ्गम्, तेन दीर्घमुखी प्रतिमा। मुखं हि प्रतिमायाः प्राणिद्रव्यवत्सम्बद्धम्।

● अनश्चाल्लोपिकर्णतः २/७/२७

अल्लोपीति लुप्त पञ्चम्येकवचनम्, अतोलोपः, सर्वस्यास्तीति इन्, अनः अन्नन्ताल्लिङ्गात्, अल्लोपिनः अकारे लोपिनः, कर्णतः, कर्णशब्दाच्च वा ई प्रत्ययो भवति। बहवो राजानो यस्यास्सा बहुराज्ञी, वहुराजा, डच् स्यात्, चारूकर्णी चारूकर्णा। अल्लोपग्रहणमिति किम्? सुपर्वा।

● नासिकोदरकण्ठान्त्रजङ्घादन्तौष्ठश्रृङ्गतः २/७/२८

नासिका, उदर, कण्ठ, अन्त्र, जङ्घा, दन्त, ओष्ठ, श्रृङ्गः इत्येतदन्तात् ई प्रत्ययो भवति। नासिकोदरयोऽन्त्रक्रोडादिबहुस्वरादिति निषेधः प्राप्तः, कण्ठादीनां वा संयोगोपधादित्यनेन। तुङ्गा नासिका यस्यास्सा तुङ्ग नासिकी, तुङ्ग नासिका। पुंवद्भाषितपुंस्केति पुंवद्भावः। निम्नोदरी, निम्नोदरा, रक्तकण्ठी, रक्तकण्ठा, अल्पान्त्री, अल्पान्त्रा, वृतुजङ्घी, वृतुजङ्घा, सितदन्ती, सितदन्ता, बिम्बोष्ठी, बिम्बोष्ठा, तीक्ष्णश्रृङ्गी, तीक्ष्णश्रृङ्गा। पुच्छान्तादीकारो वेष्यते। कल्याणपुच्छी, कल्याणपुच्छा। कवरमणिविषशरेभ्यः परस्मात् तु पुच्छान्तात् नित्यमिष्यते। कवरं पुच्छो यस्यास्सा कवरपुच्छी, एवं मणिपुच्छी, विषपुच्छी, शरपुच्छी।

● सविद्यमाननञः पूर्वान्नः २/७/२९

स च विद्यमानश्च नञ् च ते सविद्यमाननञः, ते पूर्वे यस्मात् स्वाङ्गादिति विग्रहः, सविद्यमाननञो तत्पूर्वात् स्वाङ्गात् प्रत्ययो न भवति। वा संयोगोपधात् स्वाङ्गादिति विकल्पः प्राप्तः, सह केशैः वर्तते या सा सकेशा, सपरस्वराया इत्यादि ज्ञापकात् सह शब्दस्य स भावः। विद्यमानकेशा। बहुव्रीहिरयम्। नविद्यन्ते केशाः यस्याः सा अकेशा, एवम् अनासिका, अविद्यमाननासिका।

● क्रोडादि बहुस्वरात् २/७/३०

बहवः स्वराः यस्य स बहुस्वरः, ततो द्वन्द्वः। क्रोडाद्यन्तात् बहुस्वरान्ताच्च ई प्रत्ययो न भवति। कल्याणः क्रोडा यस्यास्सा कल्याणक्रोडा, शोभनखुरा, विसीर्णपर्णा, बहुस्वरान्तात्, पृथुजघनं यस्यास्सा पृथुजघना, शशिवदना, क्रोड, खर, शफ, गुद, मल आकृतिगणोऽयम्। बहुस्वरग्रणमपार्थकं स्यात्। सत्यम्, प्रपञ्चार्थन्तु।

● अन्तर्वतो नु गर्भिण्याम् २/७/३१

अन्तर्वत इत्यस्मात् गर्भिण्यां स्त्रियां वर्तमानात्परो नुरागमो भवति। गर्भोऽस्त्यस्या इति गर्भिणी। अन्तः शब्दस्याधिकरण शक्ति प्राधान्यात्। वन्तु प्रत्ययनिर्देशवलात् उदृकारेति ई प्रत्ययः। गर्भिण्यामिति किम्? अन्तरस्यां शालायां विद्यते।

● पतिवज्जीवभर्तरि २/७/३२

जीवति भर्ता यस्यास्सा जीवभर्ता, तस्यां जीवति भर्तरि समासान्त गतेति ककारस्समासान्तः न भवति। अतएव निर्देशवलात् तथा ई प्रत्ययोऽपि वक्तव्य इत्यस्मात् जीवभर्तृकायां स्त्रियां वर्तमानात् परोनुरागमो भवति। पतिवत्नी, जीवभर्तृका, पति शब्दात् जीवभर्तृकायां स्त्रियां वन्तु प्रत्ययः अस्मादेव वच्छब्दोच्चारणात् लभ्यते। जीव भर्तरीति किम्? पतिवती मथुरा।

● पत्युर्नश्च २/७/३३

पतिशब्दादीप्रत्ययो भवति, अन्त्यस्य च नकारादेशः, पत्नी। ऊढायां स्त्रियामयं विधिः। तेनेह न भवति–ग्रामस्यपतिरियम्।

● समानादेर्गणात् परो यः २/७/३४

समानशब्द आदिर्यस्य गणस्येति विग्रहः। समानदेर्गाणत् परो यः पति शब्दः तस्माद् ई प्रत्ययो भवति नकारादेशोऽपि। समानः पतिः यस्याः सा समानपत्नी। दृग्दृशदृक्षेषु समानस्य स इति योगविभागात् समान शब्दस्य स भावः। समान, मातृ, एक, वीर, पुत्र, दस, पुरूष एते समानादयः।

● वान्यपूर्वोपसर्जनात् २/७/३५

अन्यः पूर्वः यस्मात् पतिशब्दात् स अन्यपूर्वः। ततः कर्मधारयः। समानादेर्गणाद् योऽन्यशशब्दस्तत्पूर्वात् पतिशब्दात् उपसर्जनादप्रधानाद्वा ई प्रत्ययो भवति, ईकारः, पक्षे च नकारादेशः। वृद्धपत्नी, वृद्धपतिः, स्थूलपत्नी, स्थूलपतिः, उपसर्जनादिति किम्? ग्रामस्य पतिरियम्।

● कामुकान्मैथुनेच्छायाम् २/७/३६

मैथुने इच्छा मैथुनेच्छा, कामुकशब्दाद् ई प्रत्ययो भवति मैथुनेच्छायां गम्यमानायाम्। कामुकी। मैथुनेच्छायामिति किम्? कामुका, किञ्चिद्वस्तुकामयतीत्यर्थः।

● नागात्स्थौल्ये २/७/३७

नागात् स्थौल्येऽर्थे ई प्रत्ययो भवति। नागी, स्थौल्य इति किम्? नागा यत्र तु नागशब्दः जातिवाची, तत्र तु जातेरयोपधादिति अनेन ईकारः, नागी।

● अकृते स्थूलात् २/७/३८

स्थूल शब्दाद् ई प्रत्ययो भवति अकृतेऽर्थे। स्थूली। अकृत इति किम्? स्थूला।

● गौणादावपने २/७/३९

गौण शब्दाद् ई प्रत्ययो भवति आवपनेऽर्थे। आवपनं यत्र धान्यादिः प्रक्षिप्यते, गौणी। आवपन इति किम्? गौणा।

● पिण्डादन्ने २/७/४०

पिण्डाद् ई प्रत्ययो भवति अन्नेऽर्थे। पिण्डी। अन्ने इति किम्? पिण्डा

● अमन्त्रे तु कुण्डतः २/७/४१

कुण्ड शब्दाद् ई प्रत्ययो भवति अमन्त्रेऽर्थे। अमन्त्रं भाजनम् इत्यर्थः। कुण्डी, अमन्त्र इति किम्? कुण्डा।

● घटाच्छिल्पि कृते २/७/४२

शिल्पिना कृतः शिल्पिकृतः, घट शब्दाद् ई प्रत्ययो भवति शिल्पिकृतेऽर्थे घटी। शिल्पिकृत इति किम्? घटा पङ्क्तिः।

● कुम्भात् २/७/४३

कुम्भ शब्दाद् ई प्रत्ययो भवति शिल्पिकृतेऽर्थे। कुम्भी। शिल्पिकृत इति किम्? कुम्भा।

● असितादेश्च वर्णतः २/७/४४

सितशब्द आदिः यस्य गणस्य स सितादिः। ततो नञ् समासः। वर्णतः वर्णवाचिनः लिङ्गात्। असितादेः सितादिगणवर्जिताद् ई प्रत्ययो भवति। कषायी। असितादेरिति किम्? सिता, पलिता, शुक्ला। नीलशब्दाद् औषधावर्थे ईकारः इष्यते। नीली औषधिः। कवर शब्दात् केशविषयेऽर्थे, कवरी धम्मिल्लमुच्यते, अन्यत्र कवरा।

● तोपधातो नकारश्च वा २/७/४५

वर्ण इत्येव। तोपधात्–तकारोधात्। वर्णतः वर्णवाचिनः ई प्रत्ययो वा भवति। यदा ई प्रत्ययस्तदा तकारस्य नत्वम्। एनी–एता, श्येनी–श्येता, हरिणी–हरिता। वर्ण इति किम्? प्रकृता। तोपधादिति किम्? शवली। अत्र नित्यम् ई प्रत्ययः।

● उदन्तादगुण वाचिनः २/७/४६

गुणं वक्तीति गुणवाची, नाम्न्यजातावितिणिनिः, वेत्येव। उदन्तात् उकारान्तात् गुणवाचिन गुणस्य प्रतिपादकात्, वा ई प्रत्ययो भवति। पट्वी–पटुः, मृद्वी–मृदुः, उदन्तादिति किम्, शुक्ला। तपरकरणमसन्देहार्थम्। खुर् शब्दात् गुण वाचिनः संयोगोपधात् च ईकारो नेष्यते। खुरूरियम्, पाण्डुरियम्।

● बह्वादिभ्यः २/७/४७

वा इत्येव, बह्वादिभ्यो वा ई प्रत्ययो भवति, बह्वी–बहुः, बहुकल्याणी, बहुकल्याणा। उद........., उद......., इकारान्तात्लिङ्गादीकारोवेष्यत इति कृतिः, ह्रतिः, अकरणिः, अहरणिः इत्यत्र न भवति। वा इति व्यवस्थित विभाषा हरण करण क्षरण विशाल एते बह्वादयः।

● भुवोनित्यम् २/७/४८

भुव इत्यस्य भू शब्दस्य ग्रहणाद् अग्निकार्यम् न भवति। अतएव निर्देशात् उवादेशः भुव इत्यस्माल्लिङ्गात् नित्यम् ई प्रत्ययो भवति। विभु–विभ्वी, प्रभु–प्रभ्वी, भुशब्दस्य ग्रहणादिह न भवति। स्वयम्भूरियम्।

● सख्यशिश्वोश्च २/७/४९

सखि अशिशु शब्दाभ्याम्, ई, प्रत्ययो भवति। सखी, अशिश्वी, न विद्यते शिशुर्यस्या इति विग्रहः।

● पुंयोगात्तेन चेदाख्या २/७/५०

पुंसायोगः पुंयोगः, पुंयोगात् पुरूषसम्बन्धाद् धातोः य शब्दः स्त्रियां वर्तते तस्माद् ई प्रत्ययो भवति, तेन चेत् शब्देन पुंसः आख्या–कथनं भवति। गणकस्य स्त्री गणकी, महामात्री, अत्र गणकेन पुरूषेण सम्बन्धात् स्त्रियां गणकशब्दो वर्तते, तेन गणकशब्देन पुरूषोऽपि कथ्यते। पुंयोगादिति किम्? देवदत्ता, नायशब्दः पुरूषसम्बन्धात् स्त्रियां वर्तते, किन्तर्हि संज्ञाशब्दोऽयम्। तेन चेदाख्येति किम्? प्रसूतः, अयं शब्दः पुरूष सम्बन्धात् स्त्रियां वर्तते, नतु पुंसः आख्याभूतः। नहि प्रसूतत्वं यद्गर्भविमोक्षणं तत् पुंसः सम्भवति। गोपालकादीनामयमीकारो नेष्यते। अश्वपालिकाः, गोपालिका। पालक शब्दात् गोपालकादय इत्याहुः। सूर्याद्देवतायामर्थे। सूर्यस्य स्त्री सूर्या। देवतायामिति किम्? सूर्यो नाम कश्चित् स्त्री सूरी, यस्यापत्यस्येतिय लोपः, योगविभागात्। इन्द्र वरूण भव शर्व रूद्राणाम् ईकारे कृते आनुरागमो वक्तव्यः। इन्द्रस्य स्त्री इन्द्राणी एवं वरूणानी, भवनानी, शर्वाणी, रूद्राणी। हिमारण्ययोः महत्वे त्वे ईकारः इष्यते, आनुरागमश्च। महत् हिमं हिमानी, महद् अरण्यम् अरण्यानी। आर्य क्षत्रियोपाध्यायमातुलानामीकारे परे आनुरागमो वा वक्तव्यः। आर्यस्यस्त्री आर्याणी, वा–आर्यी, एवं क्षत्रिया वा–क्षत्रियी, उपाध्यायानी वा–उपाध्यायी, मातुलानी वा–मातुली।

● क्रीतात्करणपूर्वात् २/७/५१

करणं पूर्वो यस्मात् क्रीतादिति विग्रहः। क्रीत शब्दात् करणपूर्वात् ई प्रत्ययो भवति। वस्त्रेण क्रीता वस्त्र क्रीती, धनक्रीती। करणपूर्वादिति किम्? सुखंक्रीता सुखक्रीता, सुख शब्दोऽत्र क्रियाविशेषणम्। वाक्ये तु नेष्यते, अश्वेन–क्रीता।

● पूतक्रतु मनो रै च २/७/५२

पूतक्रतुः मनुरिति समाहारे द्वन्द्वः। पूतक्रतुमनुशब्दाभ्याम् ई प्रत्ययो भवति तयोश्च ऐकारादेशः। पूतक्रतोः स्त्री पूतक्रतायी एवं मनायी। मनो औकारादेशो वेष्यते, मनावी पक्षे मनायी। ऐकारादेशोऽपि वेष्यते। पूतक्रतु मनु शब्दौ यदा पुंयोगाद्धेतोः स्त्रियां वर्तते, तदायं विधिः। तेनात्र न भवति पूताः क्रतवः यया सा पूतक्रतुः। एवमुत्तरसूत्रेऽपि।

● कुसिताग्नि वृषाकपेः २/७/५३

कुसित, अग्नि, वृषाकपि इत्येतेभ्यः ई प्रत्ययो भवति। एवमेतेभ्यः आयागमः। कुसितस्य स्त्री कुसितायी, अग्नायी, वृषाकपायी।

● दुहितुः पुत्रो वा ब्रह्मन्सूतभोजोग्रराजतः २/७/५४

ब्रह्मादीनां समाहारे द्वन्द्वः, ब्रह्मन् सूत भोज उग्र राजन् इत्येतेभ्यः परस्मात् दुहितृशब्दात् ई प्रत्ययो वा भवति। ईकार पक्षे दुहितृ शब्दस्य पुत्रादेशः। ब्रह्मणः दुहिता, ब्रह्मपुत्री–ब्रह्मदुहिता एवं सूतपुत्री– सूतदुहिता भोजपुत्री–भोजदुहिता, उग्रपुत्री–उग्रदुहिता। राजपुत्री–राजदुहिता।

● जातेरयोपधादस्त्रीतः २/७/५५

यकार उपधा यस्य लिङ्गस्य तत् योपधम्, ततो नञा समासः अस्त्रियाम्, अस्त्रीतः, आद्यादित्वात् तस्।

आकृतिग्रहणाजातिः लिङ्गानाञ्च न सर्वभाक्।
[1]सर्वदाख्यात निर्ग्राह्या गोत्रञ्च चरणैः सह।।

जातिवाचि यल्लिङ्गमयकारोपधम् तथा स्त्रियामेव नानुवर्तते तस्मादी प्रत्ययो भवति। कुक्कुटी, ब्राह्मणी, नाडायनी, कठी। जातेरितिकिम्? मुण्डा अयोपधादिति किम्? क्षत्रिया। अस्त्रीत इति किम्? बलाका।

● पाकाद्यन्तात्तथैव च २/७/५६

पाकशब्द आदिर्येषां ते पाकादयः, तेऽन्तेयस्य लिङ्गस्य तत्पाकाद्यन्तम्। जातेरित्येव, जातिवाचि यल्लिङ्गं पाकाद्यन्तं तस्माद ई

१. सकृदाख्यात (पाठान्तरम्)

प्रत्ययो भवति। अस्त्रीत इति जातिप्रतिषेधो प्राप्तः। ओदनपाकी, शङ्कुकर्णी। पाक, कर्ण, पुष्प, फल, मूल, बल इत्येते पाकादयः।

● इण्तः २/७/५७

इणः इण्तः इष्टिवशात् तस्। इण् प्रत्ययान्तात् ई प्रत्ययो भवति। दक्षस्यापत्यं स्त्री दाक्षी। एवं प्लाक्षी। इणतः इति इणि कृते ई प्रत्ययः।

● मनुष्यजातेरी २/७/५८

मनुष्यस्य जातिः मनुष्य जातिः। जात्यन्ताल्लिङ्गात् मनुष्य जातिवाचिनः ई प्रत्ययो भवति। अवन्ती, कुन्ती। मनुष्यजातेरिति किम्? तित्तिरिः। पक्षिणः जातिरियम्।

● ऊङुतः २/७/५९

उतः उकारान्तान्मनुष्यजातिवाचिन ऊङ् प्रत्ययो भवति। ङकारः पुंवद्भाषितपुंस्केत्यर्थः। कुरूः, ब्रह्मबन्धूः। मनुष्यजातेरिति किम्? कृकवाकुः।

● पङ्गु कद्रुतः २/७/६०

पङ्गु कद्रु शब्दाभ्याम् ऊङ् भवति। मनुष्य जात्यर्थवचनम्। पङ्गूः कद्रूः।

● सफलक्षणवामादेरूरौ २/७/६१

सफ, लक्षण वामादेरिति द्वन्द्व गर्भो बहुव्रीहिः, सफ लक्षण वामा इत्येतदादेः ऊरुशब्दादूङ् भवति। अमनुष्यजात्यर्थम् वचनम्। सफः ऊरूः यस्यास्सा सफोरूः। एवं लक्षणोरूः, वामोरूः। सह सहित संहितादेरप्युरो ऊङ् वक्तव्यः। सहोरूः, सहितोरूः, संहितोरूः।

● औपम्यसंहितात् २/७/६२

उपमायाः भावः औपम्यम् तेनसंहितः युक्तः औपम्यसंहितः, औपम्येन संहिताद् ऊरोः ऊङ्भवति। करभ इव ऊरू यस्यास्सा करभोरूः। कदलीस्तम्भोरूः।

● बाह्वन्ताच्चैव संज्ञायाम् २/७/६३

बाहुशब्दान्ताद् ऊङ् भवति संज्ञायां विषये। रूद्रबाहूः, मद्रबाहूः। संज्ञायामिति किम्? वृत्तबाहुरियम्।

● व लोपश्श्वसुरस्य च २/७/६४

उश्च अश्च तौ वौ, तयोः लोपः वलोपः। श्वसुर शब्दाद् ऊङ् भवति उकारस्य अकारस्य च लोपः। श्वस्रूः।

भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तौ नामप्रकरणे
स्त्रीप्रत्ययपादः सप्तमः

चतुष्टयंसमाप्तम्।

अथाख्यातप्रकरणे प्रथमःपादः

● अथ परस्मैपदानि ३/१/१

अधिकारोऽयम् वर्तमाना ति तस् अन्तीत्यादिषूपतिष्ठते। षडाद्यास्सार्वद्यातुकमित्यतः प्रागयमधिकारः। अथशब्दो मङ्गलार्थः।

● नवपराण्यात्मने ३/१/२

आत्मनेपदानीति प्रथमा बहुवचनान्तम्। आदिलोपोऽन्तलोपश्चेति पदानीत्यस्य लोपः। अयमधिकारः वर्तमाना ते आते अन्त इत्यादिषूपतिष्ठते। पूर्वोक्त एवावधिः।

● त्रीणि त्रीणि प्रथम मध्यमोत्तमाः ३/१/३

परस्मैपदानामात्मनेपदानां यानि त्रीणि त्रीणि वचनानि तानि यथा संख्यं प्रथम मध्यमोत्तम संज्ञानि भवन्ति। ति तस् अन्ति इति प्रथमाः। सि थस् थ इति मध्यमाः, मि वस् मस् इति उत्तमाः। आत्मने पदानाम्–ते आते अन्ते इति प्रथमाः। से आथे ध्वे इति मध्यमाः। ए वहे महे इति उत्तमाः। प्रथम मध्यमोत्तम संज्ञाभिःक्व प्रयोजनम् ? नाम्नि प्रयुज्यमानेऽपि प्रथमः, युष्मदि मध्यमः, अस्मद्युत्तमः इत्यत्र सः पचति, त्वं पचसि, अहं पचामि। प्रथम – मध्यमोत्तम संज्ञानां पुरूषसंज्ञापि वोद्धव्या।

● युगपद्वचने परः पुरूषाणाम् ३/१/४

युगपद्वचनम्, युगपद्वचनमिति तत्पुरूषः, परिभाषा चेयम्, त्रयाणां प्रथम–, मध्यमोत्तमानां युगपद्वचने तुल्यकालमभिधाने सति यः परः पुरूषस्स एव धातोः परोभवतीति परिभाष्यते। एकस्मिन्धात्वर्थे यदा नाम सन्निहितं भवति, युष्मदस्मदी च, तत्र प्रथममध्यमोत्तमाः अनियमेन प्राप्नुवन्ति, इति नियमः क्रियते। स च त्वं च अहं च पचामः। अत्र पर्यायेण सर्वे प्रथममध्यमोत्तमाः भवेयुरिति सूत्रारम्भात् उत्तमो भवति। डुपचष् पाके, वर्तमाना मस्, अन्वि, अस्यवमोर्दीर्घ इति दीर्घः। पुरूषाणामिति बहुवचनमप्रधानम्। तेनेहापि परः पुरूषोभवति। सच त्वंच पचथः। त्वञ्च अहञ्च पचावः। पूर्ववद्विकरणस्य दीर्घः। पूर्वोक्तपरोक्तपरिभाषयासिद्धत्वाद् योगारम्भस्तस्या एव परिभाषाया प्रपञ्चार्थः।

● नाम्निप्रयुज्यमानेऽपि प्रथमः ३/१/५

नाम्नि प्रयुज्यमाने सति धातोः प्रथमो भवति, अपि शब्दादप्रयुज्यमानेऽपि सः पचति, तौ पचतः, ते पचन्ति। अप्रयुज्यमाने पचति पचतः पचन्ति। ति तस् अन्ति, अन्वि असन्ध्यक्षर लोपः। ननु प्र ग्रहणं किमर्थम्? नाम्नि युज्यमानेऽपि प्रथम इति कृते युज्यमान धातुनासम्बध्यमाने इत्यर्थो विज्ञास्यते। अत्रोच्यते प्र ग्रहणं प्रकर्षप्रतिपत्त्यर्थम्। तेन प्रकर्षेण वा सामानाधिकरण्येन यदानाम्नः धातुना विभक्त्यन्तेन सम्बन्धः तदा प्रथमः, तेनेह न भवति देवदत्तेन पूज्यसे त्वम्। अत्र देवदत्तः कर्मत्वस्य विषयः तेन नाम्नो धातुना नास्ति सामानाधिकरण्यम्। पूज पूजायाम्। स्वरादेश्चेति इन्, वर्तमाना से, सर्वाध ातुके यण्। णकारो न णकारेति गुण प्रतिषेधार्थः। कारितस्यानामिति कारित लोपः।

● युष्मदि मध्यमः ३/१/६

युष्मदीत्यत्रैव निर्देशात् लक्षणाभावः, एवमुत्तरसूत्रेऽपि युज्यमानेपीत्यत्रानुवर्तते, उत्तरत्र च। युष्मदि प्रयुज्यमानमिति धातोः मध्यमो भवति अपि शब्दादप्रयुज्यमानेऽपि त्वं पचसि, युवां पचथः, यूयं पचथ। अप्रयुज्यमाने, पचति, पचथः, पचथ।

● अस्मद्युत्तमः ३/१/७

अस्मदि प्रयुज्यमानेसति धातो उत्तमो भवति, अपि शब्दादप्रयुज्यमाने अहं पचामि, आवां पचावः, वयं पचामः। अप्रयुज्यमाने–पचामि, पचावः, पचामः। अस्य वमोर्दीर्घ इति दीर्घः।

● अदाब्दाधौ दा ३/१/८

दाप् लवने, दैप्, शोधने, अनयोः सामान्यं दाप् इति रूपं तदिह गृह्यते, न दाप् अदाप्, दाश्च धाश्च तौ दाधौ। डुदाञ् दाने, दान् दाने, देङ् रक्षणे, दो अवखण्डने इत्येतेषां सन्ध्यक्षरान्तानामाकारो विकरण इत्यात्वे कृते यत्सामान्यं दा इति रूपं तदिह दा ग्रहणेन गृह्यते। डु धाञ् दानधारणयोः धेट्पाने इत्येतयोरपि धा इति यद्रूपं तद् धां ग्रहणेन गृह्यते। दा धा इत्येतौ दासंज्ञकौ भवतः, अदाप् दाप् दैप् इत्येतौ वर्जयित्वा। दा संज्ञायाः क्व प्रयोजनम् ? दामागायतीत्यादिषु। दीयते, धीयते। दा धा इत्येताभ्यां वर्तमाना ते, सार्वधातुके यण्, सत्यां दा संज्ञायां दामागायतीति ईत्वम्। अदाप् इति

किम् दायन्ते व्रीहयः दाप् लवने। दायन्ते भाजनानि शोधन्ते, दैप् शोधने। दा संज्ञायां सत्यां ईत्वं न स्याद्। दापदैपोः पकारः आदावित्यत्र विशेषणार्थः।

● क्रियाभावो धातुः ३/१/९

भवतेः इन्नन्तात्। क्रियाः भावयतीति कर्मणि अण्। कारित लोपः। यशब्दः क्रियां भावयति प्रतिपादयति स धातु संज्ञो भवति। क्रियत इति क्रिया, व्यापारः इत्यर्थः। भवति। भू सत्तायाम्। वर्तमाना ति। अन्वि। नाम्यन्तयोरिति गुणः। अन्ति। अद भक्षणे। वर्तमाना ति। अन्वि, तस्य अदादेर्लुक्। अघोषेष्वशिटामिति दस्य तः। जुहोति, हु दाने, वर्तमाना ति, अन्वि तस्य जुहोत्यादेश्चेति लुक्, जुहोत्यादीनां सार्वधातुक इति हु इत्यस्य द्विर्वचनम्, हो जः, नाम्यन्तयोरिति गुणः। भ्वादीनां शब्दानां सत्यां धातु संज्ञायां त्यादयो भवन्तीति पूर्वाचार्य संज्ञाङ्गीकरणं धातुपाठ पठितानां क्रियावाचिनां धातुसंज्ञार्थम्, तेन सोपसर्गाणां समुदायानां न भवति। यदि स्यात्, प्राभवदित्यत्र प्रशब्दात्प्राक् अकारागमः स्यात्। भू सत्तायाम्, प्र पूर्वः। ह्यस्तनी दि, इकारो व्यञ्जनादिदस्योरित्यर्थः। अड्धात्वादिः, अन्वि, नाम्यन्तयोरिति गुणः। सौत्राणां धातु संज्ञा वक्तव्या।स्तम्भयति। स्तन्भु धातुः। वर्तमाना ति, स्तन्भु, स्तुन्भु स्कन्भु स्कुन्भुस्कुञ्भ्यो धातु प्रत्यये नु प्रत्ययो वक्तव्य इत्यनेन नुरागमः। अनिदनुबन्धानामित्यनुषङ्गलोपश्च। क्रियाभाव इति किम्? भूवा, भू शब्दो भूमि वाची, वा शब्दो निपातः। धातु संज्ञायाः क्व प्रयोजनम्? धातोश्चहेतावित्यादिषु।

● काले ३/१/१०

अधिकारोऽयम्। इतः उत्तरं यद्वक्ष्यामः तत्रकाले इत्येतदुपतिष्ठते, तासां स्व संज्ञाभिरित्यतः प्राग् अयमधिकारः।

● सम्प्रतिवर्तमाना ३/१/११

सम्प्रति शब्दो निपात समुदायोऽव्ययम्। सम्प्रति वर्तमाने काले धातोः वर्तमाना विभक्तिर्भवति। पचति पठति यजति। डुपचष् पाके, पठ् व्यक्तायाम्, यज देवता, वर्तमाना ति, अन्वि।

● स्मेनातीते ३/१/१२

योग शब्दस्सप्तम्यन्तः अध्याह्रियते, तेन स्म शब्द योगे सति धातोः

अतीते काले वर्तमाना भवति। ह्यस्तन्यद्यतनीपरोक्षाणां बाधः। इति स्म माता ब्रवीति। ब्रूञ् व्यक्तायाम्, वर्तमाना ति, अन्वि, अदादेर्लुक्, ब्रुवः ईड्वचनादिरिति ईट्, टकार इटश्चेटीत्यर्थः, गुणः। इति स्म तमध्यापयन्कथयति। कथ वाक्य प्रतिबन्धे। स्वरादेश्चेतीन् अस्य च लोप, इति अकार लोपः, स्वरादेशः पर निमित्तकः, स्थानिवद्भावादुपधात्वादस्योपधेति दीर्घो न भवति। कथ इति स्थिते, वर्तमाना ति, अन्वि गुणः, ए अय्। ननु शब्दे उपपदेऽतीतेकाले स्म शब्द योगे असत्यपि धातोः वर्तमाना वक्तव्या पृष्ट प्रति वचने गम्यमाने। अकार्षीः कटं देवदत्तः? ननु करोमि भोः, कृतवानहमित्यर्थः।

● परोक्षा ३/१/१३

अतीत इत्येव, स्मेनेति निवृत्तम्। अतीते काले धातोः परोक्षा भवति।

चकार वामनं रूपं जहार पृथिवीं बलेः।
जघान समरे कंसम्, यस्मै तस्मै हरये नमः।

डुकञ् करणे, हृञ् ह, डु शब्दो त्वनुबन्धादसक्तेन निवृत्तेरित्यर्थः। ञकार इञ्यजादेरित्यर्थः। परोक्षा अट्, टकारः आकारादट इत्यर्थः। चण् परोक्षेति द्विर्व। अकार ऋवर्णस्येति ऋकारस्य अकारः, कवर्गस्य चः, हो जः, अस्योपधाया इति वृद्धिः, हन् हिंसा, अभ्यासाच्चेति घत्वम्।

● भूतकरणवत्यश्च ३/१/१४

अड्धात्वादेरित्येतत्सूत्रविहितोऽकारागमो भूतकरणशब्देनोच्यत इत्याहुः। भूतं करणं विद्यते यासां ताः भूतकरणवत्यः, तदस्यास्तीति वन्तुः। उदृकारेति ई प्रत्ययः। अतीत इत्येव। धातो अतीते काले भूतकरणवत्यः विभक्तयः ह्यस्तन्यद्यतनी क्रियातिपत्तयो भवन्ति। ह्यस्तनी तावत्– अकरोत्। डु कृञ् ह्यस्तनी दि, अड्धात्वादेः, तनादे रूः, करोतेरिति गुणः, नाम्यन्तयोर्विकरणस्य गुणः, वा विराम इति दस्य तः। अहरत् हृञ् हरणे, ह्यस्तनी दि, अन्वि, गुणः, अद्यतनी, अकार्षीत्, अहार्षीत्। डु कृञ् करणे, हृञ् हरणे, अद्यतनी दि, सिजद्यतन्यामिति सिच्, इकार चकारौ सिचिपरस्मै इत्यर्थौ सिचिपरस्मै इति वृद्धिः आर, सिच इति ईट्, षत्वम्। क्रियातिपत्तिः–अकरिष्यत्, अहरिष्यत्, डुकृञ् क, हृञ् ह, क्रियातिपत्तिस्स्यात्, हनृदन्तात्स्य इति इट्, गुणः।

● भविष्यतिभविष्यन्त्याशीश्श्वस्तन्यः ३/१/१५

भविष्यन्ती च आशीश्च, श्वस्तनी चेति द्वन्द्वः, आशीरित्यत्र सजुषाशिषो र इति रत्वम्, इरूरोरीरूरौ भविष्यति काले धातोः भविष्यन्ती, आशीः श्वस्तनी, एताः विभक्तयो भवन्ति। भविष्यन्ती तावत्, भविष्यति, भू सत्ता, भविष्यन्ती स्यति, इडागमो सार्वधातुकस्येति इट्, गुणः। एवं हनिष्यति, हन् हिंसा, स्यति, हनृदन्तात्स्ये इति इट्। आशीः– भूयात् भवान्विरक्तः, भू स, आशीः, यात्,। श्वस्तनी पठिता, पठितारौ, पठ व्यक्तायाम्, श्वस्तनी डा, डारौ, इट्।

● तासां स्वसंज्ञाभिःकालविशेषः ३/१/१६

स्वाश्चताः संज्ञाः स्वसंज्ञाः, पुंवद्भाषित पुंस्केति स्वा शब्दस्य पुंवद्भावः तासामिति परोक्षादयोऽनुकृष्यन्ते, न त्वनन्तराः तिस्रः। एवं तद् ग्रहणं ह्यपार्थकं स्यात्। अनन्तरस्य विधिर्भवति प्रतिषेधोवेति न्यायात् तासामडादीनां विभक्तीनां याः परोक्षेत्यादयः तत्र परोक्षेति कालस्य अतीतादेः विशेषो भवति। परोक्षादीनां सज्ञानां योऽस्ति परोक्षत्वादिको विशेषस्तेन युक्तेन परोक्षादयो भवन्ति न तु कालसामान्य इत्यर्थः। वर्तमाना तु नेहानुवर्तते, वर्तमानस्य कालस्य विहितविभक्ति सम्बन्धिना वर्तमानत्वेन विशेषेण योगे सति असति वा विशेषाभावात्। परोक्षे अतीते परोक्षा न तु अतीतसामान्ये। अक्षेभ्यः इन्द्रियेभ्यः यत् परोक्षम्। त्रिपुरं ददाह रूद्रः। दह भ, परोक्षा, अट्, चण् परोक्षेति, द्विर्वचनम्, अभ्यासस्यादि व्यञ्जनमिति हकार लोपः अस्योपधेति दीर्घः। यदपि चित्त व्याक्षेपात् कृतं तदपि परोक्षम्। मत्तोऽहं विललाप, सुप्तोऽहं विललाप। रप लप व्यक्तायां वाचि, विपूर्वः, परोक्षा, उत्तमैकवचनम्, अट, चण् परोक्षेति द्विर्वचनम्, अभ्यासस्यादिव्यञ्जनमिति पलोपः, अस्योपधेति दीर्घः अत्यन्तापह्नवे परोक्षा वक्तव्या। नाहं पतितैस्सह पपाठ, नाहं रूद्रान्नं बुभुजे। भुज पा, अट्, ए, चण् परोक्षेति द्विर्वचनम्, द्वितीयचतुर्थेति भस्य बः। ह्यः, प्रभृति ह्यस्तनी, नत्वतीतमात्रे। ह्यः पापमहरत्, हृञ् ह, ह्यस्तनी दि, अन्वि, गुणः, अद्यतनीत्वतीतमात्रेस्मर्यते न त्वतीत विशेषे, यत्रातीते क्रियाया अतिपत्तिः अनिष्पत्तिः तत्र क्रियातिपत्तिः। अभोक्ष्यत् भवान् घृतेन सह, यदि मत्समीपे आसिष्यत, भुज पालनाभ्यवहारयोः क्रियातिपत्तेः, स्यति, नाम्नश्चोपधेति गुणः, चवर्गस्य किरिति किः, षत्वम्, आसिष्यत। आस उपवेशने स्यत, इट्।

अवर्णस्याकारः इति अकारस्याकारः, भविष्यन्ती तु भविष्यत्सामान्ये न तु भविष्यद्विशेषे, विशेषस्य कस्यचिदभावात्। आशीर्युक्ते भविष्यति काले आशीः, न भविष्यत्सामान्ये। जीव्याद् भवान्, जीव प्रा, आशिषः यात्, श्वः प्रभृति भविष्यत्काले श्वस्तनी, न भविष्यत्सामान्ये, श्वः अध्येता, इङ् अध्ययने ङकार आत्मने पदार्थः अधिपूर्वः श्वस्तनी ता, गुणः। श्वो गमिष्यति इत्यत्र तु गमिष्यतीत्येतत्पदं भविष्यत्सामान्ये संस्सकृत्य पश्चात् श्वः शब्देन सम्बन्धः। गम्लृ ग, स्यति, से गमः परस्मै इति इट्।

● प्रयोगतश्च ३/१/१७

तासामित्येव काल विशेष इति च। यद्यपि प्रस्तुते कालविशेष इति तत्पुरूषोऽभूत् तथाप्यर्थवशात् कर्मधारयो वोद्धव्यः। वर्तमानाप्यत्र सम्बध्यते। प्रयोगः–शिष्ट प्रयोगः। तस्मात् शिष्ट् प्रयोगात् वर्तमानादीनां विभक्तीनां कालविशेषो भवति, विशिष्टः कालो भवति। कालान्तरे विशिष्ट प्रयोगाद्वर्तमानादयो भवन्तीत्यर्थः। यावद्भुङ्क्ते, पुरा भुङ्क्ते, यदा भोक्ष्यते अग्रे भोक्ष्यत इत्यर्थः। यावत्पुरा शब्दावत्र निपातौ ताभ्यां योगे भविष्यति काले वर्तमाना भवति। भुज, पा, ते, स्वराद्रुधादेरिति न शब्दः, रूधादेर्विकरण इति न शब्दाकारस्य लोपः, चवर्गस्य किरिति जस्य कः, वर्ग्ये वर्गान्त इति नस्य ङः। यदा निपातौ यावत्पुराशब्दौ तदा भविष्यति काले, वर्तमाना, यदा तु न निपातौ श्वकाले भविष्यन्ती एव। यावद्दास्यति तावद्भोक्ष्यते, यत्परिमाणमस्य यावत्, तत्परिमाणमस्य तावत्। परिमाणेऽर्थे यत्तदेतेभ्यो वन्तुरिष्यते। अनया पुरा व्रजिष्यतीति, डु दाञ्, दा, भुज पालनाभ्यवहारयोः। व्रज, ग, व्रजेरिति इट्, कदाकर्हिभ्यां योगे भविष्यति काले वर्तमाना विकल्पेन स्मर्यते। कदा भुङ्क्ते, कर्हि भुङ्क्ते, कदा भोक्ष्यते, कर्हि भोक्ष्यते। भुज, पा, वर्तमाना, ते, भविष्यन्ती स्यति, नामिनश्चोपधेति गुणः, चवर्गस्य किः, षत्वम्।

● पञ्चम्यनुमतौ ३/१/१८

अनुमतिः अभ्युपगमः अङ्गीकारः। अनुमतावर्थे धातोः पञ्चमी भवति, एवमस्तु, एवं भवतु, अस् भू, भूसत्ता, पञ्चमी तु, अन्विक, अस्तेः अदादेर्लुक् नाम्यन्तयोरितिगुणः, अस्येकारस्सार्वधातुक इत्युत्वम्, अकाराच्चेति हेर्लोपः। तु हि इत्येतयोराशिषि गम्यमानयोः तातङ् वक्तव्यः, जीवतात् भवान्, वा जीवतुभवान्। जीवतात् त्वम् वा जीव त्वम्। जीव प्रा, पञ्चमी। हि तु

इत्येतयोः स्थाने तातङ्। णकारोनणकारेत्यर्थः। अकार उच्चारणार्थः, अन्वि, यदा हेः आदेशो नास्ति तदा हेरकारदिति हेर्लोपः।

● समर्थनाशिषोश्च ३/१/१९

समर्थना च आशीश्च ते समर्थनाशिषे, समर्थनायामाशिषिधातोः पञ्चमी भवति। परैरशक्ये कर्मण्यध्यवसायः समर्थना। अप्राप्तस्य प्रियस्य प्राप्तुमिच्छा आशीः। समर्थानायां तावत्– समुद्रमपि पिबानि। पा पाने, पञ्चमी, आनि, अन्वि, पः पिब इति पिबादेशः। एवं पर्वतमपि शिरसा धारयाणि। धृङ् अ, स्वरादेश्चेति इन्, अस्योपधेति वृद्धिः, आनि, अन्वि गुणः, ए अय्। आशिषि खल्वपि, चिरञ्जीवतु, चिरंनन्दतु, जीव प्रा, टुनदि समृद्धौ, इकारो नकारागमार्थः। अनिदनुबन्धानामिति ज्ञापकात् नागमः, तु, अन्वि। केचित् समर्थनायां सप्तमीमिच्छन्ति, तेन पर्वतमपि शिरसा भिन्द्यात्। भिदिर् विदा, इकार रेफौ युगपदनुबन्धौ विकल्पेनानर्थकौ। सप्तमीयात्, स्वराद्रुधादेरिति नशब्दः रूधादेर्विकरणात्तलोपः।

● विध्यादिषुसप्तमी च ३/१/२०

विधिरादिर्येषाम् ते विध्यादयः। विध्यादिषु सत्सु धातोः पञ्चमी भवति सप्तमी च। विधि निमन्त्रण आमन्त्रण अधीष्ट सम्प्रश्न प्रार्थना इत्येते शास्त्रान्तर–प्रसिद्धाः विध्यादयो गृह्यन्ते। विधिः अज्ञातज्ञापने प्रेरणे वा। हव्यकव्योद्देशेन ब्राह्मणादीनां वरणम् निमन्त्रणम्। आह्वानमामन्त्रणम्, पूजापूर्वकं व्यापारमधीष्टम्। संप्रश्नः सम्प्रसारणा विचार इत्यर्थः। प्रार्थना याच्ञा। विधिस्तावत् अग्निहोत्रं जुहुयात्, हु दाना, सप्तमी, यात् अन्विक्, जुहोत्यादेश्चेति लुक्। जुहोत्यादीनां सार्वधातुक इति द्विर्व, होजः। कटं करोतु भवान्। डुकृञ् क, सप्तमी तु, तनादेरूः, करोतेरिति गुणः, नाम्यन्तयोरिति उकारस्य गुणः, कटं कुर्यात् भवान्, डुकृञ् क, सप्तमीयात्, तनादेरूः, करोतेरिति गुणः। अस्योकार इत्युत्वम्, सप्तम्यां ये चेत्युकार लोपः। निमन्त्रणे–भुङ्क्ते भवान्, भुञ्जीत भवान्, भुज पा, पञ्चमी, ताम्, सप्तमी ईत्, स्वराद्रुधादेरिति न शब्दः, रूधादेर्विकरणान्तलोपः, चवर्गस्य किरिति किः आमन्त्रणे– आगच्छतु भवान्, आगच्छेत् भवान्, गम्लृ गतौ, आङ् पूर्वः, तु, यात्, अन्वि, गमिषुयमां छः इति मस्य छः, द्विर्भावः, याशब्दस्य च सप्तम्यामिति इत्वम्। अधीष्टम्–माणवकमुपनयत, उपनयेत् वा, णीञ् प्रा, उपपूर्वः, णो नः, ताम्, ई, त, अन्वि,

नाम्यन्तयोरिति गुणः। संप्रश्ने– किं व्याकरणमध्ययै, उत् छन्दोऽध्ययै, कि लोकायतमधियीय, उत वेदमधियीय, इङ् अध्ययने, अधिपूर्वः, पञ्चमी, ऐ, सप्तमी, ईय, अन्वि, अदादेर्लुक्, सर्वेषामात्मन इति गुणाभावः, स्वरादाविवर्णेति इय्। प्रार्थना– कन्यां प्रयच्छतु भवान्, प्रयच्छेत् वा, दान दाने, दानकारो दानं यच्छतु इत्यर्थः। प्रपूर्वः तु, यात्, अन्वि, दानोयच्छेति यच्छ आदेशः, पूर्ववत् याशब्दस्य ईत्वम्।

● क्रियासमभिहारे सर्वकालेषु मध्यमैकवचने पञ्चम्याः ३/१/२१

क्रियाणां समभिहारः क्रियासमभिहारः, सर्वे च ते कालाः, सर्व कालाः मध्यमस्य एकवचनं मध्यमैकवचनम्। क्रियासमभिहारः–पौनः पुन्यं भृशार्थो वा। क्रियासममिहारे वर्तमानाद्धातोस्सर्वेषु कालेषु वर्तमाने, अतीते, भविष्यति च, पञ्चम्याः सम्बन्धि मध्यमपुरुषैकवचनं भवति। लुनीहि लुनीहि इत्येवायं लुनाति। लुनीहि लुनीहि इत्येवायमलावीत्। लुनीहि लुनीहि इत्येवायं लविष्यति, अलुनात्। पञ्चमी, हि, न्यङ्कुटादेस्स्वरोहस्व इति ह्रस्वः। उभयेषामीकार इतीत्वम्, आलोपो सार्वधातुक इत्यालोपः। णञ्चाभीक्ष्ण्योः द्विश्चपदमिति लुनीहि इत्यस्य द्विर्वचनम्। अधीष्व अधीष्व इत्येवायमधीते। अधीष्व, अधीष्व इत्येवायमधीयाते। अधीष्व अधीष्व इत्येवेमे अधीयन्ते। अधीष्व अधीष्व इत्येवायमध्यैत। अधीष्व अधीष्व इत्येवायमध्यैष्यत्। इङ् अध्य, अधिपूर्वः पञ्चमी, ष्व, अन्विक, अदादेर्लुक्, हि स्वयोर्विषये तध्वमावमीष्येते। लुनीत लुनीत इत्येव यूयं लुनीथ, लूञ् छे, पञ्चमी त, ना क्र्यादेः, प्वादीनां ह्रस्वः, अधीध्वम्, अधीध्वम् इत्येव यूयमधीध्वे, इङ् अ, अधिपूर्वः, पञ्चमी ध्वम्, अन्वि, अदादेर्लुक्।

● मा योगेऽद्यतनी ३/१/२२

मा शब्देन योगः मायोगः, मा शब्देन योगे सति धातोः अद्यतनी भवति। मा शब्दः प्रतिषेधवाची, प्रतिषेधश्च वर्तमाना भविष्यद्विषय इति वर्तमान भविष्यत्काल विहिताः प्रत्ययाः प्राप्ताः। माकार्षीत्, माहार्षीत् डु कृञ् क, हृञ् ह, मा योगः, दि, सिजद्यतन्यामिति सिच्, सिचि च परस्म इति वृद्धिः, सिच् इति ईट्, अड्धात्वादिः प्राप्तः, न, मा, मास्म योगे इति प्रतिषिद्धः। मा लावीत्, मा पावीत्। लूञ् छेदने, पूङ् पवने, मास्मयोगः, दि, सिच्, इट्, ईटि, इटश्चेटीति सिच् लोपः, पूर्ववद् वृद्धिः। योगग्रहणं प्रतिषेधवाचिन शब्दस्य ग्रहणार्थम्,

तेन मा शब्दस्य योऽचादेशः तेन योगे न भवति, देवदत्तो मापश्यत्, दृशिर् प्रे, ह्यस्तनी, दि, अन्वि, दृशेः पश्यः।

मास्म योगे ह्यस्तनी च ३/१/२३

मास्मशब्दस्य संयोगः मास्म योगः, मास्मशब्देन योगे सतिधातो अद्यतनी भवति ह्यस्तनी च। अद्यतनी तावत्– मास्मकार्षीत्, मास्महार्षीत् डुकृञ् करणे, डु पचष् पाके, मास्म योगः, अद्यतनी, दि, सिजद्यतन्यामिति सिच्, सिच इति ईट्, सिचिपरस्मा इति वृद्धिः, अस्य च दीर्घः, चवर्गस्य किः, न मा मास्म योग इति प्रतिषेधात् अकारागमाभावः। ह्यस्तनी मास्म करोत्, मास्म पचत्, ह्यस्तनी दि, तनादे रूः, अन्विगुणः।

वर्तमाना ति तस् अन्ति, सि थस् थ, मि वस् मस्, ते अते अन्ते, से आथे ध्वे, ए वहे महे ३/१/२४

इत्येतदन्तानां द्वन्द्वं कृत्वा जस्, आदिलोप इति लोपः, एवं सर्वत्र त्यादयो वर्तमानासंज्ञाः भवन्ति। क्व तया संज्ञया प्रयोजनम्? सम्प्रति वर्तमानेत्यत्र। भवति भवतः भवन्ति। भू, स, वर्तमाना, ति तस् अन्ति, अन्वि, नाम्यन्तयोरिति गुणः, असन्ध्यक्षर लोपः। परस्मैपदात्मने पद संज्ञे इहो पतिष्ठेते। नव पराणीति वचनात् परस्मैपद संज्ञा सामर्थ्यात् पूर्वेषां नवानां विधीयते। तेन त्यादीना यानि पूर्वाणि नवानि सन्ति तानि परस्मैपद संज्ञानि, यानि तु पराणि नवानि तानि आत्मनेपद संज्ञानि भवन्ति।

सप्तमी ३/१/२५

यात् याताम् युस्, यास् यातम् यात्, याम, याव याम, इत् ईयाताम् ईरन्, ईथाम् ईयाथाम् ईध्वम्, ईय इवहि ईमहि, एतानि सप्तमी संज्ञकानि भवन्ति। सप्तमी संज्ञायाः क्व प्रयोजनम्? सप्तम्यां ये चेत्यादिषु। कुर्यात्, कुर्याताम्, कुर्युः। डुकृञ् क, सप्तमी। यात् याताम्, युस्, तनादेः रूः, करोतेरिति गुण, अस्योकार इत्युत्वम्, सप्तम्यां ये चेत्युकारलोपः।

पञ्चमी ३/१/२६

तु, ताम्, अन्तु, हि तम् त, आनि आव आम, ताम् आताम् अन्ताम्, स्व आधाम् ध्वम्, ऐ आवहै आमहै। त्यादय, पञ्चमी संज्ञाः भवन्ति।

पञ्चमी संज्ञायाः क्वप्रयोजनम्? पञ्चम्यनुमतावित्यादिषु। करोतु, कुरूताम्, कुर्वन्तु। डुकृञ् करणे, पञ्चमी–तु ताम् अन्तु, तनादेरूः, करोतेरिति गुणः अस्योकार इत्युत्वम्, एकत्वे नाम्यन्तयोरिति विकरणस्य गुणः। अन्यत्र द्वित्वबहुत्वयोश्च परस्मा इतिनिषेधः।

● ह्यस्तनी ३/१/२७

दि ताम् अन्, सि तम् त, अम् व म, त, आताम् अन्तः, थास् आथाम् ध्वम्, इ वहि महि। द्यादयः ह्यस्तनी संज्ञाः भवन्ति, ह्यस्तनी संज्ञायाः क्व प्रयोजनम् ? सस्य ह्यस्तन्यां दौ त इत्यादिषु। अचकामत, चकासृ दीप्तौ ऋकारो न शास्वृदनुबन्धेत्यर्थः। ह्यस्तनी दि, अन्वि, अदादेर्लुक्, व्यञ्जनादिदश्योरिति दि लोपः सस्य ह्यस्तन्यामिति सस्य तः।

● एवमेवाद्यतनी ३/१/२८

द्यादयः एवमेव अनेनैव पूर्वोक्तेन क्रमेण अद्यतनी संज्ञाः भवन्ति। अद्यतनी संज्ञायाः क्वप्रयोजनम्? अद्यतन्याशिषोश्चात्मन इत्यादिषु। अभित्त, अभित्साताम्, अभित्सत भिदिर् वि, अद्यतन्याम्–त आताम् अन्त। सिजद्यतन्यामिति सिच्, धुटश्चधुटीति सिज्लोपः, आत्मने चानकारादिति नलोपः। अद्यतन्याशिषोश्चात्मन इति गुणाभावः।

● परोक्षा ३/१/२६

अट् अतुस ङस्, थल अथुस् अः, अट् व म, ए आते इरे, से आथे ध्वे, ए वहे महे, अडादय परोक्षासंज्ञाः भवन्ति। परोक्षासंज्ञायाः क्व प्रत्योजनम्? परोक्षायाञ्चेत्यादिषु। विभिदतुः, विभिदुः। भिदिर् वि, अतुस् उस्, चण् परोक्षेति द्विर्व, द्वितीयचतुर्थयोरिति भस्य बः, परोक्षायाञ्चेति गुणाभावः।

● श्वस्तनी ३/१/३०

ता तारौ तारस्, तासि तास्थस् तास्थ, तास्मि तास्वस् तास्मस्, ता तारौ तारस्, तासे तासाथे ताध्वे, ताहे तास्वहे तास्महे। तादयो श्वस्तनी संज्ञाः भवन्ति। श्वस्तनी संज्ञायाः क्वप्रयोजनम्? भविष्यति भविष्यन्त्याशीश्वस्तन्य इत्यादिषु। श्वः गन्ता।

● आशीः ३/१/३१

यात् याताम् यात्, यास् यास्ताम् यास्त, यासम् यास्व यास्म, सीष्ट सीयास्ताम् सीरन्, सीष्टाम् सीयतम् सीध्वम्, सीय सीवहि सीमहि। यादादयः आशीसंज्ञाः भवन्ति। आशीस्संज्ञायाः क्वप्रयोजनम्? आशिषि च परस्मा इत्यादिषु नीयात् नीयास्ताम् नीयासुः। णीञ् प्रा।

● स्यसंहितानि त्यादीनि भविष्यन्ती ३/१/३२

स्यति स्यतस् स्यन्तिः। स्यसि, स्यथस्,स्यथ। स्यामि, स्यावस्, स्यामस् स्यते स्येते स्यन्त। स्यसे स्येथे स्यध्वे। स्ये स्यावहे स्यामहे। स्येन संहितानि– युक्तानि वचनानि त्यादीनि – ति तस, अन्ति इत्यादीनि भविष्यन्ती संज्ञानि भवन्ति। स्यशब्देन योगः परत्रापि स्यात् स माभूदिति स्यति स्यतस् स्यन्तीत्यादिपठ्यन्ते। भविष्यन्ती संज्ञायाः क्व प्रयोजनम्? भविष्यति, भविष्यन्त्याशीरित्यत्र। करिष्यति करिष्यतः करिष्यन्ति। डुकृञ् क, स्यति स्यतस् स्यन्ति। हनृदन्तात्स्य इति इट्, गुणः।

● द्यादीनि क्रियातिपत्तिः ३/१/३३

स्यति स्याताम् स्यन्, स्यस् स्यतम् स्यत, स्यम् स्याव, स्याम। स्यत स्येताम् स्यन्त, स्यथास् स्येथास् स्यध्वम्, स्ये स्यावहि स्यामहि, स्यसंहितानि द्यादीनि वचनानि दि, ताम, अन् इत्यादीनि क्रियातिपत्ति संज्ञानि भवन्ति। क्रियातिपत्तिसंज्ञायाः क्व प्रयोजनम्? अड्धात्वादौ ह्यस्तन्यद्यतनी क्रियातिपत्तिषु इत्यत्र। अपक्ष्यत् अपक्ष्याताम्, अपक्ष्यन्। डुपचष् पाके, स्यत् स्याताम् स्यन्। अड्धात्वादिः, चवर्गस्य किः षत्वम्।

● षडाद्यास्सार्वधातुकम् ३/१/३४

आदौ भवाः आद्याः, षडाद्याः यस्य षडाद्याः– षण्णां विभक्तीनामाद्याः वर्तमाना सप्तमी पञ्चमी ह्यस्तन्यः सार्वधातुकसंज्ञाः भवन्ति। सार्वधातुक संज्ञायाः क्वप्रयोजनम्? जुहोत्यादीनां सार्वधातुक इत्यादिषु। जुहोति, जुहुयात् जुहोतु, अजुहवत्। हु दाना, वर्तमाना, ति, सप्तमी यात्, पञ्चमी तु, ह्यस्तनी दि, अन्वि, जुहोत्यादेश्चेति लुक्। जुहोत्यादीनां सार्वधातुक इति द्विर्वचनम्, हो जः, नाम्यन्तयोरिति गुणः। यात् प्रत्यये तु सप्तम्यां गुणाभावः।

भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तौ आख्यातप्रकरणे
परस्मैपादः प्रथमः

आख्यातप्रकरणे द्वितीयः पादः

● प्रत्ययः परः ३/२/१

परिभाषेयम्। शास्त्रे यः प्रत्ययः उक्तः वक्ष्यमाणश्च, सः प्रकृतेः परो भवतीति परिभाष्यते। प्रतीयते–ज्ञायते येन अर्थस्सः प्रत्ययः। वृक्षः, औपगवः, उपगुशब्दाद् वाणपत्य इत्यण्, उवर्णस्त्वौत्वमापाद्यः इत्यौत्वम्। कुमारी, वयसि प्रथम इति ई प्रत्ययः, जुगुप्सते, कर्तव्यम्, करणीयम्, डुकृञ्, क, तव्यानीयाविति तव्यानीयौ, गुणः।

● गुप्तिज्किद्भ्यः सन् ३/२/२

गुप् गोपने, तिज् निशाने, कित् निवासे रोगापनयेच, एभ्यः सन् प्रत्ययो भवति। नकारस्सन्यवर्णस्येत्यर्थः। जुगुप्सते, तितिक्षते, चिकित्सति, अनेन सन्, उवर्णगुपादिभ्यश्चेतीडभावः, चण् परोक्षेति द्विर्वचनम्, अभ्यासस्यादिव्यञ्जनमवशेष्यम्, कवर्गस्य चवर्गः, तिजेः चवर्गस्य किः, वर्तमाना ति, अन्वि, असन्ध्यक्षरलोपः। गुप्तिज्किद्भ्यो यथासङ्ख्यं निन्दा, क्षमा, व्याधि, प्रतीकारेष्वर्थेषु सन् इष्यते, तेनेह न भवति गुप्तिः, उत्तेजनम्, सङ्केतः। स्त्रियां क्तिः, युट्च, भावे घञ्, इत्येते प्रत्ययाः। यु वु झामनाकान्तेत्यनादेशः।

● मान्बधदान्शान्भ्योदीर्घश्चाभ्यासस्य ३/२/३

सन् इत्येव, मान् पूजायाम्, बध बन्धने, दान् अवखण्डने, शान् अवतेजने एभ्यः सन् प्रत्ययो भवति, एषां चाभ्यासस्यदीर्घः, मानेः विचारणेऽर्थे सन् इष्यते, शिष्टेभ्यस्तुस्वार्थे। स्वार्थः प्रकृत्यर्थः। मीमांसते, बीभत्सते, दीदांसति मीमांसति, सन्, पूर्ववदिडभावः, द्विर्वः, ह्रस्वः, सन्यवर्णस्येति इत्वम् तस्यानेन दीर्घः बधेः तृतीयादेर्घढधभेभ्यः इति बस्य भः, अघोषेष्वशिटामिति धस्य तः, मनोरनुस्वारः ते, ति, अन्वि, असन्ध्यक्षर लोपः, विचारणादन्यत्र मानेः सन् न भवति, सम्मानम्, मानेस्संपूर्वात् युट्चेति युट्। ननु मान्दान्शानामभ्यासस्य विशेषेण दीर्घः क्रियमाणस्सामान्यविहितं ह्रस्वमित्वञ्च बाधित्वा आकारस्यैव दीर्घस्स्यात्। बधेस्त्वकारस्य प्राप्नोति। आकारस्य दीर्घेण किं प्रयोजनमिति चेत्, ह्रस्वस्य इत्वस्य च निवृत्तिः। अत्रोच्यते– अभ्यासविकारेष्वपवादः उत्सर्गम् न बाधते इति वचनादपवादः दीर्घः ह्रस्वमित्वञ्चन बाधते। अतः ह्रस्वं कृत्वा सन्यवर्णस्येति ईत्वञ्च कृत्वा तत अनेन दीर्घः।

● धातोर्वा कर्मणस्तुमन्तादिच्छतिनैककर्तृकात् ३/२/४

तुम् अन्ते यस्य सः तुमन्तः। एकः कर्ता यस्य स एककर्तृकः, समासान्तगतेतिककारःसमासान्तः। इच्छतिना सह एककर्तृकात्–समानकर्तृकात् तुमन्तात् कर्मणः धातोः वा सन् भवति। भोक्तुमिच्छति बुभुक्षति, भुज अनवने, इच्छार्थेस्वेककर्तृकेषु तुम्, नामिनश्चोपधाया इति गुणः चवर्गस्य किः, धातोर्वा कर्मणः इत्यनेन सन्, स्वरान्तानामिति ज्ञापकात् तुमो निवृत्तिः, तस्मिन्निवृत्ते निमित्ताभावे नैमित्तिकस्याप्यभावः इति गुणादि कार्यमपि निवर्तते। तेन भुज सन् इति स्थिते, चण् परोक्षेति द्विर्वचनम्, द्वितीय चतुर्थेति भस्यबः, चवर्गस्य किः, पक्षे भोक्तुमिच्छतीत्यादि भवति। अत्र इच्छति क्रियायाः भोजनं कर्म एवं कर्तृत्वञ्चास्ति। तथाहि य एवेच्छति स एव भुङ्क्ते। एवं कर्तुमिच्छति चिकीर्षति, डुकृञ् करणे, पूर्ववत्तुमादिकार्यम्, ततः सन्, सर्वत्र पूर्ववत्तुमादिकार्यम्, ततः सन्, सर्वत्र पूर्ववत्तुमो निवृत्तिः स्वरान्तानां सनीति दीर्घः। ऋदन्तस्येरगुणे इति इर्। नामिनोर्वोरिति दीर्घः, द्विर्व, ह्रस्वः, कवर्णस्य चवर्गः, षत्वम्। द्रष्टुमिच्छति दिदृक्षते, दृशिर् प्रेक्षणे, सृजिदृशोरागमोऽकारः स्वरात्परं इति अकारागमः, रत्वम्, छशोश्चेति षत्वम्, तवर्गस्य परे इति तस्य टः तुमन्तात् सन्, पूर्ववत्तुमो निवृत्तिः निवृत्तेतस्मिन्नृकारागमादि अधिनिवर्तते। द्विर्व अकार ऋवर्णस्य, सन्यवर्णस्येतीत्वम्, छशोश्चेति षः, षढोकस्से इति कः, दृशेः सन्नन्तात् रूधादित्वादात्मने पदम्। कर्म इति किम्? गमनेन इच्छति, तुमन्तादत्र न भविष्यतीति चेत्, तर्हि उत्तरार्थम् कर्मग्रहणम्। तुमन्तादिति किम्? भोजनमिच्छति। इच्छतिनेति किम्? पठितुं जानाति। अश्ववृषेति तुम् इच्छायामिति कर्तव्ये एककर्तृकग्रहणम् विस्पष्टार्थम्। देवदत्तस्य भोजनमिच्छति यज्ञदत्त इत्यत्र तुमन्तत्वाभावाद् भुजेः प्रत्ययाभावः। इच्छा सन्नन्तात्सन्नेष्यते। चिकीर्षितुमिच्छति। अन्यस्मात्तु सन्नन्तात् सन् भवत्येव। जुगुप्सितुमिच्छति जुगुप्सिषते। जुगुप्साशब्दात् धातोर्वा कर्मण इति सन्, इट्, अस्य च लोप इत्यकारलोपः, पूर्ववत्सन्नन्तादि, कर्मण्यात्मने पदम्? आशङ्कायां वा सन् वक्तव्यः, कूलं पिपतिषतीत्येवमहमाशङ्के, श्वा मुमूर्षति। मृञ् प्राणत्यागे, सन्, उरोष्ठ्योपधस्य चेत्युरादेशः, स्वरान्तानां सनीति दीर्घः, द्विर्वः, ह्रस्वः।

● नाम्न आत्मेच्छायां यिन् ३/२/५

नाम्नः लिङ्गात् कर्मणः आत्मेच्छायामर्थे वा यिन्भविष्यति। पुत्रीयति पटीयति। पुत्रमिच्छत्यात्मनः पटमिच्छत्यात्मन इति। अनेन यिन् इकारन–कारौ यिन्यवर्णस्येत्यर्थौ, यिन्यवर्णस्येतीत्वम्, ति, अन्वि। पक्षे पुत्रमिच्छत्यात्मन इत्यादि वाक्यम्। नाम्न इति किम्? धातोः मा भूत्, आत्मन पक्तुमिच्छति। कर्म ग्रहणं किम् ? आत्मनः पुत्रेणेच्छति। राज्ञः पुत्रमिच्छतीत्यत्र कस्मान्न भवति, अस्ति ह्यात्मनीच्छा? उच्यते– इहात्मनो ग्रहणमकर्तव्यम्, इच्छा ह्यात्मन एव संभवति। अत्रेच्छयात्मग्रहणसामर्थ्याद् आत्मार्थग्रहणं यदा किञ्चिदिष्यते तदायं प्रत्ययः, तेन राज्ञः पुत्रमिच्छतीत्यत्र न भवति। मान्ताव्ययानां यिन्नेष्यते। इदमिच्छत्यात्मनः उच्चैरिच्छत्यात्मनः। नमसः पूजायामर्थे यिन् इष्यते। नमस्यति त्रिनेत्रम्। वरिदसः परिचर्यायामर्थे। वरिवस्यति रूद्रम्। चित्रङ् आश्चर्येऽर्थे, ङकार आत्मनेपदार्थः। चित्रीयते, यिन्यवर्णस्येतीत्वम्। अवश्व वृषयोर्मैथुनेच्छायां सकारागमादिः यिन्वक्तव्यः। अश्वस्यति बडवा, वृषस्यति गौः। क्षीरलवणयोस्तु लालसायामर्थे। अतिशयेन अभिलाषः लालसा। क्षीरस्यति माणवकः, लवणस्यत्युष्ट्रः। इत्वाभावोऽप्यत्रवक्तव्यः। नाम्नः लालसायां सकारागमादिः यिन्वक्तव्यः। दधि इच्छति दधिस्यति। असागमादिरन्ये। दधि इच्छति दध्यस्यति।

● काम्य च ३/२/६

अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः
तन्नाम कवयः प्राहुः भेदे वचनलिङ्गयोः।

नाम्नः लिङ्गात् कर्मण आत्मेच्छायामर्थे वा काम्य प्रत्ययः भवति। आत्मनः पुत्रमिच्छति पुत्रकाम्यति, शुभकाम्यति। कर्मण इति किम्? आत्मनः पुत्रेणेच्छति।

● उपमानादाचारे ३/२/७

मण्डूकप्लुतिन्यायेन यिन्ननुवर्तते, न काम्यः। उपमीयते येन तदुपमानम् उपमानात् कर्मणः नाम्नः लिङ्गात् आचारेऽर्थे वा यिन् भवति। अपुत्रं पुत्रमिव पश्यति। कर्मण इति किम्? अपुत्रेण पुत्रेणेवाचरति। अधिकरणाद् यिन्वक्तव्यः। कुट्यां प्रासाद इवाचरति– प्रासादीयति।

● कर्तुरायिस्सलोपश्च ३/२/८

उपमानात्कर्तुः नाम्नः आचारेऽर्थे वा आयिर्भवति, सकारस्य च लोपः। च शब्दोऽन्वाचये यथा भिक्षामट गाऽचानय इति। तेन सलोप सम्भवेऽपि आयि प्रत्ययः। काकः श्येन इवाचरति श्येनायते, वृषलः ब्राह्मण इवाचरति ब्राह्मणायते। अनेन आयिः, इकारः आयृयन्ताच्चेत्यर्थः, आयृयन्ताच्चेत्यात्मनेपदम् ते, अन्वि। उदकं पय इवाचरति पयायते, आयि प्रत्ययः, सलोपः, पक्षे—पयस्यते। नामिव्यञ्जनान्ताद् इत्यायिः, आलोपः। ओजप्सरसोर्नित्यं सलोप इष्यते। ओज इवाचरति ओजायते, अप्सर इवाचरति अप्सरायते। येन विधिस्तदन्तस्येत्यन्त सकारलोपः। तेनेह न भवति— हंसायते। लिङ्गादाचारेऽर्थे यिन्नादयोऽपीष्यते। अश्व इवाचरति अश्वति, यिकारलोपो वक्तव्यादाये लोंप इत्यत्र हि कृद्ग्रहणं सम्बध्यते। ऊष्म वाष्प फेनेभ्य उद्वमनेऽर्थे आयिरिष्यते। ऊष्मामुद्वमति ऊष्मायते, एवं वाष्पायते, फेनायते। कण्वादिभ्यो यण् वक्तव्यः, णकारो नणकारे गुणप्रतिषेधार्थः। कण्वादयो हि बहुलमुपदेशमर्हन्ति, इत्याहुः। कण्डूञ् — कण्डूयति, कण्डूयते। ञकारानुबन्धसामर्थ्यात् इञ्यजादेरूभयम्, असूयते........ यण्, नाम्यन्तानां यणायीति दीर्घः। महीङ्, ङकार आत्मने पदार्थः, महीयते।

● इन्कारितञ्च धात्वर्थे ३/२/९

नाम्न इत्येव, नाम्नः धात्वर्थे प्रतिपाद्ये सति इन् भवति, स च कारित संज्ञः, धात्वर्थः क्रिया। वस्त्रं करोति वस्त्रयति, लवणयति, करोति अत्र धात्वर्थे इन्, नकारः इनिलिङ्गस्येत्यर्थः। इनिलिङ्गस्येत्यन्तस्वरादेर्लोपः, सि, अन्वि, गुणः। व्रताभोजनेऽर्थे, तन्निवृत्तौ इन् इष्यते, पयो व्रतयति भुङ्क्त इत्यर्थः। पतितान्नं व्रतयति न भुङ्क्त इत्यर्थः। अर्थ वेद सत्येभ्यः इन्प्रत्ययान्तेभ्यः आपुरागमः वक्तव्यः। उकार उच्चारणार्थः, अर्थमाचष्टे अर्थापयति, एवं वेदापयति, सत्यापयति। कारितसंज्ञायाः क्व प्रयोजनम्? कारितसंश्चणोरित्यत्र।

● धातोश्चहेतौ ३/२/१०

हेतावर्थे धातोः इन् भवति कारितसंज्ञश्च। कारयति, पाठयति कुर्वन्तं प्रयुङ्क्ते, पठन्तं प्रयुङ्क्ते इति इन्, अस्योपधेति दीर्घो वृद्धिश्च, अन्वि, गुणः। एवं कारीषोऽध्यापयति, इङ् अध्ययने अधिपूर्वः, अधीयानं प्रयुङ्क्ते इति इन्,

स्मिङ्क्रीणामिनि इति आत्वम्, अर्तिह्री ब्लीति पकारागमः। ननु अचेतनवान्कारीषः कथं हेतुः स्यात् ? अस्त्येतत्, किन्तु प्रयोज्यव्यापारसिद्धिः। कारीषायन्ते इति कथमसौ हेतुः न भवेत्।

● चुरादेश्च ३/२/११

हेताविति निवृत्तम्, पृथग्योगारम्भात्। चुरादेर्गणात् इन् भवति कारित संज्ञश्च। चोरयति चिन्तयति लक्षयति। चुर स्तेये, चिति स्मृत्याम्, लक्ष दर्श, इकारो नकारागमार्थः। अनिदनुबन्धेति ज्ञापकात्। नागमः, इन् नामिनश्चोपधेति गुणः, गणयति, स्पृहयति, कथयति, गण सङ्ख्याने, स्पृह ईप्सा, कथ वा, अस्य च लोपः इत्यकार लोपः तस्य स्वरादेशः परनिमित्तक इति स्थानिवद्भवति, गणकथयोर्दीर्घः स्पृहेश्च गुणो न भवति।

● इनि लिङ्गस्यानेकाक्षरस्यान्त्यस्वरादेर्लोपः ३/२/१२

न एकमेनकम्, अनेकमक्षरं यस्य लिङ्गस्य तदनेकाक्षरम्, न क्षरति, न चलति परं वर्णम् नानुगच्छति इति प्राधान्यात् अक्षरशब्देन स्वरा उच्यन्ते, अन्ते भव अन्त्यः, अन्त्यस्स्वरः आदिर्यस्यावयवस्येति विग्रहः। अनेकाक्षरस्य अनेकस्वरस्य लिङ्गस्य य अवयवः अन्त्यस्वरादिः तस्य इनि परे लोपो भवति। अतिहस्तयति, उपवीणयति, हस्तिना अति क्रामतीति, वीणया उपगायतीति इन् कारितं चेति इन्, अनेन अन्त्य स्वरादेर्लोपः। ननु वीणा शब्दस्य अन्त्यस्वरः न कस्यचिदादिः इति कथं तस्य लोपः? उच्यते– आद्यन्त वदेकस्मिन्निति वचनाद् भविष्यति। लिङ्गस्येति किम्? चकासयति। कासृ दीप्तौ, चकासन्ते प्रायुर्येण उद्भासन्ते। अनेकाक्षरस्येति त्वचं गृह्णाति त्वचयति। इन्कारितं चेति इन्। अनेकाक्षरस्येति कर्तव्यम्। अनेकाक्षरग्रहण वैचित्र्यार्थम्। ननु प्राक्तनमिन्ग्रहणं स्वार्थवशाद्विभक्ति परिणाम इति वचनात् सप्तम्यन्तं विज्ञायते, तदपार्थकम् आपद्येत इन्ग्रहणम्? उच्यते– कार्यान्तर सूचनार्थम्। तेन स्थूल दूर युव ह्रस्व क्षिप्र क्षुद्राणां परस्यान्तस्थादेरवयवस्य इनि परे लोपो भवति, नामिनाञ्च गुणः। स्थूलमाचष्टे करोति वा स्थवति, इन्कारितञ्चेति इन्, एव दूरं दवयति, युवानं यवयति, ह्रस्वं ह्रसयति, क्षिप्रं क्षेपयति, क्षुद्रं क्षोदयति। परस्येति किम्? ह्रसयतीत्यत्र रेफादेरवयवस्य मा भूत्।

● र शब्द ऋतो लघोर्व्यञ्जनादेः ३/२/१३

व्यञ्जनमादिर्यस्य ऋकारस्य स व्यञ्जनादिः, इनीत्येव, अन्त्यस्वरादे र्लोप इति च व्यञ्जनादेः लघोः ऋकारस्य इनि परे र शब्द आदेशो भवति अन्त्यस्वरादेः च लोपः। पृथुमाचष्टे करोति वा प्रथयति, मृदुं म्रदयति, भृशं भ्रशयति, कृशं क्रशयति, दृढं द्रढयति, परिवृढं परिव्रढयति। सस्वरो रेफो यथास्यादिति शब्दग्रहणम्। लघोरिति किम्? वृक्षं करोति वृक्षयति। संयोगे गुरूरिति ऋकारोगुरूः। व्यञ्जनादेरिति किम्? ऋतं करोति ऋतयति। पृथ्वादीनामेव र शब्द स्मर्यते, तेनेह न भवति– वृषलमाचष्टे वृषलयति।

मृथु मृदुं भृशञ्चैव कृशञ्च दृढमेव च
परिपूर्वम् वृढञ्चैव षडेतान् र विधौ स्मरेत्।

● धातोरेकस्वराद्यशब्दश्चेक्रीयितं क्रियासमभिहारे ३/२/१४

एकः स्वरः यस्य धातोः स एक स्वरः, व्यञ्जनादेरित्येव, क्रिया समभिहारे वर्तमानाद्धातोरेकस्वराद् व्यञ्जनादेः य शब्दः प्रत्ययो भवति, स च चेक्रीयित संज्ञः। पुनः पुनः यजति अत्यर्थम् वा यायज्यते, पापठ्यते, भृशंज्वलति जाज्वल्यते, यजदेवता, पठ व्यक्तायां वाचि, ज्वलदीप्तौ, य शब्दः, चण्परोक्षेति द्विर्व, दीर्घोऽनागमान्तस्येति दीर्घः। चेक्रीयितान्तादित्यात्मने पदम्, ते, अन्वि, असन्ध्यक्षर लोपः, एकस्वरादिति किम्? पुनः पुनः जागर्ति। व्यञ्जनादेरिति किम्? भृशं इक्षते। क्रिया समभिहार इति किम्? सकृत्पठति। शुभि रूचिभ्यां नेष्यते। भृशं शोभते, भृशं रोचते, शुभ दीप्तौ, रूच दीप्तौ। शब्द ग्रहणात् सूचि सूत्रि मूत्रि ऋ अटि अशि ऊर्णूञ् इत्येतेभ्यः यशब्दः इष्यते। सूचिसूत्रिमूत्रीणामिन्नन्तानामेकस्वरत्वान्न प्राप्नोति। शेषाणां तु स्वरादित्वात्। सोसूच्यते, सोसूत्र्यते, मोमूत्र्यते। शुचि पैशुन्ये, सूत्र विमोचने, मूत्र प्रस्रवणे चुरादेश्चेति इन्। अत्यर्थम् सूचयति सूत्रयति मूत्रयति, य शब्दः कारितस्य नाम्नीति कारित लोपः, द्विर्व, गुणश्चेक्रीयिते इति गुणः। अटाट्यते, अरार्यते, अशाश्यते। अट् पट् गतौ, ऋगतौ, अशूव्याप्तौ। कुटिलमटति। एवम् ऋच्छति। अत्यर्थमश्नोति य शब्दः, चेक्रीयित चेति गुणः। अट्यः, अर्यः, अश्यः इति स्थिते। स्वरादेर्द्वितीयस्येति ट्य, श्य, र्य इत्येते द्विरूच्यन्ते। अभ्यासस्यादि व्यञ्जनमिति य लोपः दीर्घोऽनागमेति दीर्घः। प्रोर्णनूयते। ऊर्णूञ् छादने

प्रपूर्वः, अत्यर्थम् प्रोर्णोति, य शब्दः, पूर्ववत् नू द्विरुच्यते, गुणः, नाम्यन्तानामिति दीर्घः। गत्यर्थात् कौटिल्य एव य शब्दः वक्तव्यः। चङ्क्रम्यते दंद्रम्यते। क्रमु पादविक्षेपे, द्रमु हम्म मीमृ गतौ, कुटिलं क्रमति, एवं द्रामति, यशब्दः, द्विर्वचनम्, अतोऽन्तोऽनुस्वार इत्यनुस्वारः। लुपसदचरजपजभदहदंश– गृभ्यो भावगर्हायामेव य शब्दः स्मर्यते। लुप्लृ च्छेदने, षद्लृ विशरणे, य शब्दः, द्विर्व, लुपेः गुणश्चेक्रीयित इति गुणः धात्वादेष्ष–सः सदः अनागमेति दीर्घः। चञ्चूर्यते, चर गत्यर्थः, गर्हितं चरति चञ्चूर्यते, य शब्दः, द्विर्व, चरफलोरूच्चपरस्यास्येति अभ्यासस्यानुस्वारः, धात्वकारस्य च उत्वम्, नामिनोर्वोरिति दीर्घः। जञ्जप्यते, जम्जभ्यते, जप पूजायां माने च, जभ जृभि जभि गात्र विनामे। दंदह्यते, दह भस्मीकरणे। दंदश्यते, दंश दशने। गर्हितं जपति, जभति, दहति, दंशति इति य शब्दः, द्विर्व, जपादीनां चेत्यनुस्वारागमः। दंशेरनिदनुबन्धेति नलोपः निजेगिल्यते, गॄ निगरणे, नि पूर्वः, गर्हितं निगलति, ऋदन्तस्येर् गिरतेः चेक्रीयित संज्ञायाः क्वप्रयोजनम्? चेक्रीयितान्तादित्यादिषु।

● गुपूधूपविच्छिपणिपनेरायः ३/२/१५

गूपू रक्षणे, धूप सन्तापे, विच्छि गतौ, पण व्यवहारे स्तुतौ च , पन च, एभ्य आय प्रत्ययो भवति, गोपायति, धूपायति, विच्छायति, पणायति, पनायति। स्तुत्यर्थेन पनिना साधर्म्यात् पणिः स्तुत्यर्थो गृह्यते, न व्यवहारार्थः। तेनेह न भवति, शतस्य पणते। अथ कथं पनिः स्तुत्यर्थ इति? उच्यते– पण व्यवहारे स्तुतौ च पन चेति, पनेः पृथक् पाठात्। अन्यथा, धातु पाठे पण पन् व्यवहार स्तुत्योरिति अकरिष्यत्। ननु यथा शतस्य पणते इत्यत्र पणे अकारेण अनुदात्तेन अनुबन्धेन युक्तत्वात् रूचादित्वादात्मनेपदं भवति, पणायति इत्यत्रापि पणाय शब्दात् कस्मान्न भवति, अवयवे हि कृतं लिङ्गं समुदायस्य विशेषकं भवति, तद्यथा– गोः सक्थनि कर्णे वा यत्कृतं लिङ्गम्, तत्समुदायस्य विशेषकं भवति? असदेतत्, अवयवे ह्याकारे यत्कृमनुदात्तत्वं लिङ्गं तत्समुदायस्य पण इत्यस्य विशेषकं सव्यभिचारात्, न तु पणायशब्दस्य, व्यभिचरति हि पण शब्दः, आयप्रत्ययान्तत्वात्, तथा च गोः सक्थनि कर्णे वा यत्कृतं लिङ्गं तद्गोरेव विशेषणं न तु गोमण्डलस्य। तस्मान्न भवति पणायतीत्यमात्मने–पदम्। ऋते णीयङ् वक्तव्यः, ऋतिः सौत्रः। ऋतीयते, णीयङ्, ङकार आत्मने–

पदार्थः, णकारः नणकारेति गुण प्रतिषेधार्थः। कमेः इनिङ् वक्तव्यः कारित संज्ञश्च, कामयते, कमु का, इनिङ्, ङकार आत्मनेपदार्थः। अस्योपधेति दीर्घः, मानुबन्धानां ह्रस्व इति ह्रस्वस्वरः प्राप्तः न कम्यमिचमामिति प्रतिषिद्धः, ते, अन्वि गुणः। आयणीयङ इणिङ्, एते असार्वधातुके वा वक्तव्याः। आय–गोपायिता वा गोप्ता, स्वस्तनी त , इट्, अस्य च लोपः, गोप्तेत्यत्र स्वरतिसूतिसूयतीति वा इट्, ऋतीयिता, वा अर्तिता, कामयिता वा कमिता।

● ते धातवः ३/२/१६

ते सनादि प्रत्ययाः, तदन्तायाः धातुसंज्ञाः भवन्ति। जुगुप्सते, गुपेः गुप्तिजकिद्भ्यः सन्, मङ्गलीयति, नाम्न आत्मेच्छायामिति यिन्, पुत्र काम्यति, काम्य चेति काम्यप्रत्ययः, श्येनायते, कर्तुरायिः, लवणयति। इन्कारितं चेति इन्। पापठ्यते, धातोरेकस्वरेति य शब्दः। गोपायति, गुपूधूपेत्यायिः एवमश्व इवाचरति अश्वति, वक्तव्याद् हि जुगुप्सादीनां शब्दानां सत्यां धातु संज्ञायां त्यादयो भवन्ति।

● चकासकास्प्रत्ययान्तेभ्य आम् परोक्षायाम् ३/२/१७

प्रत्यया अन्ते येषां ते प्रत्ययान्ताः, चकासृ दीप्तौ, कास शब्दः कुत्सायाम्, आभ्यां धातुभ्यां प्रत्ययान्तेभ्यश्च परोक्षायां परस्याम् आम् प्रत्ययो भवति चकासाञ्चकार, कासांचक्रे, परोक्षा, आङ्, ए, अनेन आम्, अतएव परोक्षायां व्यवहितत्वाद् द्विर्वचनाभावः। आमः कृञिति कृञनुप्रयोगः, तस्य, द्विर्व, अकारः ऋवर्णस्य, अस्योपधेति वृद्धिः, अन्यत्र रत्वम्, प्रत्ययान्तस्य जुगुप्साञ्चक्रे, परोक्षा, ए, आम्, अस्य च लोपः, आमः कृञिति कृञ्, पुत्रीयाञ्चकार, पुत्रमात्मन इयेष, आङ्, आम्। पुत्रकाम्याञ्चकार, पुत्रमात्मन इयेष, काम्यचेति काम्य प्रत्ययः। श्येनयाञ्चक्रे, श्येन इवाचचार। आयिप्रत्ययः। अतिहस्तयाञ्चकार, हस्तिना अतिचक्राम्। इनकारितञ्चेति इन्, इनि लिङ्गस्येत्यन्त्यस्वरादेर्लोपः। पपाठाञ्चक्रे अत्यर्थम् पपाठ, धातोरेकस्वरेति य शब्दः, परोक्षा, ए, आम्, अस्य च लोपः, यस्यापत्यप्रत्ययस्येति य लोपः, गोपायाञ्चकार, गुपूधूपेत्यायिः परोक्षायामिति किम्? चकास्ति, अन्वि, अदादेर्लुक्।

● नाम्यन्तादेर्गुरुमतोऽनृच्छः ३/२/१८

नामी आदिर्यस्य स नाम्यादिः, गुरूर्विद्यते यस्य स गुरुमान्, न ऋच्छः अनृच्छः, आम्, परोक्षायामिति वर्तते आमः कृञित्यतः प्राक्। नाम्यादेर्धातोः गुरुमतः अनृच्छः ऋच्छ इति प्रलयमूर्तिभावयोरित्येतद्वर्जितात् परोक्षायाम् भवति। ईक्षाञ्चक्रे, ईहाञ्चक्रे। ईक्ष दर्श, ऊह तर्के, ईहचेष्टा, परोक्षा ए, आम, आमः कृञ्। उब्जाञ्चकार, उब्ज आ, अट्, आम्। नाम्यादेरिति किम्? परोक्षा। गुरुमत्त्वमत्र संयोगे गुरुरिति वचनात्। गुरुमत इति किम्? अहमियाज, यजेः उत्तमैकवचनम् अट्, द्विर्व, परोक्षायामभ्यासस्येतिसम्प्रसारणम्, अस्योपधेति दीर्घः पाक्षिको न भवति, संज्ञापूर्वको विधिरनित्य इति वचनात्। इह कस्मान्न भवति? इयेष, इषु इच्छायाम्, अट्, द्विर्व, नामिनश्चोपधेति गुणः, अभ्यासस्यासवर्ण इति इय्। अत्रोच्यते– सन्निपातलक्षणो विधिरनिमित्तं, तद्विघातस्येतिवचनात् न भवति। प्रत्ययसम्बन्धिनो हि सन्निपातेन आनन्तर्येण धातुना गुणे कृते गुरुमत्वं प्राप्तम्। न च तस्याम्प्रत्ययं कृत्वाधातुः प्रत्ययस्य आनन्तर्यम् विहन्यात्, अथवा लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति वचनात्। अनृच्छइति किम्? आनर्छ, आनर्छतुः। ऋच्छ इति प्रलयमूर्तिभावयोः, अट्, अतुस्, द्विर्व, अकार ऋवर्णस्य, तस्य अस्यादेस्सर्वत्रेति, दीर्घः, ऋकारे चेति तस्य नागमः, ऋच्छऋतः इति गुणः। ऊर्णोतेः प्रतिषेधो वक्तव्यः। प्रोर्णुनाव, ऊर्णूञ् छादने, प्रपूर्वः, अट्, चण्परोक्षा चेक्रीयितसन्नन्तेषु स्वरादेर्द्वितीयस्य न नवदरास्संयोगदयोऽय इति रेफ वर्जितः नुर्द्विरूच्यते। अस्योपधेति वृद्धिः।

● आसिदय्यायिदरिद्राभ्यश्च ३/२/१९

आस् उपवेशने, दय् दानगतिरक्षणेषु, आय् गतौ, दरिद्रा, एभ्यः परोक्षायाम् आम्भवति। आसाञ्चक्रे, दयाञ्चक्रे पलायाञ्चक्रे आयिः परापूर्वः परोक्षा, अनेन आम्, आसाम्कृञ्, उपसर्गस्यायताविति लत्वम्। दरिद्राञ्चकार, अड्, आम्,दीर्घात् परलोपः। उषविद जागृभ्यो वेत्यतो वेति वर्तते, स च व्यवस्थितविभाषा उक्तः, तेन दरिद्रातेः आम् वा भवति, ददरिद्रौ, अट्, द्विर्व, आकारादट्, औ, सन्ध्यक्षरे चेत्यालोपः।

● उषविदजागृभ्यो वा ३/२/२०

उष दाहे, विद ज्ञाने, जागृ निद्रा क्षये, एभ्य परोक्षायां आम् भवति

उषाञ्चकार, विदाञ्चकार, जाग्रयाञ्चकार, अट्, आम्, विदेः गुणाभावः, आमः कृञ्। पक्षे उवोष, विवेद, जजागार। अट्, द्विर्व, अभ्यासस्य इति उव् अस्योपधेति जागर्तेः वृद्धिः, आदादिको विदिः ज्ञानार्थः गृह्यते, न सत्तार्थः, जागर्तिना आदावित्येव साहचर्यात्।

● भीह्रीभृहुवां सार्वधातुकवच्च ३/२/२१

सार्वधातुकमिव सार्वधातुकवत्, वा इत्येव, ञि भी भये, ह्री लज्जायाम्, डुभृञ् धारणपोषणयोः, हुदानादानयोः, एषां परोक्षायां वा आम् भवति, स च आम् प्रत्ययः सार्वधातुकवद् भवति। सार्वधातुक परे यदुक्तम्, जुहोत्यादीनां सार्वधातुक इति, द्विर्व, भृञ्हाङ्माङामिदिति इत्वम्, तत आम्प्रत्ययः परे भवतीत्यर्थः। बिभयाञ्चकार, जिह्रयाञ्चकार, बिभराञ्चकार, जहुवाञ्चकार, आङ्, आम, सार्वधातुकवद्भावात् जुहोत्यादीनां सार्वधातुक इति द्विर्व, ह्रस्वः, द्वितीयचतुर्थयोरिति भस्यः बः, भृञ्हाङ्माङामिदितीत्वम्। आमः कृञ्। पक्षे दिभाय, जिह्राय, बभार, जुहाव। अट्, द्विर्व, अस्योपधेति वृद्धिः।

● आमः कृञनुप्रयुज्यते ३/२/२२

आमन्तस्य शब्दस्य कृञ् अनुप्रयुज्यते, पश्चात् प्रयुज्यत इत्यर्थः। ञनुबन्धकरणं धात्वर्थप्रतिपत्यर्थम्। उदाहरणानि प्रागभिहितानि।

● अस्भुवौ च परस्मै ३/२/२३

परस्मैपदमित्यत्र पदमित्यस्य आदिर्लोप इति लोपः। आमन्तस्य शब्दस्य अस् भू इत्येतौ च धातुतो अनुप्रयुज्येते, आत्मनेपदस्य च स्थाने परस्मैपदमादेशः। आत्मनेपदमित्येतत् लुप्तमिह द्रष्टव्यमित्याहुः, व्याख्यानाच्चैतल्लभ्यते, ईक्षामास, ईक्षांबभूव। ईक्ष दर्श, रूदादित्वादात्मनेपदम्, परोक्षा ए, नाम्यादेर्गुरूमत इत्याम्। अनेन अस्भुवोरनुप्रयोगः एकारस्यात्मनेपदस्य च स्थाने परस्मैपदमादेशः, अट्, द्विर्व, अस्यादेस्सर्वत्रेति दीर्घः। भवतेरः, द्वितीय चतुर्थयोरिति भस्य बः, अस्तेः अस्योपधेति दीर्घः। दीर्घात्परलोपः, भुवो वोऽन्तः परोक्षेति वकारागमः। अस्तेरभूरसार्वधातुक इति अस्तेर्भूरादेशो न भवति, यदिस्यात्, अस्ति ग्रहणं ह्यपार्थकं स्यात्। च शब्दः परस्मैपदशब्दादनन्तरं बोद्धव्यः, स च अन्वाचये, तेन यत्रापि परस्मैपदादेशो नास्ति तत्राप्यस्भुवोरनुप्रयोगः। चकासामास, चकासांबभूव। चकासृ दीप्तौ, अट्, चकास्कामित्याम् अस्भुवोरनुप्रयोगः,

अन्यत् पूर्ववत्। उषविद जागृभ्यो वेत्यतो वेति वर्तते, स व्यवस्थितविभाषा वाची, तेन भावकर्मणोरात्मने पदस्य परस्मैपदं न भवति। ईक्षामासे, ईक्षाम्बभूवे।

● सिजद्यतन्याम् ३/२/२४

धातोः सिच् प्रत्ययो भवति, अद्यतन्यां परतः। इकार चकारौ सिचि परस्मा इत्यर्थः। अकार्षीत्, अहार्षीत्, अचैषीत्, अनैषीत् डुकृञ् करणे हृञ् हरणे, चिञ् चयने, णीञ् प्रापणे, अद्यतनी दि, अनेन सिच्, सिच् इति ईट्, वा विराम इति दस्य तः। अभैत्सीत्, अच्छैत्सीत्, भिदिर् विदारणे, छिदिर्, द्वैधीकरणे, सिच्, व्यञ्जनान्तानामनिटामिति वृद्धिः, अघोषेष्वशिटामिति......, दस्य तः अकृत, अहृत। अद्यतनी, ह्रस्वश्चानिटीति सिचो लोपः।

● सणनिटश्शिडन्तान्नाम्युपधाददृशः ३/२/२५

अविद्यमान इट् यस्माद् धातोः, असौ अनिट्, शिट् अन्ते यस्यासौ शिडन्तः, नाम्युपधा यस्य स नाम्युपधः, न दृक् अदृक्, शिडन्तात्, नाम्युपधात्, अदृशः दृशे रहितात् धातोः सण् भवति अद्यतन्यां परतः। सिचो बाधः, अविक्षत्, अकृक्षत्, अधुक्षत्। विश प्रवेशने, कृश विलेखने, दुह प्रपूरणे, दि, विशिरक्षीति इडभावः। दहि दिहि दुहीति दुहेरिडभावः, पक्षे सण्, णकारः न णकारेति गुण प्रतिषेधार्थः। विशेः छशोश्चेति षः, षढोकस्स इति कः। दुहेः, हस्य तृतीयादेर्घ– ढ ध भान्तस्येति दस्य धः, अघोषेष्वशिडामिति घस्य कः, षत्वम्। अरूक्षत्, अलिक्षत्। रूह वीजजन्मनि, लिह् आस्वादने, दि, सण्, हो ढः, षढोकस्स इति कः। अनिट इति किम्? अकोशीत्, कुश निष्कर्षे, दि, सिच इति इट्?इटश्चेटीति सिज्लोपः, नामिनश्चोपधेति गुणः। शिडन्तादिति किम्? अभैत्सीत्, भिदि वि, नाम्युपधादिति किम्? अधक्षीत्, दह भस्मीकरणेः, दि सिच् अस्य च दीर्घः, दादेर्घः, तृतीयादेः घढध भेति दस्य धः। अधोषेष्वशिडामिति। अदृक् इति किम्? अद्राक्षीत्। दृशिर् प्रेक्षेणे दि, सिजिदृशोरागम इति..... अकारागमः, इत्वम्, अस्यच दीर्घः, छषोश्चेति षः, षढो कस्स इति कः, गुहेरिडभाव पक्षेस ण् वक्तव्यः..दनुबन्धात् सेट्त्वमस्तीति न प्राप्नोति। अघुक्षत्, गूहू संवरणे, वक्तव्यात् सः, होढः, तृतीयादेः...... घढधभेति .गस्य घः...............षढो कस्स इति क, श्लिषे आलिङ्गने सण् वक्तव्यः, पुषादित्वाद..............., आलिक्षत् कन्यकां देवदत्तः। श्लिष् आलिङ्गने आङ् पूर्वः, सन, षढो कः, आलिङ्गन इति किम्? समाश्लिषत् जतु

च काष्ठम् च, समाङ्पूर्वः, श्लिषेः पुषादि सूत्रेण अण्। ....
.... शत्यायामण् वक्तव्यः। अस्प्राक्षत्। स्पृश संस्पर्शे, सण्, पक्षे– स्पर्शेः सिच्, सम्प्राक्षीत्.........., वक्तव्याद्वा, अकारागमस्य च दीर्घः, षत्वम्, अनागमः पक्षे व्यञ्जनान्तानामनिटामिति वृद्धिः, सिच् इ............... अस्पृक्षत्, अस्प्राक्षीत् अमार्क्षीत्, स्पश अमर्षणे अमार्षीष्ट.............। अत्र इकारऽस्ति............तत्र सिच्। सिच्, वृद्धिः...... वक्तव्य त्वाद्वा..... हि हिम्यसणोऽद्यतन्यामात्मनेपद .... कृ.... ....अद........... अ......... क्ष (शि. वृ.)

(शिडन्तान्नाम्युपधादनिटो धातोर्दृश् वर्जितात् सण् परो भवति अद्य तन्यपरभूतायाम्। अलिखत्, अकक्षत्। अनिट इति किम्? अकोषीत्। कथमधुक्षत् ? अभुक्त। नाम्युपधादिति किम्? अधाक्षीत्।) (दुर्गवृत्तिः)

● श्रि द्रु सु कमि कारितान्तेभ्यश्चण् कर्तरि ३/२/२६

श्रि द्रु सु कमि कारितान्तेभ्यश्चण् परो भवति कर्तर्यद्यतन्यां परतः। अशिश्रियत्, अदुद्रवत्, असुस्रवत्, अचकरत्, अचीकरत्, अपीपवत्, अलीलवत्। कर्तरीति किम्, समाश्रयिषातां राजानौ देवदत्तेन। श्विधेटोर्वा वक्तव्यः। अशिश्वियत्, अश्वसीत्, अदधत्, अधासीत्। (शि. वृ.)

● अण् सुवचिख्यातिलिपिसिचि ह्वः ३/२/२७

समाहारे द्वन्द्वः, स्वरो ह्रस्व इति हु शब्दस्य ह्रस्वाभावः। निर्देश सामर्थ्यात् कर्तरीति वर्तते, भाव कर्मणोश्चेत्यतः प्राक्। असुक्षेपणे, वच परिभाषणे, ब्रुवोवचिर्वा। ख्या प्रथने चक्षिङःख्याञादेशोवा, लिप उप, सिच् क्षरणे, ह्वेञ् स्पर्धायाम्। एभ्यः कर्मवाचिन्यामद्यतन्यां परतः अण् भवति, णकारो नणकारेत्यर्थः। सिचो बाधः, पुषादित्वादस्यतेः अणिसिद्धे पुनरिहोपादानम् आत्मनेपदार्थम्। अस्यतेः ह्युपसर्गपूर्वादात्मनेपदं विकल्पेन स्मरन्ति, पर्यस्थत्, पर्यस्थेताम्, पर्यस्थन्त। असुक्षेपणे परिपूर्वः, अद्यतनी, आत्मने, त आताम्, अन्त। अण्, अस्यतेस्थोऽन्त इति थकारागमः, अवर्णस्याकारः, आदातामाताथामादेरिति आकारस्येत्वम्। अवोचत्, अवोचाताम्, अवोचन्। वच परिभाषणे, अथवा ब्रुवोवचिरिति ब्रुवो वच्यादेशः, दि, आताम्, अन्, अण्। अणि वचोरोदुपधाया इति उत्वम्। आख्यत्, आख्याताम्, आख्यन्। ख्या प्रथने अथवा चक्षिङः ख्याञ् आदेशः। चक्षिङ् व्यक्तायां वाचि। आङ् पूर्वः, अण्, आलोपो सार्वधातुकेति आलोपः।

अलिपत्, असिचत्, आह्वत्। ह्वेञ् स्पर्धायाम्, आङ् पूर्वः, पूर्ववदालोपः। असुरिति ह्युदनुबन्धकरणाद् अस भुवीत्यस्य न भवति। यद्यपि अस्य अस्तेर्भूरिति भू आदेशोऽस्ति तथापि स्थानिवदादेश इति वचनात् प्राप्नोति। अभूत्, अस भुवि, अस्तेर्भूरिति भूरादेशः, दि, सिच्। इणस्थादापिबति इति सिचो लुक् लिपि सिचिह्वामद्यतन्यामात्मने पदे दन्त्यादौ परे अण् वा वक्तव्यः। अलिपत, असिचत, आह्वत। अद्यतनी, आत्मने त, पूर्ववदालोपः। पक्षे असिक्त, आह्वस्त, सिच्, धुटश्च धुटीति सिच् लोपः, चवर्गस्य किः।

● पुषादिद्युताद्यॢकारानुबन्धार्तिसर्तिशास्तिभ्यश्च परस्मै ३/२/२८

पुष आदिर्येषां ते पुषादयः एवं द्युतादयः तथा ॡकारोऽनुबन्धो येषां ते ॡकारानुबन्धाः। अर्तीति। ऋगति प्रापणयोः। ऋ सृ गताविति द्वयोर्ग्रहणं दृश्यते। शास्तीति, शासु अ, पुषादयश्च, द्युतादयश्च ॡकारानुबन्धाच्च, अर्तिश्च सर्तिश्च, शास्तिश्चेति द्वन्द्वः, परस्मै इत्यत्र पदशब्दो लुप्तो द्रष्टव्यः। पुषादिभ्यः द्युतादिभ्यः ॡकारानुबन्धेभ्यश्च धातुभ्यः अर्तेः सर्तेः शास्तेश्च अण् भवति, कर्तृवाचिन्यामद्यतन्यां परस्मैपदे परे। सिच् सणोर्बाधः। पुषादयो दैवादिकाः गृह्यन्ते न भौवादिकाः, पृथग्द्युतादिग्रहणात्। दैवादिकाना हि पुषादीनां मध्ये द्युतादयः पठ्यन्त एव। पुषादिभ्यः अण्। अपुषत्, अशुषत्, अतुषत्। पुष पुष्टौ, शुषशोषे, तुष प्रीतौ, दि, अण्, द्युतादिभ्यश्च । अद्युतत्, अरूचत्, द्युत् दीप्तौ, रूच दीप्तौ। द्युतादिभ्यः आत्मनेपदिभ्योऽप्यद्यतन्याः परस्मैपदं न स्मर्यते तेन अद्यतनी दि, अण् ॡकारानुबन्धेभ्यः। अगमत् अघसत् गम्ॡगतौ, अद्भक्षणे अदेर्घस्ॡसनद्यतन्योरिति अदेर्घस्ॡ आदेशः ॡकार इहार्थः, अण्। आरत्, असरत्, ऋ गतौ, सृगतौ, दि, अण्, अर्तिसर्त्योरिति गुणः, अवर्णस्याकारः, सर्ते अड्धात्वादिः। अशिषत्, शासु अनुशिष्टौ, दि, अण्, शासेरिदुपधाया अण् व्यञ्जनयोरिति इत्वम्, शासिवसीति षः। तृपि दृपिभ्यामण् वक्तव्यः, अतृपत्, अदृपत्, तृप प्रीतौ दृप हर्षे, पक्षे सिच्, अत्राप्सीत्, अतार्प्सीत्, अद्राप्सीत् अदार्प्सीत्, दि, सिच् रूदादित्वात् विकल्पे एतौ। वक्तव्याद्वा अकारागम, वृद्धिदीर्घावत्र वक्तव्यौ। इरनुबन्धेभ्य अद्यतनी परस्मैपदे परे अण् वा वक्तव्य ।

अरूधत्, अभिदत्, रूधिर् आवरणे भिदिर् विदारणे। इकार रेफौ युगपदनुबन्धौ विकल्पेनानर्थौ। अण्, पक्षे सिच्, अभैत्सीत् अरौत्सीत्, व्यञ्जनान्तानामनिटाम् इति वृद्धिः। परस्मायिति किम्? व्यत्यपुक्षत्, पुष पुष्टौ विअधिपूर्वौ। अद्यतनी त, सणनिटा इति सण्, षढो कस्स इति कः षत्वम्। व्यद्योतिष्ट, द्युत दीप्तौ, वि पूर्वः, अद्य, सिच्, गुणः, तवर्गस्य षटेति तः।

● इजात्मने पदेः प्रथमैकवचने ३/२/२६

आत्मने पदे इति पदे शब्दो लुप्तो द्रष्टव्यः पदे पद गतावित्यस्मात् इच् भवति कर्तृवाचिन्यामद्यतन्यामात्मने पदे। प्रथमपुरूषैकवचने परे सिचो बाधः। उपपादि, समपादि, पद गतौ, उप सं पूर्वौ, अद्य, आत्मने त, इच्, चकारे इचस्तलोप इति त लोपः, अस्योपधेति दीर्घः, प्रथमपुरूष इति किम्? उदपत्थाः पद गतौ उत् पूर्वः, अद्यत, थास्, सिच्, धुटश्च धुटीति सिज्लोपः, अघोषेष्वशिटामिति दस्य तः। एकवचने इति किम् ? उदपत्साताम्, उदपत्सत, आताम्, अन्त, सिच्, आत्मने चानकारादिति न लोपः।

● भावकर्मणोश्च ३/२/३०

पूर्वसत्रमनुवर्तते, पदेरिति निवृत्तम्, धातोः इच् भवति, भावकर्मार्थ–वाचिन्यामद्यतन्यामात्मने पद` प्रथमपुरूषैकवचने परे। भावे तावद ̖ भावो धात्वर्थः, अशायि भवता, शीङ् श्वप्ने, अद्य, आत्म, त, अनेन इच्, इचस्त लोपः, अस्योपधेति वृद्धिः। आसि भवता, आस उपवेशने, त, अवर्णस्याकारः, कर्मणि–अकारि कटो भवता, अपाचि ओदनो भवता, डुकृञ्, डुपचष्, ञकारो ड्वनुबन्धादित्यर्थः, षकारष्षानुबन्धः भिदादिभ्यः इत्यर्थः। अस्योपधेति वृद्धिदीर्घौ, परस्मै, कर्मकर्तरि वा इच् वक्तव्यः। अकारि कटस्स्वयमेव, अकृत इत्यत्र ह्रस्वश्चानिटीति सिज्लोपः। अलावि केदारस्स्वयमेव। लूञ् छेदने इचस्तलोपः, अस्योपधेति वृद्धिः। अलविष्टकेदारस्स्वयमेव सिच्।

● सार्वधातुके यण् ३/२/३१

धातोः यण् भवति, भावकर्मविहिते सार्वधातुके प्रत्यये परे, भावे–तावत् आस्यते भवता, शय्यते भवता, आस, त, शीङ्, आयिर्य इति अय्। कर्मणि–क्रियते कटः, ह्रियते धनम्। यणाशिषोर्य इति इकारागमः।

● अन्विकरणः कर्तरि ३/२/३२

सार्वधातुक इत्यनुवर्तते, आनव्यञ्जनान्तादित्यतः प्राक् कर्तृवाचिनि सार्वधातुके परे धातोः अन् भवति, स च विकरणसंज्ञः नकारः, अनिच विकरण इत्यर्थः भवति। गच्छति, भू सत्ता, गम्लृ ग, ति, अन्। इषुगमियमांच्छः, इति मस्य छः, एवं भवेत्, भवतु, अभवत्, सप्तमी यात्, पच्चमी, तु, ह्यस्तनी, दि, अड्धात्वादिः, अन्, या शब्दस्य च सप्तम्यामिति या शब्दस्य इत्वम्। सार्वधातुक इति किम्? भविता, श्वस्तनी ता, इट्, गुणः, कर्तरीति किम्, पठ्यते वेदः। सार्वधातुके यण्, विकरणसंज्ञायाः क्व प्रयोजनम्? अनिच विकरण इत्यादिषु।

● दिवादेर्यन् ३/२/३३

कर्तृविहित सार्वधातुके प्रत्यय परे दिवादेर्गणात् यन् भवति, स च विकरणसंज्ञः, अनो बाधः, दीव्यति, दीव्येत्, दीव्यन्तु अदीव्यत, सीव्यति, नृत्यति, दिवु क्रीडायाम्, षिवु तन्तुसन्ताने, नृती गात्रविक्षेपे, तु, दि, यन् नकारो यन्योकारस्येत्यर्थः। नामिनोर्वोरिति दीर्घः। या शब्दस्येति इत्वम्। भू, श्रि, द्रू, स्रि, भ्रमि, क्रमि, क्लमि, त्रसि, त्रुटि, लषि, यमि, संयमिभ्यो यन् वा वक्तव्यः, भ्राम्यति, भ्रमति, भ्रमु अनवस्थाने यनि परे शमादीनां दीर्घो यनीति दीर्घः, भ्रमुचलने इत्यस्य तु न भवति यमादित्वात्। क्राम्यति, क्रमति, क्रमुपादविक्षेपे, क्रमः परस्मायिति दीर्घः यिनि तु वक्तव्यः। क्लाम्यति, क्लमति क्लमु ग्लानौ यनि परे शमादित्वाद् दीर्घः अनि तु ष्ठिवु क्लमु चमामनीति। त्रास्यति–त्रसति, त्रसी उ। त्रुट्यति–त्रुटति त्रुटिच्छेद, लष्यति–लषति, लष कान्तौ यम्यति–यमति, यम यन्त्रे, संयम्यति–संयमति स एव, सं पूर्वः। अन्योपसर्गपूर्वस्य नित्यमेव यन् आयम्यति।

● नुस्स्वादेः ३/२/३४

कर्तृविहिते सार्वधातुके प्रत्यये परे स्वादेः गणात् नुर्भवति, स च विकरणसंज्ञो भवति, अनोर्बाधः, सुनोति, चिनोति। षुञ् अभिषवे, चिञ् चये, अनेन नु, अनि च विकरण इति नियमात् गुणाभावः। सुनुतः, सुन्वन्ति, तस्, अन्ति, नोर्वकारो विकरणस्येति वत्वम् एवं सुनुयात्, सुनोतु, असुनोत्। सार्वधातुक इति किम्? सोता। श्वस्तनी ता, गुणः, अक्षेर्वेष्यते, अक्ष्णोति–अक्षति।

अक्षु व्याप्तौ उकारस्स्वरति सूति सूयतीति इड् विकल्पार्थः। पक्षे अन्वि। तक्षेः तनूकरणेऽर्थे, तक्ष्णोति। तनू करण इति किम्, संतक्षति वाग्भिः, ननु तक्षिस्तनूकरण एव पठ्यते, तत्किं तनूकरण ग्रहणेन? सत्यम्, अनेकार्थत्वाद्धातूनामर्थान्तरे यदावर्तते तदा मा भूत्।

● श्रुवः शृ च ३/२/३५

कर्तृ विहिते सार्वधातुके परे श्रू श्रुतावित्यस्मात् नुः भवति, स च विकरणसंज्ञः श्रुवश्च शृ आदेशः, अनो बाधः। शृणोति, शृणुतात्, शृणोतु।अशृणोत्। ति यात् तु, दि। अनेन नु, शृ आदेशः, सार्वधातुक इति किम्? श्रोता।

● स्वराद्रुधादेः परो न शब्दः ३/२/३६

कर्तृविहिते सार्वधातुके प्रत्यये परे रूधादेर्गणस्य यस्स्वरः तत्परो न शब्दप्रत्ययो भवति स च विकरण संज्ञः। अनो बाधः, रूणद्धि, भिनत्ति, छिनत्ति रूधिर आ, भिदिर वि, छिदिर द्वै, ति, अनेन न शब्दः। घढधभेभ्यः तथोरिति धत्वम्, धुटां तृतीय इति दत्त्वम्, भिदिछिदो अधोषेष्वशिटामिति तः एवं रून्ध्यात्, रूणद्धु, अरूणत्। यात्, तु, दि, न शब्दः, सप्तम्यां रूधादेर्विकरणान्त लोपः पूर्ववद् धत्वदत्वे। व्यञ्जनादिदश्योरिति दि लोपः। सार्वधातुक इति किम्? रोद्धा, श्वस्तनी, त, धत्वदत्वे पूर्ववत्। शब्दग्रहणं वैचित्र्यार्थम्।

● तनादेरूः ३/२/३७

कर्तृविहिते सार्वधातुके प्रत्यये परे तनादेर्गणाद् उ, प्रत्ययो भवति, स च विकरणसंज्ञः, अनो बाधः। तनोति, तनुयात्, तनोतु, अतनोत्। यात्, तु, दि, अनेन उः। नाम्यन्तयोरिति गुणः, यात्प्रत्यये तु सप्तम्यां ये चेति गुणाभावः। एवं सनोति, सनुतः, षणु दा, धात्वादेष्षस्सः इति सः, धुटि, खनि सनि जनीति ज्ञापकात् णस्य नः, सार्वधातुक इति किम्? तनिता। धन्विकृण्व्योरपीष्यते। अस्य च लोपः। धिनोति, कृणोति। इवि जिवि द्रिवि धिवि, प्राणनार्थाः। कृवि हिंसायाम्, इकारो नकारागमार्थः, अनिदनुबन्धनामिति ज्ञापकात् नागमः। ति, वक्तव्याद् उः, अन्त्यस्य वकारलोपः, नाम्यन्तयोरिति गुणः।

● नाक्र्यादेः ३/२/३८

कर्तृविहिते सार्वधातुके प्रत्यये परे क्र्यादेर्गणात् ना प्रत्ययो भवति, स

च विकरणसंज्ञः अनोबाधः, क्रीणाति, क्रीणीतः, क्रीणन्ति। डुक्रीञ् द्रव्यविनिमये ति, तस, अन्ति, ना प्रत्ययः उभयेषामिति ईत्वम्, क्र्यादीनां विकरणस्येत्यालोप। क्रीणीयात्, क्रीणातु, अक्रीणात्, पूर्ववदीत्वम्। सार्वधातुक इति किम्? क्रेता। स्तम्भुः, स्तुम्भु, स्कम्भु, स्कुम्भ्यः श्ना प्रत्ययो नु प्रत्ययश्च वक्तव्यः चत्वारस्सौत्रः स्कूञ् आप्रवणे इत्ययं क्र्यादौ पठ्यते। स्तभ्नाति–स्तभ्नोति, स्तुभ्नाति–स्तुभ्नोति, स्कभ्नाति–स्कभ्नोति, स्कुभ्नाति–स्कुभ्नोति, स्कुनाति–स्कुनोति। अनिदनुबन्धनामिति न लोपः।

● आन व्यञ्जनान्तादघौ ३/२/३९

हौ, हि प्रत्यये परे क्र्यादेर्गणाद् व्यञ्जनान्ताद् आन प्रत्ययो भवति, स विकरण संज्ञः। ना प्रत्ययः प्राप्तः। पुषाण, मुषाण, अशान, गृहाण , बधान। पुष पुष्टौ, मुष स्तेये, अश भोजने, ग्रह उपादाने, बध बन्धने, पञ्चमी, हि, आन प्रत्ययः। ग्रहिज्या वयीति सम्प्र, अनिदनुबन्धेति न लोपः। हे रकारादिति हि लोपः। व्यञ्जनान्तादिति किम्? क्रीणीहि। उभयेषामीकारः। हावितिकिम्? पुष्णाति।

● आत्मनेपदानिभावकर्मणोः ३/२/४०

भावे कर्मणिचार्थे धातोः आत्मने पदानि भवन्ति। भावे–शय्यते भवता, सुप्यते भवता। शीङ् स्वप्ने, ञि ष्वपि शयने, ञिशब्दो ञ्यनुबन्धत्वमितीत्यर्थः। ते सार्वधातुके यण्, अयिर्ये इति शीङ अय्। स्वपिवचियजादीनामिति सम्प्रसारणम्। कर्मणि–क्रियते कटः, ह्रियते भारः, यणाशिषोर्य इतीकारागमः।

● कर्मवत् कर्मकर्ता ३/२/४१

कर्म च कर्ता च, असौ कर्मकर्ता, कर्मकर्ता कर्मवद्भवति। कर्मणि यानि कार्याणि उक्तानि यण्, आत्मनेपदम्, इच्, इत्येतानि कर्मकर्तरि भवन्तीत्यर्थ.। यस्य क्रियमाणत्वात् कर्मत्वे सति सुखकरत्वात् कर्तृत्वं सम्भाव्यते, सः कर्म कर्ता। यथा लूयमानः केदारः, कर्मकर्ताभवति–लूयते केदारस्स्वयमेव। पूयते यवराशि स्स्वयमेव। भिद्यते कुशूलस्स्वयमेव। छिद्यते रज्जुस्स्वयमेव। लूञ् छेदने, पूङ्पवने, भिदिर् विदारणे, छिदिर, द्वैधीक, आत्मनेपदानि भावकर्मणोरिति कर्मवद्भावात् ते, सार्वधातुके यण्, अभेदिकुशूलस्स्वयमेव, अच्छेदि रज्जुस्स्वयमेव। अद्यतनी, भाव कर्मणोश्चेति इच्, इचस्तलोपः, उपधागुणः।

क्रियमाणं च यत्कर्म स्वयमेव प्रसिद्ध्यति।
कर्तुः सुकरं चेति कर्मकर्तेति तद्विदुः।।

● कर्तरि रूचादिङानुबन्धेभ्यः ३/२/४२

रूचिना सदृशाः रूचादयः, ङकारोऽनुबन्धोयेषां ते ङानुबन्धाः, ततो द्वन्द्वः। रूचादिभ्यो धातुभ्यः ङानुबन्धेभ्यश्च कर्तर्यर्थे आत्मनेपदानि भवन्ति रूचेरनुदात्तात्, आदि शब्दः प्रकारे, प्रकारस्सादृश्यम्, तेन रूचादयः रूचि सदृशाः धातवः ते च अनुदात्तेतः, तेभ्यः आत्मने पदं भवति। रूचादिभ्यः– रोचते, वर्तते, वर्धते, स्पर्धते मोदते, रूच दीप्तौ, वृतु वर्तने, वृधु वृद्धौ, स्पर्ध सङ्घर्षे, मुद हर्षे, अनेन आत्मने पदम्, ते, अन्वि, उपधागुणः। रूरूचे, ववृते, पस्पर्धे, मुमुदे, परोक्षा ए, सर्वत्रात्मन इति गुणाभावः, द्विर्व, शिट्परोघोषः इति स्पर्धे पकारश्शिष्यते ङानुबन्धेभ्यः–शेते, सूते। शीङ् स्वप्ने, षूञ् प्राणिगर्भ विमोचने। ङकार आत्मने पदार्थः, अन्विकरणः, अदादेर्लुक्, शीङस्सार्वधातुक इति गुणः। सूत इत्यत्र सर्वेषामात्मन इति गुणाभावः। शिष्ये, सुषुवे। परोक्षा, ए, दिर्व, य इवर्णस्येति यत्वम् स्वरादाविवर्णेति इयै मिमीते, जिहीते, माङ्माने, ओहाङ्गतौ, ते, अन्वि, जुहोत्यादेश्चेति लुक्। जुहोत्यादीनां सार्वधातुक इति द्विर्व, होर्जः, ह्रस्वः, भृञ्हाङ्माङामिति इत्वम्, उभयेषामीकारः। ममे, जहे। परोक्षा ए, द्विर्वचनम्, सन्ध्यक्षरेचेत्यालोपः, कर्मव्यतिहारे कर्तर्यर्थे आत्मनेपदं वक्तव्यम्। यत्र इतर सम्बन्धिनीं क्रियामन्यः करोति, अन्य सम्बन्धिनीं क्रियामितरो नाम कर्मव्यतिहारः परस्परकरणं वा। कर्म शब्दः क्रियावाची, व्यतिलुनते, व्यति पुनते, लूञ् छेदने, पूञ् पवने, विअति पूर्वौ। अन्ते ना क्र्यादेः, प्वादीनां ह्रस्वः, क्र्यादीनां विकरणस्येत्यालोपः। आत्मनेचानकारादिति न लोपः, गत्यर्थेभ्यो धातुभ्यो हिंसार्थेभ्यश्च नेष्यते, व्यतिगच्छन्ति, व्यतिघ्नन्ति। गम्लृगतौ, हनहिंसा गत्योः, अन्ति, अन्वि, अदादेर्लुक्, गमिषुयमां छः इति सस्य छः, गमहनेत्युपधालोपः, लुप्तोपधस्येति हस्य घः, हरतेस्तु हिंसार्थादात्मनेपदं स्मर्यते। सम्प्रहरन्ते राजानः इतरेतरान्योन्यपरस्परइत्येतदुपपदं नेष्यते, इतरेतरस्य व्यति–लुनन्ति। नेरूपसर्गात्परस्यय विशेः कर्तर्यर्थे आत्मनेपदं वक्तव्यम्। निविशते। उपसर्गादिति किम्?मधुनि विशन्ति भ्रमराः, नामिनस्स्वर इति नुरागमः। परिव्यवेभ्यः परस्य क्रीञः। परिक्रीणीते विक्रीणीते। डुक्रीञ् द्रव्यविनिमये, परिअवपूर्वः,ते, नाक्र्यादेः, उभयेषामीकारः। विपराभ्यां परस्य विजय इत्यस्य

विजयते, पराजयते। आङ् पूर्वाद् दाञः अनास्योद्घाटनेऽर्थे। विद्यामादत्ते, डुदाञ् दाने, आङ्पूर्वः, ते अन्वि जुहोत्यादेश्चेति लुक् जुहोत्यादीनां सार्वधातुक इति द्विर्वं, ह्रस्वः, अभ्यस्तानामाकारस्येत्यालोपः। अघोषेष्वशिटामिति दस्य तः। अनास्योद्घाटन इति किम्? आस्यं व्याददाति, विआङ्पूर्वः अनुसंपर्याङ्भ्यः परस्य क्रीडः। अनुक्रीडते, संक्रीडते, परिक्रीडते, आक्रीडते। क्रीड विहारे। समस्तु कूजनेऽर्थे स्मर्यते, तेन कूजनेन शब्देन न भवति। संक्रीडन्ति शकटानि। समवप्रविभ्यः परस्यस्थः, संतिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते। ष्ठा गति निवृत्तौ, धात्वादेष्षस्सः, स्थस्तिष्ठ इति ज्ञापकाद् दस्य धः, निसमुपविभ्यः परस्य ह्वेञः निह्वयते संह्वयते, उपह्वयते, विह्वयते। आङःपरस्य तु स्पर्धायामर्थे मल्लो मल्लमाह्वयते। स्पर्धायामिति किम्? देवदत्तमाह्वयति। इत्थमन्यस्मादात्मनेपदं प्रयोगानुसारेण बोधव्यम्।

● चेक्रीयितान्तात् ३/२/४३

धातोः चेक्रीयितान्तात् कर्तर्यर्थे आत्मनेपदानि भवन्ति। पापच्यते पापठ्यते। अत्यर्थम् पचति, एवं पठति। धातोरेकस्वरेति य शब्दः, द्विर्वं, दीर्घोऽनागमेति दीर्घः, ते, अन्वि, असन्ध्यक्षरलोपः।

● आय्यन्ताच्च ३/२/४४

आयि प्रत्ययान्तात् कर्तर्यर्थे आत्मनेपदानि भवन्ति, पण्डितायते, ब्राह्मणायते, पण्डित इवाचरति, ब्राह्मण इवाचरति, कर्तुरायिरिति आयिः इकार इहार्थः।

● इन्व्यजादेरुभयम् ३/२/४५

यज्ञिना सदृशः यजादयः, ततो द्वन्द्वः, इन्नन्तात् ञकारानुबन्धाद यजादिभ्यश्च उभयं परस्मैपद आत्मनेपदञ्च भवति कर्तर्यर्थे। यजिः स्वरितेत्, आदिशब्दः प्रकारे, प्रकारः सादृश्यम्, तेन यजादयः यजिना सदृशाः ये धातवः स्वरितेतः तेभ्यः उभयं भवति, इन्नन्तात्–पाठयति, पाठयते। भावयति, भावयते। पठन्तं प्रयुङ्क्ते, एवं भवन्तम्। इन्, अस्योपधेति दीर्घो वृद्धिश्च, अनेन ति, ते, अन्वि गुणः। ञानुबन्धात्–करोति, कुरुते, डुकृञ् क, तनादेः रूः, करोतेरितिगुणः, अस्योकार इत्युत्वम्। एवं हरति–हरते । हृञ् हरणे। यजादिभ्यः–यजति–यजते। वहति–वहते। तुदति–तुदते। यजदेवता, वह प्रा, तुद व्य। तुदादेरनीति

गुणाभावः। क्रमेरनुपसर्गादुभयं वक्तव्यम्। क्रामति–क्रामते। क्रमु पाद, क्रमः परस्मायिति दीर्घः। अनुपसर्गादिति किम्? सङ्क्रामति। आङः परस्य ज्योतिषामुद्गमनेऽर्थे क्रमेरात्मनेपदं स्मरन्ति। आक्रमते रविः। ज्योतिषामुद्गमन इति किम्? आक्रमति धूमो हर्म्यतलम्। विशिष्ट एव विषये उभयं स्मरन्ति। तेन–यत्रात्मने क्रियाफलम्, तत्रात्मनेपदम्, यत्र तु परार्थम्, तत्र परस्मैपदम्। तेन यजते यजमानः, यजन्ति याजकाः इति प्रयोगनियमस्सिद्धः।

● पूर्ववत् सनन्तात् ३/२/४६

निमित्तातिदेशोऽयम्। सन् प्रत्ययान्तात् पूर्ववदात्मनेपदम् परस्मैपदम् उभयं वा भवति सन्पूर्वस्य धातोः आत्मनेपदाद्युत्पत्तौ यदुक्तं तन्निमित्तं तत्सनन्तस्याप्यतिदिश्यते, तेन यथा केवलेभ्यः रूचादिभ्य. आत्मनेपदम् तथा सनन्तेभ्योऽपि। रूरोचिषते। रोचितुमिच्छति। धातोर्वा कर्मेति सन्। इट्, द्विर्व, रूचादित्वात्सनन्तादप्यात्मनेपदम्, ते। शिशयते, शीङ् स्वप्ने, शयितुमिच्छति, सन्, द्विर्व, ह्रस्वः, इट्, गुणः, ङनुबन्धत्वादात्मने पदम्। पापचिषति, पापचिषते। अत्यर्थम् पक्तुमिच्छति। धातोरकर्मकाच्चेति य शब्दः, द्विर्व, दीर्घोऽनागमेतिदीर्घः, सन्, इट्, अस्य च लोपः परस्मायिति य लोपः। चेक्रीयितान्तात् सनन्तादप्यात्मने पदम्। मृङ् प्राणत्यागे, इत्यस्य सनन्तस्य यावत् अतिदेशेन अद्यतन्यात्मने पदं न भवति। मूमूर्षति, मर्तुमिच्छति, इति सन्, स्वरान्तानां सनीति दीर्घः उरोष्ठ्योपधस्येति रत्वम्। नामिनोर्वोरिति दीर्घः, द्विर्व, ह्रस्वः।

● शेषात्कर्तरि परस्मैपदम् ३/२/४७

यस्मादात्मने पदं नोक्तं स शेषः, स च द्विविधः, धातुशेषः, प्रत्यय शेषश्च, शेषाद् धातोरान्तर्यात् परस्मैपदं भवति। भवति, वाति, याति। भू सत्तायाम्, वा गति, या प्रा, ति, अन्वि अदादेर्लुक्। वभूव, ववौ, ययौ, परोक्षा, अड्, द्विर्व, भवतेरः, भुवो वोतु इति वकारागमः? असन्ध्यक्षरे चेत्यालोपः। कर्तरीति किम्? गम्यते ग्रामः। भुजेरभ्यवहारेऽर्थे आत्मनेपदं वक्तव्यम्। अभ्यवहारो भोजनम्। भुङ्क्ते पायसम्, भुज, पा, ते, अन्वि, स्वराद्रुधादेः परो न शब्दः, भुजादेरपि विज्ञानायान्तादेशो वक्तव्यः, भुज पालने तु परस्मैपदम्। भुनक्ति पृथिवीम्? अनुपराभ्यां परस्मैपदं, स्मर्यते। अनुकरोति, पराकरोति। ऋकारान्तादुभयं प्राप्तम्। अभिप्रत्यतिपरतः क्षिपेः। अभिक्षिपति, प्रतिक्षिपति,

अतिक्षिपति। यजादित्वादुभयं प्राप्तम्, पूर्वस्य वहेः, प्रवहति, पूर्ववदुभयं प्राप्तम्। परेः–परस्य मृषः, परिमृषति पूर्ववदुभयं प्राप्तम्। व्याङ्पर्युपेभ्यो रमः। विरमति, आरमति, परिरमति, उपरमति। कर्तुराय्यन्तादात्मनेपदं प्राप्तम् शेषादिति न सिध्यति।

भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तौ आख्यातप्रकरणे द्वितीयः पादः।

अथाख्यातप्रकरणे तृतीयःपादः

द्विर्वचनमनभ्यासस्यैकस्वरस्याद्यस्य ३/३/१

...... द्वौवारौ द्विः, तुमादित्वाद्दुः प्रत्ययः, ततो द्विःवचनं। द्विर्वचनमिति तत्पुरूषः। अविद्यमानः अभ्यासः अस्य धातोः स अनभ्यासः। एकः स्वरो यस्य स एकस्वरः, तयोरभ्यासस्य अकृतद्विर्वचनस्य धातोः यः आद्य एकस्वरः तस्य द्विर्वचनं भवतीत्यर्थः क्रियते, चण्परोक्षेत्यतो तदुपतिष्ठते। ददरिद्रौ, दरिद्रा दुर्ग, अट्, अभ्यासस्यैकस्वरस्य इत्यस्य द्विर्वचनादाकारस्यौत्वमिष्यते, ये चेत्यालोपः। जजागार, जागृनिद्रा, यु, अट्, जा इत्यस्य द्विर्वचनम्, ह्रस्वः, अस्योपधेति वृद्धिः। इयाय, इण् गतौ, अट्, द्विर्व, अस्योपधेति वृद्धिः, अभ्यासस्यासवर्णे इति इय् (त्रुटितः पाठः) नायमिकार आद्य इति कथं अस्य द्विर्वचनंस्यात् ? उच्यते– आद्यन्तवदेकस्मिन्निति वचनात्। एवम्, आर्, ऋगतौ, अकारादवर्णस्य अस्यादेस्सर्वत्रेति दीर्घः। अस्योपधेति वृद्धिः आर्, दीर्घस्वरलोपः। अभ्यासस्येति किम्? लोलविष्यते। अत्यर्थम् लवितुमिच्छति, 'य' शब्दः, द्विर्व, गुणश्चेक्रीयित इति गुणः, ततः सन्, इट्, अस्य च लोपः। पुनस्सनि द्विर्वचनं न भवति।

स्वरादेर्द्वितीयस्य ३/३/२

द्विर्वचनमनभ्यासस्यैकस्वरस्येत्यनुवर्तते, स्वरादेः धातोः अनभ्यासस्य यः द्वितीयः एकस्वरः अवयवस्तस्य द्विर्वचनं भवतीत्यधिक्रियते। पूर्वेण आद्यस्यद्विर्वचन प्राप्तम्। एतदपि चण्परोक्षेत्यत्रोपतिष्ठते। आशिषत्, आटिटत्, अश भोजने, अट् पट् गतौ, अशितवन्तं प्रयुङ्क्तवान्, एवमटितवन्तम्। धातोश्च हेताविति इन्। अस्योपधेतिदीर्घः। ह्यस्तनी दि, श्रिद्रुश्रूकमीति चण्। अनेन शिटि द्विर्वचनं, कारितस्यानामीति कारितलोपः। अवर्णस्याकार इति अकारस्याकारः। आशिशिषति, आटिटिषति, अशितुमिच्छति, अटितुमिच्छति, सन्, इट्, द्विर्व, अनभ्यासस्येति किम्? अटाटिषते, अटपटगतौ, कुटिलमटितुमिच्छति। वक्तव्याद् य शब्दः द्विर्व, अभ्यासस्यादिर्व्यञ्जनमिति

य लोपः, दीर्घोऽनागमेति दीर्घः, सन्, इट्, अस्य च लोपः, यस्यापत्यस्येति य लोपः, द्वितीयस्यैकस्वरस्येति किम्? आटतुः, आटताम्, द्विर्व, अस्यादेस्सर्वत्रेति दीर्घः। इर्ष्यतेः यिशब्दस्य सनोवा द्विर्वचनं वक्तव्यम्। ईर्ष्यियिषति–ईर्ष्यिषिषति। षुर्क्ष्य, ईक्ष्र्य, ईर्ष्य, ईर्ष्यार्थाः, सन्, इट्, ईर्ष्य शब्दं विना यि शब्दस्य द्विर्वचनम्, पक्षे सनः पूर्वमकारस्य सन्यवर्णस्येतीत्वम् कण्ड्वादीनां तृतीयस्य वर्णस्य। कण्डूयियिषते। कण्डू शब्दाद्यत्वं वक्तव्यम्। ततः सन्, इट् अस्य च लोपः, यिशब्दस्य द्विर्वचनम्, नामधातोः आद्यस्य, द्वितीयस्य तृतीयस्य। पुपुत्रीयिषति पुतित्रीयिषति, पुत्रीयियिषति। पुत्र शब्दात् नाम्न आत्मेच्छायां यिनिति यिन्। यिन्यवर्णस्येतीत्वम्। पु इत्यस्य द्विर्वचनम् पक्षे त्रीशब्दस्य, पक्षे यिशब्दस्य, सनोप्यत्र द्विर्वचनमित्याहुः पुत्रीयिषिषति। सन्यवर्णस्येतीत्वम्।

● न नबदरास्संयोगादयोऽये ३/३/३

संयोगस्यादयः संयोगादयः, स्वरादेर्धातोर्यो द्वितीयः एकस्वरः, तस्य अवयवाः नकारवकारदकाररेफाः संयोगस्यादयो न द्विरूच्यन्ते। एवं उन्दिदिषति,उब्जिजिषति, अदिड्डिषति, अर्चिचिषति। उन्दी क्लेदने, उब्ज आर्जवे, अद्ड अभियोगे, अर्च पूजायाम्। उन्दितुमिच्छति एवं उब्जितुमिच्छति अड्डितुमिच्छति, अर्चितुमिच्छति। सन्, इट्, चण्परोक्षेति दि, जि, डि, चि इत्येते नवदरैः विना द्विरूच्यन्ते। तवर्गश्चटवर्गेति दस्य ङः। औन्दिदत्, औब्जिजत्, अड्डिडत् अर्चितवन्तम्। सन्, दि, श्रिद्रूश्रूकमीति यण्, द्विर्व, कारितलोपः स्वरान्तानांवृद्धिरादे इति उकारस्य वृद्धिः, अवर्णस्याकारः इत्यकारस्याकारः। नबदरा इति किम्? इचिक्षिषते, ईक्ष दर्शनाङ्कनयोः त, सन्, इट्, क्षिद्विर्व, कवर्गस्य चवर्गः। संयोगादय इति किम्? अरिरिषति। ऋगतौ, अर्तुमिच्छति सन्, स्मिङ्पूङ्रञ्ज्वशूकृ इति इर्। गुणः, रि द्विर्व। अय इति किम्? आरर्यते, ऋगतौ कुटिलमृच्छति, वक्तव्यादय शब्दः, चेक्रीयितं चेति गुणः, र्य द्विर्व, अभ्यासस्यादिर्व्यञ्जनमिति च लोपः, दीर्घोऽनागमेति दीर्घः।

● पूर्वोभ्यासः ३/३/४

द्विर्वचनमित्यनुवर्तते, धातोर्द्विर्वचनं कृते यः पूर्वो भागः स अभ्याससंज्ञो भवति। पपाच, पपाठ, अट्, द्विर्व, अभ्याससंज्ञायाः सत्यामभ्यासस्यादिर्व्यञ्जनमिति चकारलोपः, अस्योपधेति वृद्धिः। शिश्राय,

दुद्राव। श्रिञ् सेवायाम्, द्रुगतौ, अट्, द्विर्व, पूर्ववदभ्यासलोपोवृद्धिश्च अभ्याससंज्ञायाः क्व प्रयोजनम्? अभ्यासस्यादिर्व्यञ्जनमित्यादिषु।

● द्वयमभ्यस्तम् ३/३/५

धातोः द्विर्वचनेकृते यत् द्वयम् तदभ्यस्तसंज्ञं भवति। ददति, ददतु, दधति, दधतु। डुदाञ् दाने, डुधाञ् दानधारणयोः, वर्तमाना अन्वि, पञ्चमी, अन्तु, अन्वि, जुहोत्यादेर्लुक्, जुहोत्यादीनां द्विर्व, ह्रस्वः, द्वितीय चतुर्थयोरितिधस्य दः, अभ्यस्तसंज्ञायां सत्यामभ्यस्तानामाकारस्येत्यालोपः लोपोऽभ्यस्तादन्तिन इति न लोपः। जोहूयते, ह्वेञ् स्प, सन्ध्यक्षरान्तानामित्यात्वम्, अत्यर्थम् ह्वयति। धातोरेकस्वरेति यशब्दः द्विर्व, अभ्यस्तस्य चेति धात्वाभ्यासयोस्सम्प्रसारणम्, गुणश्चेक्रीयित इति गुणः। नाम्यन्तानां यणायीति दीर्घः।

● जक्षादिश्च ३/३/६

जक्षादिर्गणः अकृतद्विर्वचनोऽपि अभ्यस्तसंज्ञो भवति। जक्ष भक्षणे, जागृ निद्राक्षये, दरिद्रा दुर्गतौ, चकासृ संदीप्तौ, शासु अनुशिष्टौ। एते जक्षादयः। जक्षति, जाग्रति, दरिद्रति, चकासति, शासति, अन्ति, अन्वि, अदादेर्लुक् लोपोऽभ्यस्तादन्तिन इति नकारलोपः, दरिद्रातेः अभ्यस्तानामाकारस्येत्यालोपः अभ्यस्तसंज्ञायाः क्वप्रयोजनम्? अभ्यस्तस्य चेत्यादिषु।

● चण्परोक्षा चेक्रीयितसन्नन्तेषु ३/३/७

चेक्रीयितञ्च सन् च तौ चेक्रीयितसनौ, तावन्ते यस्य स चेक्रीयित सन्नन्तः, ततो द्वन्द्वः, चणि परे परोक्षायां च परस्याम् तथा चेक्रीयितान्ते शब्दे सन्नन्ते च धातोः द्विर्वचनं भवति। चणि तावत्–अपीपठत्, अपीपचत्, पठ व्यक्तायां वाचि, डुपचष् पाके, पठितवन्तम्, पक्ववन्तम्, इन्, उपधादीर्घः, दि, श्रि द्रु, स्रु कमीति चण्, कारितस्यानामीति कारित लोपः। इन्यसमानेति ह्रस्वः, द्विर्व, अलोपे समानस्य इति इत्वम्, दीर्घो लघोः, परोक्षायाम्–चकार, पपाठ, डुकृञ् क , पठ व्यक्तायां वाचि, अन्वि, द्विर्व, अस्योपधेति वृद्धिदीर्घौ चेक्रीयितान्ते, अटाट्यते, अशास्यते। अट् पट् गतौ, अशू व्याप्तौ। कुटिलमटति, अत्यर्थमश्नुते, य शब्दः, ट्य, श्य, इत्येतौ द्विरुच्येते। अभ्यासस्येति य लोपः दीर्घोऽनागमेति दीर्घः, सन्नन्ते–प्रतीषिषति, इण्गतौ प्रतिपूर्वः, प्रत्येतुमिच्छति, सन्, द्विर्व,

अभ्यासस्य इति इय्, समानदीर्घः, सनीणिङोर्गमिरिति गम्यादेशोऽत्र प्राप्तः सम्बोधनेऽर्थे न स्मर्यते। एवं पिपठिषति पठेस्सन्, द्विर्व, इट्।

● जुहोत्यादीनां सार्वधातुके ३/३/८

जुहोत्यादीनां सार्वधातुके परे द्विर्वचनं भवति, जुहोति, विभेति जिहेति। हुदानादानयोः, ञिभी भये, हीलज्जायाम्, ति, अन्वि, अदादेर्लुक्, अनेन द्विर्व, हो जः, द्वितीयचतुर्थयोरिति भस्य बः, नाम्यन्तयोरिति गुणः, एव ददाति, दधाति, डुदाञ्, दाने, डुधाञ् दानधारणयोः। अन्यत्पूर्ववत्, सार्वधातुक इति किम्? होता।

● अभ्यासस्यादिर्व्यञ्जनमवशेष्यम् ३/३/९

आदौ व्यञ्जनमादिव्यञ्जनम्। अभ्यासस्य यदादिव्यञ्जनं तदवशिष्टो भवति, सामर्थ्याद् अनादिव्यञ्जनं लुप्यते। यियक्षति, पिपक्षति, यज देवता, डुपचष् पा, यष्टुमिच्छति पक्तुमिच्छति, सन् द्विर्व, अनेन जकारचकारयोः लोपः। सन्यवर्णस्येति इत्वम्, भृजादीनां ष इति जस्य षः, षढोकस्स इति षस्य क, पचेः चवर्गस्य किः। सुष्वाप, इयाज, उवाय। ञिष्वप्, शयने, यजदेवता, डुवप् वीजसन्ताने, अट्, द्विर्व, परोक्षायामभ्यासस्येति सम्प्रसारणम्। व्यञ्जन ग्रहणमुपलक्षणार्थम् तेन स्वरोप्यवशिष्यते। आश, आट। अश ओजने, अटपट गतौ, अट, द्विर्व, अभ्यासस्यादेस्सर्वत्रेति दीर्घः। दीर्घात्परलोपः। ननु अनादि व्यञ्जनवत्स्वरस्यापिलोपः प्राप्नोति? उच्यते– सन्यवर्णस्येति अवर्णस्य इत्वारम्भान्न भविष्यति।

● शिट्परोऽघोषः ३/३/१०

शिटः परः, शिट्परः, अभ्यासस्येति वर्तते इतो लोप इति यावत्। अभ्यासस्य यः अधोषः शिट् परः सोऽवशेष्यो भवति, पूर्वेण लोपः प्राप्तः। चिच्योत, टिष्ठेव, चस्कन्दि,। च्युतिर् क्षरणे, ष्ठिवु निरसने, स्कन्दिर् शोषणे। अट्, द्विर्व, अनेन चकारटकारककाराणामवशेष्यम्, अन्येषां लोपः। द्वितीयचतुर्थयोरितिठस्य टः, कवर्गस्यचवर्गः, उपधागुणः। शिट्पर इति किम्? पप्सौ , प्सा भक्षणे, अट् द्विर्व, पूर्वेण स लोपः, आकारादद्, औ, सन्ध्यक्षरेचेत्यालोपः। अघोष इति किम् सस्नौ, ष्णा शौचे, धात्वादेष्षस्सः गात्रपुरुषयोस्स्न इति ज्ञापकात् णस्य नः अन्यत्पूर्ववत्।

● द्वितीयचतुर्थयोः प्रथमतृतीयौ ३/३/११

अभ्यासस्य यौ द्वितीयचतुर्थौ तौ यथासंख्यं प्रथमतृतीयौ आदेशौ भवतः। चखान, विभेद, खन अ, भिदिर् विदारणे, अट्, द्विर्व, कवर्गस्य चवर्गः इति, खस्य कः, अनेन कस्य च, भस्य ब, बभार, बभञ्ज, डु भृञ् धारण पोषणयोः, भञ्जो आमर्दने, अट्, द्विर्व, अकारः ऋवर्णस्य।

● हो जः ३/३/१२

अभ्यासस्य यो हकारस्तस्य जकारादेशो भवति। जघान। हन हिंसागत्योः अट्, द्विर्व, अनेन हस्य जः, अभ्यासाच्चेति घत्वम्, जहौ, ओहाक् त्यागे, ओकारः ल्वाद्योदनुबन्ध इत्यर्थः। ककारः, हः काल ब्रीह्योरित्यर्थः। अट्, द्विर्व, हो जः, पूर्ववत् चर्त्वम्, आलोपश्च। जुहाव। हुदानादानयोः।

● कवर्गस्य चवर्गः ३/३/१३

अभ्यासस्य यः कवर्गस्तस्य चवर्गो भवति। चकार, चखान, जगाम, जघास। डु कृञ् क, खन अवदारणे, अद भक्षणे। अट्, वापरोक्षायामिति अदेर्घस्लृ आदेशः, द्विर्व, अनेन कवर्गस्य चवर्गः, द्वितीयचतुर्थयोरिति दस्य धः, घस्य जः, अस्योपधेति वृद्धिदीर्घौ।

● न कवतेश्चेक्रीयते ३/३/१४

कवतेः, कुङ् शब्दे इत्यस्य योऽभ्यासस्तस्य चवर्गो न भवति, चेक्रीयिते परे। कोकूयते अत्यर्थम् कवते, य शब्दः, द्विर्व, गुणश्चेक्रीयित इति गुणः, नाम्यदन्तानां यनायीतिदीर्घः, चेक्रीयित इति किम्? चुकूषते। भोक्तुमिच्छति, स्वरान्तानां सनीति दीर्घः। कवतिरिति विकरण निर्देशात् कूशब्दस्य आदादिकस्य निवृत्त्यर्थम्। इह तु न भवति–चोकूयते। अत्यर्थम् कौति।

● ह्रस्वः ३/३/१५

ह्रस्वेन सम्बन्धिशब्दात् दीर्घः आक्षिप्यते। तेन अभ्यासस्य यो दीर्घस्तस्य ह्रस्वो भवति। ददौ पपौ। डुदाञ् दाने पा पाने, अट् द्विर्व, ह्रस्वः, आकारादट औ, सन्ध्यक्षरेचेत्यालोपः डु ढौकं, ढौकृ गत्यर्थः। ककि श्वकि इत्यत्र पठ्यते, परोक्षा ए, द्विर्व, ह्रस्वः, ओकारस्य उकारः, सन्ध्यक्षराणां ह्रस्वादेशे इदुताविति वचनात् द्वितीयचतुर्थेति ढस्य डः।

● अकारः ऋवर्णस्य ३/३/१६

अभ्यासस्य यः ऋवर्णस्तस्य अकारादेशो भवति। ववृते, ववृधे, वृतु वर्तने वृधु वृद्धौ। परोक्षा ए, अनेन ऋवर्णस्य अकारः। सर्वत्रात्मन इति गुणाभावः। चक्रतुः चक्रुः। डुकृञ् करणे, अतुस्, उस्, द्विर्व, परोक्षायां चेति गुणाभावः।

● दीर्घ इणः परोक्षायामगुणे ३/३/१७

अविद्यमानो गुणो यत्र प्रत्यय इति विग्रहः, इण् गतावित्यस्य धातोः योऽभ्यासः तस्य दीर्घो भवति परोक्षायां य अगुणः तस्मिन् परतः। ईयतुः, ईयुः इण् गतौ, स्वरविधिस्स्वर इति वचनात् पूर्वमृद्विर्वचनम्, तस्यानेन दीर्घः। ततः इणश्चेति य, परोक्षायां चेति गुणाभावः। अगुण इति किम्? इयाय। इण् गतौ, अट्, द्विर्व, अस्योपधेति वृद्धिः, अभ्यासस्यासवर्णेति इय्।

● अस्यादेस्सर्वत्र ३/३/१८

सर्वस्यां सर्वत्रेति त्र प्रत्ययः, पुंवद्भाषित पुंस्केति योगविभागात् पुंवद्भावः, अभ्यासस्य य आदिः इकारस्तस्य दीर्घोभवति परोक्षायां सर्वस्यां सगुणायामगुणायां परस्याम्। आट, आटतुः, आटुः, आश, आशतुः, आशुः, अट् पट् ग, अश भोजने, अट्, अतुस् उस्, द्विर्व, अनेन दीर्घः अटि अस्योपधेति दीर्घः। अस्यादेरिति किम्? पपाठ। यद्यत्र दीर्घस्स्यात् ह्रस्व इति ह्रस्वो न भवेत्, दीर्घविधान सामर्थ्यात्। समान दीर्घेण सिद्धत्वात् योगारम्भः उत्तरत्र तस्माद्ग्रहणेन कृत दीर्घस्याकारस्य परामर्शार्थः। योगारम्भे ह्यसति तस्माद् ग्रहणेन नकारागम सामर्थ्यात्। तत्तर्हि न करिष्यत इति चेत् ? मैवम् वोचुः। एवं हि सति, आचचक्षे इत्यत्रापि नकारागमः स्यात्। चक्षिङ् व्यक्तायां वाचि, इवर्णस्य परोक्षा, ए, द्विर्व।

● तस्मान्नागम परादिरन्तश्चेत् संयोगः ३/३/१६

परस्यादि परादिः, तस्मादकारात्, कृत दीर्घाद् यः परः तस्य आदेः नकारागमो भवति यद्यन्तस्संयोगश्चेत्। आनञ्ज, आनञ्जतुः, आनञ्जुः। अञ्जू व्य, अट्, अतुस् उस्, द्विर्व, अस्यादेस्सर्वत्रेति दीर्घः। अनेन नकारागमः, अकारः उच्चारणार्थः। द्विवचन बहुवचनयोः अनिदनुबन्धानामित्यनुषङ्गलोपो न भवति परोक्षायाम्, इन्धि श्रन्थि, ग्रन्थि स्वञ्जामिति नियमात्। अन्तश्चेत संयोग इति किम् ? आट।

● ऋकारे च ३/३/२०

तस्मादकाराद् दीर्घभूतात् परस्मिनृकारे आदौ नकारागमो भवति आनृधतुः आनृधुः। ऋधु वृद्धौ, अतुस् उस्, द्विर्व, अकारः ऋवर्णस्य। अस्यादेरितिदीर्घः, अनेन नागमः, आनृधे, अनृधाते, आनृधिरे। कर्मण्यात्मने–पदम्, ऐ, आते, इरे। अन्यत्पूर्ववत्। इहकस्मान्न भवति। आरतुः, आरुः। ऋ गतौ, अतुस्, उस् द्विर्व, अस्यादेरितिदीर्घः, रत्वम्। नन्वागमादेशयोरागमोविधिः वलवानिति वचनात् अकृत्वा रत्वं नकारागमो कथं न स्यात् ? असदेतत्– आगमात् सर्वादेशविधिर्वलवानिति वचनात् पूर्वम् रत्वम् प्रवर्तते, ततः ऋकाराभावान्न नकारागमः।

● अश्नोतेश्च ३/३/२१

तस्मादकारात् कृतदीर्घात्परस्य अशू व्याप्तावित्यस्य आदिः नकारागमो भवति। व्यानशे, व्यानशाते, व्यानशिरे, अशूव्याप्तौ, वि पूर्वः, ए, आते, इरे, द्विर्व, अस्यादेरिति दीर्घः, अनेन नागमः, विकरणनिर्देशात् अश भोजन इत्यस्य अश्नातेः न भवति– आश, आशतुः, आशुः।

● भवतेरः ३/३/२२

भवतेरभ्यासस्य परोक्षायामकारादेशो भवति। बभूव, बभूवतुः, बभूवः,। भू सत्तायाम्, अट्, अतुस्, उस्, द्विर्व, अनेन ऊकारास्य अकारादेशः, भुवोवोतु इति वकारागमः। एवमनुबभूवे कम्वलो देवदत्तेन, कर्मण्यात्मनेपदम्। ए, द्विर्व, अन्यत्पूर्ववत्, भुव इति न कृतं वैचित्र्यार्थम्।

● निजिविजिविषां गुणः सार्वधातुके ३/३/२३

निजिर् शौच पोषणयोः, विजिर् पृथक् भावे, विष्लृ व्याप्तौ, एषामभ्यासस्य गुणो भवति सार्वधातुके परे। नेनेक्ति, नेनिज्यात्, नेनेक्तु, अनेनेक्, वेवेक्ति, वेविज्यात्, वेवेक्त, अवेवेक्, वेवेष्ठि, वेविष्यात्, वेवेष्ट, अवेवेट्, ति, यात्, तु, दि, अन्वि, जुहोत्यादेर्लुक्। जुहोत्यादीनां सार्वधातुक इति द्विर्वचनम्, अनेन गुणः। नामिनश्चोपधेति गुणः, चवर्गस्य किः व्यञ्जनादिदश्योरिति दि लोपः, तवर्गस्य षटेति तस्य टः, वा विराम इति थस्य टः, सार्वधातुक इति किम्? निनेज, अट्।

● भृञ्हाङ्माङामित् ३/३/२४

डुभृञ् धारणपोषणयोः, ओहाङ् गतौ, माङ् माने, एषामभ्यासस्य इत्वं भवति, सार्वधातुके परे। बिभर्ति, बिभृयात्, बिभर्तु, अबिभः। ति, यात्, तु, दि, अन्वि, पूर्ववल्लुक्। द्विर्व, अभ्यासकार्यम्, अनेन इत्वम्, गुणः, पूर्ववत्, दि लोपः। जिहीते, जिहीतः, जिहीताम्, अजिहीत, ओहाङ् गतौ, वर्तमाना ते, सप्तमी ईत्, पञ्चमी, ताम्, ह्यस्तनी त, सप्तम्यामभ्यस्तानामाकारस्येत्यालोपः, अन्यत्रोभयेषामितीत्वम्। मिमीते, मिमीत, मिमीताम्, अमिमीत, माङ् माने, अन्यत्पूर्ववत्। सार्वधातुक इति किम्? बभार, जहे, ममे, अट्, ए, सन्ध्यक्षरे चेत्यालोपः।

● अर्तिपिपर्त्योश्च ३/३/२५

अर्तीति, ऋ सृ गतौ इत्यस्य ग्रहणम्, तस्यैव सार्वधातुके अभ्यासस्सम्भवति, न तु ऋ गति प्रापणयोरित्यस्य। ऋ सृ गतौ , पृ पालनपूरणयोः इत्येतयोः अभ्यासस्य सार्वधातुके परे इत्वं भवति। इयर्ति, इयृयात्, इयर्तु, एयः। ति, यात्, तु, दि, अन्वि, जुहोत्यादेर्लुक्। जुहोत्यादीनां द्विर्व, अकार ऋवर्णस्य अनेन इत्वम्, अभ्यासस्यासवर्ण इति इय्, अट्, व्यञ्जनादिदश्योरिति दि लोपः, स्वरादीनां वृद्धिः। पिपर्ति, पिपूर्यते, पिपर्ति, अपिपः, पृ पालने, अन्यत् पूर्ववत्। उरोष्ठ्योपधस्येति उरादेशः, नामिनोर्वोरिति दीर्घः, सार्वधातुक इति किम्? आर्, पपार। अड्, द्विर्व, अकार ऋवर्णस्य, अस्यादेस्सर्वत्रेति दीर्घः, अस्योपधेति वृद्धिः।

● सन्यवर्णस्य ३/३/२६

सन्निमित्तस्य अभ्यासस्य य अवर्णः तस्य इत्वं भवति पिपक्षति, यियक्षति, विवक्षति, डुपचष् पाके, यज देवता, वच परिभाषणे। पक्तुमिच्छति, यष्टुमिच्छति, वक्तुमिच्छति, सन्, द्विर्व, अनेन इत्वम्, चवर्गस्य किः, पिपासति, यियासति, पा पाने, या, प्रापणे पातुमिच्छति, यातुमिच्छति इति सन्। अवर्णस्येति किम्? बुभूषति। अभ्यासस्य इति किम्, पापचिषते। अत्यर्थम् पक्तुमिच्छति। य शब्दः, द्विर्व, दीर्घोऽनागमेति दीर्घः, ततः सन्, इट्, अभ्यासलोपः, यस्याननीति य लोपः।

● उवर्णस्य जान्तस्थापवर्गः परस्यावर्णे ३/३/२७

जश्च, अन्तस्थश्च, पवर्गश्च, ते जान्तस्थापवर्गाः, ते परे अस्मात् उवर्णात् सः जान्तस्थापवर्गः, तेभ्यः परः। जपरः, अन्तस्थापरः, पवर्गपरः य उवर्णस्तस्य सनि परे इत्वं भवति अवर्णे परे, जान्तस्थापवर्गाः अवर्णपराः यदिस्युः। जिजावयिषति, यियावयिषति, रिरावयिषति, लिलावयिषति पिपावयिषति, बिभावयिषति, सिसावयिषति। जु इति सौत्रः, यु मिश्रणे, रू शब्दे, लूञ् छेदने, पूञ् पवने, भू सत्तायाम्, षुञ्बन्धने। जवन्तं प्रयोक्तुमिच्छति एवं यवन्तम्, रूवन्तम्, लुनन्तम्, पुनन्तम्, भवन्तम् सुनन्तम्, इति विग्रहः। ततः धातोश्चहेतावितीन् अस्योपधेति वृद्धिः, ततः सन्। इट् ,गुण, इनिकृतं स्थानिवद्भवतीति स्थानिवद्भावात् जु यु रू लू पू भू षु द्विरूच्यन्ते। अनेन उवर्णस्य इत्वम्। जान्तस्थापवर्गपरस्येति किम्? जुहावयिषति, हु दा, जुह्वन्तं प्रयोक्तुमिच्छति, इन्, वृद्धिः, सन्, इट्, इनिकृतं स्थानिवदिति हु, द्विर्व। अवर्ण इति किम्? लविषति। लवितुमिच्छति, सन्, सनीति किम्? लुलाव ननु जिजावयिषति इत्यादिषु इत्यादीनां द्विर्वचने कृते पूर्वेण इत्वं सिद्धम्। असारमेतत्। इनिकृतंस्थानिवदिति वचनात् जु इत्यादयो हि द्विरूच्यन्ते तत्कथं पूर्वेण इत्वं स्यात्। सु श्रू द्रू प्रू प्लु च्युङामभ्यासस्य य उवर्णः तस्य अवर्णपरायामन्तस्थायांपरस्यां सनि परे वा इत्वं वक्तव्यम् सिस्रावयिषति, सुस्रावयिषति, शिश्रावयिषति– शुश्रावयिषति, दिद्रावयिषति–दुद्रावयिषति, पिप्रावयिषति–पुप्रावयिषति, पिप्लावयिषति–पुप्लावयिषति, चिच्यावयिषति–चुच्यावयिषति। सर्वे एते गत्यर्थाः। स्रवन्तं प्रयोक्तुमिच्छति, श्रवन्तं, द्रवन्तम्, प्रवमानम् प्लवमानम्, च्यवमानमिति विग्रहे कृते इन्, वृद्धिः, सन् इट् गुणः इनि कृते स्थानिवदिति वचनात् श्रू द्रु स्रु प्रु प्लु च्युङाम् इति द्विरूच्यन्ते, वक्तव्यात् उकारस्य इत्वम्। अवर्णे पवर्गान्तस्थायामिति किम्? शुश्रूषति। स्वरान्तानां सनीतिदीर्घः।

● गुणश्चेक्रीयिते ३/३/२८

चेक्रीयित परे अभ्यासस्य गुणो भवति। चेचीयिते, नेनीयते, जोहूयते, लोलूयते। चिञ् चये, णीञ् प्रापणे, हु हवने, लूञ् छेदने। अत्यर्थम् चिनोति, नयति जुहोति लुनोति इति। य शब्दः, द्विर्व, नाम्यन्तानां यणायि इति दीर्घः। चेक्रीयित इति किम्? चिचीषति, सन्, स्वरान्ताना सनीति दीर्घः।

● दीर्घोऽनागमान्तस्य ३/३/२६

आगम अन्ते यस्याभ्यासस्यस आगमान्तः ततोऽनागमान्तस्येति अभ्यासस्य दीर्घस्स्यात्। अलोपे समानस्येत्यतः प्राक् यस्य अभ्यासस्य नान्यस्य अनागम उच्यते, तस्यैव अनेन लोपो भवति, पापच्यते, पापठ्यते य शब्दः, द्विर्व, अनेन दीर्घः। अनागमान्तस्येति धातुविशेषः गृह्यते। यम उपरमे, रम क्रीडायाम्। अत्यर्थम् यच्छति, रमते, यशब्दः, द्विर्व, अनेन. दीर्घः.................., अनागमे विशेष विहिते न सामान्यविहितस्य दीर्घः प्राप्नोति। अथ किम् अनागमान्तस्येति? सत्यम्– अभ्यास विषयेऽपवादाः न प्रवर्तन्त इति वचनात् कृतेऽप्यागमे दीर्घो भवेदित्यनागमान्तग्रहणं कर्तव्यमेव।

● वञ्चिस्रन्सिध्वन्सिभ्रन्सिकसिपतिपदिस्कन्दामन्तो नी ३/३/३०

वञ्चु गत्यर्थः। वन्चुचन्चित्यत्र पठ्यते, स्रन्सु ध्वन्सु भ्रन्सु अवस्रंसने, कसिपतिपदि गतौ, स्कन्दि शोषणे एषामभ्यासस्य चेक्रीयित परे नी प्रत्ययो भवति। अन्तः शब्दः आगमत्वं द्योतयति। वनीवच्यते, सनीस्रस्यते, दनी–ध्वस्यते, बनीभ्रश्यते, चनीकस्यते–पनीपत्यते, पनीपद्यते, चनीस्कद्यते। कुत्सितं वञ्चति, अत्यर्थम् स्रंसते, ध्वंसते, भ्रंसते, कुटिलंकसति। एवं पतति, पद्यते। अत्यर्थम् स्कन्दति य शब्दः, द्विर्व, नी आगमः, अनिदनुबन्धेति न लोपः। आगमे नी शब्दे ह्रस्वो न भवति, दीर्घोच्चारण सामर्थ्यात्। चेक्रीयित इति किम् विवञ्चिषति।

● अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्य ३/३/३१

अनुनासिकान्तस्य धातोः योऽभ्यासः तस्य अतः अकारस्य अनुस्वारो भवति चेक्रीयिते परे। यंयम्यते तंतन्यते रंरस्यते, बंभण्यते, यम् उयरमे, तनुविस्तारे, रम क्रीडायाम्, भण शब्दे। अत्यर्थम् यच्छति, तनोति, रमते, भणति,। य शब्दः द्विर्व, अनुस्वारागमः। एवं चङ्क्रम्यते, दंद्रम्यते क्रमु पादविक्षेपे, द्रम हस, कुटिलं क्रामति, द्रामति,। वक्तव्यादय शब्दः। द्विर्व, अभ्यास कार्यम्, अत इति किम्? तेतिम्यते। तिम तीम आर्द्रीभावे। अत्यर्थम् तिम्यति, अण्, चेक्रीयित इति गुणः। लाक्षणिकस्य अकारान्तस्य न भवति बाभाम्यते। भाम क्रोधे। अत्यर्थम् भामति, य शब्दः, द्विर्व, ह्रस्वः, दीर्घोऽनागमेति, दीर्घः अनुनासिकान्तस्येति किम्? पापच्यते।

● जपादीनाञ्च ३/३/३२

जपादीनामभ्यासस्य चेक्रीयिते परे अनुस्वारागमो भवति। जप मानसे, जभ जृभ जृभी गात्र विनिमये, दह भस्मीकरणे, दा दै दाने, भन्ज आमर्दने, पम गतौ, एते जपादयः। व्याकरणस्य लक्ष्यमूलत्वात्। जंजप्यते, जंजभ्यते, दंदह्यते दंदश्यते, बंभज्यते, पंपम्यते, गर्हितं जपति जभति दहति दंशति, अत्यर्थम् भञ्जति, कुटिलं पयति। अनिदनुबन्धेति न लोपः।

● चरफलोरुश्च परस्यास्य ३/३/३३

चर गत्यर्थः, फल निष्पत्तौ, अनयोरभ्यासस्य अनुस्वारागमो भवति। परस्य च अकारस्य उकारादेशः, चेक्रीयिते परे, चञ्चूर्यते, पंफल्यते, गर्हितं चरति, अत्यर्थम् फलति। द्वितीयचतुर्थे फस्य पः, अनेन अनुस्वारः, परस्य अकारस्य उत्वम्। नामिनोर्वोरिति दीर्घः। चेक्रीयित इति किम्? चचार।

● ऋमतो रीः ३/३/३४

ऋ विद्यते यस्य स ऋमान्, ऋमतो धातो अभ्यासस्य चेक्रीयिते परे री आगमो भवति, दरीदृश्यते, नरीनृत्यते। दृशिर् प्रेक्षणे, नृती गात्र विनिमये, अत्यर्थम् पश्यति, नृत्यति, य शब्दः, द्विर्व, री आगमः। अनित्या लक्षणोक्त परिभाषा, स्थादोश्चेति सूत्रारम्भात्। तेन यत्रापि अकारः लाक्षणिकः तत्राप्यागमः, जरीगृह्यते, ग्रह उपादाने, अत्यर्थम् गृह्णाति। ग्रहि ज्यावयीति सम्प्रसारणम्। ऋमत इति किम्? चेक्रीयिते, डुकृञ् करणे, य शब्दः, ऋतः इदन्ताच्चेक्रीयित इति ईकारागमः, अतो द्विर्व, चेक्रीयित इति किम्? ववृते।

● रि रेफौ च लुकि ३/३/३५

चेक्रीयितस्य लुकि सति ऋमतो धातो अभ्यासस्य री आगमो भवति, रि रेफौ च, नरीनर्ति, नरिनर्ति, नर्नर्ति, नृती गात्र विनिमये, य शब्दः। सर्वविधिभ्यो लोपविधिर्बलवान् इति परिभाषायाः पूर्वम् वा चेक्रीयित इति लुक्, ततः प्रत्ययलोपे प्रत्ययलक्षणमिति वचनात् द्विर्व, लुग्लोपे न प्रत्ययकृतमित्येतच्च नोपतिष्ठते, नञानिर्दिष्टमनित्यमिति वचनात्। कृते द्विर्वचने, अनेन री, रि, र इत्येते चर्करीतम्। परस्मैपदमिति वचनात् वर्तमाना ति, रेफादकार उच्चारणार्थः अन्वि, अदादेर्लुक्, नामिनश्चोपधेति गुणः धुट्, धुटोधुटि सवर्णे परे अधुडिति

विशेषस्स्यात्। लोकोपचाराद्रकारलोपः णत्वञ्चात्र न भवति। अपि शब्दात् ऋमत इति किम्? चर्कर्ति, कृ विक्षेपे अत्यर्थम् किरति, य शब्दः, पूर्ववल्लुक्, द्विर्व, ह्रस्वः, दीर्घोऽनागमेति दीर्घः, अन्यत् पूर्ववत्।

● अलोपे समानस्य सन्वल्लघुनि चण्परे ३/३/३६

कार्यातिदेशोऽयम्, अलोपः नलोपः, सन् इव सन्वत्। चण्परो यस्मादिनः स चण्परः। समानस्य समानसंज्ञकस्य वर्णस्य, अलोपे सति लोपाभावे सति, लघुनि धात्वक्षरे इनि चण्परेऽक्षरे अभ्यासस्य सन्वत्कार्यम् भवति, सनि यदुक्तं कार्यम् तत् इनि चण् परे भवतीत्यर्थः। चण्परो यस्मादिनः तस्मादिनि परे। इन् प्रत्ययः अन्यपदार्थः। नह्यत्र तं विना चण् भवति। अचीकरत्, अपीपठत्। डुकृञ्, करणे, पठ व्यक्तायां वाचि। कृतवन्तम्, एवं पठितवन्तम्। अस्योपधेति वृद्धिदीर्घौ। दि, श्रि द्रु स्रू कमीति चणः कारितलोपः, इन्यसमानेति ह्रस्वः, इनिकृतं स्थानिवदिति। कृञ्पठौ द्विरूच्येते, अनेन सन्वत्कार्यम्, तेन सन्यवर्णस्येति इत्वम्।

● [1]दीर्घो लघोः ३/३/३७

वा विराम, स इति दस्य तः अलीलवत्, अबीभवत्, लूञ छेदने भू सत्तायाम्, लुनन्तं प्रयुंक्तवान् एवं भूतवन्तम्, इन्, वृद्धिः, दि, चण्, कारित लोपः, पूर्ववत् ह्रस्वः, सन्वद्भावात् इवर्णस्य जान्तस्थेति उकारस्य ईत्वम्, दीर्घोलघोः, अलोपे समानस्येति किम्?. अचकथत् अददृशत्। कथामाख्यत्, दृशदमाख्यत्, इन्कारितं चेति इन्, इनि लिङ्गस्येति अन्त्यस्वरादि लोपः, दि, चण्, कारितलोपः, द्विर्व यत्र इनि परे इनो लोपः, तत्र समान लोपत्वात्, सन्वद्भावो न प्राप्नोति इति वक्तव्यः। एवमुत्तरसूत्रेऽपि। अवीवदत्, वदव्यक्तायां वाचि उदितवन्त प्रयुङ्क्तवान्, इन् दीर्घः, वादितवन्तम् प्रयुङ्क्तवान् इति पुनः इन्पूर्वस्य कारितस्यलोपः, दि, चण्, अत्र संयोगे गुरूरिति अकारो गुरूः। चण् पर इति किम्? अहं पपाच। उत्तमैकवचनम्, दीर्घोलघोः, पूर्वसूत्रमनुवर्तते, समानस्य समानसंज्ञकस्य वर्णस्य अलोपे सति लोपाभावे सनि लघुनिधात्त्क्षरे इनि चण् परे अभ्यासस्य लघोः, लघ्वन्तस्य दीर्घोभवति।

---

१ दीर्घो लघोरिति सूत्रं पूर्व सूत्रस्यैवांश इति प्रतीयते दुर्गवृत्तौ तु अस्य पृथक्त्वेन उल्लेखः, किन्तु अत्र वृत्तौ अस्योल्लेखः पृथक् रूपेण उचितं नास्ति।

अदीपचत्। अजुहवत्। लघोरिति किम्? अतित्रपत्, त्रैङ् पालने, सन्ध्यक्षरान्तानामित्यात्वम्। त्राणवन्तं प्रयुङ्क्तवान्। इन् , अर्ति ह्री ब्लीति पकारागमः, दि, चण्, कारितलोपः, इन्यसमानेति ह्रस्वः, द्विर्व, पूर्वेण, इत्वम् लघुनीति किम्? अररक्षत्, अलोपे समानस्येति किम्? अचकथत्।

● अत्वरादीनाञ्च ३/३/३८

अ इत्येतल्लुप्तप्रथमैक वचनम्, इनि, चण् पर इत्येव, त्वरादीनामभ्यासस्य य अन्त्यः तस्य इनि चण् परे अकारदेशो भवति। अकारस्य अकारविधानं सन्वत्, इत्वम्, दीर्घञ्च बाधते। ञित्वरा संत्रासे, प्रथ प्रख्याने, म्रद मर्दने, स्मृ चिन्तायाम्, दृ भये, स्तृञ् छादने, मृष बाधने, इत्येते त्वारादयः। अतत्वरत्, अददरत्, अतस्तरत्, अममृषत् तूर्णवन्तं प्रयुङ्क्तवान्, एवम् प्रथितवन्तम्, म्रदितवन्तम्, स्मृतवन्तम्,, दीर्णवन्तम्, स्तीर्णवन्तम्, मृषितवन्तम्, इन् अस्योपधेति दीर्घो वृद्धिश्च। त्वरि, प्रथि, दृ स्त्र्यादीनाम् मानुबन्धानां ह्रस्वः, चण् कारित लोपः। इन्यसमानेति ह्रस्वः। द्विर्व, शिट्परेऽघोषः अनेन अभ्यासस्य अकारादेशः। वेष्ट चेष्टयोः अभ्यासस्य अकारादेशो वेष्यते। अववेष्टत्, अविवेष्टत्, अचचेष्टत्, अचिचेष्टत्, वेष्ट वेष्टने, चेष्ट चेष्टायाम्, वेष्टितवन्तं प्रयुङ्क्तवान्। एवं चेष्टितवन्तम्। चण्, द्विर्व, ह्रस्व इति ह्रस्वः, एकारस्य इकारः, तस्य वक्तव्याद्वा अकारादेशः।

● गणेरी च ३/३/३९

गणेरभ्यासस्य इकारादेशो भवति, इत्वञ्च इनि चण् परे अजगणत्, अजीगणत्, गणसङ्ख्याने, चुरादित्वादिन्, अस्यच लोपः, कारित लोपः, द्विर्व अनेन अकारादेशः, ईत्वञ्च।

● इतो लोपोऽभ्यासस्य ३/३/४०

अधिकारोऽयम्, इतस्सूत्रादारभ्य अभ्यासस्य च लोपो भवतीत्यधिक्रियते। आपादपरिसमाप्तेरयमधिकारः, इतो ग्रहणमधिकारत्व द्योतनार्थम्। पुनरभ्यासग्रहणं सर्वस्याभ्यासस्य लोपार्थम्, अन्यथा वर्णान्त्यस्य विधिरिति वचनाद् अभ्यासस्यान्त्यस्य लोपस्स्यात्।

● सनि मीमादारभलभशकपतप दामिस्स्वरस्य ३/३/४१

मीञ् हिंसायाम्, डुमिञ् प्रक्षेपणे इति वा। डुमिञिति स्वरान्तानां सनीति कृते दीर्घे मी इति रूपम् भवति, मा इति माने वा, माङ्माने, मेङ् प्रणिधान इति वा त्रयाणां ग्रहणम्। दा इति दा संज्ञकानाम्, मीमादा इत्येतेषां तथा रभ लभ रप् डु लभष् प्राप्तौ, शक्लृ शक्तौ, शक गतौ वा, पत्लृ गतौ पद गतौ इत्येतेषां च यः स्वरस्तस्य सनि परे इसादेशो भवति, अभ्यासस्य च लोपः , मित्सति, प्रमित्सति, सित्सति, सित्सते, प्रमित्सते, दित्सति दित्सते, धित्सति धित्सते, मीञ् हिंसायाम्। डुमिञ् प्रक्षेपणे, प्र पूर्वः, मा माने, माङ् माने, मेङ् प्रणिधाने, डुदाञ् दाने, डुधाञ् दान धारणयोः। मातुमिच्छतीत्यादि वाक्यम्। सन्, डुमिञ् स्वरान्तानां सनीति दीर्घः, द्विर्व, अनेन इस्, अभ्यास लोपः, सस्य से सार्वधातुके त इति सस्य तः। आरिप्सते, आलिप्सते, शिक्षति, पित्सति, पित्सते, रभ राभस्ये, आङ्पूर्वः आरब्धुमिच्छति, एवम् आलब्धुं, शक्तुम्, पतितुम्, पत्तुमिति सन्, द्विर्व अनेन स्वरस्य इस्, अभ्यासलोपः। स्को संयोगाद्योरिति स लोपः, पति, सनि वेट्, अघोषेष्वशिटामिति भस्य पः, दस्य तः षत्वम्। सनीति किम्? मास्यति मीनातिमिनोतिदीङामिति मीञ आत्वम्। सेटिसनिपतेर्नेष्यते, पिपतिषति। कथम् अमीमपत्? मीञ्हिंसायाम्, मीनवन्तम् प्रयुङ्क्तवान्, इन्, मीनाति मिनोतीत्यात्वम्। अर्ति ही ब्लीति पकारागमः, दि चण्, कारित लोपः, इन्यसमानेति ह्रस्वः, स्थानिवद्भावात् मी द्विर्व, ह्रस्वः दीर्घोलघोः, अत्रालोपे समानस्येत्यनेन सन्वद्भावाभ्यासलोपौ प्राप्नुतः , तौ कस्मान्न भवतः? उच्यते मी इत्यस्य रूपस्य सनि यदुक्तं तत् स्थानिवद्भावात् मीत्यस्यैवातिदेष्टुं युक्तम्, इदं तु इनिकृते शब्दान्तरं जातम्, कथमिह सन्वद्भावेन अभ्यासलोपः स्यात्, हिंसायामर्थे राधेस्स्वरस्य इत्वं वक्तव्यम् अभ्यास लोपश्च। रित्सति, राध साध संसिद्धौ, प्रति पूर्वः प्रति राद्धुमिच्छतीति सन्, द्विर्व, स्वरस्य इस्, अभ्यासलोपः, स्कोस्संयोगेति स लोपः, पूर्ववद् धस्य तः। हिंसायामिति किम्? आरिरत्सति, राधेः आङ्पूर्वः, आराद्धुमिच्छतीति सन्, द्विर्व, सन्य वर्णस्येति इत्वम्।

● आप्नोतेरी ३/३/४२

आप्लृ व्याप्तावित्यस्य सनि परे ईत्वं भवति, अभ्यासस्य च लोपः

ईप्सति, आप्तुमिच्छति, सन्, आप्स इति स्थिते स्वरादेर्द्वितीयस्य प्सः द्विरूच्यते, अनेन आकारस्य ईत्वम्, अभ्यासलोपश्च। सनीति किम्? प्राप्स्यति। आप्लृ व्याप्तौ प्र पूर्वः, स्यति। ज्ञापेः ऋधेश्च स्वरस्य सनि परे यथासङ्ख्यमीकारादेशः, ईरादेशश्च वक्तव्यः, अभ्यासलोपश्च सनि परे यथासङ्ख्यम्। ज्ञा अववोधने, ज्ञानवन्तं प्रयोक्तुमिच्छति, इन्, अर्तिह्रीब्लीति पकारागमः मानुबन्धानां ह्रस्वः, ज्ञापि इति स्थिते, ऋधुवृद्धौ, अर्धितुमिच्छति, सन्, सन्येतौ वेटौ, अघोषेष्वशिटामितिधस्यतः, ज्ञापिस, रित्स इति स्थिते ज्ञापेराद्यस्य द्विर्व, सन्, ऋत्स इत्यत्र द्वितीयस्य वक्तव्यम्, ज्ञापेरकारस्य ईत्वम्, ऋत्स इत्यत्र ऋकारस्य ईट्, अभ्यासलोपः, इट्पक्षे त्वेतन्नेष्यते। जिज्ञापयिषति, अर्दिधिषति। ज्ञपि ऋधि इति स्थिते, सन् इट गुणः, ए अय् ननबदरेति निषेधात् अर्धिरित्यस्य धिशब्दो द्विरूच्यते, द्वितीयचतुर्थेति दस्यधः।

● दन्भेरिच्च ३/३/४३

दन्भेस्स्वरस्य ईत्वं भवति सनि परे इकारादेशश्च, अभ्यासलोपश्च। धीप्सति, धिप्सति, दन्भु दम्भेः, दम्भितुमिच्छति, सन्, द्विर्व, अनेन स्वरस्य ईत्वम् इत्वे च, अभ्यासलोपः, तृतीयादेर्घढधभेति दस्यधः, वक्तव्यादनुषङ्ग-लोपः, अघोषेष्वशिटामिति भस्य पः, इट् पक्षे च इत्वमीत्वञ्च नेष्येते, दिदम्भिषति।

● दिग्दयतेः परोक्षायाम् ३/३/४४

दयतेः दीङ् रक्षणे, इत्यस्य परोक्षायाम् दिग्यादेशो भवति, दिग्ये, दिग्याते, दिग्यिरे, दीङ् रक्षणे, ए आते इरे, द्विर्व, अनेन दिग्यादेशः, अभ्यास-लोपः, अवर्णस्येति यत्वम्, परोक्षायामिति किम्? दयते, अन्वि, ए अय् दयतेरिति दयदान गतिरक्षण इत्यस्य न ग्रहणम्, आम्प्रत्ययेन परोक्षायां व्यवहितत्वात्। दयाञ्चक्रे, आमिदयीत्याम्, आमः कृञ्, द्विर्व, देङ् इति न कृतम्, वैचित्र्यार्थम्।

भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तौ आख्यातप्रकरणे
तृतीयः पादः।

आख्यातप्रकरणे चतुर्थः पादः

• सपरस्वरायाः सम्प्रसारणमन्तस्थायाः ३/४/१

सह परेणस्वरेण वर्तते या अन्तस्था सा सपरस्वरा, परिभाषेयम्, परेण स्वरेण सहितायाः अन्तस्थायाः स्थाने सम्प्रसारणं भवतीति परिभाष्यते। इज्यते, गृह्यते, उह्यते। ननु यदि सस्वरायास्स्थानेस्यात्, सन्धौ कृते तदेव रूपं संजातमिति किं सम्प्रसारणेन कृतं स्यात्। अतस्सम्प्रसारणविधानसामर्थ्यादव्याकृतसन्धयः प्रयोगास्स्युः, परेणैव सस्वरत्व सिद्धमिति परग्रहणं प्रयोजनशून्यमित्याहुः।

• ग्रहिज्यावयिव्यधिवष्टिव्यचिप्रच्छिव्रश्चिभ्रस्जामगुणे ३/४/२

अविद्यमानो गुणो यत्र प्रत्यय इति विग्रहः। ग्रह उपादाने, ज्या वयो हानौ, वेञ् तन्तु सन्ताने, तस्य वेञोवयिः, व्यध ताडने, वशकान्तौ, व्यच सम्भवे, प्रच्छ ज्ञीप्सायाम्, ओ व्रश्चूच्छेदने, भ्रस्ज पाके, एषामन्तस्थायास्सम्प्रसाणं भवति अगुणे प्रत्यये परे। गृह्यते, जीयते, ते, सार्वधातुके यण्। अनेन सम्प्रसारणम्, रेफस्य ऋकारः, यकारस्य इः, नाम्यन्तानां यणायीति दीर्घः। ऊयतुः, ऊयुः, वेञ् तन्तु सन्ताने, अतुस्, उस्, वेञोवयीति वयिः, अनेन सम्प्र, द्विर्व, समानदीर्घः। विध्यते, उश्यते, विच्यते, पृच्छते, वृश्चते, भृज्ज्यते, व्यध ताडने, वश कान्तौ, व्यच सम्भवे, प्रच्छ ज्ञीप्सायाम्, ओ व्रश्चू छेदने, भ्रस्ज पाके, ते सार्वधातुके यण्, सम्प्र, धुटां तृतीय इति वचनात्। लृतुलसाः दन्त्याः इति स्थानसावर्ण्यात्, भ्रस्जे, सस्य तृतीयो दः, तवर्गश्चटवर्गेति दस्य जः, गृह्णाति, जिनाति, विध्यति, विदति, पृच्छति, व्रश्चति, भृज्जति, नाक्र्यादेः, दिवादेर्यन्, क्वचिदन्विकरणः, जि इत्यस्य तद्दीर्घमन्त्यमिति दीर्घे कृते, प्वादीनां ह्रस्व इतिह्रस्वः। जरीगृह्यते, जेजीयते, वेविध्यते, वेविद्यते, परीपृच्छ्यते, वरीवृश्च्यते, बरीभृज्ज्यते। अत्यर्थम् गृह्णाति, जिनाति, विध्यति, विचति, पृच्छति, वृश्चति, भृज्जतीति। य शब्दः, सम्प्रसारणम्, नाम्यन्तानां यणायीति दीर्घः, जि इत्यस्य दीर्घः, द्विर्व, ऋमतोरी, इति री आगमः, गुणश्चेक्रीयित इति गुणः, गृहीतः–गृहीतवान्, विद्धः–विद्धवान्, पृष्टः– पृष्टवान्, वृक्षः–वृक्षवान्,

भृष्टः–भृष्टवान्, गृह्यतेस्म–गृह्णातिस्म, विध्यतेस्म–विध्यतिस्म, पृच्छतेस्म–पृच्छतिस्म, वृश्चतेस्म–वृश्चतिस्म, भृज्यतेस्म–भृज्यतिस्म, इति विग्रहे कृते निष्ठेति क्तक्तवतू, सम्प्रसारणम्, इटोदीर्घो ग्रहेरिति दीर्घः, व्यधः घढधभेति इति तस्य, धः, धुटां तृतीय इति धस्यदः, पृच्छेः छषोश्चेति शस्यकः, ल्वाद्योदनुबन्ध इति निष्ठानत्वम्, कमगमीति भ्रस्जेस्सलोपः, भृजादीनामिति जस्य षः, सि, अन्त्वसन्तस्येति दीर्घः। जीनः–जीनवान्, उषितः–उषितवान्, विचितः–विचितवान्, ज्या वयो हा, वश का, व्यच स, जिनातिस्म, विष्टिस्म, विचतिस्म, गत्यर्थाकर्मकेति क्तः, निष्ठेति क्त क्तवन्तू, सम्प्रसा, तद्दीर्घमन्त्यमिति दीर्घः, पूर्ववत् नत्वम् इट्। अगुण इति किम्? ग्रहीता। इट्, पूर्ववद्दीर्घः। प्रश्न इत्यत्र सम्प्रसारणं न भवति, प्रश्नाख्यानयोरिति ज्ञापकात्। प्रच्छयाचिविच्छिप्रच्छीति नङ्, च्छवोः शूटाविति छस्य च।

● स्वपिवचियजादीनां यण् परोक्षाशीःषु ३/४/३

यज् आदिः येषांते यजादयः, ततो द्वन्द्वः, अगुण इत्येव, ञिष्वप् शयने, वच भाषणे इत्यनयोः तथा यजादीनाञ्च, यज देवतापूजासङ्गतिकरण दानेषु, डुवप् बीजसन्ताने, वह प्रापणे, व्येञ् संवरणे, ह्वेञ् स्पर्धायाम्, वेञ् तन्तु सन्ताने, वद व्यक्तायां वाचि, वस निवासे, टुओश्वि गति वृद्ध्योः, इत्येतेषां या अन्तस्था तस्यास्सम्प्रसारणं भवति, यणिपरे, परोक्षायामगुणायाम् आशिषिच। अगुणायां परतः आदि शब्दः यजिना संवध्यते न स्वपि वचिभ्याम्, स्वपिग्रहणं ह्यपार्थकं स्यात् असावपि हि वच्यादिः, यथासंङ्ख्यमनुदेशस्समानामित्यस्या अनित्यत्वात् यथासंख्याभावः। यणि तावत्–सुप्यते, उच्यते, इज्यते, उप्यते, उह्यते, संवीयते, आहूयते, ऊयते, उद्यते, उष्यते, शूयते। ते, यण्, सम्प्रसाएणम्, नाम्यन्तानां यणायीति दीर्घः। परोक्षायाम्–सुषुपतुः, सषुपुः, एवं ऊचतुः ईजतुः, ऊपतुः ऊहतुः संविव्यतुः, जुहुवतुः, ऊयतुः, ऊदतुः, ऊषतुः। अतुस्, उस्, सम्प्र, द्विर्व, समानदीर्घः, विशब्दस्य च इवर्णस्येति यः। आशिषि–सुप्यात्, इज्यात्, उप्यात्, उह्यात्, संवीयात्, आहूयात्, ऊयात् उद्यात्, उष्यात्, शूयात्। पूर्ववद् दीर्घः। सुप्तः–सुप्तवान्, उक्तः–उक्तवान्, इष्टः–इष्टवान्, उप्तः–उप्तवान्, ऊर्णः–उर्णवान्, संवीतः–संवीतवान्, आहूतः–आहूतवान्, उतः–उतवान्, उदितः–उदितवान्, उषितः–उषितवान्, शुनः–शूनवान्। स्वपिवचीति सम्प्र, ञ्यनुबन्धमतीति क्तः, स्वपितिस्मेति,

निष्ठेति क्तः क्तवन्तू प्रत्ययः। उच्यतेस्म, वक्तिस्म, इज्यतेस्म, यजतिस्म, उप्यतेस्म वपतिस्म, उह्यतेस्म, वहतिस्म, संवीयतेस्म, संव्ययतिस्म, आहूयतेस्म, आह्वयतिस्म, ऊयतेस्म, वयतिस्म, उद्यतेस्म, वदतिस्म, उष्यतेस्म, वसतिस्म, शूयतेस्म, श्वयतिस्म, क्त क्तवन्तू, सम्प्रसारणम्, वचेः चवर्गस्य किः, यजेः भृजादीनां षः, वहेः होढः इति हस्य ढः, घढधभेभ्यः इति तस्य धः। चवर्गस्य षटवर्गेति धस्य ढः, ढे ढलोपोदीर्घश्चोधाया इति दीर्घः। व्याह्वाश्वानां कृते सम्प्रसारणे तद्दीर्घमन्त्यमिति दीर्घः, ल्वाद्योदनुबन्धेति नत्वम्, उत इत्यत्र दीर्घो न भवति, वः क्वावितिनियमात्। वसेः निष्ठायांचेति इट्, शासिवसीति षः, अगुण इति किम्? सुस्वाप, अट्, द्विर्व, परोक्षायामभ्यासस्येति सम्प्रसारणम्। अप्सीष्ट।

• परोक्षायामभ्यासस्योभयेषाम् ३/४/४

उभयेषाम्–ग्रहादीनां स्वपादीनाञ्चाभ्यासस्य अन्तस्थायाः परोक्षायां परस्यां सम्प्रसारणं भवति। ग्रहप्रच्छिभ्रस्जामभ्यासस्य सत्यसति वा सम्प्रसारणे नास्तिविशेषः, वशेरस्तिविशेष इति केचिदाहुः, तदसारम्। अकृते हि व्रश्चेः रेफस्य नसम्प्रसारणेसम्प्रसारणमिति निषेधात्। सगुणार्थम् चेदम्। अगुणे हि कृते धातोः सम्प्रसारणे अभ्यासस्यैतत्सञ्जातमिति किमनेन योगेन कृतं स्यात्। ग्रहादीनाम्–जिज्यौ–जिज्यिथ, उवाय–उवयिथ, विव्याध–विव्यधिथ, उवाच–उवचिथ, विव्याच–विव्यचिथ, वव्रश्च–वव्रश्चिथ। जॄ वयोहानौ, वेञ् तन्तु सन्ताने, व्यध ताडने, वच परिभाषणे व्यच सम्भवे, ओव्रस्चू छेदने, अट्, यण्, वेञोवयिः, द्विर्व, अनेन अभ्यासस्य सम्प्रसारणम्। आकारादण औ सन्ध्यक्षरे चेत्यालोपः थलि परे कृसृभृवृ इति नियमात् इट इटि परे इटि चेत्यालोपः। स्वपादीनाम् सुस्वाप–सुषुपिथ, उवाच–उवचिथ इयाज–इयजिथ, उवाच, उवाह, विव्याय, उवास, उवसिथ,। ञिष्वप् शयने, वच भाषणे, यज् दे, डुवप् वप, वह प्रा, व्येञ् संव, वस् नि। अट्, यण्, पूर्ववन्नियमात् इट्, द्विर्व, सम्प्रसारणम्, अस्योपधेति वृद्धिः ऐकारः, ऐ आय्। परोक्षायामिति किम्? विवक्षति, वच भा, वक्तुमिच्छति,सन्।

• वृषेश्च ३/४/५

वृषेरभ्यासस्य अन्तस्थायास्सम्प्रसारणं भवति, परोक्षायां परस्याम्। विव्यथे, विव्यथाते, विव्यथिरे, वृष भय चलनयोः।

• न वेञ्श्व्योरगुणे च ३/४/६

परोक्षायामित्येव वेञ् तन्तु, टु ओश्वि गति, इत्यनयोः अन्तस्थायाः परोक्षायामगुणायां परस्यां सम्प्रसारणं न भवति। च शब्दात् सगुणायाम् अभ्यासस्य यजादित्वात्प्राप्तम्। ववतुः, ववुः। वेञ् तन्तु सन्ताने, अतुस् उस्, द्विर्व, आ लोपे सार्वधतुक इत्यालोपः शिश्वियतुः, शिश्वयुः, टु ओ श्वि गतिवृद्ध्योः, स्वरादाविवर्णेति इय्, आभ्यासस्य खल्वपि, ववौ, शिश्वाय, अट्, द्विर्व, आकारादण औ सन्ध्यक्षरे चेत्यालोपः। अस्योपधेति वृद्धिः, अत्र परोक्षायामभ्यासस्येति सम्प्रसारणं प्राप्तम्।

• ष्वपि स्यमि वेञ्यां चेक्रीयते ३/४/७

ञिष्वपि शयने, स्यमु स्वन ध्वन शब्दे, व्येञ् संवरणे इत्येतेषाम् अन्तस्थायाः सम्प्रसारणं भवति चेक्रीयते परे। सोषुप्यते, सेसिम्यते संवीयते अत्यर्थम् स्वपिति, स्यमति, व्ययति इति, य शब्दः, सम्प्रसारणम्, द्विर्व, गुणश्चेक्रीयित इतिगुणः, नाम्यन्तानां यणायीति दीर्घः, चेक्रीयित इति किम्? स्वपिति, स्यमति, व्ययति, सार्वधातुके च रूधादेरिति इट्।

• स्वापेश्चणि ३/४/८

स्वापेरिन्नन्तस्य अन्तस्थायाश्चणि परे सम्प्रसारणं भवति, असुषुपत्, सुप्तवन्तं प्रयुङ्क्तवान्, इय्, अस्योपधेति दीर्घः, दि, चण्, कारितलोपः सम्प्रसारणम्, द्विर्व, दीर्घोलघोः। चणि इति किम? सुप्यते, ष्वपिरिन्नन्तः, ते, सार्वधातुके यण्, कारितलोपः। इनं विना स्वपेः, चण्, नामीति इनो निर्देशः, केवलस्य इना नहि तस्य स्वापेश्चणिति वचनात् चण् मा भूदिति।

• ग्रह स्वपि प्रच्छां सनि ३/४/६

ग्रह उपा, ञिष्वप् श, प्रच्छ ज्ञी, एषामन्तस्थायाः सनि परे। सम्प्रसारणंभवति जिघृक्षति, सुषुप्सति, पिपृच्छिषति, ग्रह उ, ञिष्वप् श प्रच्छ ज्ञी, गृहीतुमिच्छति, स्वप्तुमिच्छति, प्रष्टुमिच्छति इति सन् स्मिङ्पूङ्रञ्ज्वशिति इट्, सम्प्र, होः तृतीयादेर्घढधभेति गस्य घः, षढोकस्स इति कः, द्विर्व, कवर्गस्य चवर्ग इति घस्य झ, द्वितीयचतुर्थेभ्योरिति झस्य जः, सन्यवर्णस्येति इत्वम्, सनीति किम्? ग्रहीता, सुप्ता, प्रष्टा, श्वस्तनीता, इट् इटोदीर्घः छशोश्चेति षः।

● चायः की चेक्रीयतेः ३/४/१०

चायृ पूजानिशामनयोः, इत्वम् चेक्रीयिते परे की आदेशो न भवति चेक्रीयते। अत्यर्थम् चायते, य शब्दः, कीरादेशः, द्विर्व, चेक्रीयित इति किम्? चायतेः दीर्घोच्चारणमुत्तरसूत्रेऽपि वाच्यम्।

● प्यायः पी परोक्षायाम् ३/४/११

प्यायी, ओप्यायी वृद्धौ, इत्यस्य चेक्रीयते परे परोक्षायां परस्यां पी आदेशो भवति। पेपीयते, अत्यर्थम् प्यायते, य शब्दः, पी आदेशः, द्विर्व, आपिप्ये, आपिप्याते, आपिप्यिरे, ए, आते, इरे। पी आदेशः, द्विर्व, य, उवर्णस्येति यः, चेक्रीयितं परोक्षायमिति किम्—प्यायते।

● श्वयतेर्वा ३/४/१२

चेक्रीयित परोक्षायामित्येव, टुओश्वि गतिवृद्ध्योरित्यस्य अन्तस्थायाश्चेक्रीयिते परे परोक्षायां च परस्यां वा सम्प्रसारणं भवति। शोशूयते, अत्यर्थम् श्वयति, य शब्दः, सम्प्रसारणम्, द्विर्व, गुणश्चेक्रीयित इति गुणः, नाम्यन्तानामिति दीर्घः। पक्षे शेश्वीयते, शुशाव, शुशुवतुः, अट् अतुस्, सम्प्र, द्विर्व, अस्योपधेति वृद्धिः, स्वरादाविवर्णेति उव्, पक्षे शिश्वाय, शिश्वियतुः। स्वरादाविवर्णेतिइय्।

● कारिते च संश्चणोः ३/४/१३

श्वयतेः अन्तस्थायाः सम्प्रसारणं वा भवति, कारिते सन्परे, चण् परे च। शुशावयिषति, श्वयन्तं प्रयोक्तुमिच्छति, इन्, सन्, सम्प्र, अस्योपधेति वृद्धिः। इनिकृतंस्थानिवदिति शु द्विर्व, इट्, गुण, अपवादविषये उत्सर्गो न प्रवर्तते, तेन श्वि इन, इतिस्थिते, सनः पूर्वमस्योपधेति वृद्धिः भवति। अपवादो हि सम्प्रसारणम्, वृद्धिस्तूत्सर्गः, कृते तर्हि सम्प्रसारणे वृद्धिर्नभवति। सकृद्गतौ विप्रतिषेधः यद्बाधते तद्बाधितमेव, पुनः प्रसङ्गविज्ञानाद् भविष्यति। पक्षे शिश्वावयिषति। पूर्ववत् इन् चणि, अशूशवत्, शूनवन्तं प्रयुङ्क्तवान् इन्, दि, चण्, सम्प्र, वृद्धिः, कारितलोपः, इन्न्यसमानेति ह्रस्वः। स्थानिवद्भावात् शु द्विर्व, दीर्घोलघोः, पक्षे, अशिश्वयत्। संश्चणोरिति किम्? श्वाययति।

● ह्वयतेर्नित्यम् ३/४/१४

अन्तस्थायाः नित्यं सम्प्रसारणं भवति, कारिते सन् परे चण् परे च जुहावयिषति। ह्वयन्तं प्रयोक्तुमिच्छति, इन्, सन्, सम्प्र, वृद्धिः, स्थानिवद्भावात् हु, द्विर्व, होजः, इट्, गुणः, यणि, अजुहवत्, हूनवन्तं, प्रयुङ्क्तवान्, इन्, दि, यण्,सम्प्र, वृद्धिः, कारितलोपः, इन्न्यसमानेति ह्रस्वः, द्विर्व, दीर्घोलघोः।

● अभ्यस्तस्य च ३/४/१५

अभ्यस्तस्य कृते द्विर्वचनस्य ह्वयतेः अन्तस्थायास्सम्प्रसारणं भवति। जुहाव, ह्वेञ् स्पर्धायाम्, अट्, द्विर्व, अनेन धात्वाभ्यासयोस्सम्प्रसारणम्, वृद्धिः, जोहूयते। अत्यर्थम् हूयते, य शब्दः, द्विर्व, सम्प्र, गुणश्चेक्रीयित इति गुणः नाम्यन्तानां यणायीति दीर्घः। जोहूयते। स्वरान्तानां सनीति दीर्घः।

● द्युतिस्वाप्योरभ्यासस्य ३/४/१६

द्युति दीप्तावित्यस्य स्वापेश्च इन्नन्तस्य योऽभ्यासस्तस्य अन्तस्थायाः सम्प्रसारणं भवति, दिद्युते, परोक्षा, ए, द्विर्व, सम्प्र, देद्युत्यते, अत्यर्थम् द्योतते, य शब्दः, द्विर्व, सम्प्र, गुणः, चेक्रीयिते इति गुणः, दिद्योतिषते, द्योतितुमिच्छति, सन्, सुष्वापयिषति, स्वपन्तं प्रयोक्तुमिच्छति, अस्योपधेति, दीर्घः, सन्, ण्य, द्विर्व, सम्प्रसारणम्, अभ्यासस्येति किम्? द्योतते, स्वाप्यते, अन्वि, स्वापेः, सार्वधातुके यण्, कारितलोपः।

● न सम्प्रसारणे सम्प्रसारणम् ३/४/१७

धातोः सम्प्रसारणं कृते सति पुनः सम्प्रसारणं न भवति। विध्यते, विच्यत। व्याध ताडने, व्यचसम्भवे, ग्रहिज्यावयीतिसम्प्र, पुनः इकार सहितस्य वकारस्य न भवति यद्यपि व्यधिव्यचीति विकृतौ, तथाप्येकदेशविकृतमनन्यवद्भवतीति वचनात् विकृतयोरपितयोः प्राप्नोति।

● वशेश्चेक्रीयिते ३/४/१८

वश कान्तावित्यस्य चेक्रीयिते परे सम्प्रसारणं न भवति, ग्रहिज्यावयीति प्राप्तम्, वावश्यते, अत्यर्थम् वष्टि, य शब्दः, चेक्रीयित इति किम्? उशन्ति ग्रहिज्यावयीति सम्प्र।

• प्रच्छादीनां परोक्षायाम् ३/४/१६

प्रच्छ ज्ञी, ओव्रश्चू छेदने, भ्रस्ज पा, एषां परोक्षायां परस्यां सम्प्रसारणं न भवति, पप्रच्छतुः। वव्रश्चतुः, बभ्रस्जतुः। परोक्षायामिति किम्? परीपृच्छ्यते, य शब्दः, ग्रहिज्यावयीति सम्प्रसारणम्, आकार ऋवर्णस्य, ऋमतोरी।

• सन्ध्यक्षरान्तानामाकारोऽविकरणे ३/४/२०

सन्ध्यक्षरमन्ते येषांते सन्ध्यक्षरान्ताः, सन्ध्यक्षरान्तानां धातूनामा-कारादेशो भवति अविकरणे, विकरणरहिते प्रत्यये परे। दाता, दाता, दाता, देङ् रक्षणे, दैप् शोधने, दो अवखण्डने, सर्वेषामनेनात्वम्। सन्ध्यक्षराणामिति किम्, चेता, स्तोता, चिञ् चये, स्टूञ् स्तुतौ। गुणेऽपि कृते भवत्यात्वम्, सन्ध्यक्षरस्य लाक्षणिकत्वात्। अविकरण इति किम्? ग्लायति त्रायते, ग्लै हर्ष, त्रैङ् पालने, ते, ति, अन्वि, ऐ आय्। अविकरणे इति नायं पर्युदासः, तस्मिन् हि सति विकरणसदृशे प्रत्यये परे आत्वं स्यात्। ततश्च सुग्ल इत्यत्र ग्लै धातोः वुण्तृचाविति तृचि सति आत्वे कृते सुग्लात इति अनिष्टं भवति। प्रसज्यप्रतिषेधे सादृश्याभवात् निमित्तमन्तरेण आत्वमादौ भवति ततः आकारान्तनिमित्तः उपसर्गेत्वातो ड इति डः प्रत्ययः सिद्धो भवति।

• न व्ययतेः परोक्षायाम् ३/४/२१

व्येञः परोक्षाविषये आत्वं न भवति, विव्याय, विव्ययिथ, व्येञ् संवरणे, अट्, अल्, द्विर्व, परोक्षायामभ्यासस्येति सम्प्रसारणम्। अस्योपधेति वृद्धिः, ऐ आय्, इट्। परोक्षायामिति सामान्येनोपादानेऽप्यटलावेव ग्राह्यौ अन्यैरत्र सम्प्रसारणं प्राप्तम्, विशेषानुपलम्भात्। परोक्षायामिति किम्? व्याता।

• मीनाति मिनोति दीङां गुण वृद्धिस्थाने ३/४/२२

गुणश्च वृद्धिश्च ते गुणवृद्धी, तयोः स्थानं गुणवृद्धिस्थानम्, आकारोऽनुवर्तते। मीञ् हिंसायाम्, डुमिञ् प्रक्षेपणे, दीङ् क्षये, एषामात्वं भवति गुण वृद्धिस्थाने प्रत्यये परे, यस्मिन् प्रत्यये गुणः, प्राप्नोति वृद्धिश्च प्राप्नोति स गुणवृद्धिस्थानमुच्यते, माता मास्यति, अमास्यत्, प्रमाता, प्रमास्यति प्रमास्यत्। दाता दास्यते, अदास्यत, श्वस्तनी ता,

भविष्यन्ती—स्यति, स्यते क्रियातिपत्तेः—स्यत्, स्यत। अनेन आत्वम्, अत्र सर्वत्र गुणः प्राप्नोति वृद्धिस्थाने खल्वपि, मापयति, प्रमापयति, दापयति। मीनवन्तं प्रयुङ्क्ते एवं प्रमिण्वन्तम्—मीयमानमिति। अनेन आत्वम्। अर्तिह्रीब्लीति पकारागमः। अत्रास्योपधेति वृद्धिः प्राप्ता। गुण स्थान इति किम्? मीयते, प्रमीयते, दीयते। सार्वधातुके यण्।

● सनि च दीङः ३/४/२३

दीङ् क्षये इत्यस्य सनि परे आत्वं भवति, नाम्यन्तानामनिटामित्यनेन दीङः परस्य सनः अगुणस्थानवत्पूर्वेण आत्वं न सिद्ध्यतीति वचनम्। उपदिदासते, दीङ् क्षये, उप पूर्वः, उपदातुमिच्छतीति सन्, आत्वम्, द्विर्व, सन्यवर्णस्येतीत्वम्। पूर्ववत् सन्नन्तादित्यात्मनेपदम्। सनीति किम्? देदीयते, अत्यर्थम् दीयते, य शब्दः, गुणश्चेक्रीयिते।

● स्मिञ्जिक्रीङामिनि ३/४/२४

स्मिङ् ईषद्धसने, जि जये, डुक्रीञ् द्रव्य विनिमये, इङ, अ, एषामिनिपरे आत्वं भवति, विस्मापयते, विजापयते, विक्रापयते, अध्यापयते, विस्मायमानं प्रयुङ्क्ते, एवं विजायमानम्, विक्रीणवन्तम्, अधीयानमिति इन्, आत्वम्, अर्तिह्रीब्लीति पकारागमः। इनीति किम्? विस्मेता, विजेता, विक्रेता, अध्येता, हेतु भयेऽर्थे, स्मिङ आत्वं स्मर्यते, इन् करणात् भये न भवति कुञ्चिकया विस्मापयति, इन् वृद्धिः, आत्मने पदमपि हेतुभये एवेष्यते, वी ली भी इत्येतेषामिनि परे आत्वं वेष्यते, वापयति, विलापयति, मुण्डो भापयति, आत्वम्। पूर्ववत् पकारागमः। पक्षे—वाययति, विलाययति, मुण्डो भीषयते, वी गति प्रजनयोः, लीञ् श्लेषणे। ञिभी भये, वियन्तं प्रयुङ्क्ते, एवं विलीयमानं, विभ्यन्तम्, इन्, अस्योपधेति वृद्धिः। भियष्षुग्वेति षकारागमः। भी हेतुभयेऽर्थेऽपि ञिभेः आत्वं विकल्पेन स्मर्यते, तेनेह विकल्पेन भवति। मुण्डो भाययति, आत्मनेपदमपि हेतुभय एव सिद्ध्यते। आत्वमपारलौकिकं वक्तव्यम् इनि परे, पायसं संसाधयति, भोक्ष्यते। षिधु संराद्धौ। सिद्ध्यन्तं प्रयुङ्क्ते इन्। उकारस्यात्वम्। अपारलौकिकइति किम्। पायसं सेधयति—विप्रेभ्यो दास्यतीत्यर्थः।

• सृजिऽदृशोरागमोऽकारस्स्वरात्परो धुटि गुणवृद्धिस्थाने ३/४/२५

सृज विसर्गे, दृशिर् प्रेक्षणे इत्येतयोः स्वरात्परः अकारागमो भवति, धुटि गुणवृद्धिस्थाने प्रत्यये परे। स्रष्टा, स्रक्ष्यति, अस्रक्ष्यत्। द्रष्टा, द्रक्ष्यति, अद्रक्ष्यत्। ता, स्यति, स्यत्। षकारागमः, अत्वम्, सृजो भृजादीनां षः,। दृशेः छशोश्चेति षः, षढोःकस्स इति कः। स्रष्टा, स्रष्टुम्, स्रष्टव्यम्। द्रष्टा द्रष्टुम्, द्रष्टव्यम्। सृजति, पश्यति, वुण् तृचाविति तृच्। इच्छार्थेषु एककर्तृकेषु तुम्, सर्जनीयम्, दर्शनीयम् इति तव्यानीयाविति अनीय, अकारागमः, पूर्ववत् षत्वम्, वृद्धिस्थाने, अस्राक्षीत्, अद्राक्षीत्, दि, सिजद्यतन्यामिति सिच्, सिच इति ईत्वम् अकारागमः अस्य चदीर्घः। षत्वकत्वे, अड्व्यञ्जनान्तानामनिटामिति वृद्धिः प्राप्ता, धुटीति किम्। विसर्जयति, प्रदर्शयति .... इन्, नामिनश्चोपधेति गुणः। गुणवृद्धिस्थान इति किम्? सृक्षीष्ट, दृक्षीष्ट, ...य शब्दः, षत्वकत्वे, अद्यतन्याम् आशिषिच इति गुणाभावः, ऋकारोपधस्य धातो अकारागमो वेष्यते धुटि गुणवृद्धिस्थाने परे। स्प्रष्टा स्पर्ष्टा, स्पृश संस्पर्शे, श्वस्तनी, ता, अकारागमः, पक्षे गुणः, छशोश्चेति षः। अस्प्राक्षीत्। अद्यतन्यां दि सिच्, वक्तव्यादकारागमः, अस्यचदीर्घः, व्यञ्जनान्तानामनिटामिति वृद्धिः आर् पूर्ववत् सार्वधातुके, एवं रूचादित्वादिड्विकल्पः, अत्राप्सीत् अतार्प्सीत् अद्राप्सीत्, अदार्प्सीत्, तृप्दृप् संदीपने, दि, सिच्। वा अकारागमः, वृद्धिदीर्घावत्र वक्तव्यौ।

• दीङो योऽन्त्यस्वरादावगुणे ३/४/२६

दीङ् क्षय इत्यस्य स्वरादावगुणे प्रत्यये परे यकारागमोऽसौऽन्त्यो भवति। य इवर्णस्येति यत्वं प्राप्तम्, उपदिदीये, उपदिदीयाते, दीङ् क्षये, उप पूर्वः, यकारागमः, द्विर्व, ह्रस्वः। स्वरादाविति किम्? दिवादेर्यन्। युट्चेति युवुझामित्यनादेशः। मीनातिमिनोतीत्यात्वम्।

• आलोपो सार्वधातुके ३/४/२७

स्वरादावगुण इति धातोराकारस्य स्वरादावगुणे असार्वधातुके परे लोपो भवति, पपतुः पपुः, ददतुः ददुः, पा पाने, डुदाञ् दाने, स्वरविधिस्वर इति द्विर्वचनात् पूर्वम् द्वित्वम्, ततः आलोपः। असार्वधातुक इति किम्?

पेचतुः, पेचुः, डुपचष् पाके अभ्यासलोपः सार्वधातुक... अगुण इति किम्? दानम्,.......... असार्वधातुक इति किम्? यान्ति। या प्रापणे, अन्वि।

• इटि च ३/४/२८

आकारस्य इटि च परे लोपो भवति गुण्यर्थमिदम्, पपिथ, ददिथ। पा पाने, डुदाञ् दाने, परोक्षा, थल्, कृसृभृवृ इति नियमादिट्।

• दामागायतिपिबतिस्थास्यति जहातीनामीकारोव्यञ्जनादौ ३/४/२९

असार्वधातुक अगुण इति वर्तते। दीयते, मीयते। डुदाञ्दाने, मा इति, मा माने, माङ्माने, मेङ्प्रणिधान इति। गायतीति। कै गै शब्दे। गाङ् गताविति गायतीति निर्देशसमार्थ्यात् भावकर्मणोरप्यर्थयोः अत्र सार्वधातुके यण् ईडभावश्च। पा पाने, ष्ठा गतिनिवृत्तौ, षो अन्त कर्मणि, स्तिप्, दिवादेर्यन्, यन्योकारस्येत्यालोपः, ओ हाक् त्यागे, दामागायतिपिबति स्थास्यतिजहातीनामीत्वं भवति असार्वधातुक व्यञ्जनादावगुणे परे। दीयते, धीयते, मीयते, गीयते, स्थीयते अवसीयते, हयते, वर्तमाना, ते, यण् अनेन ईत्वम्। देदीयते, देधीयते मेमीयते, जेगीयते, पेपीयते, तेतिष्ठीयते अवसेसीयते, जेहीयते। अत्यर्थम् ददाति दधाति माति गायति पिबति तिष्ठति, अवस्यति, जहाति, य शब्दः, ईत्वम्, द्विर्व, चेक्रीयित इति गुणः। दामागायतिपिबतिस्थास्यतिजहातीनामिति किम्? दायन्ते व्रीहयः, दाप् लवने, सार्वधातुकेति यण्। व्यञ्जनादाविति किम्? डुदाञ्, परोक्षा, ए, द्विर्व, सन्ध्यक्षरे चेत्यालोपः। अगुण इति किम्? दाता। सार्वधातुक इति किम्? मातः। तस्, अन्वि, अदादेर्लुक्, पिबतीति निर्देशः धातोः रक्षणार्थस्य निवृत्त्यर्थः, तेन पायतीत्यस्य न निर्देशः। क्षै जै संक्षये, इत्यस्य निवृत्त्यर्थः। तेन सायते, जहातीति निर्देशात्,ओहाङ्गतावित्यस्य न भवति, हायते।

• आशिष्येकारः ३/४/३०

दामागायतिपिबतिस्थास्यतिजहातीनाम् एकारादेशो भवति आशिषि, अगुणायां ईत्वं प्राप्तम्। देयात्, मेयात्, गेयात्, पेयात्, स्थेयात्, अवसेयात्, हेयात्। अगुण इति किम्? दासीष्ट, संयोगादेः धातोः अकारान्तस्य स्थावर्जितस्य आशिषि अगुणायामेत्वं वक्तव्यम्। ग्लेयात् वा ग्लायात्,

संयोगादेरिति किम्? यायात्। स्था वर्जितस्येति किम्? स्थेयात्! धातुना संयोगो निषेधयितव्यः। तेनेह न भवति–निर्यायात्।

• अन उस्सिजभ्यस्तविदादिभ्योऽभुवः ३/४/३१

सिच्च, अभ्यस्तञ्च, विच्च, आश्च, ते सिजभ्यस्तविदाः, न भूः अभूः सिचः अभ्यस्ताद् विदेः आकारान्ताच्च परस्य अनः उसादेशो भवति अभुवः,भुवः परस्य न भवति। सिचस्तावत्–अकार्षुः, अद्राक्षुः। डुकृञ्करणे हृञ् हरणे, दृशिर् प्रेक्षणे, अद्यतनी, अन्, सिच्, सिचः परस्मै इति वृद्धिः। दृशेः सृजि दृशोरागमोऽकार इति अकारागमः, अस्य च दीर्घः छशोश्चेति षः षढोकस्स इति कः, अनेन उस्, अभ्यस्तात्–अबिभयुः, अनेनिजुः, अजागरूः। ञिभी भये, निजिर् शौचपोषणयोः जागृ निद्रा क्षये, ह्यस्तनी, अन्, अन्वि, जुहोत्यादेर्लुक्। जुहोत्यादीनां द्विर्व, द्वितीयचतुर्थयोरिति भस्य ब, ह्रस्वः। निजिविजिविशामिति निजेः अभ्यासस्य गुणः, अन्, उस् अभ्यस्तानामुसीति गुणः, अभ्यस्तस्य चोपधायाः इति निजेः गुणाभावः। एवम् ऐयरूः, ऋ सृ गतौ, ह्यस्तनी अन्, अन्वि, जुहोत्यादेर्लुक् जुहोत्यादीनां द्विर्व, अकार ऋवर्णस्य, अर्ति पिपर्त्योश्चेति इत्वम्, अभ्यासस्यासवर्ण इति इय्, अनेन उस्, अभ्यस्तानामुसीति गुणः, अर् स्वरादीनां वृद्धिरादे इति ऐकारः। विदेः–अविदुः ह्यस्तनी अन्, ज्ञानार्थो विदिर्गृह्यते न सत्तार्थः नापि विचारणार्थः, नहि ताभ्यां ज्ञानं भवति आत्मनेपदित्वात्। लाभार्थोऽप्युभयपदी न गृह्यते, अन् विकरणे नपरस्य अनः व्यवधानात्। अयस्तात्, अयुः। अरूः, या प्रापणे, रा दाने, ह्यस्तनी, अन्, उसादेशः आकारस्योसीति आलोपः। आदन्तात्–द्विषोश्च परस्य ह्यस्तन्याः अनः उसादेशो वा वक्तव्यः। अयुः अयान्, अद्विषुः अद्विषन्। अभुव इति किम्? अभूवन् अद्यतनी सिच् इणस्थादापिवति इति लुक्। भुवोवोऽन्तः, अत्रसिचो लुकिकृते प्रत्ययलोपः इतिवचनात् उसादेशः प्राप्नोति इति न भवति। लुग्लोप इत्यतश्च नोपतिष्ठते, कुतः? प्रत्यये हि परे प्रकृते यत्प्राप्तं तदपि निषिध्यते, न तु प्रत्ययात्परस्य यत्प्राप्तं तदपि, इह तु प्रत्ययात् सिचः परस्य अनः यत्कार्यमुक्तं तल्लुग्लोप इत्यनेन कथं निषिध्यते।

• इचस्तलोपः ३/४/३२

इचेः परस्य त प्रत्ययस्य लोपो भवति, क्वचित्पूर्वपराविति सर्वस्य। अकारि अहारि अपाठि, अद्यतनी, त, भावकर्मणोश्चेति इच् चकार इहार्थः,

अनेन त लोपः। अस्योपधेति वृद्धिः दीर्घश्च, आख्यातिकः तशब्दः गृह्यते, प्रत्यासत्तेः। तेनेह न भवति अकारितराम्, अहारितराम्। तमादित्वात्तरां प्रत्ययः गृह्यते।

• हेरकारादहन्ते ३/४/३३

अकारात्परस्य ह लोपो भवति अहन्तेः। हन् हिंसागत्योः इत्येतं वर्जयित्वा। पद, पठ, गच्छ, पञ्चमी , हि, अन्वि, हेर्लोपः। इषुगमियमां छ इति मस्यच्छः। अकारादिति किम्? युहि, यु मिश्रणे। अहन्तेरिति किम्? जहि, हन् हिंसा, अन्वि, अदादेर्लुक्, हन्तेर्जहाविति, हन्तेःजत्वम्, भवत्ययंजकारः हन्तेरेव स्थानिवद्भवात्। ननु विषयं यमाश्रित्य योऽभूज्जादेशः, स कथं तमेव विहन्यात्, सन्निपात लक्षणो विधिरनिमित्तं तद्विघातस्य इत्यतोऽनर्थकमेतत् प्रतिषेधः, सत्यम्, वर्णग्रहणे अनिमित्तमिति वचनात् हि प्रत्ययस्य विघातं प्रति अस्ति जादेशस्य निमित्ताभावः, अकारादित्ययञ्च वर्णो गृह्यते, तेनहन्तेः परस्य हेर्लोपनिवृत्त्यर्थम् सार्थकम् अहन्तेरिति प्रतिषेध करणम्। तातङ् पक्षे हेर्लोपोनेष्यते, पठतात्, हेर्वक्तव्यात् तातङादेशः।

• नोश्चविकरणादसंयोगात् ३/४/३४

असंयोगात्। असंयोगात् असंयुक्तात् नोः विकरणात्परस्य हेर्लोपो भवति। सुनु, चिनु, षूञ् अभिषवे, चिञ् चये, नुस्स्वादेः, अनेन हेर्लोपः। विकरणादिति किम्? नुहि, णु स्तुतौ, अनः अदादेर्लुक्, संयोगादिति किम्? शक्नुहि, तक्ष्णुहि। शक्लृ शक्तौ, तक्ष तनूकरणे, हि, नुस्स्वादेः, तक्षेर्वक्तव्यान्नुः।

• उकाराच्च ३/४/३५

उकाराद्विकरणात् परस्य हेः लोपो भवति। तनु, सनु। तनु विस्तारे, षणुदाने। हि, तनादेरूः, हेर्लोपः। कुरू, डुकृञ्करणे, हि, तनादेरूः करोतेरिति गुण, अस्योकार इत्युत्वम्, हेर्लोपः, विकरणादिति किम्? युहि।

• उकारलोपो वमोर्वा ३/४/३६

असंयोगाद्विकरणादिति च वर्तमानमर्थवशात्षष्ठ्यन्तं विज्ञायते। असंयोगस्य असंयुक्तस्य विकरणस्य वमोः परयो उकारलोपो वा भवति

सुन्वः, सुन्मः। सुनुवः, सुनुमः। तन्वः, तन्मः। तनुवः, तनुमः। षूञ् अभिषवे, तनु विस्तारे, वस्, मस्, नुस्स्वादेः तनादेरूः, पक्षे उकार लोपः, सुनोमि, तनोमि इत्यत्र तनु भवति, परत्वाद् गुणस्य प्रवृत्तेः। असंयोगस्येति किम्? शक्नुवः, शक्नुमः, वमोरिति किम्? सुनुतः, तनुतः, उकार ग्रहणं वमोर्लोपशंका निवृत्त्यर्थम्। उकारस्येति कर्तव्ये लोपग्रहणं विष्पष्टार्थम्। उत्तरत्र नित्य ग्रहणाद् वा ग्रहणे लब्धे वा ग्रहणं सुखार्थम्।

• करोतेर्नित्यम् ३/४/३७

करोतेः परस्यः उकारस्य वमोः परयोः नित्यं लोपो भवति। कुर्वः कुर्मः, कुर्वहे, कुर्महे। डुकृञ् करणे, वस् मस्, वहे महे। तनादेरूः करोतेरिति गुणः, अनेन उकार लोपः। करोतेरिति निर्देशः कृञ् हिंसायामित्यस्य निवृत्त्यर्थम्, तेनेह न भवति–कृणुवः, कृणुमः। पुनरारम्भ सामर्थ्यात् नित्यग्रहणे लब्धे नित्यग्रहणं विस्पष्टार्थम्।

• सप्तम्यां ये च ३/४/३८

करोतेः परस्य उकारस्य सप्तम्यां ये–यकारे परे लोपो भवति। कुर्यात्, कुर्याताम्, कुर्युः। डुकृञ् करणे, यात्, याताम्, युस्। अन्यत्पूर्ववत्। कृञ्पर उकारस्सप्तम्यामेव यकारे संभवतीति सप्तमी ग्रहणं विस्पष्टार्थम्।

• अस्योकारस्सार्वधातुकेऽगुणे[1] ३/४/३९

करोतेरकारस्यागुणे सार्वधातुके परे उकारो भवति। कुरुतः, कुर्वन्ति। कथं कुरु? प्रत्ययलोप लक्षणत्वात् गुणेनैव स्वरूपनिर्देशात्। सार्वधातुकम् इति किम्? सञ्चस्कुरु। अगुण इति किम्? करोमि।

• रुधादेर्विकरणस्य लोपः[2] ३/४/४०

रुधादेर्विकरणान्तस्य लोपो भवति अगुणे सार्वधातुके परे। रुन्धः रुन्धन्ति। भिन्तः, भिन्दन्ति। अगुण इति किम्? रुणद्धि, भिनत्ति।

• अस्तेरादे[3] ३/४/४१

अस्तेरादेरवयवस्य लोपो भवति अगुणे सार्वधातुके परे। स्तः, सन्तिः, अगुण इति किम्? अस्ति।

(१,२,३ क्रमाङ्केषुस्थितानां सूत्राणां वृत्तेः शिष्यहितायां त्रुटितपाठत्वात् दुर्गवृत्तिमनुसृत्य उल्लेख वर्तते।)

● अभ्यस्तानामाकारस्य[1] ३/४/४२

अभ्यस्तानामाकारस्यागुणे सार्वधातुके परे लोपो भवति। मिमते, मिमताम्। जिहते, जिहताम्। दत्ते, धत्ते,। अगुण इति किम्? जहाति।

● क्र्यादीनां विकरणस्य[2] ३/४/४३

क्र्यादीनां विकरणस्य सार्वधातुके परे विकरणस्याकारस्य लोपो भवति, क्रीणते, क्रीणन्ति, प्रीणते, प्रीणन्ति। कथं स्तभ्नन्ति इति? उपलक्षणत्वात्। क्र्यादीनामिति किम्? दीव्यामः। विकरणस्येति सुखं प्रति–पत्त्यर्थम्। अगुण इति किम्? क्रीणाति।

● उभयेषामीकारो व्यञ्जनादावदः[3] ३/४/४४

राश्यपेक्षयोभयशब्दो व्यक्त्यपेक्षया बहुवचनम्। उभयेषामभ्यस्तक्र्यादि विकरणानां दावर्जितानामाकारस्य व्यञ्जनादावगुणे सार्वधातुके परे ईकारो भवति। मिमीते, जिहीते, लुनीते, पुनीते। व्यञ्जनादाविति किम्? मिमते, क्रीणते अगुण इति किम्? जहाति, क्रीणति। सार्वधातुके इति किम्? लालायते। अद इति किम्? दत्से धत्से।

● इकारोदरिद्रातेः[4] ३/४/४५

दरिद्रातेराकारस्यागुणे सार्वधातुके व्यञ्जनादाविकारो भवति। दरिद्रितः, दरिद्रिथः। सार्वधातुक इति किम्? दरिद्राणम्, दरिद्रायकः, दिदरिद्रासति। व्यञ्जनादाविति किम्? दरिद्रति। अगुण इति किम्? दरिद्राति। भियोवेति वक्तव्यम्। बिभितः, बभीतः।

● लोपः सप्तम्यां जहातेः[5] ३/४/४६

जहातेराकारस्य सप्तम्यामगुणे लोपो भवति। जह्यात्, जह्याताम्, जह्युः। व्यञ्जनादावगुणे सार्वधातुके इत्वं वा वक्तव्यम्। जहितः जहीतः। हौचात्वमित्वमीत्वञ्चेष्टम्। जहाहि, जहिहि, जहीहि।

(१,२,३,४,५ अत्र सर्वत्र सूत्राणां वृत्तेः शिष्याहितायां त्रुटितपाठत्वात् दुर्ग वृत्तिमनुसृत्योल्लेखः कृतः।)

• घुटि हन्तेः सार्वधातुके[1] ३/४/४७

हन्तेर्धुडादौ सार्वधातुकेऽगुणेऽन्तस्य लोपो भवति। हतः, हथः, आहते, आहताम्। घुटीति किम्? हन्वः, हन्मः। अगुण इति किम्? हन्ति। प्रतिषिद्धेटां मध्ये हन्तेरेवसार्वधातुके सम्भवदर्शनार्थमिदम्।

• शासेरिदुपधाया अण्व्यञ्जनयोः[2] ३/४/४८

शासेरूपधाया इद्भवति अणि व्यञ्जनादावगुणे प्रत्यये परे। अन्वशिषत्, शिष्यते, शिष्टः। कथं मित्रं शास्तीति मित्रशीः? विलोपात् स्वरादेशविधिर्बलवानिति। अणासहचरितः शासिरिह गृह्यते–आशास्ते, आशास्यमानः। कथमाशीः? ज्ञापकात्।

• हन्तेर्जहौ[3] ३/४/४९

हन्तेर्जकारो भवति हौ परे। जहि शत्रून्। हेर्व्यक्तित्वात्–हतात्। परत्वात्तातम्।

• दास्त्योरेऽभ्यासलोपश्च[4] ३/४/५०

दासंज्ञकस्य अस्तेश्च हौ परे ऽन्तस्यैकारो भवति अभ्यासलोपश्च यथासम्भवम्। देहि, धेहि, अस्–एधि। अलोपश्चेति सिद्धेऽभ्यासग्रहणं समस्तलोपार्थम्।

• अस्यैकव्यञ्जनमध्येऽनादेशादेः परोक्षायाम्[5] ३/४/५१

अगुणे परोक्षायां परतोऽनादेशादेः धातोरस्यैकव्यञ्जनमध्यगतस्य एत्वम् भवति अभ्यासलोपश्च। पेचतुः, पेचुः, नेमतुः नेमः, से हे चकाराधिकात् क्वचिद् दीर्घोऽपि गृह्यते। अपपूर्वोराधहिंसायाम्, अपरेधतुः। हिंसायामित्येव–आरराधातुः राजिभ्राजिभ्रमशिभ्लाशीनां वा वक्तव्यम्। रेजतुः, रराजतुरित्यादि। अन्यत्र न भवति–चकाशे। थलि च सेट्यप्येवम्। रेजिथ, रराजिथ। असहायव्यञ्जनमध्यगतस्येति किम्? ततक्षतुः। अनादेशादेरिति किम्? बभणतुः। अगुण इति किम्? अहं पपच।

(१,२,३,४,५ अत्र सर्वत्र सूत्राणां वृत्तेः शिष्यहितायां त्रुटितत्वात् दुर्गवृत्तिमनुसृत्य अल्लेखः क्रियते।)

● थलिच सेटि' ३/४/५२

थलिच सेटि परतोऽनादेशादेर्धातोरस्यैकव्यञ्जनमध्यगतस्यैत्वं भवति अभ्यासलोपश्च। पेचिथ नेमिथ.। सेटीति किम्? पपक्थ। अनादेशादेरिति किम्? बभजिथ। एकव्यञ्जनमध्यगतस्येति किम्? विव्ययिव्य।

● तृ फल भज त्रप श्रन्थि ग्रन्थि दम्भीनाञ्च ३/४/५३

तृ प्रभृतीनामत एत्वम्भवति अभ्यासलोपपश्च, परोक्षायामगुणे थलिच सेटि परतः। गुण्यादेशादि सहायव्यञ्जनत्वाद्वचनम्। तेरतुः, तेरिथ। फेलतुः फेलिथ। भेजतुः, भेजिथ। त्रेपे, त्रेपाते, त्रेपिरे। श्रेथतुः, ग्रेथतुः, देभतुः। अनुषङ्गलोपिनांमध्ये दम्भेरेवेति नियमात् ममथ्वान्। निरनुषङ्गै साहचर्यात् शश्रन्थिथ, जग्रन्थिथ, ददम्भिथ इत्यनुषङ्गिनां न स्यात्। अगुण इति किम्? अहं ततर। जृ–भ्रमु–त्रसि–स्वन–फण–स्यमां वा वक्तव्यम्। जेरतुः, जजरतुः। जेरिथ जजरिथ। (अस्य सूत्रस्य वृत्तेः उल्लेखः दुर्गवृत्ति मनुसृत्य क्रियते। अग्रे उल्लेखः शिष्यहितावृत्तिमनुसृत्यवर्तते)।

गुणित्वात् न शसददेति निषेध प्राप्तः फलभजोः आदेशादित्वात्। त्रपिश्रन्थिग्रन्थिदम्भीनाम् एकव्यञ्जनमध्यत्वात्। तेरतुः तेरुः, तेरिथ, फेलतुः, फेलुः, फेलिथ, भेजतुः, भेजुः, भेजिथ। भेजे, भेजाते, भेजिरे, त्रेपतुः, त्रेपुः, त्रेपिथ, त्रेपे, त्रेपाते, त्रेपिरे, श्रेथतुः, श्रेथुः, श्रेथिथ, ग्रेथतुः, ग्रेथुः, ग्रेथिथ, देभतुः, देभु, देभिथ। अतुस्, उस्, थल, ए आते इरे। थलि परे इट्, द्विर्वचनम्, तृ इत्यस्य ऋदन्तानाञ्चेति गुणः, अनेन एत्वाभ्यास लोपौ अगुणे परे परोक्षायाम्। इन्धीत्यादिना अनुषङ्लोपः, थलि तु थलिचेत्यनेन। ननु दम्भेः अनुषङ्ग लुप्ते सिद्धावेत्वाभ्यासलोपौ इति किम् दम्भि ग्रहणेन? सत्यम्–लाक्षणिकत्वात् एक व्यञ्जनमध्यत्वस्य कथं सिद्धिस्स्यात्। जॄष्, भ्रमि त्रसि फणि राजि भ्राजि भ्राशि भ्लाशि स्यमिस्वनीनामवर्णस्य वा ईत्वं वक्तव्यमभ्यासस्य च लोपः। जॄष् वयो हानौ। जरतुः, जेरुः, जेरिथ, जजरतुः, जजरुः, जजरिथ। ऋदन्तानामिति गुणः, एत्वाभ्यासलोपौ। भ्रमु चलने अनवस्थान इति वा। भ्रेमतुः भ्रेमुः भ्रेमिथ, बभ्रमतुः बभ्रमुः बभ्रमिथ, त्रसी उद्वेजने। त्रेसतुः, त्रेसुः त्रेसिथ। तत्रसतुः, तत्रसुः, त्रेसिथ। फणगतौ, फणतुः, फेणुः, फेणिथ। पफणतुः पफणुः, पफणिथ। राजृ दीप्तौ, रेजतुः

(१ दुर्गवृत्तेः पाठः)

रेजुः, रेजिथ, रराजतुः, रराजुः रराजिथ, रेजे रेजाते रेजिरे,रराजेरराजातेरराजिरे। भ्राजृ दीप्तौ, भ्रेजे, भ्रेजाते, भ्रेजिरे, बभ्राजे, बभ्राजेते, ब्रभाजिरे, भ्राशृ दीप्तौ, भ्रेशे, भ्रेशाते, भ्रेशिरे। भ्लाशृ दीप्तौ, बभ्लशे, बभ्लाशाते, बभ्लाशिरे। स्यमु स्वन–शब्दे स्येमतुः, स्येमुः स्येमिथ, सस्यमतुः सस्यमुः, सस्यमिथ। स्वेनतुः, स्वेनुः, स्वेनिथ, सस्वनतुः, सस्वनुः, सस्वनिथ। (शिष्यहितावृत्तिः)

• न शश दद वादि गुणिनाम् ३/४/५४

वकारादिर्येषां ते वादयः, गुणो विद्यते येषां ते गुणिनः, तदस्यस्तीति इन् ततो द्वन्द्वः, शसु हिंसायाम्, दद दाने, अनयोः वकारादीनांच धातूनां गुणिनां च य आकारस्तस्य पूर्वोक्त निमित्ते एत्वं न भवति अभ्यासस्य च लोपो न भवति। विशशसतुः, विशशसुः, विशशसिथ, ददद, ददताते, ददिरे। वकारादीनाम्–टु वम उद्गिरणे, ववमतुः, ववमुः दवमिथ। ववलतुः, ववलुः, ववलिथ। गुणिनाम्–विशशरतुः, विशशरूः, विशशरिथ। विपपरतुः, विपपरूः, विपपरिथ। शासु हिंसायाम् विपूर्वः, पृ पालन पूरणयोः, विपूर्वः। अतुस्, उस्, रिन्, ए, आते इरे,। शॄ पॄ शब्दयोः ऋदन्तानां चेति गुणः।

• स्वरादाविवर्णोवर्णान्तधातोरियुवौ ३/४/५५

इवर्णश्च उवर्णश्च तद् इवर्णोवर्णम्। ततः अन्तशब्देन कर्मधारयः। यदि तु बहुवीहिः स्यात्, ततः अनेकवर्णस्सर्वस्येति सर्वधातोरियुवौस्याताम्। परोक्षायामिति निवृत्तम्। अगुण इत्येव धातोस्सम्बन्धिन इवर्णोवर्णस्य यथासङ्ख्यमियुवौ भवतः स्वरादावगुणे परतः। यत्ववत्वयोर्बाधः। शिश्रियतुः, शिश्रियुः चिक्रियतुः, चिक्रियुः, जुहुवतुः, जुहुवुः, लुलुवतुः, लुलुवुः, श्रिञ्सेवायाम्, डुक्रीञ् द्रव्यविनिमये। हुदानादानयोः, लूञ्च्छेदने। अतुस्,उस् द्विर्वचनम्, अनेन इयुवौ, एवं क्षियन्ति, स्तुवन्ति। क्षिनिवासे, ष्टूञ् स्तुतौ, नम्, अनेन इयुवौ, एवं क्षियन्ति, स्तुवन्ति। क्षिनिवासे, ष्टूञ् स्तुतौ, अन्विक, स्तौतेः, अदादेर्लुक्। स्वरादाविति किम्? श्रीयात्, ग्लायात्, आंशीर्यात्। नाम्यन्तानां यणायीति दीर्घः। अगुण इति किम्? श्रयिता, लविता। इवर्णोवर्णान्तस्येति किम्? चक्रतुः, धातुग्रहणं तूत्तरार्थम्। न च विकरणस्यास्त्युवादेशप्रसङ्गः, नोर्वकारो विकरणस्येति नियमार्थत्वात्।

● अभ्यासस्यासवर्णे ३/४/५६

स्वरादावित्यनुवर्तते, कारितसंकीर्तनात्प्राग् अगुण इत्यत्र संबध्यते, अभ्यासस्य यद् इवर्णोवर्णम् तस्य इयुवादेशौ भवतः असवर्णे स्वरे परे। इयर्ति, इयृतात्, ऋ गतौ, वर्तमाना ति, सप्तमीयात्, अन्विकरणः, जुहोत्यादे श्चेतिलुक्। जुहोत्यादीनाञ्चेति द्विर्व, अकार ऋवर्णस्य अर्तिपिपर्त्योश्चेति इत्वम्। तस्यानेन इय्, गुणः, इयेष, उवोष। इषु इच्छायाम्, उषदाहे, अट्, द्विर्व, गुणः। अनेन इयुवौ। असवर्ण इति किम्? ईषतुः, ऊषतुः। इषु इच्छायाम्, उष दाहे, द्विर्वचनम्, समानदीर्घः। स्वरादाविति किम्? इयाज उवाह, यजदेव, वहप्रा, अट्, द्विर्वचनम्। परोक्षायामभ्यासस्येति सम्प्रसारणम्।

● नोर्विकरणस्य ३/४/५७

उवर्ण ग्रहणमनुवर्तते, उवादेशश्च। विकारणस्य नोर्य उवर्णस्तस्य उवादेशो भवति, स्वरादावगुणे परे। नोरसंयोगपूर्वस्य नोर्वकारो विकरणस्येति। अनेन वकारो वक्ष्यतीति सामर्थ्यात् संयोगपूर्वस्येत्ययं विधिः। प्राप्नुवन्ति, प्राप्नुवन्तु, शक्नुवन्ति शक्नुवन्तु, आप्लृ आप्तौ, प्रपूर्वः शक्लृ शक्तौ, अन्ति, अन्तु। नुस्स्वादेः, अनेन उव्। नोरिति किम्? तृण्वन्ति, तृणु आ, अन्ति, तनादेः रूः। विकरणस्येति किम्? तन्वन्ति। तनु वि, तनादे रूः। अस्यनोरनर्थकत्वान्न भविष्यति इति विकरणग्रहणम्। धातोर्निमित्तान्तरे मा भूदिति। स्वरादाविति किम्? शक्नुयात्। अगुण इति किम्? शक्नुवानि, पञ्चमी, अनि, नुस्स्वादेः, गुणः।

● य इवर्णस्यासंयोगपूर्वस्यानेकाक्षरस्य ३/४/५८

संयोगः पूर्वो यस्मादिवर्णात् स संयोगपूर्वः, ततो नञा समासः, न एकम् अनेकम्, अनेकमक्षरं यस्य धातोरसावनेकाक्षरम्। अक्षर शब्देन स्वराः उच्यन्ते। असंयोगपूर्वस्य अनेकाक्षरस्य अनेकस्वरस्य धातोर्य इवर्णस्तस्य यत्वं भवति। स्वरादावगुणे परे। स्वरादाविवर्णेति इयादेशः प्राप्तः। चिच्युतः चिच्युः। निन्यतुः, निन्युः चिञ् चयने, णीञ् प्रापणे। अतुस् उस्, द्विर्व। कृत द्विर्वचनस्य धातोः अनेकाक्षरत्वादनेन यत्वम्। इवर्णस्येति किम्? जुहुवतुः, हुदानादानयोः अतुस्, स्वरादाविवर्णेति उव्। असंयोगोपधस्येति किम्?

शिश्वियतुः। टु ओ श्वि गतिवृद्ध्योः, स्वरादाविवर्णेति इय्, अगुण इति किम्? चिचाय।

• इणश्च ३/४/५६

इण् गतावित्यस्य स्वरादावगुणे परे यत्वं भवति। यन्ति, यन्तु। वर्तमाना, अन्ति,। पञ्चमी अन्तु। अन्वि, अदादेर्लुक्। स्वरादाविति किम्? इतः तस्। अगुण, इति किन्? अयानि, अनि, गुणः। इकोऽपीष्यते–अधियन्ति। इक् स्म, अधिपूर्वः, वर्तमाना, अन्वि, यत्वम्।

• नोर्वकारोविकरणस्य ३/४/६०

अवर्ण ग्रहणभनुवर्तते, असंयोगपूर्वस्येति च नोर्विकरणस्य य उवर्णः असंयोगपूर्वः तस्य वकारादेशो भवति स्वरादावगुणे परे। नोर्विकरणस्य उवादेशः प्राप्तः। सुन्वन्ति, चिन्वन्ति। विकरणस्येति किम्? नुवन्ति, णु स्तुतौ। असंयोग पूर्वस्येति किम्? शक्नुवन्ति। नोर्विकरणस्येति उव्।

• जुहोतेस्सार्वधातुके ३/४/६१

वकार इत्येव। जुहोतेः हु दानादानयोरित्यस्य य उवर्णस्तस्य वत्वं भवति स्वरादावगुणे सार्वधातुके प्रत्यये परे। स्वरादाविवर्णस्येति उवादेशः प्राप्तः। जुह्वति, जुह्वतु। अन्ति, अन्तु, अन्वि, जुहोत्यादेर्लुक्। जुहोत्यादीनां द्विर्व, अनेन वत्वम्। लोपोऽभ्यस्तादन्तिन इति न लोपः। जुहोतेरितिकिम्? युवन्ति, यु मिश्रण, स्वरादाविवर्णेति उव्।

• भुवोवोऽन्तः परोक्षाद्यतन्योः ३/४/६२

भुव इत्यस्य अन्तुः वकारागमो भवति परोक्षाद्यतन्योः अगुणयोः परयोः। बभूव, बभूवतुः, बभूवुः। भू सत्तायाम्। अट्, अतुस्, उस्। भवतेरः, अनेन वकारागमः। आगमादेशयोरागमविधिर्बलवानिति वचनात् पूर्वम् वकारागमः। अभूवन्, अभूवम्। अद्यतनी, अन्, अम्, सिच्। इण्स्थादेति सिचोलुक्, वकारागमः। स्वरादाविति किम्? बभूवान्, क्वन्सुकानावितिक्वन्सुः, परोक्षावद्भावाद्द्विर्वचनम्, भवतेरः, सि, सान्तमहतोरितिदीर्घः। अभूत्, अद्यतनी, दि, सिच्, इण्स्थादेति सिचोलुक्।

● गोहेरूदुपधायाः ३/४/६३

गूहेः गूहू संवरण इत्यस्यकृतगुणस्य उपधायाः उत्वं भवति। गूहति, गूहतः, गूहन्ति। गूहते, गूहेते, गूहन्ते। उपधागुणे कृते अनेन ओकारस्य ऊत्वम्, गूहेः कृतगुणस्य निर्देशादिह न भवति जुजुहतुः। परोक्षायाञ्चेति गुणाभावः।

● दुषेः कारिते ३/४/६४

ऊदुपधाया इत्येव। दुष् वैकृत्ये इत्यस्य उपधाया कारिते परे ऊत्वं भवति। दूषयति। दुष् वैकृत्ये, दुष्यन्तं प्रयुङ्क्ते, इन् ऊत्वम्, कारित इति किम्? दोषः, व्यञ्जनान्ताच्चेति घञ्।

● वा चित्तविरागे ३/४/६५

चित्तस्य विरागः चित्तविरागः वैचित्यमुच्यते। चित्तविरागे वर्तमानस्य दुषेः वा ऊत्वं भवति कारिते परे। चित्तं दूषयति, चित्तं दोषयति, प्रज्ञां दूषयति, प्रज्ञां दोषयति। चित्तविराग इति किम्? वादी परस्यचित्तं दूषयति। पूर्वेण नित्यमूत्वम्।

● मानुबन्धानां ह्रस्वः ३/४/६६

घट चेष्टायामित्यतः आरभ्य शम श्रम वैकल्य इत्येतदन्ताः धातवः अमानुबन्धा अपि कार्यार्थम् पूर्वाचार्यैःमानुबन्धा उच्यन्ते, तेषामुपधायाः ह्रस्वो भवति कारिते परे। घटयति, व्यथयति प्रथयति, जनयति। घट चेष्टायाम्, व्यथ भयचलनयोः, प्रथ प्रख्याने, जनी प्रादुर्भावे। घटमानं प्रयुङ्क्ते, व्यथमानं प्रयुङ्क्ते, एवं प्रथमानं जनमानमिति। इन्, अस्योपधेति दीर्घः, अनेन ह्रस्वः, एवं शमयति, रमयति, भ्रमयति। शमु उपशमे, रमु क्रीडायाम्, भ्रमुचलने, शाम्यन्तं प्रयुङ्क्ते, रममाणम्, भ्रमन्तम् इति। इन्, दीर्घः ह्रस्वः, स्मृ इत्ययमाध्यानेऽर्थेमानुबन्धःस्मर्यते। आध्यानमुत्कण्ठयास्मरणम्, स्मरन्ति। आध्यानमिति किम्? स्मारयन्ति किञ्चित्, दृ इत्ययं भयेऽर्थे। दरयति–दृणन्तं प्रयुङ्क्ते, इन्, भय इति किम्? काष्ठं विदारयति, चल्, इत्ययं कम्पनेऽर्थे, लतां चलयति। कम्पन इति किम्? उच्चालयति।

• इचि वा ३/४/६७

कारित इत्येव, मानुबन्धानामुपधायाः ह्रस्वो वा भवति इचि कारिते परे च, पूर्वेणनित्यं प्राप्तम्, अघटि, अघाटि। अव्यथि अव्याथि, अशमि–अशामि–पूर्ववद् इन्, उपधायाः दीर्घः। अद्यतनी, भावकर्मणोश्चेति इच्, इचस्तलोपः। अनेन वा ह्रस्वः।

• जनिवध्योश्च ३/४/६८

कारित इति निवृत्तम्, वेति, इचीति संबध्यते, जनिस्सामान्यः हन्तेश्च यो वधिस्तयो उपधायाः ह्रस्वो भवति इचि परे, अवधि, अजनि, जन जनने, हन् हिंसागत्योः, अद्यतनी त, पूर्ववत् इच् तलोपश्च। अद्यतन्या हन्तेर्वधिः, दीर्घे कृते अनेन ह्रस्वः। बध बन्धने इत्यस्यात्र न ग्रहणम्, मान्बधादि सूत्रेण नित्यम् सन्नन्तत्वात्। यद्येवं–भक्षकश्चेन्नास्ति, बाधकोऽपि न विद्यते, इति कथमेवं बधेस्सन्रहितस्यप्रयोगः, ब्रूमः–बध संयमने–इत्यस्य चौरादिकस्यैव प्रयोगः।

• ओदौद्भ्यां यिन्नायी स्वरवत् ३/४/६९

ओकारौकाराभ्यां परःयिन् आयि इत्येतौ स्वरवद्भवतः। स्वरे परे यत्कार्यम् ओकारौकारयो उक्तम् तत् यिन्नाय्योः परयोः भवतीत्यर्थः। गव्यति नाव्यते। गामिच्छत्यात्मन, नौरिवाचरति, नाम्न आत्मेच्छायां यिन्, कर्तुरायिः, नामिव्यञ्जनान्ताद् इत्यायेरालोपः। स्वरवद्भावात् औ आव्। ओदौद्भ्यामिति किम्? रैयति, रैयते। रायमिच्छत्यात्मन, राः इवाचरति, पूर्ववत् यिन्नायी, आलोपश्च। ननु आयिस्स्वरादिरेव, इति किम् तस्य स्वरवद्भावेन? असदेतत्–सर्वविधिम्यो लोपविधिर्वलवान् इति वचनाद् आकारे लुप्ते कथं तस्य स्वरादित्वम्। लोपस्वरादेशपरिभाषया आलोपात्पूर्वम आव् आदेशो भविष्यति इति चोक्तमोदौतौ च। स्वरो हि य आदेशः स पूर्वम् क्रियते, न तु स्वरस्य आदेशः। अन्यथा यः सः अत्र व्यञ्जनाच्चेति सिलोपं बाधित्वा त्यदाद्यत्वं न स्यात्।

• नाम्यन्तानां यणायि यिन्नाशीश्च्विचेक्रीयितेषु ये दीर्घः ३/४/७०

नाम्यन्तानां धातूनां लिङ्गानाञ्च यणि, आयि, यिनि, आशिषि ये यकारे, च्वौ, चेक्रीयितेषु परेषु दीर्घोभवति इत्येतदाशिषो विशेषणम्, न यणादीनाम् व्यभिचारात्। यणि, चीयते, भूयते, चिञ् चये, ष्टूञ् स्तुतौ, सार्वधातुके यण्, अनेन दीर्घः। अग्नीयते। अग्निरिवाचरति, कर्तुरायिरित्यायिः, पूर्ववदालोपः एवं पटूयते, यिनि, अग्नीयति, पटूयति, नाम्नः आत्मेच्छायामिति यिन्, आशिषि, चीयात्, भूयात्। चेक्रीयते, चेचीयते, तोष्टूयते। अत्यर्थम् चिनोति स्तौति, य शब्दः, दीर्घः, द्विर्व, शिट्परो घोषः, यणादिष्विति किम्? चिनुयात्, सप्तमीयात्, य इति किम्? चेषीष्ट। यदि दीर्घस्स्यात् गुणो न भवेत्।

• इणोऽनुपसृष्टस्य ३/४/७१

न उपसृष्टः अनुपसृष्टः, धातोः यिन् आयि इत्येतौचानुवर्तेते, स्वरादित्वात् चेक्रीयते च ये। अनभिधानात् प्रयोगाभावात् आशीर्ग्रहणं शिष्टत्वादपेक्षते। अनुपसृष्टस्य उपसर्गेण अप्रयुक्तस्य इण्गतौ इत्यस्य आशिषि च परे दीर्घो भवति। ईयात् ईयास्ताम्, इण् गतौ आशीः,यात्, यास्ताम्। अनेन दीर्घः। अनुपसृष्टस्येति किम्? समियात्। य इति किम्? एषीष्ट।

• ऋत ईदन्तश्च्विचेक्रीयितयिन्नायिषु ३/४/७२

ऋत ऋकारान्तस्य धातोः लिङ्गस्य चेक्रीयते, जेह्रीयते, अत्यर्थम् करोति हरति, य शब्दः, ईकारागमः, रत्वम्, द्विर्वचनम्। यिनि–मात्रीयति। आयौ–मात्रीयते। ऋत इति तपरकरणम् ऋकारनिवृत्त्यर्थम्, तेनेह न भवति चेक्रीयते, कॄविक्षेपे, अत्यर्थम् किरति, ऋदन्तस्येर्, नामिनोर्वोरिति दीर्घः।

• इरन्यगुणे ३/४/७३

ऋकारान्तस्य धातोः इकारागमो भवति, अनि च विकरणे, अगुणे परे। आद्रियते आध्रियते। दृङ् आदरे, धृङ् अनवस्थाने, आङ्पूर्वः, अन्विकरणः तुदादेरनीत्यगुणत्वात्, अनेन इकारागमः, स्वरादाविवर्णेति, इय्, रत्वम्, अनीति किम्, आदद्रे, दृङ् आदरे, परोक्षा, ऐ, सर्वत्रात्मन

इत्यगुणत्वम्। अगुण इति किम्? हरति। ईकारागमे वर्तमाने इकारागमविधानमुत्तरार्थम्।

• यणाशिषोर्ये ३/४/७४

ऋकारान्तस्य धातोः इकारागमो भवति यणि परे आशीर्यकारे च। नाम्यन्तानां यणायीति दीर्घः प्राप्तः। क्रियते, ह्रियते, क्रियात्, ह्रियात्, ते सार्वधातुके–यण्, आशीःयात्, इकारागमः, रत्वम्। य इति किम्? कृषीष्ट। ऋदन्तानाञ्चेति गुणाभावः।

• गुणोऽर्ति संयोगाद्योः ३/४/७५

आदौ यस्य ऋकारस्येति विग्रहः, ततो द्वन्द्वः, अर्तेस्संयोगादेश्च ऋकारस्य यणि परे आशिषो यकारे च गुणो भवति, पूर्वेण इकारागमः प्राप्तः। अर्यते, अर्यात्, ऋगतौ। स्मर्यते, स्मर्यात्, स्मृ चिन्तायाम्। य इति किम्? समृषीष्ट, स्मृषीष्ट। इह कस्मान्न भवति? संस्क्रियते। डुकृञ्करणे, सं पूर्वः, सुट्सुंपर्युपेभ्य इति सुट्, अत्र सुटिकृते संयोगादित्वं प्राप्नोति। अस्त्येतत्, किन्तु असिद्धंवहिरङ्गमन्तरङ्ग इति द्योतनात् न भवति, अन्तरङ्गे ह्येकपदविषये गुणे कर्तव्ये वाहिरङ्गः पदद्वयविषयः सुट्त्वासिद्धः, अतः ऋकारो न संयोगादिः।

• चेक्रीयिते च ३/४/७६

अर्तेस्संयोगादेश्च ऋकारस्य चेक्रीयते परे गुणो भवति, नणकारेति निषेधः प्राप्तः। अरर्यते, सस्मर्यते। ऋगतौ, स्मृचिन्तायाम्, कुटिलमियर्ति, अत्यर्थम् स्मरति, अनेन गुणः, स्वरादेर्द्वितीयस्येति य इत्यस्य द्विर्वचनम्, दीर्घोऽनागमेति दीर्घः, हन्तेः हिंसायामर्थे घ्री आदेशोवक्तव्यः चेक्रीयते परे–जेघ्रीयते, य शब्दः, घ्री आदेशः, अभ्यासकार्यम्। हिंसायामिति किम्? जघन्यते–कुटिलं हन्ति। वक्तव्यात् य शब्दः, द्विर्व, अतोऽन्तोऽनुस्वारागमः, अभ्यासाच्चेति घः।

• घ्राध्मोरीः ३/४/७७

घ्रा गन्धोपादाने ध्मा शब्दोग्निसंयोगे इत्येतयोश्चेक्रीयते परे ईत्वं भवति। जेघ्रीयते, देध्मीयते। अत्यर्थम् जिघ्रति, धमति, अनेन ईत्वम्, द्विर्व, अभ्यासकार्यम्, चेक्रीयत इति किम्? आघ्रायते, आध्मायते, सार्वधातुके यण्।

• यिन्यवर्णस्य ३/४/७८

अवर्णान्तस्य लिङ्गस्य यिनि परे ईत्वं भवति, मङ्गलीयति, शालीयति, यिनीति किम्? शुभंकाम्यति।

• अदेर्घस्लृ सन्नद्यतन्योः ३/४/७६

अद् भक्षणे इत्यस्य सनि परे अद्यतन्यां च परस्यां घस्लृ आदेशो भवति। लृकारः पुषादीत्यर्थः। जिघत्सति अद भक्षणे, सन्, अनेन घस्लृ आदेशः, द्विर्व सन्यवर्णस्येतीत्वम्, सस्य से सार्वधातुके त इति सस्य तः, अद्यतन्याम्–अघसत्, अघसाताम्, अघसन्। दि, ताम्, अन्। अनेन घस्लृ पुषादिसूत्रेण अण्, सन्नद्यतन्योरिति किम्? अद्यते।

• वा परोक्षायाम् ३/४/८०

अदेः परोक्षायाम् वा घस्लृ आदेशो भवति, जघास, जक्षतुः, जक्षुः। अद भक्षणे, परोक्षा–अट्, अतुस, उस्। अनेन, घस्लृ, द्विर्व, अभ्यासकार्यम्, अटि, अस्योपधेति दीर्घः। अन्यत्र, गमहनेत्युपधालोपः, अघोषेष्विटामिति घस्य कः, शासि वसीति षः, पक्षे आद, आदतुः, आदुः, द्विर्व, अस्यादेस्सर्वत्रेति दीर्घः। परोक्षायामिति किम्? अत्ति।

• वेञोवयिः ३/४/८१

वेञ् तन्तु सन्ताने इत्यस्य परोक्षायां वयिरादेशो वा भवति। इकार उच्चारणार्थः। उवाय, ऊयतुः, ऊयुः। वेञ् तन्तु सन्ताने, वयिरादेशः, अगुणे ग्रहिज्यावयीति सम्प्र, द्विर्व, अटि परोक्षायामभ्यासस्येति सम्प्र, पक्षे ववौ, ववतुः, ववुः। आकारादट औ, सन्ध्यक्षरे चेत्यालोपः, अगुणे तु आलोपः सार्वधातुके इत्यनेन वयेः यकारस्य परोक्षायामगुणायां वा उत्वं वक्तव्यम्। ऊवतुः, ऊवुः, ऊयतुः, ऊयुः वेञ् तन्तु।

• हन्तेर्वधिराशिषि ३/४/८२

हन्तेर्वधिरादेशो भवति आशिषि परस्याम्, इकार उच्चारणार्थः। वध्यात्, वध्यास्ताम्, आशिषि इति किम्? जघास। अभ्यासाच्चेति घत्वम्।

• अद्यतन्याञ्च ३/४/८३

हन्ते अद्यतन्यां परस्यां वधिरादेशो भवति, अवधीत्, अवधिष्टाम्, अवधिषुः, हन् हिंसा, दि, ताम्, अनेन वधिः सिच्, इट्, एकत्वे सिच इति ईट्, इटश्चेटीतिसिज्लोपः, अन उस्सिजिति अन उस्, अद्यतन्यामात्मने पदे हन्तेर्वधिर्वा वक्तव्यः, अवधिष्ट, अवधिषाताम्, अवधिषत्, हन्तेराङ्पूर्वस्य रूदादित्वादद्यतनी त, आताम्, अन्त। हन्तेः वधिः। सिच्, इट्, आत्मनेचान कारादिति न लोपः, पक्षे आहत, आहसाताम्, आहसत्। इष्टि वशान्नलोपः, घुटि परे ह्रस्वश्चानिटीति सिज्लोपः।

• इणो गा ३/४/८४

इणत अद्यतन्यां गा आदेशो भवति, अगात अगाताम्, अगुः। इण् गतौ, दि, ताम्, अन्, गादेशः, सिच्, इण्स्थादेति सिचोलुक्, अन उसीति उस् आकारस्योसीत्यालोपः, अद्यतन्यामिति किम्? एति। इकोऽप्यद्यतन्यां गा आदेशो वक्तव्यः। अध्यगात्, अध्यगाताम्, अध्यगुः। इक् स्मरणे, अधि पूर्वः अन्यत्पूर्ववत्। गा आदेशः। इणस्थादाप्यत्र इकं स्मरन्ति, तेन सिचो लुक्।

• इङः परोक्षायाम् ३/४/८५

इङ् अध्ययन इत्यस्य गा आदेशो भवति परोक्षाया परस्याम्, अधिजगे, अधिजगाते, अधिजगिरे, इङ् अध्ययने, अधिशब्दःपूर्वः गा आदेशः द्विर्वचनम्, आलोपो सार्वधातुक इति आलोपः। ननु स्वरविधिस्स्वर इति वचनात् पूर्वम् द्विर्वचनम् स्यात् नतु गा आदेशः? सत्यम् स्वरविधिपरिभाषाया अकृतग्रहणात् क्वचित् पूर्वम् स्वरविधिः, तेन अरिरषतीत्यत्र अर्तेः इटि कृते द्विर्वचनात् पूर्वम् गुणस्सिद्धः, अद्यतनी क्रियातिपत्त्योः गी आदेशो वा वक्तव्यः। अध्यगीष्ट, अध्यगीषत्, इङ् अध्ययने अधिपूर्वः, अद्यतनी आत्मने त, क्रियातिपत्तिः आत्मने स्यत, गीरादेशः, सिच्, पक्षे अध्यैष्ट, अध्यैषत स्वरादीनां वृद्धिरादेरिति ऐकारः।

• सनीणिङोर्गमिः ३/४/८६

इणः इङश्च सनि परे गमिरादेशो भवति, इकारः उच्चारणार्थः। जिगमिषति, इण् गतौ, एतुमिच्छति, सन्, गमिरादेशः, से गमः परस्मायिति

इट्, इङ् खल्वपि। अधिजिगांसते, इङ् अध्ययने, अधिपूर्वः, अध्येतुमिच्छति, सन्, हनिगमिङोरूपधाया इति दीर्घः। सनीति किम्? एति, अधीते। बोधनेऽर्थे इणः गमिर्नेष्यते। अर्थान् प्रतीषिषति। इण् गतौ प्रति पूर्वः सन्, स्वरादेर्द्वितीयस्येति स शब्दस्य द्विर्व, सन्यवर्णस्येति इत्वम्, अवबोधनेऽर्थे इणः गमिर्वक्तव्यः इनि परे। गमयति। इण् गतौ, यन्तुं प्रयुङ्क्ते, इन् वक्तव्याद् गमिः। अस्योपधेति दीर्घः, मानुबन्धानां ह्रस्वः। अवबोधन इति किम्? अर्थान् प्रत्याययति, प्रतियन्तुं प्रयुङ्क्ते, इन्, वृद्धिः।

● अस्तेर्भूरसार्वधातुके ३/४/८७

अस् भुवि इत्यस्य असार्वधातुकविषये भूरादेशो भवति। भविता, भविष्यति अभविष्यत्। कृते भ्वादेशे ता, स्यति, स्यत्। भूयात्, बभूव, भवतेरः, भुवोवोतुः। असार्वधातुके इति किम्? अस्ति। स्यात्। सन्तु। आसीत्। ति, यात्, तु, दि। सप्तम्यामस्तेरादेरिति अकारलोपः। अस्तेर्दिश्योरिति ईट्। अस्तेरिति अकारस्याकारः। असार्वधातुके इति यदि परसप्तमीस्यात् तदा ऋवर्ण व्यञ्जनान्तादित्यस्तेः व्यञ्जनान्तत्वात् घ्यणि सतिभ्वादेशे भाव्यमिति भवेत्। विषयसप्तम्यां तु पूर्वमादेशः, ततस्स्वरान्तत्वात् स्वरादय इति यप्रत्यये सति भव्यमिति सिद्धयेत्। अथकिं न भवति? भाव्यमित्येतद्भवति, यदा उवर्णादावश्यके इति आवश्यके ध्यणि क्रियते।

● ब्रुवोवचिः ३/४/८८

ब्रूञ् व्यक्तायां वाचि इत्यस्य असार्वधातुक विषये वचिरादेशो भवति। इकार उच्चारणार्थः। वक्ता, वक्ष्यति, अवक्ष्यत्। ता स्यति, स्यत् चवर्गस्य किः, उच्यात्, आशीर्यात्। स्वपि वचीति सम्प्रसारणम्। असार्वधातुक इति किम्? ब्रवीति, ब्रूयात् ब्रवीतु। ब्रुव इड्वचनादेरिति सगुणे ईट्। इहापि यद्यसार्वधातुक इति पर सप्तमी स्यात्, तदा स्वरान्तत्वाद् य प्रत्यये कृते–वच्यादेशे सञ्जाते वच्यमितिस्यात्। विषयभावे तु व्याख्यायमाने आदेश व्यञ्जनान्तत्वात् घ्यणि सति वाच्यमिति सिद्धम्।

● चक्षिङःख्याञ् ३/४/८९

चक्षिङः ख्याञादेशो भवति, असार्वधातुकविषये। आख्यास्यति, आख्यास्यते। असार्वधातुक इति किम्? आचष्टे। चक्षिङ् व्यक्तायां वाचि,

आङ्पूर्वः, स्कोस्संयोगाद्योरिति क लोपः। यदि सार्वधातुक इति परसप्तमी स्यात् तदाचक्षिङ आत्मनेपदस्य विहितत्वात् ख्याञो ञनुबन्धेन उभयपदार्थेन आदावात्मनेपददानात्किं कृतं स्यात्। वर्जनेऽर्थेचक्षिङः ख्याञादेशो वेष्यते। सञ्चक्ष्यः खलः, वर्जनीय इत्यर्थः। ऋवर्णस्य व्यञ्जनान्ताद् ध्यण्, यु प्रत्यये च विचक्षाणः, रूदादेश्च व्यञ्जनादेरितियुः, यु वु झामित्यनादेशः। चक्षिङः रूदादित्वादात्मनेपदे सिद्धे ङानुबन्धानां रूदादिनिमित्तात्मनेपदस्य क्वचिदनित्यत्वार्थम्। तेन सहतीत्यादि सिद्धम्।

• वा परोक्षायाम् ३/४/६०

परोक्षायां विषये चक्षिङः ख्याञादेशो वा भवति, नित्यं प्राप्तम्। आचष्टे आचरव्याते आचरिव्यरे। आलोपो सार्वधातुक इत्यालोपः। पक्षे आचक्षे आचक्षाते, आचक्षिरे।

• अजेर्वी ३/४/६१

विशेषादिष्टं प्रकृतं न बाधत इति, असार्वधातुक इति वर्तते, न परोक्षाग्रहणम्। वेति निवृत्तम्। अज गतिक्षेपणयोरित्यस्य सार्वधातुक विषये वी आदेशो भवति। वेता वेष्यति। असार्वधातुक इति किम्? अजति। यद्यत्र परसप्तमीस्यात् तदा व्यञ्जनान्तत्वात् अजेः घ्यणि परे व्यादेशे सति वैयमिति भवेत्, विषयसप्तम्यां त्वादेशे कृते स्वरान्तत्वाद् य प्रत्यये सतिवेयमिति सिद्ध्यति। घञि अलि क्यपि च नेष्यते–समाजः, समजः, समज्या। अजेः सम्पूर्वः। भावे घञ्, वक्तव्याद् अल्, समजासनिसदेति क्यप्। युटि वेष्यति, प्रजनः, प्रवयणः। करणाधिकरणयोश्चेति युट्। पक्षे वीरादेशः गुणः।

• अदादेर्लुग्विकरणस्य ३/४/६२

अद भक्षण इत्येवमादेर्गणात् विकरणस्य लुग्भवति। अत्ति, हन्ति, द्वेष्टि विकरणस्येतिकिम्? अद्यते।

• जुहोत्यादेश्च ३/४/६३

हु दानादानयो इत्यादेर्गणात् विकरणस्य लुग्भवति। जुहोति, विभेति, जिह्रेति। हुदानादानयोः, ञिभी भये, ह्री लज्जायाम्, विकरणस्येति किम्? हूयते। नाम्यन्तानां यणायीति दीर्घः।

• वा चेक्रीयितस्य ३/४/६४

चेक्रीयितस्य वा लुग्भवति, वोभवीति, रारटीति, य शब्दः, तस्यानेन लुक् चर्करीते परस्मैपदमिति, ति, अन्विक, अदादेर्लुक्। वक्तव्याद ईट्। पक्षे वोभूयते, रारट्यते।

• इणस्थादापिवतिभूभ्यस्सिचः परस्मै ३/४/६५

इण् गतौ, ष्ठागति निवृत्तौ, दा इति दासंज्ञकाः, पा पाने, भूसत्तायाम्, एभ्यःपरस्य सिचोलुग्भवति परस्मैपदे परे। अगात्, अस्थात्, अदात्, अपात्, अभूत्। इणोगा इति गा आदेशः, सिच्, तस्यानेन लुक्। परस्मैपद इति किम्? व्यत्यभविष्ट। भवतेः व्यति पूर्वः, अद्यतनी आत्मने, त, सिच्, इट्। "घ्रा शास्छासाधेट्भ्यः परस्य सिचः परस्मै पदे लुग्वावक्तव्यः" अघ्रात्, अशात्, अच्छात्, असात्, अधात्। घ्रा गन्धोपादाने, शो तनूकरणे, छो छेदने, षो अन्तकर्मणि, धेट्पाने। सिच्, वक्तव्यात् लुक्। पक्षे अघ्रासीत्, अशासीत्, अच्छासीत्, असासीत् अधासीत्। सिच्, यमिरमिनम्यादन्तेति इट्, इटः पूर्वम् सकारागमः, इटश्चेटीति सिज्लोपः समानदीर्घः। परस्मैपद इति किम्? अघ्रासाताम् पुष्पे देवदत्तेन।

।। भट्टोग्रभूति कृतायां शिष्यहितायां वृत्तावाख्यातप्रकरणे चतुर्थः पादः।।

अथाख्यातप्रकरणे पञ्चमःपादः

• नाम्यन्तयोर्धातुविकरणयोर्गुणः ३/५/१

धातुविकरणयोः नाम्यन्तयोर्गुणो भवति। स्थानेऽन्तरतम इति परिभाषया मूर्धन्यस्य ऋकारस्य अर्, तालव्यस्य इवर्णस्य तालव्यः एकारः, ओष्ठ्यस्य वर्णस्य ओष्ठ्यः ओकारो भवति, धातोः, कर्ता, तरति, नेता, चेता, स्तोता, लविता। डुकञ् क, तृ प्लवन तरणयोः, चिञ् चये, णीञ् प्रा, ष्टूञ् स्तु, लूञ् छेदने। विकरणस्य–सुनोति, तनोति, षुञ् अ, तनु वि, नाम्यन्तयोरिति किम्? उम्भिता, उभ उम्भ आद्रभावे, गुणः। अत्रौष्ठ्यस्य उकारस्य ओष्ठ्यः ओकारः गुणः प्राप्तः। धातुविकरणयोरिति किम्? कर्तृभिः। गौण मुख्ययोर्मुख्ये सम्प्रत्यय इति वचनात् गौणस्य धातोर्न भवति। नीभ्याम्, लूभ्याम्, नयतीति नीः, लुनातीति लूः, क्विप्। नानयोः नी लू शब्दयोः अस्ति मुख्यत्वम्। किबन्तो धातुत्वं न जहाति, लिङ्गत्वं च प्रतिपद्यते इति शुद्धस्य क्रियावाचित्वस्याभावात्। ग्लायतीत्यत्र ऐकारस्य एकारो गुणो न भवति। यदि स्यात् किमेकारपाठेन कृत भवेत्।

• नामिनश्चोपधायाः लघोः ३/५/२

धातुग्रहणमनुवर्तते, न विकरण ग्रहणम्, तस्योपधाया असम्भवात्। धातो उपधाभूतस्य नामिनः लघोः लघ्वन्तस्य गुणो भवति। वेदिता, मोषिता, वर्तिता। विद ज्ञाने, मुषस्तेये, वृतु वर्तने। दोग्धा, द्वेष्टा। दुह प्रपूरणे, द्विष् अप्रतौ। ता, दादेर्घ इति हस्य घः, घढधभेभ्य इति तस्य धः धुटां तृतीय इति घस्य गः। उपधाया इति किम्? भिनत्ति। भिदिर् विदारणे, स्वराद्रुधादेरिति न शब्दः। लघोरिति किम्? ईहते ऊहते, इति। चण् परे परतः उपधाभूतस्य ऋवर्णस्य वा ऋकारादेशो वक्तव्यः। अवीवृधत्, वा, अववर्धत्। वृधू वृद्धौ, वृद्धवन्तं प्रयुङ्क्ते, इन्, दि, श्रिद्रुस्रुकमीति चण्। पक्षे ॠकारस्य ऋकार। पक्षे कीर्त्तीषोक्तिश्चेति ज्ञापकात् इट्, कारितलोपः, द्विवर्चनम्।

• अनि च विकरणे ३/५/३

पूर्वेण सूत्रद्वयेन अतिप्रसक्तौ गुणः सर्वत्र विकरणे स्यादिति नियम्यते। धातोः अनि च विकरण एव परे गुणो भवति। भवति, भवतः भवन्ति। मोदते, वर्तते। अनि एवेति किम्? नृत्यति, सुनोति, तृणोति, क्रीणाति, पुषाण। नृती गात्र विक्षेपे, षुञ् अभिषवे, तृणु अदने, डुक्रीञ् द्रव्यविनिमये, पुष पुष्टौ, वर्तमाना ति, पुषेः पञ्चमी, हि, दिवादेर्यन्, नुस्स्वादेः, तनादेरूः, ना क्र्यादेः, आन व्यञ्जनान्ताद्धौ, इति यथाक्रमं करणाः। हेरकारादिति हेर्लोपः।

• करोतेः ३/५/४

पूर्वेण नियमेन उकारे विकरणे न स्यादिति वचनम्। करोतेः डुकृञ् करण इत्यस्य उ विकरणे परे गुणो भवति। करोति, कुरूतः, कुर्वन्ति, तनादेरूः अनेन गुणः, अस्योकारः, करोतेरिति विकरण निर्देशः। कॄञ् हिंसायामित्यस्य निवृत्त्यर्थः। कृणोति।

• मिदेः ३/५/५

ञि मिदा स्नेहनमोचनयोः इत्यस्य विकरणे परे गुणो भवति, मिदेः भौवादिकस्य गुणस्सिद्धः इति दैवादिको गृह्यते। मेद्यति, दिवादेर्यन्।

• अभ्यस्तानामुसि ३/५/६

अभ्यस्तानां सम्बन्धी य उस् तस्मिन्परे नामिनः गुणो भवति। द्वित्व बहुत्वयोश्च परस्मायिति निषेधो बाध्यते। अजुहवुः, अबिभयुः, अजागरूः। हु दानादानयोः, ञिभी भये, जागृनिद्राक्षये, ह्यस्तनी अन्, अन्वि, जुहोत्यादेश्चेति लुक्, अदादेर्लुक्, द्विर्वचनम्। अन उससिजभ्यस्तेति अनः उस्, अनेन गुणः। अभ्यस्तानामिति किम्? अविदुः, विद ज्ञाने, ह्यस्तनी, अन्। चिच्युः, चिञ् चये। परोक्षा उस्, य इवर्णस्येति यः।

• न णकारानुबन्धचेक्रीयितयोः ३/५/७

नाम्यन्तस्य धातोः नाम्युपधस्य च णकारानुबन्धे चेक्रीयिते च परे गुणो न भवति। नीयते, लूयते। सार्वधातुके यण्। अपुषत्, अद्युतत्। पुष पुष्टौ, द्युत दीप्तौ। पुषादि सूत्रेण अण्। चेक्रीयिते खल्वपि नेनीयते, बोभूयते, पोपुष्यते, लोलिह्यते। अत्यर्थम् नयति भवति पुष्णाति, लेढि। णकारानुबन्ध-चेक्रीयितयोरिति किम्? कुरूतात्।

• अभ्यस्तस्य चोपधायाः नामिनस्स्वरेगुणिनि सार्वधातुके ३/५/८

[1]अभ्यस्तस्य चोपधायाः नामिनः स्वरादौ गुणिनि सार्वधातुके परे गुणो न भवति। नेनिजानि, अनेनिजम्। विशेषनामिग्रहणाद्व्यञ्जनानीत्यलोपो न स्यात्, एवमुत्तरत्रापि योज्यम्। गुणिनीति किम्? गुणिन्यपि गुणो मा भूत्–अनेनिजुः।

• सनिचानिटि ३/५/६

[2]नामिन उपधाया अनिटि सनि गुणो न भवति। बिभित्सति, दित्सा, बभुक्षते, जिघृक्षति। चकारादनामिनोऽपि क्वचित्, तेन धीप्सतीति न लोपः स्यात्। अनिटीति किम्? चुकोषिषति।

• सिजाशिषोश्चात्मने ३/५/१०

नामिन उपधायाः सिच्यात्मने पदे आशिषि चानिटि गुणो न भवति। अभित्त, अच्छित्त, अभित्साताम्, अदुह्वहि, अदुग्धाः। दुह दिह लिह गुहामात्मने वतवर्गे वा सणेव, तत्रव्यवस्थित वानुवृत्तेः। सिचोऽद्यतन्युपलक्षणत्वात् सिद्धम्। भित्सीष्ट, भुक्षीष्ट। अनिटीति किम्? अवर्धिष्ट, वर्धिषीष्ट। इहात्मने ग्रहणं गुणबाधिका वृद्धिरिति ज्ञापनार्थम्, तेन न्यनुवीत् कुटादित्वादगुणे वृद्धिर्नस्यात्।

[4]अभित्साताम्, अभित्सते। आशिषि–भित्सीष्ट, छित्सीष्ट, भुत्सीष्ट।

---

१. दुर्गवृत्तिः २. दुर्गवृत्तिः ३. दुर्गवृत्तिः ४. शिष्यहितावृत्तिः।

तृतीयादेर्घढधभेति बस्य भः। अनिति किम्? अवर्तिष्ट, वर्तिषीष्ठ। वृतु वर्तने अद्यतनी, आत्मने पदम्, त, आशीः, सीष्ट, सिच्, इट्, उपधाया इति किम्? अचेष्ट, चेषीष्ट। चिञ् चये।

• ऋदन्तानाञ्च ३/५/११

अद्यतन्याशिषोश्च आत्मने पदे अनिटि परे। ऋकारान्तानां धातूनां गुणो न भवति, अकृत, अकृषाताम्, अकृषत। अद्यतनी, त, आताम्, अन्त, सिच्, ह्रस्वश्चानिटीति किम्? अवरिष्ट, वर्तिषीष्ट। वृञ् वरणे, अद्यतनी सिच्। आशिषः, सीष्ट, इट् गुणः।

• स्थादोश्च ३/५/१२

अद्यतनी ग्रहणं सम्बध्यते, न त्वाशीर्ग्रहणम्। तस्यां परस्या नामिनोरभावात् ष्ठा गति निवृत्तौ, इत्यस्य, दासंज्ञकस्य च अद्यतन्यामात्मनेपदे परे गुणो न भवति समस्थिषत, समस्थिषत्। अदित अदिषाताम् अदिषत। अधित, अधिषाताम्, अधिषत। ष्ठा गतिनिवृत्तौ, डु दाञ् दाने, डु धाञ् दानधारणार्थः। अद्यतनी, त, आताम्, अन्त। सिच्, स्थादोरिरद्यतन्यामिति ईत्वम्, ह्रस्वश्चानिटीति सिच् लोपः।

• भुवस्सिज्लुकि ३/५/१३

भवतेः सिचो लुकि सति गुणो न भवति। अभूत्, अभूताम्, अभूवन्। इण्स्थादेरिति सिचो लुक्। भुवोवोतु इति वकारागमः। भुवस्सिज्लुकीति इडभावः। सिज्लुकीति किम्? व्यत्यभविषाताम्, व्यत्यभविषत। रूदादित्वात् व्यतिपूर्वात् भुवः, आत्म, त, आताम्, अन्त। अड्धात्वादिः, सिच्, इट्, गुणः, आत्मनेचानकारादिति न लोपः।

• सूतेः पञ्चम्याम् ३/५/१४

षूङ् प्राणिगर्भ विमोचन इत्यस्य तिपि गुणो न भवति, अतएव निर्देशात् सूतेः गुणो न भवति पञ्चम्यां परतः। सर्वेषामात्मन इत्यनेन पञ्चम्युत्तमे गुणः प्राप्तः स अनेन बाध्यते, सुवै सुवावहै। षूङ् प्राणि गर्भ विमोचने पञ्चमी। ऐ, आवहै स्वरादाविवर्णेति इय्, पञ्चम्यामिति किम्? प्रसविता।

• दीधीवेव्योश्च ३/५/१५

पञ्चम्यामेवेति निवृत्तम्, सूत्रे दीधीवेव्योः पञ्चम्यामित्येक-योगाकरणात्। दीधीङ् दीप्तिदेवनयोः, वेवीङ् वेतिनातुल्ये इत्यनयोर्गुणो न भवति। आदीध्यनम्। आदीव्यनम्, युट्चेति युट्, य इवर्णस्येति यः, आदीध्यै, आदीध्यावहै, ए, आवहै, पूर्ववद् यत्वम्।

• रूदविदमुषांसनि ३/५/१६

रूदिर् अश्रुविमोचने, विद ज्ञाने, मुष स्तेये, एषां सनि परे गुणो न भवति, सनिचानिटीत्यनेन नास्ति सिद्धिः सेडर्थत्वादस्य ज्ञानार्थो विदिर्गृह्यते, सेट्त्वात् अरूदिषति, विविदषति, मुमुषिषति। सनीति किम्, रोदिता, वेदिता, मोषिता।

• नाम्यन्तानामनिटाम् ३/५/१७

अविद्यमानः इट् येभ्यः धातुभ्यः ते अनिट्, सनीत्येव। नाम्यन्ताना धातूनामनिटां गुणो न भवति सनि। चिचीषति, निनीषति, जुहूषति, इवर्णादश्विश्रीति इडभावः। स्वरान्तानां सनीति दीर्घः, द्विर्वचनम्। अनिटामिति किम्? शिषयिषते, शीङ् स्वप्ने, शयितुमिच्छति, सन्, इट्, गुणः।

• सर्वेषामात्मने सार्वधातुकेऽनुत्तमे पञ्चम्याः ३/५/१८

सर्वेषां धातूनां विकरणानां च गुणो न भवति, आत्मनेपदे सार्वधातुके परे अनुत्तमे पञ्चम्याः, य आत्मनेपदोत्तमपुरूषस्तस्मिन् परे गुणो भवत्येव। स्तुते, स्तुवीत, स्तुताताम्, अस्तुत, ष्टूञ् स्तुतौ, वर्तमाना, ते, सप्तमी, ईत, ह्यस्तनी त, स्वरादाविवर्णेति उव्। दुग्धे, दुहीत, दुग्धाम्, अदुग्ध दुह प्रपूरणे, ते, ईत ताम् त। दादेर्घः, घढधभेभ्यं इति तस्य धः, धुटां तृतीय इति घस्य गः। विकरणे। कुरूते, कुर्वाते, कुरूताम्, अकुरूत। डुकृञ् करणे, तनादेरूः, करोतेरिति गुणः, अस्योकारः, सुनते, सुन्वीत, असुनुताम्, असुनत्। षुञ् अभिषवे, नुस्स्वादेः, नोर्विकारो विकरणस्येति वत्वम्। सर्वग्रहणं नाम्यन्तानामित्यस्य निवृत्यर्थम्। आत्मन इति किम्? दोग्धि, करोति, सुनोति। दुहेः पूर्ववद् घत्वादिः सार्वधातुक इति किम्?

स्तोता, दोग्धा, श्वस्तनी, ता। अनुत्तमे पञ्चम्या इति किम्? स्तवै, स्तवावहै, स्तवामहै। दोहै, करवै, सुनवै, ऐ, आवहै आमहै तनादेरूः, नुस्स्वादेः, गुणः।

• द्वित्वबहुत्वयोश्च परस्मै ३/५/१९

सर्वेषां धातुविकरणानां गुणो न भवति सार्वधातुके परस्मै पदे, द्वित्वबहुत्वयोः पञ्चम्याः परयोः अनुत्तमे। पञ्चम्यां परस्मैपदोत्तमपुरूषे तु द्वित्वबहुत्वे, तयोः परयोः गुणो भवत्येव। स्तुतः, स्तुवन्ति, स्तुताम्, स्तुवन्तु अस्तुताम्, अस्तुवन्। दुग्धः, दुहन्ति, दुग्धाम्, दुहन्तु, अदुग्धाम्, अदुहन्। कुरूतः, कुर्वन्ति, कुरूताम्, कुर्वन्तु, अकुरूताम्, अकुर्वन्। सुनुतः, सुन्वन्ति,, सुनुताम्, सुन्वन्तु, सुनुताम्, असुन्वन्। वर्तमाना, ति, तस्, अन्ति। पञ्चमी, ताम्, अन्तु ह्यस्तनी, ताम्, अन्। स्तु दुह इत्येतयोः, अन्विकरणः। अदादेर्लुक्, कृ सृ अनयोः तनादेरूः, नुस्स्वादेश्च नोर्वकारो विकरणस्येति नोर्वत्वम्। द्वित्ववहुत्वयोरिति किम्? दोग्धि, करोति, सुनोति। सार्वधातुक इति किम्? स्तोतारौ, स्तोतारः। अनुत्तमे पञ्चम्या इति किम्? स्तवाव, स्तवाम, दोहाव, दोहाम, करवाव, करवाम, सुनुवाव, सुनुवाम। पञ्चमी, आव आम। गुणः।

• परोक्षायाञ्च ३/५/२०

परोक्षायां परस्मैपदे द्वित्वबहुत्वयोः परयोः धातोः गुणो न भवति। चक्रतुः, चक्रुः, दुदुहतुः, दुदुहुः। द्वित्वबहुत्वयोरिति किम्? दुदोह।

• सर्वत्रात्मने ३/५/२१

परोक्षायामात्मनेपदे सर्वत्र, एकत्वे द्वित्वे बहुत्वे च गुणो न भवति। चक्रे, चक्राते, चक्रिरे। दुदुहे, दुदुहाते दुदुहिरे। आत्मन इति किम्? दुदोह।

• आशिषि च परस्मै ३/५/२२

आशिषि च परस्मैपदे परे गुणो न भवति। भूयात्, भूयास्ताम्, भुयासुः। दुह्यात्, दुह्यास्ताम्, दुह्यासुः। नाम्यन्तानां यणायीतिदीर्घः। परस्मायिति किम्? स्तोषीष्ट।

• सप्तम्याञ्च ३/५/२३

सप्तम्यां परस्य गुणो न भवति। स्तुयात्, दुह्यात्, स्तुनुयात्।

• हौ च ३/५/२४

हौ, हि प्रत्यये परे गुणो न भवति, स्तुहि। दुग्धि। पञ्चमी, हि, दादेर्घः हुधुड्भ्यां हेर्धिः। सुनु। षुञ् अभिषवे। नोश्चविकरणादिति हेर्लोपः। एवम् इहि, इण् गतौ। कथम् एहि? इङः आङ् पूर्वस्यायं प्रयोगः।

• तुदादेरनि ३/५/२५

तुदादेर्गणस्य अनि परे गुणो न भवति। तुदति, नुदति, विशति। तुद व्यथने, णुद प्रेरणे, विश प्रवेशने। अनीति किम्? तोत्ता।

• आमि विदिरेव ३/५/२६

विद ज्ञाने इत्यस्य अस्ति परे गुणो न भवति। विदाञ्चकार। अट्, उषविदजागृभ्यो वेत्याम्। आमः कृञ्, द्विर्वचनम्। संविदाञ्चक्रे। संपूर्वो विदिः कृञ्, अद्यतनी दि, परोक्षा ए, अन्यत्पूर्ववत्। आमीति किम्? विवेद विदेरिति किम्? उषाञ्चकार, उष दा, अट्, पूर्ववत् आम्। एवकारो वैचित्र्यार्थः। विदिःज्ञानार्थो गृह्यते, तस्यैवागमसम्भवात्।

• कुटादेरनिनिचट्सु ३/५/२७

कुट कौटिल्य इत्यतः आरभ्य यावत् कुङ् शब्दे इत्यतस्तावत् कुटादिः। कुटादेर्गणस्य गुणो न भवति अनिनिचट्सु। इनि इचि अटि परे गुणो भवत्येव। कुटिता कुटिष्यति। पुटिता पुटिष्यति। कुट कौटिल्ये, पुट संश्लेषे। व्यनुवीत् व्यधुवीत्। णुस्तुतौ, धू विधूनने विपूर्वः, अद्यतनी दि, अड्धात्वादिः सिच्, ईट्, इटश्चेटीति सिज्लोपः। स्वरादाविवर्णेत्युव्। अनिनिचट्स्वति किम्? कोटयति कुटन्तं प्रयुङ्क्ते। कुट्, इन्, अटि, अकोटि, अद्यतनी त, भावकर्मणोश्चेति इच्, इचस्तलोपः, अटि, अकोट।

• विजेरिटि ३/५/२८

ओ विजी भयचलनयो इत्यस्य इटि परे गुणो न भवति। उद्विजिता, उद्विजिष्यते। उत्पूर्वाद्विजेः, त, स्यत, इट्। इटीति किम्? उद्वेगः। भावे घञ्, चजोःकगाविति जस्य गः। कथम् "उद्वेजिताः वृष्टिभिराद्रयन्ते" इत्यत्र गुणः। किन्तर्हि इन्, निष्ठेति क्तः, इट्, निष्ठेटीन इति इनो लोपः। प्रोर्णोः, ऊर्णूञ् छादने इत्यस्य इटि परे गुणो वा भवति प्रोर्णविता इट्, स्वरादाविवर्णेत्युव्। पक्षे गुणः, इटीति किम्? प्रौर्णोत्, ह्यस्तनी, दि, स्वरादीनां वृद्धिरादेरित्यौकारः, गुणो हयस्तन्याञ्चेति गुणः।

• स्थादोरिरद्यतन्यामात्मने ३/५/२९

ष्ठा गति निवृत्तावित्यस्य दा संज्ञकस्य च अद्यतन्यामात्मने पदे परे इत्वं भवति। समस्थित समस्थिषाताम् समस्थिषत। आदित, आदिषाताम्। अद्यतन्यामिति किम्? संस्थाप्यते, सं पूर्वस्य तिष्ठते। रूचादित्वादात्मने पदम्। आत्मनइति किम्? अस्थात्। अदात्। अधात्। इणस्थादापिवतीति सिचोलुक्।

• मुचादेरागमो नकारस्स्वरादनि विकरणे ३/५/३०

मुच्लृ मोक्षणे इत्यत आरभ्य पिष अवयवे इत्येतत्पर्यन्तः मुचादिभ्यो विकरणस्य यः स्वरस्तस्मात् परो नकारागमो भवति, अनिविकरणे परे, अकार उच्चारणार्थः। मुञ्चति, मुञ्चते। लुम्पति लुम्पते। विन्दति। मुच्लृमोक्षणे, लुप्लृच्छेदने, विद्लृ लाभे। यजादित्वादुभयपदम्, इति, अन्विकरणः अनेन नकारागमः। अनिविकरण इति किम्? मोक्ता। मुञ्चग्रहणं विष्पष्टार्थम्, नह्यन्यो मुचादिभ्यो विकरणादिति।

• मस्जिनशोर्धुटि ३/५/३१

टु मस्जो शुद्धौ, णश् अदर्शने, इत्यनयोः धुटि परे स्वरात्परो नकारागमो भवति। मङ्क्ता, मङ्क्ष्यति, अमङ्क्ष्यत्। टुमस्जो शुद्धौ। ता, स्यति, स्यत्। युजि रजि रञ्जीति इडभावः अनेन नागमः, धुटां तृतीय इति सस्य दः। तवर्गश्चटवर्गेति दस्य जः, व्रश्चिमस्जोर्धुटीति जकार–लोपः। चवर्गस्य किः, वर्गान्तम् षत्वम्। नशेः खल्वपि। नष्टा, नङ्क्ष्यति,

अनङ्क्ष्यत्। नश् अ, ता, स्यात्, स्यत्। रूचादित्वादिटो विकल्पः नकारागमः, छषोश्चेति शस्य षः, षढोकस्स इति कः, धुटीति किम्? मज्ज्यते, नश्यते। सार्वधातुके यण्।

• रधिजभोस्स्वरे ३/५/३२

रध हिंसायाम्, जभ जृभि जभी, अनयोस्स्वरेपरे स्वरात्परो नकारागमः भवति। इन्धयति, जम्भयति, रध्यन्तं प्रयुङ्क्ते, जम्भमानं प्रयुङ्क्ते। आगमादेशयोरामगो विधिर्वलवानिति वचनात्पूर्वो नकारागमः, कृते तस्मिन्नस्योपधेति दीर्घो न भवति। रन्धकः, जम्भकः, वुण्तृचाविति वुण्, स्वर इति किम्? रध्यते, जभ्यते।

• नेटिरधेरपरोक्षायाम् ३/५/३३

रध हिंसासंराध्योरित्येतस्य नकारागमः इटि परे न भवति अपरोक्षायाम्, परोक्षायां तु यः तत्र इट् भवत्येव। पूर्वेण प्राप्तः। रधिता, रधिष्यति, अरधिष्यत्, रधितव्यम्, तव्यानीयाविति तव्यः। इटीति किम्? रन्धयति, अपरोक्षायामिति किम्? ररन्धिव, ररन्धिम, परोक्षा, व, म, इट्, द्विर्वचनम्, पूर्वेणनागमः।

• रभिलभोरविकरणपरोक्षयोः ३/५/३४

विकरणश्च परोक्षा च ते विकरणपरोक्षे, ततो नञा, समासः, स्वर इत्येव आगमो नकारः। रभ राभस्ये, डुलभष् प्राप्तौ, इत्यनयोः स्वरे परे, स्वरात्परो नकारागमो भवति। अविकरणपरोक्षयोः, विकरणस्य परोक्षायाश्च यः स्वरस्तस्मिन्परे न भवति। आरम्भयति, आलम्भयति, रभ राभस्ये डुलभष् प्राप्तौ, आङ् पूर्वः। आरभमाणं प्रयुङ्क्ते, आलभमानमिति, इन्, अनेन नकारागमः। आरम्भकः, आलम्भकः। वुण्तृचावितिवुण्, अविकरण परोक्षयोरिति किम्? आरेभे आलेभे। अस्यैकव्यञ्जनमध्ये इति एत्वाभ्यास लोपौ। स्वरइति किम्? आरभ्यते, आलभ्यते, लभेरनुपसर्गस्य णमि इचि परे। णकारागमो वा वक्तव्यम्। णमि लम्भम्–लम्भम्। लाभम्–लाभम्। णमृचाभीक्ष्ण्ये द्विश्चपदमिति णम्, वक्तव्याद्वा नागमः। पक्षे अस्योपधेति दीर्घः। णञ्चाभीक्ष्ण्ये द्विः, इचि, आलम्भि अलभि। अनुपसर्गस्येतिकिम्? प्रलम्भम्– प्रलम्भम्। प्रालभि।

• हुधुड्भ्योहेर्धिः ३/५/३५

हु दानादानयो इत्यस्मात् धुडन्ताच्च परस्य हेः हिप्रत्ययस्य धिरादेशो भवति जुहुधि। धुडन्तात्– चकाद्धि। चकासृ दीप्तौ, हेर्धित्वम्। धुटां तृतीय इति सस्य दः, छिन्धि, भिन्धि। छिदिर् द्वैधीकरणे, भिदिर् विदारणे, हि, स्वराद्रुधादेरिति न शब्दः, रूधादेर्विकरणान्तादेशः। शिण्डि, पिण्डि। शिष्लृ विशरणे, पिस्लृ संचूर्णने, हि, पूर्ववत् लृ शब्दान्तलोपः हेर्धित्वम्, धुटां तृतीयचतुर्थ इति षस्य डः, ऋटुरषाणां मूर्ध इति वचनात् तृतीयो डः। तवर्गश्चटवर्गेति नस्य णः हुधुड्भ्यामिति किम्? क्रीणीहि। उभयेषामीकारः। हेरिति किम्? जुहोति, भिनत्ति।सेड्विषये तातङ्, पक्षे च धित्वं नेष्यते। रूदिहि, रूदिर् अश्रुविमोचने। सार्वधातुके च रूधादेरिति इट्। भित्तात्, भिदिर् विदारणे, हि पूर्ववत् र शब्दान्त लोपः। वक्तव्यात् हेः तातङ्। अघोषे प्रथमः।

• अस्तेः ३/५/३६

अस् भुवि इत्यस्मात् परस्य हेर्धित्वं भवति, एधि, अस्–भुवि हि, अस्तेरादेरिति अकार लोपः। दास्त्योरभ्यासलोपश्चेति अकारस्य एत्वम्। नित्यानित्ययोर्नित्यो विधिर्वलवानिति एत्वे कृते धुटस्सकारस्याभावात्पूर्वेण धित्वं प्राप्नोतीति वचनात्। न च कृते एत्वे स्थानिवद्भावोऽस्ति, अवर्णविधाविति प्रतिषेधात्।

• शा च शास्तेः ३/५/३७

शासु अनुशिष्टावित्यस्य शा आदेशो भवति हौ परे, च शब्दात् हे र्धित्वञ्च।अनुशाधि, अनुप्रशाधि, शासु अनु, प्र पूर्वौ, हेः शादेशः, हेर्धित्वम्।

• लोपोऽभ्यस्तादन्तिनः ३/५/३८

अन्तेः नः, अन्तिनः, तस्य अन्तिनः अभ्यासात्परस्य अन्त इत्यस्य यो नकारस्तस्य लोपो भवति, अन्तेः इकार उच्चारणार्थः। ददति, ददतुः, दधति, दधतुः जुह्वति, जुह्वतुः, दरिद्रति दरिद्रतुः। डुदाञ्दाने, डु धाञ् दानधारणयोः, हु दानादानयोः। दरिद्रा दुर्गतौ, वर्तमाना, अन्ति, पञ्चमी, अन्तु, अन्विकरणः, जुहोत्यादेश्चेति लुक्, अभ्यस्तानामाकारस्येत्यालोपः,

जुहोतेः, सार्वधातुक इति वत्वम्। अनेन लोपः। अभ्यस्तादिति किम्? यान्ति। अनि ग्रहणं किम्? ददीरन्, डुदाञ् दाने सप्तमी ईरन्। पूर्ववदा लोपः।

● आत्मनेचानकारात् ३/५/३९

लोपोऽन्तिन इत्येव, आत्मनेपदे यः अन् शब्दः, तस्य नकारलोपो भवति, अनकारात्, अकारान्तपरस्य न भवति, कुर्वते, चिन्वते, लुनते, डुकृञ् क, चिञ् च, लूञ छे, वर्तमाना अन्ते, तनादेरूः, नुस्स्वादेः, ना क्र्यादेः, करोतेरिति गुणः, अस्योकारः, नोर्वकारोविकरणस्येति वत्वम्। क्र्यादीनां विकरणस्येति ना प्रत्ययस्य आलोपः, प्वादीनां ह्रस्वः, अनेन लोपः, आत्मनेपदादितिकिम्? लुनन्ति। अकारादिति किम्? च्यवन्ते, प्लवन्ते। च्युङ् गतौ, प्लुष्, प्लुङ् गतौ, अन्ते, अन्विकरणः गुणः।

● शेतेरिदन्तेरादिः ३/५/४०

शीङ् स्वप्ने, इत्यस्मात्परस्य अन्तिशब्दस्य आदेः रेफागमः भवति, अन्तेः इकार उच्चारणार्थः, आगम्य च शेरते। शेरते, शेरताम्, अशेरत्। शीङ् स्वप्ने, वर्तमाना अन्ते, पञ्चमी अन्ताम्, ह्यस्तनी, अन्त, शीङस्सार्वधातुक इति गुणः अनेन रेफागमः। पूर्वेण न लोपः, अन्तेरिति किम्? शेते, शयाते, ते, आते पूर्ववद्गुणः।

● वेत्तेस्सम्प्रति परस्मै वा त्यादयः ३/५/४१

परस्मै पदानां पदमित्यस्य लोपः। विद ज्ञान इत्यस्मात् परेषां परस्मैपदानां सम्प्रति काले विहितानां त्यादीनाम् अटादय आदेशा वा भवन्ति। स्थानेऽन्तरतमपरिभाषया त्यादीनां परस्मैपदसंज्ञानां परस्मै पदसंज्ञका एव अटादयः भवन्ति। वेद, विदतुः, विदुः, वेत्थ, विदथुः, विद, वेद विद्व विद्म, वर्तमाना ति तस् अन्ति। सि थस् थ मि वस् मस्। अद्यतन्यादीनां नवानामटादयः स्थानिवद्भावाद्वर्तमानेऽवस्थित इति चण् परोक्षेति द्विर्वचनं न भवति। एकत्वे गुणः, अन्यत्र, द्वित्वबहुत्वयोश्च निषेधः। पक्षे वेत्ति, वित्तः, विदन्ति, वेत्सि, वित्थः, वित्थ, वेद्मि, विद्वः, विद्मः। सम्प्रतीति किम्? विद्यात्। परस्मैपदानामिति किम्? संवित्ते, संपूर्वोः विद रूदादिर्वर्तते।

● ब्रुवः पञ्चानामादित आदिश्च ३/५/४२

आदौ आदितः सम्प्रति परस्मै वा अटादय इत्येव ब्रुवः, ब्रूञः परेषां सम्प्रति कालविहितानां पञ्चानां परस्मैपदानां आदितः आदौस्थितानां यथासंङ्ख्यं वा अटादयः आदेशाः भवन्ति, ब्रुवश्च आहिरादेशः। इकारः उच्चारणार्थः। आह, आहतुः, आहुः। आत्थ, आहथुः, ब्रूञ् व्यक्तायां वाचि, वर्तमाना ति, तस, अन्ति, सि, थस्, अनेन वा अटादयः आदेशाः ब्रुवः आहिरादेशः थलिपरे। थे थश्चेति हस्य थः, तस्य प्रथमः। पक्षे ब्रवीति ब्रूतः ब्रुवन्ति, ब्रवीषि, ब्रूमः। ब्रुव ईड्वचनादिरिति ईट्, गुणः, पञ्चानामिति किम्? ब्रूथ।

● थेथश्च ३/५/४३

आहिरित्येव, आहेरन्त्यस्य थकारादेशो भवति, थे, थकारे परे, आत्थ। ब्रूञ् व्यक्तायां वाचि, वर्तमाना, सि, पूर्वेण से, थल, ब्रुवश्चाहिः, अनेन हस्य थः, तस्य प्रथमः।

● आकारादट औ ३/५/४४

आकारान्ताद्धातोः परस्य अटः, औत्वं भवति, पपौ, ददौ, ययौ। पा पाने, डु दाञ् दाने, या प्रापणे, अट्, द्विर्वचनम्, अनेन अटः औत्वम् सन्ध्यक्षरे चेत्यालोपः। अट इति किम्, याहि।

● ऋदन्तस्येरगुणे ३/५/४५

ऋकारान्तस्य धातोः अगुणे प्रत्यये परे इकारादेशो भवति, किरति, गिरति। कॄविक्षेपे, गॄनिगरणे, ति, अन्विकरणः, तुदादेरनीत्यगुणत्वम्। अनेन इर्, नामिनोर्वोरिति दीर्घः। कीर्यते, गीर्यते ऋदन्तस्येति किम्? तुदति। अगुण इति किम्? करिता, कॄ वि, अनेकवर्णस्सर्वस्येति वचनमनित्यम्। गिरतेश्चेक्रीयित इति ज्ञापकात्– तदन्तस्य वायमादेशः विज्ञायते।

● उरोष्ठ्योपधस्य च ३/५/४६

ओष्ठे भवः ओष्ठ्यः, ओष्ठ्य उपधा यस्य स ओष्ठ्योपधः ओष्ठ्योपधस्य धातोः ऋदन्तस्य च अगुणे प्रत्यये परे उरादेशोभवति।

ईरादेशस्यापवादः। आपूर्यते, भूर्ज्यते। पृ पालनपूरणयोः, आङ्पूर्वः, भृजी भर्जने, यण्, अनेन ऋकारस्य उर्, नामिनोर्वोरिति दीर्घः, द्विर्व, ह्रस्वः, ओष्ठ्योपधस्येति किम्? जीर्यते। अगुण इति किम्? परिता, पृ पालन–पूरणयोः। दन्त्योपधस्यापि ऋदन्तस्य अगुणे उरादेशः। वुवूर्षति, वृ वरणे, च शब्दात्, उर्।

• इन्यसमानलोपोपधायाः ह्रस्वश्चणि ३/५/४७

नसमानः असमानः, असमानः लोपः यस्यशब्दस्य स असमानलोपः, तस्य उपधा असमानोपधा, तस्य ह्रस्वो भवति, इनि चण् परे, अपीपचत्, अपीपठत्, पक्वन्तं प्रयुङ्क्तवान् पठितवन्तं प्रयुङ्क्तवान् इन्, अस्योपधेति दीर्घः। द्रूश्रूकमीति चण् द्विर्व, अलोपे समानस्येति ईत्वम्, दीर्घो लघोः असमानलोप ग्रहणं किम्? अत्यरराजत्, राजनमतिक्रान्तवान्, इन्कारितं चेति इन्, लिङ्गस्यान्त्यस्वरादिलोपः, अड्धात्वादिः, चण्, द्विर्व, उपधाया इति किम्? अचकाङ्क्षत्, काङ्क्षि काङ्क्षायाम्, काङ्क्षितवन्तं प्रयुङ्क्ते, इन् चणीति किम्? पाठयति। यत्र इनि परे इनो लोपः, तत्र समान लोपत्वाद् ह्रस्वो न प्राप्नोतीति वक्तव्यः। अवीवदत्, विदेः इन्नन्तात् पुनः, इन्, दि, चण्।

• न शास्वृदनुबन्धानाम् ३/५/४८

शासु अनुशिष्टावित्यस्य ऋदन्तानुबन्धानां च इनि चण् परे–परतः उपधायाः ह्रस्वः भवति। अशशासत्, अडुढौकत्, अययाचत्। शासु अनुशिष्टौ, ढौकृ गत्यर्थः, ककि ष्वकीत्यत्र पठ्यते, डुयाचृ याच्ञायाम्, शिष्टवन्तं प्रयुङ्क्तवान्, ढौकितवन्तं प्रयुङ्क्तवान्, याचितवन्तं प्रयुङ्क्तवान्। इन्, दि, चण्, कारितलोपः, द्विर्वः।

• लोपः पिवतेरी चाभ्यासस्य ३/५/४६

इनि चणीत्येव, उपधाया इति च, पा पाने इत्यस्य उपधाया इनि चण् परे लोपो भवति, अभ्यासस्य च ईत्वम्। अपीप्यात्, अपीप्याताम्, अपीप्यन्। पा पाने, पीतवन्तं प्रयुङ्क्तवान्, शाच्छासाह्वा इत्याकारस्य आयिरादेशः, दि, ताम्, इन्, चण्। अनेन उपधायाः लोपः, इनिकृतंस्थानिवदिति वचनात्। पा, द्विर्व, ह्रस्वः, अनेन अभ्यासस्य ईत्वम्।

• तिष्ठतेरित् ३/५/५०

ष्ठा गतिनिवृत्तावित्यस्य उपधायाः इनि चण्परे इत्वं भवति, अतिष्ठिपत्, ष्ठा गति, स्थितवन्तंप्रयुङ्क्तवान्, इन् अर्तिह्रीब्लीति पकारः दि, चण्, अनेनोपधाया इत्वम्, द्विर्व, शिट् परोघोषः।

• जिघ्रते च ३/५/५१

घ्रा गन्धोपादाने इत्यस्य उपधाया इनि चण्परे परतः वा इत्वं भवति, अजिघ्रपत्। घ्रागन्धोपादाने, घ्राणवन्तं प्रयुङ्क्तवान्। इन्, अर्ति–ह्रीब्लीति पकारागमः, दि, चण्। उपधाया अनेन इत्वम्। द्विर्व, अभ्यासकार्यम्, पक्षे, अजिघ्रिपत्, अलोपो समानस्येति इत्वम्।

भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तावाख्यातप्रकरणे
पञ्चमःपादः।

भनक्ति, भङ्क्तः, भञ्जन्ति, भञ्जो आमर्दने। पूर्ववत् नशब्दान्तलोपः। न-शब्दादिति अकर्तुम् शक्यम्, नह्यत्र अस्माद्विकरणात् परोऽनुषङ्गोऽस्ति। विकरणादिति किम्? नन्दन्ति, टुनदि समृद्धौ।

• परोक्षायामिन्धिश्रन्थिदन्भीनामगुणे ३/६/३

ञि इन्धी दीप्तौ, श्रन्थ ग्रन्थ सन्दर्भे, दन्भु दन्भे, एषामनुषङ्गस्य परोक्षायामगुणायां परस्यलोपो भवति। समीधे, ञि इन्धी दीप्तौ, ञ शब्दो। ञनुबन्धसतीत्यर्थः, सं पूर्वः, परोक्षा ए, अनुषङ्गलोपः, द्विर्व, समान दीर्घः। नाम्यादेर्गुरूमत इति आम्प्रत्यो न भवति, समीधे इत्यस्य छान्दसिकत्वात्। श्रेथतुः, श्रेथुः, ग्रेथतुः, ग्रेथुः, देभतुः, देभुः। अतुस्, उस्, तृफल भजेति एत्वाभ्यासलोपौ, अनुषङ्गलोपे सिद्धे योगारम्भो नियमार्थः, इन्ध्यादीनामेव परोक्षायामगुणायामनुषङ्गलोपो यथा स्यात्, अन्येषां माभूत्। सस्रन्से।

• थलि च ३/६/४

श्रन्थिग्रन्थिदन्भीनामित्येव। इन्धेरात्मनेपदित्वात्थलि नास्तीति असावनुवर्तते। श्रन्थि, ग्रन्थि दन्भीत्येषामनुषङ्गलोपो भवति थलिपरे। श्रेथिथ, ग्रेथिथ, देभिथ पूर्ववदेत्वाभ्यासलोपौ।

• दन्शिसञ्जिस्वञ्जि रञ्जीनामनि ३/६/५

दन्श दशने, सञ्ज सङ्गे ष्वञ्ज परिष्वङ्गे, रञ्जरागे एषामनि परे अनुषङ्गलोपो भवति। दशति, सजति, परिष्वजति। रजते। अनीति किम्? उपदंशते। सङ्गः, परिष्वङ्गः, रङ्गः। भावे घञ्। चजोः कगाविति जस्य गः, रञ्जेः अनिपरे, मृग रमणेऽर्थे अनुषङ्गलोपो वक्तव्यः, रजयति मृगम्, रञ्जन्तं प्रयुङ्क्ते, इन्, अस्योपधेति दीर्घः। मानुबन्धानां ह्रस्वः। मृगरमण इति किम्? रञ्जयति वस्त्रम्।

• अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिजट्सु ३/६/६

अकारस्योपधाभूतस्य दीर्घो भवति नामिनामन्तर्गतानां वृद्धिः इनि इचि अटि परे। पाचयति, याजयति, चाययति, नाययति हाययति। डुपचष् पा, यज दे, चिञ् च, णीञ् प्रा, हु दानादा। पचन्तं प्रयुङ्क्ते, ईजमानम् चिन्वन्तम्, नयन्तम्, जुह्वन्तमिति इन्, नामिनां वृद्धिः ऐ, औ, इचि।

पपाचि, अदायि, अकारि। अद्यतनी त, भावकर्मणोश्चेति इच्, इचस्तलोपः, दीर्घः वृद्धिश्च, अटि। पपाच, चिचाय, चकार, जुहाव। अस्येति किम्? भेदयति, भिन्दन्तं प्रयुङ्क्ते, इन्, इनिजट्स्वितिकिम्? पठति। संज्ञापूर्वको विधिरनित्य इति वचनात्, उत्तमैकवचने अटि, वृद्धिदीर्घौ वा भवतः। अहं चिचय वा अहं चिचाय। अहं पपठ अहं पपाठ।

• सिचिपरस्मै स्वरान्तानाम् ३/६/७

वृद्धिरित्येव, स्वरान्तानां धातुनामन्त्यस्य वृद्धिर्भवति, सिचिपरस्मैपदे परतः, अचैषीत्, अनैषीत्, अस्तावीत्, अलावीत्। चिञ् चये, णीञ् प्रापणे, ष्टूञ् स्तुतौ, लूञ् छेदने, सिच् इति ईट्, अनेन वृद्धिः, लूञ्, इन्, स्तु इत्यस्य स्तुसूधूञ्भ्यः परस्मै इति इट्, इटश्चेटीति सिज्लोपः, सिचीति किम्? नेता, परस्मै इति किम्? अच्योष्ट। च्युङ् गतौ, अद्यतनी, त, सिच्, गुणः।

• व्यञ्जनान्तानामनिटाम् ३/६/८

अविद्यमानः इट् येभ्यस्ते अनिटः, सिचि परस्मायित्येव। नामिनामिति च व्यञ्जनान्तानां धातूनामनिटां नामिनो वृद्धिर्भवति सिचि परस्मैपदे परे। गुणापवादः, अभैत्सीत्, अच्छैत्सीत्, अरौत्सीत्। भिदिर् विदारणे, छिदिर् द्वैधी, रूदिर् अ. वि., तुदि वदि राधि रूधी चेडभावः। अनेन वृद्धिः। अनिटामिति किम्? अकोषीत्, कुष, निष्कर्षे दि, सिच्, इट् ईट्, इटश्चेटीति सिज्लोपः।

• अस्य च दीर्घः ३/६/९

व्यञ्जनान्तानां धातूनामनिटामस्य अकारस्य दीर्घो भवति सिचि परस्मैपदे परतः। अपाक्षीत्, अभाङ्क्षीत्, डुपचष्-पाके, भञ्जो आमर्दने, दि, सिच्, सिच इति ईट्, अनेन दीर्घः चवर्गस्य किः, अनिटामिति किम्? अवक्षीत्।

• सेटो वा ३/६/१०

सह इटा वर्तते यस्सः सेट् अस्त्येव, उपधाग्रहणमिह सम्बध्यते, सेटो धातोरकारस्य उपधाभूतस्य वा दीर्घो भवति सिचि परस्मै पदे परतः,

अकाणीत्, अकणीत्, अराणीत्, अरणीत्। कण रण शब्दे। अस्येति किम्? अदेवीत्, दिवु क्रीडायाम्, उपधाया इति किम्? अरक्षीत, हकार सकार षकारान्तानां सेटाम्, क्षणशसोः एदनुबन्धानां स्वरादीनां च सेटां दीर्घो नेष्यते। अवमीत्, अग्रहीत्, अव्ययीत्। टुवम् उदिगरणे, ग्रह उपा, व्यय गतौ, क्षणशसोः अक्षणीत्, अशसीत्, क्षण हिं, शसु हिं। एदनुबन्धानाम्, अरगीत्, रग शङ्कायाम्, एकारः सिचि दीर्घप्रतिषेधार्थः। स्वरादीनां सेटाम्, मा भवान् अटीत्, अट पट गतौ, मा भवन्त, शब्दयोगः। असवर्णस्तकार इत्याकारस्याकारो न भवति। मा स्म योगे प्रतिषेधात्।

• वदव्रजरलन्तानाञ्च ३/६/११

रश्च लश्च तौ रलौ, रलौ अन्ते येषां ते रलन्ताः। उपधाया अस्येति चानुवर्तते, वद व्यक्तायां वाचि। व्रजगतौ, अनयोरूपलब्धानां रेफ लकारान्तानाञ्च धातूनामकारस्य उपधाया दीर्घो भवति सिचि परस्मै पदे परतः। अवादीत्, अव्राजीत् अचारीत्, अफालीत्, चर गतौ, फल निष्पत्तौ। अस्येति किम्? अरवोरीत्, क्षुर् खुर् विलेखने, उपधाया इति किम्? अवभ्रीत्, अस्वल्लीत्, अभ्र, वभ्र, शल, ष्वल्ल आशुगमने।

• श्विजाग्रोर्गुणः ३/६/१२

टु ओश्वि गतिवृद्ध्योः, जागृनिद्रा क्षये इत्यनयोः सिचि परस्मै पदे परे गुणो भवति, सिचि पस्मायिति वृद्धिः प्राप्ता, अश्वयीत्, अजागरीत्।

• ऊर्णोतेर्वा ३/६/१३

ऊर्णूञ् आच्छादने इत्यस्य सिचिपरस्मै परतः गुणो वा भवति, प्रोर्णवीत्, प्रोर्णावीत्। अनेन वा गुणः, पक्षे सिचि परस्मायिति वृद्धिः। स्वरादीनां वृद्धिरादेरिति वृद्धिः।

• अर्तिसर्त्योरणि ३/६/१४

अर्ति सर्ति इति, ऋगतौ, सृगतौ, ऋगतिप्रापणयोः, ऋसृगताविति सामान्येन ग्रहणम्। अर्तिसर्त्यो रणि परे गुणो भवति नणकारेति प्रतिषेधः प्राप्तः, तस्य बाधः, आरत्, असरत्। पुषादि सूत्रेण अणि, दि, गुणः,

अवर्णस्याकार इत्यकारस्याकारः, सर्ते, अङ्धात्वादिः, अर्तिसर्त्योरिति किम्? अपुषत्, पूर्ववदण्।

• जागर्तेःकारिते ३/६/१५

जागृ निद्राक्षये इत्यस्य कारिते परे गुणो भवति, वृद्धेरपवादः, जागरयति, जाग्रन्तं प्रयुङ्क्ते, इन्। कारित इति किम्? जजागार, अट्।

• यणाशिषोर्ये ३/६/१६

जागर्तेर्यणि परे आशिषो यकारे च परे गुणो भवति, जागर्यते जागर्यात्।

• परोक्षायामगुणे ३/६/१७

जागर्तेः गुणो भवति परोक्षायामगुणायां परस्याम्। जजागरतुः, जजागरूः परोक्षायामिति किम्? जागर्ति। अस्ति लोपोऽभ्यस्तादन्तिनः इति नकार लोपः। अगुण इति किम्? जजागार। वृद्धिं बाधित्वा गुणस्स्यात्।

• ऋतश्च संयोगादेः ३/६/१८

ऋतः ऋकारान्तस्य परोक्षायामगुणायां परतः गुणो भवति। सस्वरतुः, सस्वरूः, दध्वरतुः, दध्वरूः, स्वृ शब्दोपतापनयोः, ध्वृ मूर्च्छने ऋत इति किम्? शिश्वियतुः शिश्वियुः, स्वरादाविवर्णेति इय्। संयोगादेरिति किम्? चक्रतुः, अगुण इति किम्? अस्मरत्। स्मृ चिन्तायाम्।

• ऋदन्तानां च ३/६/१६

ऋदन्तानां धातूनां परोक्षायामगुणायां परस्य गुणो भवति विचकरतुः, विचकरूः, निजगरतुः, निजगरूः। कॄ विक्षेपे, गॄ निगरणे, वि नि पूर्वः।

• ऋच्छ ऋतः ३/६/२०

ऋच्छ इन्द्रिय प्रलय मूर्तिभावेषु इत्यस्य ऋतः परोक्षायां परस्यां गुणो भवति। अगुण इति निवृत्तम्। आनर्छ, आनर्छतुः, आनृछुः, द्विर्व,

अकारः ऋवर्णस्य पर इति दीर्घः। ऋकारे चेति नागमः, अनेन गुणः। परोक्षायामिति किम्? ऋच्छति।

• शीङ्स्सार्वधातुके ३/६/२१

शीङ् स्वप्ने इत्यस्य सार्वधातुकपरे गुणो भवति। सर्वेषामात्मन इति निषेधः प्राप्तः, शेते, शयीत, शेताम्, अशेत। शीङ् स्वप्ने, वर्तमाना, ते, सप्तमी ईत, पञ्चमी ताम्, अद्यतनी त, अनेन गुणः। शीङ् इति किम्? स्तुते। सार्वधातुक इति किम्? शिष्ये, परोक्षा ए, इन्, व्रश्चेति षः।

• अयीर्ये ३/६/२२

अगुणग्रहणमिह सम्बध्यते, शीङ्, अयिरादेशो भवति, यकारे अगुणे परे, इकार उच्चारणार्थः, शाशय्यते, य शब्दः अनेन अय्, द्विर्व। अगुण इति किम्? चेयम् स्वरादय इति य शब्दः।

• आयिरिच्यादन्तानाम् ३/६/२३

आकारान्तानां धातूनामिचि परे आयिरादेशो भवति, इकारः उच्चारणार्थः, अदायि, अधायि। डुदाञ् दाने, डुधाञ् दानधारणयोः। इचीति किम्? दाता। आदन्तानामिति किम्? अचायि, चिञ् चये।

• शाच्छासाह्वाव्यावेपामिनि ३/६/२४

शो तनूकरणे, छो छेदने, षोऽन्तकर्मणि, ह्वे स्पर्धायाम्, व्येञ् संवरणे, वेञ् तन्तु सन्ताने, पा पाने। एषामन्त्यस्य इनि परे आयिरादेशो भवति। अर्ति हीब्लीति पकारागमः प्राप्तः। शाययति, छाययति, साययति, आह्वाययति, व्याययति, वाययति, पाययति। प्रयुङ्क्ते, एवं छान्तम्, सावन्तम् आह्वयन्तम्, संव्ययन्तं, वयन्तम्, पाययन्तम्, अनेन आयिः।

• अर्ति ह्री ब्लीरीक्नूयीक्ष्माय्यादनन्तानामन्तः पो, य लोपो गुणश्चनामिनाम् ३/६/२५

इनीत्यनुवर्तते, हस्यहन्तेरित्यतः प्राक्। अर्तीति ऋसृ गतौ, ऋगतिप्रापणयोरिति वा। ह्री लज्जायाम्, ब्ली वरणे, री गति रेषणयोः,

रीङ् श्रवणे वा। क्नूयी शब्दे, क्ष्मायी विधूनने, एषाम् आदन्तानाञ्च इनि परे पादेशो भवति, यकारस्यच लोपः। अन्त्यादीनां च येषामिनः तेषां गुणः। अर्जयति, हेपयति, ब्लेपयति, क्नोपयति क्ष्मापयति, दापयति, स्थापयति। अपर्यन्तं प्रगुङ्क्ते अथवा ऋच्छन्तं प्रयुङ्क्ते, एवं जिघ्रयन्तं ब्लिनन्तम्, रिणन्तम्, अथवा रयमानं, क्नूयमानम्, क्ष्मायमानम्, ददन्तम् तिष्ठन्तम् इति। इन्। अनेन पकारागमः क्नूयिक्ष्माय्योः य लोपः, नामिनां च गुणः।

● पातेर्लोऽन्तः ३/६/२६

पातेः पा रक्षण इत्यस्य इनि परे लकारागमो भवति, पालयति, पान्तं प्रयुङ्क्ते, पुनरन्तग्रहणं विस्पष्टार्थम्।

● धूञ्प्रीणात्योर्नः ३/६/२७

धूञ् कम्पने, प्रीञ् तर्पणे कान्तौ चेत्यनयोरिनि परे वकारागमो भवति, वृद्धेर्बाधः। विधूनयति, प्रीणयति। विधुन्वन्तं प्रयुङ्क्ते, प्रीणन्तं प्रयुङ्क्ते, इन्। धूञ् प्रीणात्योरिति ञकारेण विकरणेन च निर्देशात् धू विधूनने, प्री प्रीतावित्यनयोर्भौवादिकदैवादिकयोः न भवति। धावयति, प्रावयति, धुन्वन्तं प्रयुङ्क्ते एवं प्रीयमाणमिति वृद्धिः।

● भियष्षुग्वा ३/६/२८

ञि भी भये इत्यस्य इनि परे षुगादेशो वा भवति। उकार उच्चारणार्थः, ककारः पूर्वाचार्याभिहितस्य विशेषस्य सूचनार्थः। तेनायमागमो हेतु भयेऽर्थे भवति न कारणाद्भये। मुण्डो भीषयते, बिभ्यन्तं प्रयुङ्क्ते, इन्, अनेन लुक् रूचादित्वादात्मने पदम्। पक्षे मुण्डो भापयते। वक्तव्या द्वा आत्वम्। अर्तिह्रीब्लीति पकारागमः। कारणाद्भये न भयहेतोः। पाक्षिकष्षुक् भाययति........................ । अनि इति किम्? भेता।

● स्फायेर्वादेशः ३/६/२९

वादेशः, वेतिनिवृत्तम्, स्फायी, ओप्यायी, य, इनि परे वकारादेशो भवति, स्फावयति स्फा............ । आदेश ग्रहणमागमशङ्का निवृत्त्यर्थम्।

• रूहेः पो वा ३/६/३०

रूह बीज जन्मनि इत्यस्य अनि परे पकारादेशो वा भवति। वृक्षानारोपयति वृक्षानारोहयति। रूहन्तं प्रयुङ्क्ते, इन्। इनीति किम्? आरोहति।

• शदेरगतौतः ३/६/३१

वेति निवृत्तम्, शद्लृ शातने, शद्लृ विशरण इति वा। अगतावर्थे। शदेः तकारादेशोभवति, इनि परे, फलानि शातयति, शीयमानं प्रयुङ्क्तेः दकारस्य तः। अगताविति किम्? गाः शातयति, शमयति इत्यर्थः।

• हन्तेस्तः ३/६/३२

हन हिंसा गत्योरित्यस्य इनि परे तत्वं भवति, घातयति घ्नन्तं प्रयुङ्क्ते, इन्, हस्य हन्तेर्घिः इति घि आदेशः। पुनस्तद् ग्रहणमगतावित्यस्य निवृत्त्यर्थम्। तेनगतावप्यर्थे तत्वम्। गां दण्डेन घातयति गमयतीत्यर्थः। इनि इति किम्? हन्ति।

• हस्य हन्तेर्घिरिनिचोः ३/६/३३

हकारस्य इनि इचि परे घः भवति इकारः उच्चारणार्थः, घातयति, अघानि, पुनर्हन्तेर्ग्रहणं हकारान्तस्य धातोर्भवति इत्याशङ्का निवृत्त्यर्थम्।

• लुप्तोपधस्य च ३/६/३४

लुप्तोपधस्य हन्तेः हकारस्य घत्वं भवति घ्नन्ति, घ्नन्तु, अघ्नन्, वर्तमाना अन्ति, पञ्चमी अन्तु, ह्यस्तनी अन्। गमहनेत्युपधा लोपः।

• अभ्यासाच्च ३/६/३५

अभ्यासादुत्तरस्य हन्तेः हकारस्य घत्वं भवति, जिघांसति। हनि गमिङोरूपधाया इति दीर्घः। जंघन्यते कुटिलंहन्तीति वक्तव्यादय शब्दः। अतोऽन्तोऽनुस्वार इति अनुस्वारागमः इत्यनुस्वारागमः, हि गतौ वृद्धौ चेत्यभ्यासस्य घत्वम् वक्तव्यम्। प्रजिघाय। हि गतौ, प्र पूर्वः, अट्, द्विर्व

घत्वम्, अस्योपधेति दीर्घः, जेघ्नीयते, अत्यर्थम् प्रहिणोति य शब्दः, नाम्यन्तानां यणायीति दीर्घः। चणोऽन्यत्रेति किम्? प्राजीहयत्, हि गतौ, प्र पूर्वः प्रहिण्वन्तं प्रयुङ्क्ते, इन्, अस्योपधेति चण्, कारितलोपः, इन्यसमानेति ह्रस्वस्य इनिकृतंस्थानिवद्भावादिति, द्विर्व, दीर्घोलघोः।

• जेर्गिस्सन्परोक्षायाम् ३/६/३६

जेरिति जि जये, जि जृ अभिभवे, इति वा। जिरित्यस्य गिरादेशो भवति सनि परे परोक्षायाम् परस्याम्। जिगीषति, विजिगीषते। वि पूर्वः जि रूचादिः, स्वरान्तानांसनीति दीर्घः परोक्षायाम्। जिगाय, अट्, विजिग्ये, य इवर्णेति यः, सन्परोक्षयोरिति किम्? जेजीयते। अत्यर्थम् जयति, नाम्यन्तानां यणायीति दीर्घ इह कस्मान्नभवति ? सत्यम्–गुणे कृते न भवति। जिज्यतुः जिज्युः, ज्या वयो हानौ, अतुस् उस्, ग्रहिज्यावयीति सम्प्र, द्विर्व, लाक्षणिकोऽयम् शब्दः इति ग्यादेशाभावः।

• चेः किः वा ३/६/३७

चिञ् चये इत्यस्य सन् परोक्षयोः चेः किरादेशो भवति। चिकीषति चिचीषति, चिकाय–चिचाय, चिच्ये–चिक्ये। ए इवर्णस्येति ए। सन् परोक्षयोरिति किम्? चेचीयते।

• सणोऽल्लोपः स्वरेऽबहुत्वे ३/६/३८

अतो लोपः अल्लोपः, न बहुत्वे अबहुत्वे, य आकारस्तस्य लोपो भवति स्वरादौ प्रत्यये परे अबहुत्वे–बहुवचने परतः बाधः। अधुक्षाताम्, अधुक्षाथाम्। दुह प्रपूरणे, अद्यतनी, आताम्, आथाम्, सननिट् इति सन् अनेन अकारलोपः, दीर्घः, अट्प्रत्ययः घढधभेति धस्य दः। अघोषेष्व–शिटामिति घस्य कः। अधुक्षि, अद्यतनी त, इच, अ लोपो भवति। स्वर इति किम्? अधुक्षत्। अबहुत्व इति किम्? अधुक्षन्त। अद्यतनी, अन्त, सण्, सन्ध्यक्षर लोप इति अकार लोपस्स्यात्। तदात्मनेचानकारादिति न लोपो भवेत्।

● दरिद्रातेरसार्वधातुके ३/६/३९

लोप इत्यनुवर्तते लोपश्चेत्यतः प्राक्। दरिद्रा दुर्गतावित्यस्य अन्तलोपो भवति असार्वधातुके परे। दरिद्र्यते, दरिद्र्यात्। सार्वधातुके यण्, आशिषो यात्। दरिद्रः, अचपचादिभ्यश्चेति अच्, प्रत्ययः। असार्वधातुक इति किम्? दरिद्राति। अद्यतन्यामेवेष्यते अदरिद्रीत्, अदरिद्रासीत्। अद्यतनी, दि, सिच, ईट्, इटश्चेटीति सिज्लोपः वक्तव्यादालोपः। यदा तु न लोपः तदा यमिरमिनम्यादन्तानामिति सकारागमः। युटि, वुण् प्रत्यये। अनिटि च सनि लोपो नेष्यते। युटि– दरिद्राणम्, युट्चेति युट्। वुणप्रत्यये दरिद्रायकः। आयिरिच्यादन्तानामित्यायिः अनिटि च सनि, दिदरिद्रासति सनि, इड्वि– कल्पः स्मर्यते। सेटितु लोपः, दिदरिद्रसति।

● व्रश्चिमस्ज्योर्धुटि ३/६/४०

ओ व्रश्चू छेदने, टु मस्जो शुद्धौ, अनयोरन्त्यस्य लोपो भवति धुटि परे, व्रष्टा व्रक्ष्यति, अव्रक्ष्यत्, ता, स्यति, स्यत्। अनेनान्तलोपः। व्रश्चेति षः, षढोकस्स इति कः। मस्जेर्मङ्क्ता, मङ्क्ष्यति, ममङ्क्ष्यात् मस्जिनसोर्धुटीति नकारागमः। धुटां तृतीय इति सस्य दः, त वर्गश्चटेति दस्य जः। अनेनान्त लोपः, चवर्गस्य किः। धुटीति किम्? वृश्च्यते, मज्ज्यते, यण्, ग्रहिज्यावयीति सम्प्र।

● यन्योकारस्य ३/६/४१

यनि परे ओकारस्य लोपो भवति। द्यति स्यति। दो अवखण्डने, षो अन्त कर्मणि, दिवादेर्यन्। नकार इहार्थः। ओकारस्येति किम्? दीव्यति, दिवु क्रीडायाम् नामिनोर्वोरितिदीर्घः।

● आकारस्योसि ३/६/४२

आकारस्य उसि परे लोपो भवति। आदेशः उस् गृह्यते न परोक्षायाम् बहुवचनम्, तस्मिन्परे आलोपो सार्वधातुके इत्यालोपस्य सिद्धत्वात्। अयुः अरुः अलुः। या प्रापणे, रा आदाने, ला आदाने। ह्यस्तनी, अन उसीति अनः उस्, आलोपः। अगुः, अदुः, इण् गतौ, डुदाञ्

दाने, अद्यतनी अन्, सिच्, इणस्थादेरिति सिचो लुक्, पूर्ववदनः उस्, इणोगा इति गा आदेशः। आलोपः। आकारस्येति किम्? अविदुः, विद ज्ञाने, ह्यस्तनी अन्, अनः उस्।

• सन्ध्यक्षरे च ३/६/४३

आकारस्य सन्ध्यक्षरे परे लोपो भवति। व्यति रे, व्यतिले, रा आदाने व्यति पूर्वः, वर्तमाना ए, अनेन आलोपः।

• अस्तेस्सौ ३/६/४४

अस भुवीत्यस्य स सिकारादौ प्रत्यये परे अन्तलोपो भवति, साविति सिकारे। इकार उच्चारणार्थः, असि, व्यति से, अस् भुवि, वर्तमाना, सि, से, अनेन लोपः, साविति किम्? अस्ति।

• दीधीवेव्योरिवर्णयकारयोः ३/६/४५

दीधीङ्, दीप्तिदेवनयोः, वेवीङ् वेतना तुल्ये इत्यनयोरिवर्ण इकारे ईकारे च परे यकारे च अन्त लोपो भवति। आदीध्यते, आवेव्यते। यण्, इवर्णयकारयोरिति किम्? आदीध्ये, आवेव्ये, वर्त, ए, यइवर्णस्येति यः।

• असन्ध्यक्षरयोरस्यतौ तल्लोपश्च ३/६/४६

तयोः लोपः तल्लोपः, असन्ध्यक्षरयो अस्य अकारस्य ते असन्ध्यक्षरे आदेशौ भवतः, यथासङ्ख्यं तयोश्च परयोः असन्ध्यक्षर लोपो भवति पचन्ति यजन्ति। पचे, यज्ञे। वर्तमाना, अन्ति ए अन्वि, अनेन, अकारस्य अकारसन्ध्यक्षरे आदेशौ, परयोश्च लोपः न पूर्वयोः। अस्येति किम्? यान्ति।

• नामिव्यञ्जनान्तादायेरादेः ३/६/४७

नामी च, व्यञ्जनञ्च ते नामिव्यञ्जने ततो बहुव्रीहिः, नाम्यन्ताल्लिङ्गात् व्यञ्जनान्ताल्लिङ्गात् परस्यायेः आदिलोपो भवति, अश्नीयते, पटूयते, कर्तुरायिरित्यायिः, अनेन आलोपः, नाम्यन्तानां

यणायीति दीर्घः, व्यञ्जनान्तात् विद्वस्यते, पयस्यते, नामिव्यञ्जनान्तादिति किम्? श्येनायते।

• गम हन जन खन घसामुपधायाः स्वरादावनण्यगुणे ३/६/४८

गम हन जन खन घसामुपधायास्स्वरादावगुणे अनणि—अण् वर्जिते परे लोपो भवति। जग्मतुः, जग्मुः, जघ्नतुः, जघ्नुः, जज्ञतुः, जज्ञुः, जज्ञे, जज्ञाते, जज्ञिरे, चख्नतु, चख्नुः, जक्षतु जक्षुः, जन जनने इत्यस्मात् परस्मै पदम्, प्रादुर्भावार्थादात्मनेपदम्। वापरोक्षायामित्यादिना घस्लृ, द्विर्वचनम् अभ्यासकार्यम, अनेन उपधालोपः, अभ्यासाच्चेति घः, तवर्गश्चटवर्ग इति नञः, घसेः शासिवशीति षः, अत इति कर्तव्ये, उपधाग्रहणं गौरव—प्रतिपत्तिपरिहारार्थम्। स्वरादाविति किम्? गम्यते। अनणीति किम्? अगमत्, अघसत्, गम्लृ गतौ, अद भक्षणे, दि, अदेर्घस्लृ, सनद्यतन्योरिति घस्लृ, पुषादिसूत्रेण अण्, अगुण इति किम् ? गमनम्।

• कारितस्यानामिड्विकरणे ३/६/४६

कारितस्य लोपो भवति अनामिड्विकरणे— आम्, इट्, विकरण, एतद्वर्जिते प्रत्ययपरे। कारणा, हारणा, कारि, हारि इति स्थिते, ईषि श्रन्थ्यासीति यु प्रत्ययः, कारितलोपः, स्त्रियामादाप्, कार्यते, हार्यते, ते सार्वधातुके यण् कारितलोपः, अचीकरत्, अजीहरत्। कारि हारि, दि, चण् कारित लोपः, इन्यसमानेति ह्रस्वः, द्विर्व, अलोपे समानस्येति इत्वम्, दीर्घो लघोः अनामिड्विकरण इति किम्? कारयाञ्चकार, कारि, अट्, चकास्कामित्याम्, गुणः, आमः कृञिति कृञः, द्विर्व, इटि, कारयिता कारिता, इट्, गुणः, विकरणे, कारयति।

• यस्यापत्यप्रत्ययस्यास्वरपूर्वस्य यिन्नायिषु ३/६/५०

अपत्ये भव आपत्यः, एवमादेरणिष्यत इत्यण्, स्वरः पूर्वो यस्मात् यकारात् सः स्वरपूर्वः ततो नञासमासः आपत्यस्य—अपत्येऽर्थे विहितस्य यकारस्य, अस्वर पूर्वस्य—यस्मात्पूर्वः स्वरो नास्ति, तस्य लोपो भवति यिनि आयोः ई प्रत्यये परे। यस्येति अकार उच्चारणार्थः, गार्गीयति, गार्गायते, गार्गी, गर्गस्यापत्यम्, ण्यगर्गादेरितिण्यः, गार्ग्यमिच्छत्यात्मन इति यिन्,

गार्ग्य इवाचरिति, कर्तुरायिरित्यायिः, अन्यत्र ण्यादिति ई प्रत्ययः। अनेन यि लोपः, यिन्यवर्णस्येति ईत्वम्। ईकारे परे ईकारेस्त्रीकृत इत्यकार लोपः, यस्येति किम्? वासिष्ठीयति, वासिष्ठायते, वासिष्ठी। वासिष्ठस्यापत्यमित्यण्, यद्यत्र अकारलोपः स्यात्, ईत्वं न स्यात्। आयेश्च नामिव्यञ्जनान्तादित्यालोपो भवेत्। अपत्यस्येति किम् ? आर्यीयति आर्यायते आर्यी। ऋ गतौ, ऋवर्णव्यञ्जनान्ताद्घ्यण्, अस्योपधेति वृद्धिः, ततो यिन्, आयिः, पुंयोगात्तेन चेदाख्या इति ईकारः। अस्वरस्येति किम्? कारिकेयीयति–कारिकेयायते, कारियी, कारिकेयाः अपत्ये स्त्र्यत्र्यादेरेयण्, इवर्णावर्णलोपः, यिन्, आयिः, अणेयेकादिति ईकारः। यिन्नायिष्विति किम्? गार्गकाम्यति ईकारे परे गार्ग्ये य लोपो वक्तव्यः। मत्सी गौरादिरिति ई प्रत्ययः। तिष्यपुष्योरणि परे, तिष्येण युक्तो मासः, तैष्यः, पुष्येण युक्तोमासः पौषः।

• न लोपश्च ३/६/५१

यिन्नायी अनुवर्तेते नत्वीकारः। यिन्नाय्योर्नकारस्य लोपो भवति। पथीयति, पथीयते। राजीयति राजीयते। विद्वस्यति, विद्वस्यते। पथिन्, राजन्, विद्वन्, यिन्, आयिः, अनेन न लोपः। पथि शब्दस्य नाम्यन्तानां यणायीति दीर्घः, विद्वन्स् शब्दात् नामिव्यञ्जनान्तादित्यायेर्नलोपः, एवं पथि शब्दान्नगरीयतीत्यादौ लोपो भवति, लक्ष्यमूलत्वाद्व्याकरणस्य व्यञ्जने चैषां निः, लिङ्गान्त नकारस्य अनुषङ्गश्चाक्रुञ्चेरिति सूत्रैस्सिद्धो न लोपः इति योगरम्भो नियमार्थः। यिन्नाय्योः लोप एव यथा स्यात्, कार्यान्तरे मा भूत्। विध्यर्थ इत्यपरे। उवाच, राजीयति, राजायते इत्यादौ ईत्वात्वे भवतः। नियमार्थे नकारस्य अलुप्तत्वात् ईत्वात्वे न स्याताम्।

• व्यञ्जनादिदस्योः ३/६/५२

व्यञ्जनानतात्परयोर्दिस्योः लोपो भवति, अद्वेद्, अद्वेट, अलेट् अलेट, अधोक् अधोक, द्विष् अप्रीतौ, लिह आस्वादने दुह प्रपूरणे ह्यस्तनी दि, सि, अनेन दिस्योः लोपः, द्विषः षकारस्य वा विराम इति टः, हो ढः, पूर्ववत् हस्य टः, दुहेः दादेर्घः। व्यञ्जनादिति किम्? अभवत्, अभवः, भू सत्तायाम, दि, सि अन्वि। दिस्योरिति किम्? दोग्धि, दुह प्रपूरणे ति गुणः, दादेर्घः, घढधभेभ्यः धुटां तृतीयः, दि। सहचरितस्य सेर्ग्रहणम्, तेनेह

न भवति धोक्षि। दुह प्रपूरणे, वर्त, सि, अन्वि, अदादेर्लुक्, दादेर्घः, तृतीयादेर्घढधभेति दस्य धः। अघोषेष्वशिटामिति घस्य कः, षत्वम्।

• यस्यानन्यधातोः ३/६/५३

व्यञ्जनादित्येवम् व्यञ्जनात्परस्य अधातोः सम्बन्धिनो यकारस्य लोपो भवति अननि। अननि इत्यनेन असार्वधातुकम् लक्ष्यते। पापचिता पापचिष्यते, पापच्यशब्दात् श्वस्तनी ता, भविष्यन्ती, स्यते, इट्, अस्य च लोपः इत्यकारलोपः। अनेन यलोपः, बेभिदिता, बेभिदिष्यते बिभिद्य शब्दात् ता, स्यते। अन्यत्पूर्ववत्। व्यञ्जनादिति किम्? लोलूयते, अत्यर्थम् लविता, य शब्दः, ता, इट्, द्विर्व, अस्य च लोपः, अननीति किम्? पापच्यते। अधातोरिति किम्? मव्यता, मव्य बन्धने गौणमुख्ययोः मुख्ये सम्प्रत्यय इति वचनान्मुख्यस्य धातोः अधातोरित्ययं प्रतिषेधः। यस्तु ते धातव इति गौणः धातुः तस्य यलोपो भवत्येव। यिन्नाय्योः यकारस्य लोपो वा वक्तव्यः। दृशदिता, दृशद्यिता। दृशदमिच्छति, यिन्, दृशद इवाचरति, आयिः, ता, इट्।

• अस्य च लोपः ३/६/५४

अधातोरिति निवृत्तम्। अकारस्य लोपो भवति अननि, अनीत्यनेन असार्वधातुकमित्यपि लक्ष्यते, चिकीर्षिता, चिकीर्षिष्यते, चिकीर्षशब्दात् ता, स्यते, इट्। अकारलोपः, गणयति, मृगयति, स्पृहयति। गण सङ्ख्याने, मृग अन्वेषणे, स्पृह ईप्सायाम्, स्वरादेश्चेति इन्, अस्य च लोपः, तस्य स्वरादेशः, परनिमित्तक इति स्थानिवद्भावात् गुणे उपधादीर्घो न भवति, मृगिस्पृहेश्च गुणः, पुनर्लोपग्रहणं विस्पष्टार्थम्।

• सिचो धकारे ३/६/५५

लोप इत्यनुवर्तते, चवर्गस्य किरित्यतः प्राक् धकारादौ प्रत्यये सिचो लोपो भवति, अलविध्वम्, अपविध्वम्। लूञ् छेदने, पूङ् पवने, अद्यतनी, ध्वम्, सिच्, अट्। अनेन सेर्लोपः गुणः, सिच इति किम्? स्तुध्वे। धकारस्येति किम्? अलविष्ट। अद्यतनी, सिच्, इट्।

• धुटश्चधुटि ३/६/५६

धुटः परस्य सिचः धुटि परे लोपो भवति। अभित्त, अभित्थाः अबुद्ध, अबुद्धाः, भिदिर् विदारणे, बुध अवगमने, त, थास्, सिच्, अनेन लोपः बुधेः घढधभेभ्य इति तस्य धः, धुटां तृतीयः। धुट इति किम्? अमंस्त। मन् ज्ञाने, अद्यतनी, त, सिच्। धुटीति किम्? अभित्साताम्। भिदिर्, वि, आताम्, सिच्।

• ह्रस्वश्चानिटि ३/६/५७

अविद्यमान इट् यस्य सिच् इति विग्रहः। ह्रस्वात्परस्यानिटः सिचो धुटि परे लोपो भवति। अकृत, अकृथाः, अह्रत, अह्रथाः, अद्यतनी त, थास्। सिच्, तस्यानेन लोपः। ह्रस्व इति किम्? अचेष्ट। चिञ् चये अटि इति किम्? अवारिष्टाम्, वृञ् व, ताम्, सिच् , इट्, सिचि परस्मै इति वृद्धिः। नन्वत्र अन्तरङ्गत्वात् वृद्धौ कृतायां ह्रस्वादुत्तरः सिच् नास्तीति किमर्थमनिडिति निषेधेन, सत्यम्, सर्वविधिभ्यो लोप विधिर्बलवनिति बृद्धिं बाधित्वा सिचो लोपः स्यात्, स मा भूदिति अनिड्ग्रहणं कर्तव्यमेव। धुटीति किम? अकृषत, आत्मने चानकारादिति न लोपः।

• इटश्चेटि ३/६/५८

इटः परस्य सिच ईटि परे लोपो भवति। अलावीत् अपावीत्, आकोषीत्, लूञ् छेदने, पूङ् पवने कुष् निष्कोषणे, सिच इट्, ईट्, अनेन सिज्लोपः। सिचि परस्मायिति वृद्धिः। ईटीति किम्? अलाविष्टाम्।

• स्कोस्संयोगाद्योरन्ते च ३/६/५९

संयोगस्यादी यौ स्कौ सकार ककारौ, तयोः धुटि परे लोपो भवति अन्ते पदान्ते वर्तमानस्य सकारककारस्य। धुटि तावत्—आरिप्सते, आलिप्सते, रभ लाभस्ये, डुलभष् प्राप्तौ, आङ् पूर्वः, सन्, द्विर्व सनि मीमादेति स्वरस्य इम्, अभ्यासस्य च लोपः। अनेन स लोपः। अघोषेष्वशिटामिति तस्य पः भकारस्य धुटि। आचक्षे, आचष्टे, चक्षिङ्, व्यक्तायां वाचि, आङ्पूर्वः से, ते, अनेन क लोपः। षढोः कः। अन्ते सकारस्य। अववक्, वस्क गत्यर्थः कुटिलं वस्कतीति य शब्दः, वा

चेक्रीयितस्येति लुक् द्विर्व, दीर्घोऽनागमेति दीर्घः, ह्यस्तनी, दि, अन्वि, अदादेर्लुक्, व्यञ्जनादिदस्योरिति दिलोपः अनेन सलोपः। अन्ते ककारस्य, अरारट्, रक्ष पालने अत्यर्थम् रक्षति, अन्यत्पूर्ववत् अनेन कलोपः, वाविराम इति षस्य टः। स्कोरिति किम्? नर्नर्ति, नृती गात्र विनामे, अत्यर्थम् नृत्यति, य शब्दः, लुक्, द्विर्व, रि रेफौ च लुकि इति रेफागमः, ति, गुणः, संयोगाद्योरिति किम्? वस्ता, मस्ता, धुटीति किम्? वस्कते, वस्कति।

• चवर्गस्यकिरसवर्णे ३/६/६०

धुटीत्यन्ते चेत्येदद्वयमनुवर्तते, भाषितपुंस्कमित्यतः प्राक्। चवर्गस्य कत्वं भवति, असवर्णे धुटि परे अन्ते च। इकार उच्चारणार्थः। पक्ता, पक्ष्यति, योक्ता, योक्ष्यति। डुपचष् पाके, युजिर् योगे। अन्ते च, खल्वपि, अपापक्, अयोयोक्त। अत्यर्थमपचत्, अत्यर्थमयुनक्, य शब्दः, तस्य लुक्, द्विर्व, ह्यस्तनी, दि, व्यञ्जनादिदस्योरिति दिलोपः, अनेन कः, धुटीति किम्, संबुद्धि। असवर्ण इति किम्? उज्झति। उज्झ उत्सर्गे जस्य कत्वं न भवति। वर्ग्यो वर्ग्येण। सवर्ण इति चछजझञां सवर्णसंज्ञा, वर्णान्त्यस्य विधिरिति वचनादन्त्यस्य चवर्गस्य कत्वं भविष्यतीति असवर्णग्रहणं धातुना चवर्गे विशेष्यमाणे सत्यनन्त्यस्य मा भूदिति।

• होढः ३/६/६१

हकारस्य ढत्वं भवति धुटि परे, अन्ते च। लेक्ष्यति, अलेक्ष्यत् लिह् आस्वादने, स्यति, स्यत्, गुणः, अनेन ढः, षढोः कः। सोढा, वोढा, षह मर्षणे, वह प्राप, ता, सहेर्वेषुसहेति इड्विकल्पः। वहेः, दहिदिहीति इडभावः। अनेन ढः। घढधभेभ्य इति तस्य धः तवर्गस्य षटवर्गादितिधस्य ढः। ढोढे लोपः, सहिवहोरोदवर्णस्येति ओत्वम्, अन्ते, अलेलेट् ति, ह्यस्त। अत्यर्थमलेट्, धुटीति किम्? सह्यते।

• दादेर्घः ३/६/६२

दकार आदिर्यस्यावयवस्य सः दादिः ह इत्येव धातोस्सम्बन्धिन रादेरवयवस्य यो हकारस्तस्य घत्वं भवति, धुटि परे अन्ते च। ढत्वापवादः। अधोक्ष्यत्, अधेक्ष्यत्, दुह प्र, दिह उपचये, स्यत्, अड्धात्वादिः। अत्र अकारागमे कृते अदुह अदिह इत्यस्य धातोः यः दादेः

अवयवस्तस्य यो हकारस्तस्यघः, तृतीयादेर्घढधभेति दस्य धः। अघोषेष्वशिटामिति घस्य कः, दोग्धा, दोक्ष्यति, दुह प्र, ता, स्यति, अनेन घः, घढधभेभ्यः इति धः, धुटां तृतीयः, पूर्ववत् कत्वम्, आदिचतुर्थत्वं च । यद्यप्यत्र धातोरवयवः दादिर्न भवति तथापि आद्यन्तवदेकस्मिन्निति वचनाद् घत्वमन्ते च, अधोक्, दुह प्रपूरणे, ह्यस्तनी दि, अड्धात्वादिः, अन्विक, अदादेर्लुक्, व्यञ्जनादिदस्योरिति दिलोपः अनेन घः लोपे च, दिस्योरिति दस्य तः। वा विराम इति घस्य कः, धुटीति किम्? दुह्यते। द्रुहमुहष्णुहष्णिहां धुटि ता, घत्वं वक्तव्यम् द्रोग्धा, मोग्धा, स्नोग्धा, स्नेग्धा। द्रुह जिघांसायाम्। मुह् वैचित्ये। स्णुह उदिगरणे, ष्णिह् प्रीतौ।.................... ....। ....। तृतीयः। पक्षे द्रोढा मोढा, स्नोढा स्नेढा, होढः।

• नहे धः ३/६/६३

नह बन्धन इत्यस्य धत्वं भवति, धुटि परे, अन्ते च, ढत्वापवादः। नद्धा, नत्स्यति, अनेन हस्य धः, अन्ते अनानत्, अत्यर्थम् नह्यत यशब्दः पूर्ववत्, दि। धुटीति किम्? नह्यते।

• भृजादीनां षः ३/६/६४

भ्रस्जेरत एव निर्देशात् भृजादेशः, लक्ष्यमूलत्वाद् व्याकरणस्य। भ्रस्ज पाके, मृजूष् शुद्धौ, सृज विसर्गे, यजदेव, राजृ दीप्तौ इत्येते भृजादयः। एषामप्यन्तस्य षत्वं भवति धुटि परे अन्ते च। भ्रष्टा, भ्रक्ष्यति। भ्रस्ज पाके स्कोस्संयोगाद्योरिति सलोपः, अनेन षः, षढो कः, अवरीभर्ट् य शब्दः, लुक्, ग्रहिज्यावयीति सम्प्र, द्विर्व, रि रेफौ च लुकि इति रीरागमः। ह्यस्तनी, दि, व्यञ्जनादिदस्योरिति दिलोपः। स्कोस्संयोगेति सलोपः, अनेन षः, वा विराम इति षस्य टः, स्रष्टा, स्रक्ष्यति। सृज विसर्गे सृजिदृशोरागम इति रकारागमः। अमरीमर्ट्, यशब्दः, पूर्ववल्लुगादिः। मार्ष्टा, मार्ट्स्यति। मृजूष् शुद्धौ, गुणः, मर्जो मार्जिरिति मार्जिरादेशः, अनेन षः, षढो कः। अमरीमर्ट्। य शब्दः, पूर्ववल्लुगादि गुणे कृते मर्जोमर्जिः, जस्य षः, वा विराम इति षस्य टः। यष्टा, यक्ष्यति। यज् देवता। अयायट्, अरारट्। अवभ्राट्। भ्राजृदीप्तौ, राजृदीप्तौ, षत्वे कृते षस्य टः। राजिभ्राज्योस्सेट्त्वाद् धुटादिः प्रत्ययो न सम्भवति। भ्रस्जे भृजादेशः,

सगुणे प्रत्यये वा स्मर्यते, भर्जनम्, भृज्जनम्। युट्चेति युट्, एवं भर्ष्टा भ्रष्टा। अनेन षः स्कोस्संयोगेति सलोपः, अगुणे तु यथा प्राप्तमेवरूपम्। भृज्जति–भृज्जते, सार्वधातुके यण्। ग्रहिज्येति सम्प्र.।

• छशोश्च ३/६/६५

छशावित्येतयोः षत्वं भवति धुटि परे अन्ते च। प्रष्टा, प्रक्ष्यति। वेष्टा, वेक्ष्यति। प्रच्छ ज्ञीप्सायाम्, विश प्रवेशने, अपरीपर्ट्। अवेवेट्, धुटीति किम्? पृच्छ्यते। विश्यते।

• भाषितपुंस्कं पुंवदायौ ३/६/६६

भाषितः उक्तः पुमान्येन, तद्भाषितपुंस्कम्। पूर्वम् येन पुमान् भाषितः सम्प्रति स्त्रियां वर्तते तस्य आमि प्रत्यये परे पुंवद्भावो भवति। पुल्लिङ्गे यद्रूपं तत्तस्य भवतीत्यर्थः। ब्राह्मणी इवाचरति ब्राह्मणायते। एनी–एतायते। श्येनी–श्येतायते। हरिणी–हरितायते। एतश्येतहरितेभ्यः तोपधात्तो नकार इति ई प्रत्ययः तस्य च नः, कर्तुरायिरिति आयि प्रत्ययः। अनेन पुंवद्भावे सति ब्राह्मण एत श्येत हरित इत्येते आदेशाः भवन्ति। आयाविति किम्? ब्राह्मणीयति। यिन्, चे किर्वेत्यतो वेति वर्तते। .... स्त्रीलिङ्गस्यैव पुंवद्भावः। न तु नपुंसकलिङ्गस्य । अतिनूयते, नौ..। नाम्यन्तानांयणायीति दीर्घः। अतिनूशब्दस्य अति नौ आदेशो न भवति, व्यवस्थितविभाषाविज्ञानात्, इहापि न भवति, द्रोणीयते, श्वश्रूयते।

• आदाताम‍ाथामादेरिः ३/६/६७

आतामाथामिति द्वन्द्वः। आदि लोपोऽन्तलोपश्चेति। ओसो लोपः आत् अकारात्परयोः आताम् आथामित्येतयोः आदावित्वं भवति। पचेताम्, पचेथाम्, यजेताम्, यजेथाम्। पञ्चमी आताम्, आथाम्। अन्विक, अनेनाकारस्य इत्वम्। आदिति किम्? कुर्वाताम्, कुर्वाथाम्। डुकृञ् करणे, तनादेरुः। करोतेरिति गुणः। अस्योकारः।

• आते आथे इति च ३/६/६८

आते आथे द्वन्द्वः, ओसः पूर्ववल्लोपः। अकारात्परयो आते आथे इत्येतयोरादेरित्वं भवति। पचेते–पचेथे। यजेते–यजेथे। निर्देशे सन्धेरकरणे स्वरे परे आते आथे इत्येतयोः प्रकृतिभावार्थम्। पचेते इति पचेथे इति। इति य शब्दादेकारान्तस्याप्यन्तस्य द्विर्वचनस्य प्रकृतिः। पचावहे इति। अन्विकरणः। अस्य वमोर्दीर्घः।

• या शब्दस्य च सप्तम्याः ३/६/६९

अकारात्परस्य सप्तम्याः या शब्दस्य इत्वं भवति। पचेत्, पचेताम्। पचेः अन्विकरणः। अनेन या शब्दस्य इः। या इति कर्तव्ये शब्द ग्रहणम् या शब्दस्य सस्वरस्य इत्वार्थम्। परकार्ये विकार्यादिरिति वचनात् यकार मात्रस्य इत्वं स्यात्। ननु तस्य इत्वे कृते पुनरपि यत्वे या शब्दस्स एव स्थित इति किं सूत्रेण कृतं स्यात्। आदिति किम्? अद्यात्। सप्तमीभ्यामिति किम्? चिकीर्ष्यात्। आशीर्यात्। अस्य च लोपः। अन्तरङ्गत्वादकार लोपे कृते प्राप्त्यभावात् अत्रेत्वं न भविष्यति इति सप्तमी ग्रहणं स्वरादेशत्वान्माभूत्।

• यास्युसोरियसियुसौ ३/६/७०

अकारात्परयोः यास् उस् इत्येतयोः यथासङ्ख्यम् इयस् इयुस् इत्येतावादेशौ भवतः। पचेयम् यजेयम्। पचेयुः यजेयुः। सप्तमी, यास्, युस्, अन्विक, अनेन इयस् इयुस्। आदिति किम्? कुर्यात्, कुर्युः। सप्तम्यां येचेत्यकारलोपः।

• शमादीनां दीर्घो यनि ३/६/७१

लक्ष्यायत्तत्वाद्व्याकरणस्य शमादयोऽष्टौ गृह्यन्ते। शमु उपशमे, तमु कान्तौ, दमु उपशमे, श्रमु उपशमे, भ्रमु अनवस्थाने, क्षमूष् सहने, क्लमु ग्लानौ, मदीहर्षे, एषां यनि परो दीर्घो भवति। शाम्यति ताम्यति, दाम्यति, श्राम्यति, भ्राम्यति, क्षाम्यति क्लाम्यति, माद्यति। दिवादेर्यन्, अनेन दीर्घः। यनीति किम्? शमिता।

- **ष्ठिवु क्लम्वाचमाभनि ३/६/७२**

ष्ठिवु निरसने, क्लमु ग्लानौ, चमु अदने, आङ्पूर्वः, एषामनि दीर्घो भवति। ष्ठीवति क्लामति, आचामति, क्लमेः वक्तव्यादन्विकरणः अनीति किम्? ष्ठेविता। आङ्पूर्वस्य चमेरूपादानादिह न भवति। चमति, परिचमति।

- **क्रमः परस्मै ३/६/७३**

अनीत्यनुवर्तते, जानातेरित्यतः प्राक्। क्रमु पादविक्षेपे इत्यस्य अनि परस्मै पदे परे दीर्घो भवति। क्रामति, क्रामतः, क्रामन्ति। यन्यपि परे दीर्घ इष्यते क्राम्यति, वक्तव्याद् यन्। परस्मायिति किम्? आक्रमते भानुः।

- **गमिषुयमां छः ३/६/७४**

परस्मायिति निवृत्तम्। गम्लृ गतौ, इषु इच्छायाम्, यम उपरमे, एषामनि परे छत्वं भवति। गच्छति, इच्छति, यच्छति। संगच्छति। सं पूर्वोगमिः। रूचादिः।

- **पः पिबः ३/६/७५**

पा पाने इत्यस्य अनि परे पिबादेशो भवति। पिबति। लोपः पिबतेरिति ज्ञापकाद् गुणो न भवति।

- **घ्रो जिघ्रः ३/६/७६**

घ्रा गन्धोपादाने इत्यस्य अनि परे जिघ्रादेशो भवति। जिघ्रति।

- **ध्मोधमः ३/६/७७**

ध्मा शब्दोऽग्नि संयोगे इत्यस्य अनि परे धमादेशो भवति। धमति।

- **स्थस्तिष्ठः ३/६/७८**

ष्ठा गति निवृत्तौ इत्यस्य अनि परे तिष्ठादेशो भवति। तिष्ठति।

- **म्नोमनः ३/६/७६**

म्ना अभ्यासे इत्यस्य अनि परे मन आदेशो भवति। मनति।

- **दाणो यच्छ ३/६/८०**

दाण दाने इत्यस्य अनि परे यच्छ आदेशो भवति, यच्छति। दाणो नकार इहार्थः।

- **दृशेः पश्यः ३/६/८१**

दृशिर् प्रेक्षणे इत्यस्य अनि परे पश्य आदेशो भवति। पश्यति।

- **अर्तेः ऋच्छः ३/६/८२**

ऋ गति प्रापणयोरित्यनि परे ऋच्छादेशो भवति। ऋच्छति।

- **सर्तेर्धावः ३/६/८३**

सृ गतावित्यस्य अनि परे धावादेशो भवति। धावति। धावादेशो वेगितायां गतौ इष्यते। तेनेह न भवति—प्रियामनुसरति। सृ गतौ, धावु गति शुद्ध्योः इति धातुद्वयेन सरति धावतीति प्रयोगद्वये सिद्धे योगारम्भो नियमार्थः इत्याहुः।

- **शदेःशीयः ३/६/८४**

शदलृ शातन इत्यस्य शदलृ विशरणे इति वा, अनिपरे शीयादेशो भवति। शीयते, शदेः अन्विकरणविषये रूचादित्वादात्मने पदं स्मर्यते।

- **सदेः सीदः ३/६/८५**

षद्लृ विशरण इत्यस्य अनि परे सीदादेशो भवति।

• जा जनेर्विकरणे ३/६/८६

जनी प्रादुर्भावे इत्यस्य विकरणे परे जादेशो भवति। जायते, जायेते, जायन्ते। दिवादेर्यन्, जन जनने इत्यस्य न ग्रहणम्, विकरणाभावात्। यनीति कर्तव्ये विकरणग्रहणमुत्तरार्थम्।

• ज्ञश्च ३/६/८७

ज्ञा अववोधन इत्यस्य विकरणे परे जादेशो भवति। जानाति।

• प्वादीनां ह्रस्वः ३/६/८८

पूञ् पवन इत्यादीनां विकरणे परे ह्रस्वो भवति। पुनाति, लुनाति, स्तृणाति। पूञ् पवने, लूञ् छेदने, स्तॄञ् आच्छादने, अनेन ह्रस्वः, प्वादयः आगणान्तात्। विकरण इति किम्? पूर्यते।

• उकारस्य वृद्धिर्व्यञ्जनादौ गुणिनि सार्वधातुके ३/६/८६

उकारस्य वृद्धिर्भवति, गुणिनि सगुणे व्यञ्जनादौ सार्वधातुके परे, यौति, यौषि, यौमि, स्तौति, स्तौषि, स्तौमि। यू मिश्रणे, ष्टूञम् स्तुतौ। अन्वि, अदादेर्लुक्, अनेन वृद्धिः। एवं स्तौतु, अस्तौत्, पञ्चमी तु, ह्यस्तनी दि, उकारस्येति किम्? एति, एतु, इण् गतौ, औदिति कर्तव्ये वृद्धि ग्रहणं संज्ञापूर्वकेन वृद्धेरनित्यत्वार्थम्। तेन विकरणेभ्यः तयोः न भवति। सुनोति, योयोति, युमिश्रणे, अत्यर्थम् यौति, य शब्दः। वाचेक्रीयितस्येति लुक्, द्विर्व, व्यञ्जनादाविति किम्? यवानि, यु मिश्रणे, पञ्चमी अन्वि, गुणिनीति किम्? यतः तस्, सार्वधातुक इति किम्? स्तोता।

• ऊर्णोतेर्वा ३/६/६०

ऊर्णोते उकारस्य व्यञ्जनादौ सगुणे परे वा वृद्धिर्भवति, प्राप्त–विकल्पः, प्रोर्णौति, प्रोर्णोति, प्रोर्णौषि प्रोर्णोषि प्रोर्णौमि, प्रोर्णोमि। व्यञ्जनादाविति प्रोर्णवीति। अणिनीति किम्? प्रोर्णुते।

• गुणोह्यस्तन्याञ्च ३/६/६१

ऊर्णोतेः ह्यस्तन्यां परस्यां गुणो भवति। पूर्वेण पाक्षिक्याः वृद्धेरपवादः। प्रौर्णोत्, प्रौर्णोः। ह्यस्तनी, दि, सि, स्वरादीनां वृद्धिरादेरित्यौकारादेशः।

• तृहेरिड्विकरणात् ३/६/६२

व्यञ्जनादौ गुणिनीति चानुवर्तते। तृह हिंसि हिंसायामित्यस्य विकरणात् परः इडागमो भवति, व्यञ्जनादौ सगुणे परे, इट्, टकारः पूर्वाचार्य सिद्ध्यागमत्व द्योतनार्थः। तृणेढि, तृणेक्षि, तृणेढ्मि, वर्तमाना ति, सि, मि। स्वराद्बुधादेरिति न शब्दः, अनेन इट्, होढः, घढधभेभ्य इति तस्य धः, तवर्गश्चटवर्गेति धस्य ढः। ढोढेर्लोपः, षकारे परे षढोः कः, अतृणेट्, ह्यस्तनी दि, न शब्दः, षः, इट्, व्यञ्जनादाविति किम्? तृणहानि। अगुणेति किम्? तृढः, तस्, न शब्दः, रूधादेर्विकरणान्त लोपः, पूर्ववत्, ढत्वादि, नाविति कर्तव्ये विकरणं विस्पष्टार्थम्।

• ब्रुव इट्वचनादेः ३/६/६३

वचनस्यादिः वचनादिः। व्यञ्जनादौ गुणिनि सार्वधातुके इत्यनुवर्तते, ब्रूञः परं यद्वचनम्, तस्य व्यञ्जनादेर्गुणिनि सार्वधातुकस्यादिः इडागमो भवति, इकारश्चेटीत्यर्थः, ब्रवीति, ब्रवीषि, ब्रबीमि, ब्रवीतु, अब्रवीत्। व्यञ्जनादाविति किम्? ब्रुवाणि, गुणिनीति किम्? ब्रूयात्, सार्वधातुक इति किम्? वक्ता, ब्रुवोवचिः।

• चेक्रीयित लुगन्तात् ३/६/६४

वेष्यते, बोब्रबीति, ब्रोब्रोति।

• अस्तेर्दिस्योः ३/६/६५

अस् भुवीत्यस्मात्परयोः दिश्योः आदिः ईडागमो भवति, आसीत्, आसीः, ह्यस्तनी दि, सि। अस्तेरित्यकारस्याकारः, दि, सहचरितस्य सेर्ग्रहणादिह न भवति, असि, अस्तेस्सावितित सि लोपः। दिस्योरिति किम्?

अस्ति, स्तिपा निर्देशातत्वादेशे कृते न भवति। अभूत्, अभूः। इणस्थादेरिति सिचो लुक्।

• सिचः ३/६/६६

सिचः परयोर्दिश्योः आदिरीडागमो भवति, अकार्षीत्, अकार्षीः, अलावीत्, अलावीः।

• रूदादिभ्यश्च ३/६/६७

लक्ष्यानुरोधात् रूदादयः पञ्च गृह्यन्ते। रूदिर् अश्रु विमोचने। ञि ष्वप् श, श्वस् प्रा, अन च, जक्ष् भक्षणे। एभ्यः परयोः दिस्यो आदिरीडागमो भवति, सार्वधातुके च रूचादेरिति इड् प्राप्तः, अरोदीत्, अरोदीः, अस्वपीत्, अस्वपीः, अश्वसीत्, अश्वसीः। प्राणीत्, प्राणीः, अजक्षीत् अजक्षीः। पञ्चानां ग्रहणादिह न भवति अजागर्भवान्। जागृ निद्राक्षये गुणः, व्यञ्जनादिदस्योरिति दि लोपः।

• अदोऽट् ३/६/६८

अद भक्षणे इत्यस्मात्परयोः दिस्योः अट् आगमो भवति। टकारो वैचित्र्यार्थः। रूदादिभ्योऽपीष्यते। अरोदत्, अरोदः, अस्वपत्, अस्वपः, अश्वसत्, अश्वसः, प्राणत्, प्राणः, अजक्षत्, अजक्षः।

• सस्यसेऽसार्वधातुके तः ३/६/६६

सस्य सकारस्य तत्वं भवति सकारादावसार्वधातुके परे। वत्स्यति। अवत्स्यत्। वस् निवसने। विवत्सति सन्। जिघत्सति सन्, अदेर्घस्लृ, सनद्यतन्योरिति घस्लृ, सन्। द्विर्वचनम्, सस्येति किम्? वक्ष्यति। वच् भाषणे, स इति किम्? वस्ता, असार्वधातुक इति किम्? आस्से। आस् उपवेशने।

• अणि वचेरोदुपधायाः ३/६/१००

वचेरूपधायाः अणि परे ओत्वं भवति, अवोचत्, अवोचताम्, अवोचन् अण् सुवचीत्यण्।

• अस्यते स्थोऽन्तः ३/६/१०१

असु क्षेपण इत्यस्य अणि परे थकारागमो भवति। आस्थत्, पूर्ववदण्, अनेन थकारागमः। अवर्णस्याकारः।

• श्वयतेरः ३/६/१०२

टु ओ श्वि गति वृद्ध्योरित्यस्य अणि परे अकारादेशो भवति। अश्वत्। अत एवाकारादेशविधानात् श्वयतेरण्।

• पतेः पप्तिः ३/६/१०३

पत्लृ गतावित्यस्य अणि परे पप्तिरादेशो भवति। लृकार उच्चारणार्थः। अपप्तत्। पुषादि सूत्रेण अट्।

• कृपेरोलः ३/६/१०४

कृपू सामर्थ्ये इत्यस्य गुणे कृते यो रेफस्तस्य लत्वं भवति। क्लप्ता, क्लप्स्यति। अक्लप्स्यत्। गुणः, रस्यलः, ऋदुपधाच्च क्लृपि चृतेरिति ज्ञापकात् ऋकारस्य लृकारः आदेश इष्यते। ओत्वादिः। क्लप्सति सन्, द्विर्व, शिष्ट प्रयोगानुसारेणान्यत्रापि रेफस्य लत्वं वक्तव्यम्। वारः, वालः, मूरम्, मूलम्, रघुः, लघुः, अरम्, अलम्, असुरः, असुलः परिगः, पलिगः पर्यङ्कः पल्यङ्कः।

• उपसर्गस्यायतौ ३/६/१०५

रो ल इत्येव। उपसर्गस्य यो रेफः तस्य लत्वं भवति। अयतोः। अय गतावित्यस्मिन्परे। प्लायते, प्लायेते, प्लायन्ते। अय गतौ, परापूर्वः, अनेन रस्य लः, आते आथे इति चेत्याकारस्य इत्वम्। प्लाय्यते भवता। प्रत्यय इत्यत्र लत्वं न भवति। प्रति शब्दपूर्वस्य अयतेः प्रयोगाभावात्। अयताविति किम्? परायतते।

• गिरतेश्चेक्रीयिते ३/६/१०६

गॄ निगरण इत्यस्य लत्वं भवति चेक्रीयिते परे, निजेगिल्यते। गर्हितं निगलति, यशब्दः, ॠदन्तस्येर्, अनेन लत्वम्, द्विर्वचनम्, चेक्रीयित इति किम्? निगीर्यते।

• वा स्वरे ३/६/१०७

गिरते रेफस्य स्वरे परे लत्वं वा भवति। निगिरति निगिलति, अन्विक, इट्, वा लत्वम्। निगरणम् निगलनम्। युद्चेति युद् वा शब्दस्य व्यवस्थितविभाषाविज्ञानात् प्राण्यङ्गे। गलः। विषे तु गरः। अच् पचादिभ्यश्चेति अच्।

• तृतीयादेर्घढधभान्तस्य धातोरादिचतुर्थत्वं स्ध्वोः ३/६/१०८

तृतीयः आदिर्यस्यावयवस्य स तृतीयादिः, घढधभान्तस्येति द्वन्द्वगर्भो बहुव्रीहिः। आदेश्चतुर्थः आदि चतुर्थः, तस्य भावः आदिचतुर्थत्वम्, धातोः अवयवः तृतीयादिः घढधभान्तः, तस्य यः आदिः तस्य चतुर्थो भवति स्ववर्गात् प्रत्यासत्तेः सकारे ध्व शब्दे च परे। अधोक्ष्यत्, अघोक्ष्यत् अभोत्स्यत। दुह प्रपूरणे, गूहू संवरणे, वुध अवगमने क्रियातिपत्तेः स्यत्, स्यत, अड्धात्वादिः, दुहेः दादेर्घः, गुहेः, हो ढः, अनेन आदेः चतुर्थः। अघोषेष्वशिटामिति घस्य कः, धस्यतः, षढोः कः। धिप्सति। दम्भु दम्भेः, सन्, द्विर्व, दम्भेरिच्चेति इत्वम्, अभ्यासलोपश्च अनेन दस्य धत्वम्। इष्टिवशान्नलोपः। अघोषेष्वशिटामिति भस्य बः। धोक्ष्यति। दुह् प्रपूरणे, स्यति, दादेर्घः, अनेन दस्य धः। आद्यन्तवदेकस्मिन्निति वचनात् धुश्शब्दो धातोरवयवः, ध्वशब्दे, अदुग्ध्वम्। दुह् प्रपूरणे अद्यतनी ध्वम्, अड्धात्वादिः, सणनिट् इति सन्, वक्तव्यात् तस्य लुक्, दादेर्घः, अनेन गस्य घः, तवर्गश्चटवर्गेति धस्य ढः, ढोढेलोपो दीर्घश्चोपधायाः। अभुद्ध्वम्। बुध अवगमने, ध्वम्, सिचो धकार इति सिच्लोपः, अनेन बस्य भः, धुटां तृतीय इति धस्य दः। तृतीयादेरिति किम्? क्रोत्स्यति। क्रुध क्रोधे घढधभान्तस्येति किम्? दास्यति। यस्मिन्विधिस्तदादौ तत्कार्यमिति

वचनात् सकारे कार्यम् सकारादौ बोद्धव्यम्, तेनेह न भवति, दिदम्भिषति। स्ध्वोरिति किम्? दोग्धा।

• लोपे च दिस्योः ३/६/१०६

धातोरवयवस्य तृतीयादेः धढधभान्तस्य आदेः चतुर्थो भवति दिस्योः। लोपे कृते सति तु अदोक् अधोक्। दुह प्रपूरणे, ह्यस्तनी दि, सि, व्यञ्जनादिदश्योरिति दिस्योर्लोपः। दादेर्घः, अनेन दस्य धः, वा विराम इति धस्य कः। अजोघोट, गूहू संवरणे, अत्यर्थमगूहत्, य शब्दः द्विर्व, अङ्धात्वादिः, पूर्ववत् दिस्योः लोपः। होढः, अनेन घस्य गः। पूर्ववद् ढस्य टः। ननु सिचो लोपविषये प्रत्ययलोप इति वचनात् पूर्वेण सिद्धमादि चतुर्थत्वमित्यपार्थकम् सिग्रहणम्। असदेतत्– सिकारे हि वर्णे कार्यम् पूर्वत्र विधीयते। न च वर्णाश्रये प्रत्यय लक्षणमिति, निषेधात्।

• तथोश्चदधातेः ३/६/११०

घढधभान्तस्येति। वर्तमानधातुग्रहणमनुवर्तते। डुधाञ् दान धारणयोरित्यस्य धातोरादि चतुर्थो भवति सकारे ध्व शब्दे च परे तथा तथयोः परयोश्च। धत्से, धद्ध्वे। डु धाञ् दानधारणयोः वर्तमाना से ध्वे, अन्विकः जुहोत्यादेर्लुक्, जुहोत्यादीनामिति द्विर्व, द्वितीय चतुर्थेति धस्यदः, अघोषेष्वशिटामिति धस्य तः, तथोः खल्वपि। धत्तः, धत्थः, डुधाञ् दानधा, तस् थस् अन्यत्पूर्ववत्, धान्तस्येति किम्? दधाति, दधासि ओ लोपो न भवति अगुणे तस्य विधानात्।

भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तावाख्यातप्रकरणे

षष्ठः पादः।

आख्यातप्रकरणे सप्तमः पादः

• इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः ३/७/१

असार्वधातुकस्यादिः इडागमो भवति, टकार ईटश्चेटीत्यर्थः। भविता, भविष्यति, अभविष्यत्, भविता, भवितुम्, भवितव्यम्, वुण्तृचाविवितितृच्। इच्छार्थेष्वेकर्तृकात्तुम्, तव्यानीयाविति तव्यः। असार्वधातुकस्येति किम्? आस्ते, व्यञ्जनादेरिति किम्? बभूव। अयकारादिति किम्? भूयात्। वृणोतेराच्छादन इति ज्ञापकात् विकरणस्य न भवति, गृह्णाति।

• स्नुक्रमिभ्याञ्च परस्मै ३/७/२

परस्मैपद निमित्ताभ्यामिति आचार्येण सूत्रे पठितमित्याहुः। स्नु प्रस्रवणे, क्रमु, पाद विक्षेपे, आभ्यां परस्मैपदनिमित्ताभ्यां–कारणाभ्यां परस्य व्यञ्जनादेः अयकारादेः असार्वधातुकस्यादिरिडागमो भवति, प्रस्नविता, प्रस्नविष्यति, क्रमिता, क्रमिष्यति। अत्र स्नुक्रमी परस्मैपदनिमित्ते पूर्वेण सिद्धे नियमार्थम् वचनम्, परस्मैपदनिमित्ताभ्यामेव यथास्यात्, आत्मनेपदनिमित्ताभ्यां मा भूत्। प्रस्नोषीष्ट, प्रक्रमीष्ट, प्रस्नोष्यते, प्रक्रम्यते, आत्मनेपदानि भावकर्मणोरित्यात्मनेपदम्, प्रस्नोता, उपक्रान्ता, प्रोपपूर्वौ क्रमिः कर्मण्यर्थे रूचादिः।

• सार्वधातुके रूदादेः ३/७/३

व्यञ्जनादेः यकारादे इत्येव, तच्चार्थवशात्सप्तम्यन्तं ज्ञायते। रूदादेर्गणात् परस्मिन्व्यञ्जनादौ अयकारादौ सार्वधातुके आदिरिडागमो भवति। रोदिति, स्वपिति, श्वसिति, प्राणिति, जक्षति। व्यञ्जनादाविति किम्? रूदन्ति। अयकारादेरिति किम्? रूद्यात्, रूद्यत इत्यत्र नित्यत्वात्, यणिकृते इडागमो भवति, पञ्चादीनां रूदादीनां ग्रहणादिह न भवति। जागर्ति।

• ईशस्से ३/७/४

सार्वधातुक इत्येव। ईश ऐश्वर्ये इत्यस्मात्परस्मिन् से–सकारादौ सार्वधातुके परे आदिः इडागमो भवति। ईशिषे, ईशिष्व।

• ईड्जनोर्ध्वेच ३/७/५

सार्वधातुक इत्येव। ईड् स्तुतौ, जन जनने। अनयोस्सम्बन्धिनि सकारादौ ध्व शब्दादौ च सार्वधातुके परे आदिरिडागमो भवति, च शब्दात् ईशेश्च। ईडिषे, ईडिष्व, ईडिध्वे, ईडिध्वम्, वर्तमाना से, ध्वे। पञ्चमी स्व, ध्वम्। व्यतिजज्ञिषे, व्यतिजज्ञिध्वे, व्यतिजज्ञिष्व, व्यतिजज्ञिध्वम्। वि अतिपूर्वौ, जुहोत्यादीनामिति द्विर्व, इट् गमहनेत्युपधालोपः। तवर्गश्चटवर्गेति नस्य ञः जनी प्रादुर्भावे इत्यस्य न ग्रहणम्, यनाव्यवधानात्। ईशेः खल्वपि, ईशिध्वे, ईशिध्वम्।

• सेः गमः परस्मै ३/७/६

परस्मैपद निमित्तमित्याहुः। सूत्रं पठतिस्म। असार्वधातुक ग्रहणमनुवर्तते। परस्मैपदनिमित्तं योऽसौगतिस्तस्मात्परस्य असार्वधातुकस्य यस्सकारः तस्मिन्सकारे परे आदिरिडागमो भवति, यमि, रमि, नमीति प्रतिषेधस्य बाधः। गमिष्यति, अगमिष्यत्। परस्मैपदग्रहणं यदि सकारस्य विशेषणं स्यात्, पुनरिडागमो न भवेत्। जिगमिषति, जिगमिषा, शन्सु प्रत्ययादित्यकारप्रत्ययः। स्त्रियामादाप्। जिगमिषुः। सनन्ताशंसीति उः, अस्य च लोपः। सर्वत्र परस्मैपदनिमित्तं योग्यत्वात्। परस्मैपदनिमत्तादिति किम्? सङ्गमीष्ट, संगम्यते। गमिस्संपूर्वः, रूचादिः। एवमधिजिघांसति, इङ् अध्ययने, अधि पूर्वः, सनीणिङोर्गमि इति इङः गमिः, हनिगमिङोरूपधाया इति दीर्घः अत्र स्थानिवद्भावादगमिरात्मनेपदस्य निमित्तम्।

• हनृदन्तात्स्ये ३/७/७

हनहिंसागत्योरित्यस्माद्धातोः कृदन्ताच्च परस्मिन् स्ये–स्यकारादौ प्रत्यये परे इडागमो भवति। हनिमन्यतेर्नात्, ऋतोऽवृङ्वृञ इति च प्रतिषेधस्य बाधः, हरिष्यति, करिष्यति। स्य इति किम्? जिघांसति। अभ्यासाच्चेति घः, हनिगमिङोरिति दीर्घः।

• अञ्जेस्सिचि ३/७/८

अञ्जू व्यतिरक्षणगतिषु। अस्माद्धातोः परस्मिन्सिचि आदिरिडागमो भवति। ऊदनुबन्धात् विकल्पः प्राप्तः। आञ्जीत्, आञ्जिष्टाम्, आञ्जिषुः। दि, ताम् अन्, सिच्, अनेन इट्, ईट्। इटश्चेटीति सिज्लोपः। अन उस्, अवर्णस्याकारः। सिचीति किम्? अङ्क्ता, अञ्जिता। स्वरतिसूतीति वा इट्।

• स्तुसुधूञ्भ्यः परस्मै ३/७/९

सिचीत्येव। ष्टूञ् स्तुतौ, षुञ् अभिषवे, सु श्रु गतौ सु प्रसवनैश्वर्वयोः, इति वा। धूञ् कम्पने एभ्य परस्मिन् सिचि परस्मैपदे परे आदिरिडागमो भवति, स्तु सु इत्येतयोः परयोः उतोऽयुरूष्विति प्रतिषेधस्य बाधः, धूञोऽपि स्वरतिसूतीति विकल्पस्य। अस्तावीत्, असावीत्, अधावीत्, सिचि परस्मायिति वृद्धिः। परस्मायिति किम्? अस्तौष्ट, असौष्ट, अधोष्ट, अधविष्ट।

• यमिरमिनम्यादन्तानां सिरन्तश्च ३/७/१०

आत् अन्ते येषां ते आदन्ताः ततो द्वन्द्वः, यम उपरमे, रम क्रीडायाम्, णम् प्रह्वत्वे शब्दे, एषामादन्तानां च सम्बन्धिनि सिचि परस्मैपदे परे आदिरिडागमो भवति यस्यादीनां यसकारागमः यमिरमिनमीति अनिडेकस्वरादिति च प्रतिषेधो बाध्यते। अयंसीत्, अयंसिष्टाम, अयंसिषुः व्यरंसीत्, व्यरंसिष्टाम्, व्यरंसिषुः, अनंसीत् अनंसिष्टाम्, अनंसिषुः। दि, ताम्, अन्, सिच्, ईट्, अनेन इट, इटः पूर्वम् सकारागमः, सिज्लोपः, अन, उस् आदन्तानाम्। अयासीत्, अयासिष्टाम्, अयासिषुः, या प्रापणे, अन्यत् पूर्ववत्।

• स्मिङ्पूङ्रञ्ज्वशू कॄ गॄ दृ धृ प्रच्छां सनि ३/७/११

स्मिङ् ईषद्धसने, पूङ् पवने, ऋ गतौ, अञ्जू व्यतिरक्षणगतिषु, अशू व्याप्तौ, कॄविक्षेपे, गॄनिगरणे, दृङ् आदरे, धृङ् अनवस्थाने, प्रच्छ ज्ञीप्सायाम्, एषां सनि परे इडागमो भवति। स्मयतेरिवर्णादश्विति निषेधः प्राप्तः। पूङः उवर्ण गुपादिभ्यश्चेति वृ दृ गॄणाम्, ऋतोवृङ्वृञ इति, अन्ज्वश्वोस्स्वरतिसूतीति विकल्पः प्राप्तः। तथा कॄ गॄ इत्येतयोः ऋदन्तानां हि इड्विकल्पस्स्मर्यते। प्रच्छेरपि प्रच्छेश्छादिति निषेधः प्राप्तः। सिस्मयिषते, पिपविषते, अवर्णस्य जान्तस्थेति इत्वम्। अरिरिषते। स्वरादेर्द्वतीयस्येति

द्विर्वचनम्। एवं अञ्जिजिषते, अशिशिषते, चिकरिषति, जिगरिषति, दिदरिषति दिधरिषति। करितुमिच्छति। एवं गरितुम्, दर्तुम्, धर्तुम्। सन्, इट्, पिपृच्छिषति, ग्रहिस्वपिप्रच्छां सनीति सम्प्रसारणम्, पूङोऽनुबन्धनिर्देशः पूञोनिवृत्त्यर्थः। पुपूषति, ऋदन्तानां वृङ्वृञ्भ्यां च सनीड्वेष्यते। तितरिषति, तितीर्षति। तॄ प्लवनतरणयोः। ऋदन्तस्येर्, नामिनोर्वोरिति दीर्घः। विवरिषते, वुवूर्षति। वृङ् संवरणे, वृञ् वरण इति वा, इट्। अनिट्पक्षे स्वरान्तानां सनीति दीर्घः। उरोष्ठ्योपधस्यचेति च शब्दात् स्वरति, सूति, सूयति, धूञ् ऊदनुबन्धेभ्यः च व्यञ्जनादेरयकारादेरसार्वधातुकस्यादिरिडागमो वा वक्तव्यः। स्वृशब्दोपतापयोः, स्वरिता स्वर्ता। षूङ् प्राणिगर्भविमोचने प्रसविता, प्रसोता। धूञ् कम्पने, विधविता, विधोता। गाहू विलोडने। गाहिता, गाढा। सूति, सूयति इति निर्देशात् षु प्रेरण इत्यस्य तौदादिकस्य सुवतेः न भवति। सविता। धूञो ञनुबन्धः धूविधूनन इत्यस्य निवृत्त्यर्थः। व्यवस्थितविभाषा चेयम्। रमृवर्णेति रकारानुबन्धप्रतिषेध एव। सूता, शूता। तथा रध–हिंसासंराद्ध्योः। णश् अदर्शने। तृप, तृप्तौ, दृप हर्ष मोहनयोः। द्रुह जिघांसायाम्। मुह वैचित्ये, ष्णुह उद्गिरणे, ष्णिह प्रीतौ इत्येतेभ्योऽपि। रधिता, रद्धा, नशिता, नंष्टा, मस्जिनशोर्धुटीति नकारागमः, छशोश्चेति षः। तर्पिता, तर्प्ता, त्रप्ता, दर्पिता, दर्प्ता, द्रप्ता। वक्तव्याद्वा रकारागमः। द्रोहिता, द्रोग्धा, द्रोढा। मोदिता, मोग्धा, मोढा। स्नोहिता, स्नोग्धा, स्नोग्ढा। स्नेहिता, स्नेग्धा, स्नेढा। द्रुह, मुह ष्णुहष्णिहां वक्तव्याद्वा घः। पक्षे होढः, तथा निपूर्वात् कुशेरपि। निष्कोषिता, निष्कोष्टा, निरोरेफस्य विसर्गः। अनव्ययविसृष्टस्येति तु शब्दात् षत्वम् इन्नन्ताद्धातोः। ऋधु वृद्धौ, भ्रस्ज पाके, दम्भुदम्भे, श्रिञ् सेवायाम्, यु मिश्रणे, लूञ् छेदने, भृञ् भरणे, ज्ञा अववोधने। अस्मादिन्नन्तात्, षणुदाने, तनुविस्तारे, पत्लृ गतौ, दरिद्रा दुर्गतावित्येतेभ्यः सनीत्वेष्यते, दिदविषति। दुद्यूषति, दिवुक्रीडायाम्। च्छ्वोश्शूटौ। पञ्चमेचेति ऊट्, द्विर्वचनम्। ऋध, अर्दिधिषति, सन्, इट्, गुणः। स्वरादेर्द्वितीयस्येति द्विर्व, द्वितीयचतुर्थेति, धस्यदः। पक्षे ईर्त्से, आप्नोतेरी इत्यत्र साधितमेतत्। भ्रस्जपाके, बिभ्रज्जिषति। बिभ्रक्षति। स्कोः संयोगेति सलोपः। दम्भुदम्भे, दिदम्भिषति, धिप्सति, श्रिञ् सेवायाम्, शिश्रयिषति, शिश्रीषति, युमिश्रणे, यियविषति। उवर्णस्य जान्तस्थेति इत्वम्। पक्षे युयूषति। ऊर्णूञ् छादने, प्रोर्णुनविषति प्रोर्णुनोषति। स्वरादेर्द्वतीयस्येति नुः, द्विर्व, भृञ्, भरणे, बिभरिषति, बुभूर्षति। ज्ञा अववोधने, जिज्ञापयिषति, ज्ञीप्सति। जानातेरिनि, अर्तिह्रीब्लीति पकारागमः। ज्ञीप्सते, व्याप्नोतेर्य इत्यत्र साधितम्। प्रणिसिसनिषति, सिसासति, धुटि–खनिसनिजनीति आत्वम्। तनु, वि, तितनिषति, तितंसति।

पत्लृ गतौ, पिपतिसति, पिपत्सति। सनिमीमादेत्यत्र, साधितम्। दरिद्रा, दुर्गतौ, दिदरि–द्रषति, दिदरिद्राषति। दरिद्रातेरसार्वधतुक इत्यालोपः सन्यनिटि न स्मर्यते।

● इटः दीर्घोग्रहेरपरोक्षायाम् ३/७/१२

ग्रहेः परस्य इटः दीर्घो भवति, अपरोक्षायाम्। परोक्षायां य इटः तस्य न भवति। ग्रहीता, ग्रहीष्यति, ग्रहीतः, ग्रहीतुम्, ग्रहीतव्यम्। अत्र इड्ग्रहणम् ग्रहे स्थानित्वनिवृत्त्यर्थम्। अपरोक्षायामिति किम्? जगृहिव, जगृहिम, ईदिति कर्तव्ये दीर्घग्रहणं ऋदन्तेभ्यो वृङ्वृञ्भ्यां च परस्येटः आशीःपरोक्षे वर्जयित्वा वा दीर्घः। तरीता, तरिता, वरीता, वरिता, संवरिता। आशीः परोक्षायां तु न स्यात् तरिषीष्ट, वरिषीष्ट। तेरिथ, तॄ प्लवनसंतरणयोः। तृफल भजेत्येत्वाभ्यास लोपौ। ववरिथ। न शसददेत्येत्वाभ्यासलोपाभावः। चेक्रीयितलुगन्ताद्ग्रहे सिचि दीर्घो नेष्यते। जरीगृहीता, अत्यर्थम् गृहीता, य शब्दस्य लुक्, ग्रहिज्येति सम्प्र, द्विर्व, रि रेफौच लुकीति आगमः।

● अनिट् एकस्वरादातः ३/७/१३

न इट् अनिट्, एक स्वरादधातो आकारान्तात्परस्यासार्वधातुकस्यादि–रनिड्भवति–इट् न भवतीत्यर्थः। दाता, दासीष्ट, दास्यति। नेतिकर्तव्ये अनिड्ग्रहणं वैचियार्थम्। एकस्वरादिति किम्? दरिद्रिता, दरिद्रातेरसार्वधातुक इत्यालोपः।

● इवर्णादश्विश्रिञ्डीङ्शीङः ३/७/१४

टु ओश्विगतिवृद्ध्योः, श्रिञ् सेवायाम्, डीङ् विहायसा गतौ, शीङ्स्वप्ने इत्येतद्वर्जितादिवर्णादेकस्वराद्धातोः परस्य सार्वधातुकस्य इडागमो न भवति। चेता, चेषीष्ट, नेता, नेषीष्ट। एकस्वरादिति किम्? आदीधिता आवेविता। दीधीवेव्योरिवर्णयकारयोरिति ईकारलोपः, अश्विश्रिडीङ् इति किम्? श्वयिता, श्रयिता, डयिता, शयिता।

● उतोऽयुरुणुस्नुक्षुक्ष्णुवः ३/७/१५

यु मिश्रणे, रू शब्दे, णु स्तुतौ, स्नु प्रस्रवणे, टु क्षु शब्दे, क्ष्णु तेजने, एतद्वर्जितादुतः उकारान्तादेकस्वराद्धातोः परस्यासार्वधातुकस्यादिरिडागमो न भवति। स्तोता, स्तोष्यति। तपरकरणं तत्कालार्थम्, तेनोर्णविता।

एकस्वरादिति किम्? प्रोर्णविता। अयुरू, णु, स्नु क्षुक्ष्णुव इति किम्? शमिता, रविता, जविता स्मविता, स्नविता, क्ष्णविता।

• ऋतो वृङ्वृञः ३/७/१६

वृङ् सम्भक्तौ, वृञ् वरणे, एतद्वर्जितात् ऋतः ऋकारान्तात् एक स्वराद्धातोः परस्यासार्वधातुकस्य इडागमो न भवति। कर्ता हर्ता एकस्वरादिति किम्? जागरिता, अवृङ्वृञ इति किम्? आवरिता, संवरिता, तपरकरणं तत्कालार्थम्। तेन कॄ विक्षेपे करिता।

• शकेः कात् ३/७/१७

शक विभाषितो मर्षणे, शक्लृ शक्ताविति शकः परस्यासार्वधातुकस्य इडागमो न भवति कात्, कादित्यादीनां पदानां प्रयोजनम् शासकितेत्यादौ निषेधो मा भूदिति केचित्। शक्ता।

• पचि वचि सिचि रिचि विचि मुचेश्चात् ३/७/१८

डुपचष् पाके, वचभाषणे, ब्रुवोवचिरादेशः, सिच् क्षरणे, रिचिर् विरेचने, मुचिर् पृथग्भावे, मुच्लृ मोक्षणे। एभ्य परस्यासार्वधातुकस्यादिरिडागमो भवति पक्ता, वक्ता, सेक्ता, रेक्ता, वेक्ता, मोक्ता।

• प्रच्छेश्छात् ३/७/१६

प्रच्छ ज्ञीप्सायामित्यस्मात् परस्यासार्वधातुकस्य इडागमो न भवति, प्रष्टा, प्रक्ष्यति, छषोश्चेति षः, षढो कः, विच्छेस्सेट्, अतो न पठितम्।

• युजिरूजिरञ्जिभजिभञ्जिभ्रस्जिभुजियजिष्वञ्जिमस्जि त्यजिसृजिनिजिविजिसञ्जेर्जात् ३/७/२०

युजिर् योगे, युज समाधाविति वा, रूजि भङ्गे, रञ्जिरागे, भज सेवायाम्। भञ्जो आगर्दने, भ्रस्जपाके, भुजपालनाभ्यवहारयोः, भुज कौटिल्ये इति वा। यज देवता पूजा, स्वञ्ज परिस्वङ्गे, टु मस्जि शुद्धौ, त्यज् हानौ, सृज विसर्गे, निजिर् शौचकर्मणि, विजिर् पृथग्भावे, सन्ज सङ्गे, एभ्यः परस्यासार्वधातुकस्य इडागमो न भवति। योक्ता, रोक्ता, रङ्क्ता, भ्रष्टा,

भङ्क्ता, स्कोस्संयोगाद्योरिति सलोपः। भृजादीनां ष, भोक्ता, मस्जि नशोर्नुडीति नागमः। व्रश्चिमस्ज्योर्धुटि इत्यन्त लोपः। त्यक्ता, स्रष्टा, सृजिदृशोरित्यकारागमः भृजादीनां षः, नेक्ता, वेक्ता, मङ्क्ता, मृजूष् शुद्धावित्ययमूदनुबन्धत्वाद्वेट्। अतो न पठ्यते। मार्ष्टा, मार्जिता, मर्जोमार्जिः।

• तुदि नुदि क्षुधि स्विद्यति विद्यति विन्दति विनन्ति च्छिदि भिदिशदिसदिपदिस्कन्दिहद्यदिविदेर्दात् ३/७/२१

तुद व्यथने, नुद प्रेरणे, क्षुधिरि संपोषे, ष्विदा गात्र प्रस्त्रवे, दिवादेर्यन्, विद सत्तायाम्, विद्लृ लाभे, मुचादेरागमो नकारः, विद विचारणे, स्वराद्रुधादेरिति न शब्दः, च्छिदिर् द्वैधीकरणे, भिदिर् विदारणे, शद्लृ विशरणे, शद्लृ शातने इति वा, पद गतौ, स्कन्दिर् शोषणे, हद पुरीषोत्सर्गे, अद भक्षणे, रिवद दैन्ये, रिवद परितापन इति वा, एभ्यः परस्य सार्वधातुकस्य इडागमो न भवति, तोत्ता, नोत्ता, क्षोत्ता, स्वेत्ता, वेत्ता, भेत्ता, शत्ता, सत्ता, पत्ता, स्कत्ता, अत्ता, खेत्ता। ज्ञानार्थे विदिः। सेट् नाभावश्च, वेदिता।

• राधि रूधि क्रुधि क्षुधि बन्धि शुधि सिद्ध्यति वुधि युधि व्यधि साधेर्धात् ३/७/२२

राध संसिद्धौ, रूधिर् आवरणे, क्रुध कोपे, क्षुध बुभुक्षायाम्, बन्ध बन्धने, शुध शोधने, षिधु संराद्धौ यना निर्देशः, बुध अवगमने, युध सम्प्रेषणे, व्यध ताडने, षाध संसिद्धौ, एभ्यः परस्य असार्वधातुकस्य इडागमो न भवति, राद्धा रोद्धा, क्रोद्धा, क्षोद्धा, बन्द्धा, शोद्धा, सेद्धा, वोद्धा, योद्धा व्यद्धा, साद्धा, सिध्यतीति राध्य नानिर्देशः षिधुगत्यामित्यस्य भौवादिकस्यनिवृत्त्यर्थः। तेन सधिता।

• हनिमन्योर्नात् ३/७/२३

हन हिंसागत्योः, मन ज्ञाने, यना निर्देशः, आभ्यां परस्य असार्वधातुकस्य इडागमो न भवति, हन्ता, मन्ता मन्यतीति यनानिर्देशः मनु अववोधने इत्येतेभ्यः दैवादिकस्य निवृत्त्यर्थः। मनिता।

- **आप्लृ तप तिपि ष्वपि वपि शपि छुप छिप् लिप्, लुप्लृ सृपेः पात् ३/७/२४**

आप्लृव्याप्तौ, तपसन्तापे, तिप्–क्षरणे, ञि ष्वप् शयने, डुवप् वीजसन्ताने, शप आक्रोशे, छुप संस्पर्शे, छिप् प्रेरणे, लिप् उपदेशे, लुप्लृ छेदने, सृप्लृ गतौ, एभ्यः परस्य असार्वधातुकस्य इडागमो न भवति। आप्ता, तप्ता, तेप्ता, स्वप्ता, वप्ता, शप्ता, छोप्ता, क्षेप्ता, लेप्ता, लोप्ता, सर्प्ता, स्रप्ता, वक्तव्याद्वा अकारागमः। तृपि दृपी रूधादित्वाद्वेटाविति न पठ्येते।

- **यभि रभिलभिभ्यो भात् ३/७/२५**

यभ विपरीतमैथुने, रभ राभस्ये, डुलभष् प्राप्तौ, एभ्यः परस्य असार्वधातुकस्य इडागमो न भवति। यब्धा, रब्धा, लब्धा।

- **यमि रमि नमि गमेस्सात् ३/७/२६**

यम उपरमे, रम क्रीडायाम्, णम् प्रह्वत्वे, गम्लृ गतौ, एभ्यः परस्यासार्वधातुकस्य इडागमो न भवति। यन्ता, रन्ता, नन्ता, गन्ता।

- **रिसि रूषि क्रुषि विसि लिशि दिसि दृशि स्पृशि मृशि दन्शेश्शात् ३/७/२७**

रिश रूश क्रुश–आह्वाने, विश–प्रवेशने, लिश–अवयवे, दिश–अतिसर्जने, दृशिर्–प्रेक्षणे, स्पृश–संस्पर्शे, मृश–आमर्षणे, दन्श–दशने एभ्य परस्य असार्वधातुकस्य इडागमोन भवति। रेष्टा, रोष्टा, क्रोष्टा, वेष्टा, लेष्टा, देष्टा, द्रष्टा, सृजिदृशोरकारः। स्रष्टा, स्पर्ष्टा। वक्तव्याद्वा अकारागमः एवं स्रष्टा सर्ष्टा, देष्टा। सर्वत्र छसोश्चेति षः।

- **त्विषि पुष्यति, कृषि, श्लिषि, द्विषि, पिषि विषि शिषि शुषि तुसि दुषेष्षात् ३/७/२८**

त्विष् दीप्तौ, पुष–पुष्टौ, यन्, कृष–विलेखने, श्लिष–आलिङ्गने, द्विष–अप्रीतौ, पिष्लृ–संचूरणे, विष्लृ–व्याप्तौ, शिष्लृ–विश्लेषणे, शुष शोषणे, तुष–प्रीतौ, दुषवैकृत्ये, एभ्यः परस्य असार्वधातुकस्य इडागमो न भवति।

द्वेष्टा, पोष्टा, क्रष्टा, कर्ष्टा, श्लेष्टा, देष्टा, पेष्टा, वेष्टा, शेष्टा, शोष्टा, तोष्टा, दोष्टा। पुष्यतीति निर्देशेन भौवादिकक्रैयादिकयोः प्राप्त्योर्निवृत्त्यर्थः। पोषिता।

● वसतिः घसेस्सात् ३/७/२६

वस–निवासे, घसिस्सौत्रः आदेशश्च आभ्यां परस्यासार्वधातुकस्य इडागमो न भवति । वस्ता, घस्ता, जिघत्सति। वसतीति निर्देशात् वस आच्छादने इत्येतस्य आदादिकस्य न भवति।

● दहि दिहि दुहि मिहि रुहि लिहि नहि वहेर्हात् ३/७/३०

दह–भस्मीकरणे, दिह–उपचये, दुह–प्रपूरणे, मिह–सेचने, रूह–वीज जन्मनि, लिह–आस्वादने, णह–बन्धने, वह–प्रापणे, एभ्यः परस्यासार्वधातुकस्य इडागमो न भवति। दग्धा, दिग्धा, मेढा, रोढा, लेढा, नद्धा, वोढा। दहि दिहि दुहां दादेर्घः, अन्येषां होढः। नहेर्धः इति धः। वहेः सहिवहोरात्वम्, मुह वैचित्ये इत्ययं रुधादित्वाद्वेट्। सहितपि नित्यं सेट्।

● ग्रह गुहोस्सनि ३/७/३१

ग्रह–उपादाने, गूहू–संवरणे, इत्येतयोस्सनिपरे इडागमो न भवति। जिघृक्षति, जुघुक्षति। ग्रहिस्वपिप्रच्छां सनीति सम्प्र, होढः, तृतीयादेर्घढधभान्तस्येति गस्यः घः। षढोः कस्स इति कः सनीति किम्? ग्रहीता, गूहिता।

● उवर्णगुपादिभ्यश्च ३/७/३२

उवर्णन्तादगुपादिभ्यश्च सौत्रेभ्यः, गण–गणने, तिज–निशाने, कित–निवासे मानवधदानशान इत्येतेभ्यः परस्मिन् सनि इडागमो न भवति। उवर्णग्रहणेन उवर्णान्ताच्च गृह्यन्ते। उकारान्तास्तु–युरुणुक्षुस्नुक्ष्णु ल्वः। युयूषति, रूरूषति, नुणूषति, क्षुक्षूषति, सुस्णूषति, शुक्ष्णूषति, लुलूषति। स्वरान्तानां सनीति दीर्घः, दीदांसति, मामांसति। गुप्तिज्किद्भ्यस्सनिमान्वधादिति सन्, द्विर्व, एत्वे, अभ्यासस्य ह्रस्वे इत्वे च कृते दीर्घश्चाभ्यासस्येति दीर्घः। बधे तृतीयादेर्घढधभेति दस्य तः।

• भुवस्सिज्लुकि ३/७/३३

भुवः परस्यासार्वधातुकस्य सिचो लुकि सति इडागमो न भवति, अभूत्, इण्स्थादेति सिचोलुक्। सिज्लुकीति किम्? व्यत्यभविष्ट।

• कृसृभृवृस्तु द्रु स्रु श्रुव एव परोक्षायाम् ३/७/३४

डुकृञ् करणे, सृ गतौ, वृ इति वृङ्वृञौ, ष्टूञ् स्तुतौ, द्रु गतौ, स्रु गतौ एभ्यः परस्यासार्वधातुकस्य इडागमो न भवति, चकृव, चकृम, ससृव, ससृम, ववृवहे, ववृमहे, तुष्टुव, तुष्टुम, दुद्रुव, दुद्रुम, सुस्रुव, सुस्रुम, शुश्रुव, शुश्रुम। क्र्यादीनां प्रतिषेधे सिद्धे योगारम्भः नियमार्थः, क्र्यादीनामेव परोक्षायामनिटः। तेनान्येषां प्रतिषिद्धेऽनिटामपि परोक्षायामिडागमः। पेचिव, पेचिम,। अस्यैक व्यञ्जनमध्ये एत्वाभ्यासलोपौ, नञानिर्दिष्टमनित्यम्, तेन वृञः थलि प्रतिषेधो न भवति। ववरिम।

• थल्यृकारात् ३/७/३५

ऋकारान्तात् थलिपरे इडागमो न भवति, पूर्वेण नियमेन प्राप्तः। दध्वर्थ, जहर्थ, ध्वृ हूर्च्छने, हृञ् हरणे। श्वस्तन्यां नित्यानिट्। "उपदेशेऽकारवतोधातोस्थलि इड्वा वक्तव्यः।" उपदेशः–सूत्रपाठः धातुपाठश्च। पपक्थ, पेचिथ श्वस्तन्यां नित्यानिट् इति किम्? जिघसि, घसेर्वापरोक्षायामिति घस्लृ, श्वस्तन्यां घसेरसेट्त्वान्नित्यानिट्त्वस्यादेशो नास्ति। नित्यग्रहणं किम्? आनञ्जिथ। अञ्जू व्यतिम्रक्षण, द्विर्व, अस्यादेस्सर्वत्रेति दीर्घः। तस्मान्नागमेति नागमः अञ्जेर्सेट्त्वात्पाक्षिकोऽनिट्त्वमस्तीति विकल्पस्स्यात्। नित्यग्रहणात् तु न भवति। उपदेश इति किम्? चकर्षिथ, कृष विलेखने। कृते गुणे भवत्यकारवान् न तूपदेशे। तथा स्वरान्तस्य सृजिदृशोश्चयथा। ययाथ, ययिथ। सस्रष्ठ, ससर्जिथ दद्रष्ठ, ददर्शिथ। सृजिदृशोरकारागमः, छशोश्चेति षत्वम्। अद्यन्ति। व्येञां थलि नित्यमिष्यते। अदेरिकारानुबन्धत्वाद्विकल्पः प्राप्तः। व्येञोऽपि। स्वरान्तत्वात् अर्तेस्तु निषेधः प्राप्तः। आदिथ, आदेस्थल्, आदित्थ। द्विर्व, अस्यादेस्सर्वत्रेति दीर्घः। अर्ति, आरिथ। ऋधातोः थल्, द्विर्व, पूर्ववद् दीर्घः, इण्, गुण, व्येञ् सं, विव्ययिथ, परोक्षायामभ्यासस्येति सम्प्रसारणम्।

● कृञोऽसुटः ३/७/३६

अविद्यमानस्सुटः यस्येति विग्रहः। परोक्षायामिति वर्तते, असुटस्सुडागमरहितस्य कृञः परोक्षायामिडागमो न भवति। चकृव, चकृम चकर्थ, असुट इति किम्? संचस्करिव, संचस्करिम, संस्चस्करिथ, डुकृञ् क, संपूर्वः, सुट् संपर्युवेभ्य इति सुट्, द्विर्व, शिट्परोऽघोषः, ऋतश्चसंयोगादेरिति गुणः।

● सुट्सम्पर्युपेभ्यः करोतौ भूषणे समवाये च ३/७/३७

सम्, परि, उप इत्येतेभ्यः परस्मिन् करोतौ सुडागमो भवति भूषणे, समवाये चार्थे, अयुत सिद्धानामाधाराधेय भूतानां यस्सम्यगुक्तः इह प्रत्यय हेतुस्स समवायः, टकारः पूर्वाचार्य प्रसिद्धया आदेशः सकारागमार्थः उकारः उच्चारणार्थः। संस्कर्ता, परिस्कर्ता, उपस्कर्तुम्, संस्कर्तव्यम् सुट्संपर्युपेभ्य इति किम्? प्रकरोति, करोताविति किम्? सम्भवति। भूषणसमवाययोरिति किम्? संकर्ता, परिकर्ता, उपकर्ता।

भट्टोग्रभूति कृतायां शिष्यहितायां वृत्तौ आख्यातप्रकरणे इडागम पादस्सप्तमः।

आख्यातप्रकरणे अष्टमः पादः

• पदान्ते घुटां प्रथमः ३/८/१

पदान्तवृत्तीनां घुटां प्रथमो भवति। त्वत्नयनम्, त्वन्नयनम्। अर्थ भुत्नाथः अर्थभुन्नाथः, ह चतुर्थान्तस्येति धस्य तः अनेन प्रथमः पञ्चमेपञ्चमानिति तस्य नः। पदान्त इति किम्? वेदिम, वा विराम इति, अथ अभ्यासस्य को विशेषः? उच्यते– यत्र परवर्णानुपलब्धिस्स तस्य विषयः यत्र तु परभूतं किञ्चिन्मा स्युः।

• र सकारयोर्विसृष्टः ३/८/२

पदान्त इत्येव। पदस्यान्तर्भूतयोः रेफसकारयोः विसृष्टो भवति। अविभः, डु भृञ् धा, ह्यस्त, दि, जुहोत्यादेश्चेति लुक्। जुहोत्यादीनामिति द्विर्व, भृञ् हाङ्माङामित् इतीत्वम् स्वरः, व्यञ्जनादिदश्योरिति दि लोपः, पचावः, पचामः, अस्य वमोर्दीर्घः। सिद्धेसत्यारम्भो नियमार्थः, धातुविषये पदान्त एव विसृष्टो यथा स्यात्, इह मा भूत्–बिभर्ति, आस्महे, करोति।

• घ ढ ध भेभ्यस्तथोर्धोऽधः ३/८/३

घ ढ ध भेभ्यस्तथयोः परयोः धत्वं भवति अधः, धाञः परे तु न भवति। अघोषेष्वशिटां प्रथम इति घ ढ ध भानां प्रथमः प्राप्तः, घः। अदुग्ध, अदुग्धाः, दुह् प्रपूरणे, त, थास्, सणो वक्तव्याच्च दादेर्धः, अनेन तथयोः धः, धुटां तृतीय इति घस्य गः। अलीढ, अलीढाः, लिह आस्वादने, होढः। अबुद्ध, अबुद्धाः, बुध अवगमने, धुटश्च धुटीति, सिज्लोपः। अलब्ध, अलब्धाः, डुलभष्, पूर्ववत्, सिज्लोपः। तथोरिति किम्? अधुक्षाताम्, दुह प्रपूरणे, आताम्, सण, दादेर्धः तृतीयादेर्घढधभान्तस्येति दस्य धः, सणो लोपस्स्वरे बहुत्वे इति सणः अकार लोपः। षढोकस्से इति घस्य कः! अध इति किम्? धत्तः, धत्थः, तथोश्च दधातेरित्यादेर्दकारस्य चतुर्थत्वं धकारे।

आख्यातप्रकरणे षष्ठः पादः

● अनिदनुबन्धानामगुणेऽनुषङ्गलोपः ३/६/१

इत् अनुबन्धो येषां ते इदनुबन्धाः, ततो नञ् समासः, अनिदनुबन्धानां धातूनां येषामिकारानुबन्धो नास्ति तेषामनुषङ्ग लोपो भवति अगुणे प्रत्यये परे, स्रस्यते, ध्वस्यते, भ्रश्यते। स्रन्सु ध्वन्सु भ्रन्सु अवस्रंसने। सार्वधातुके यण्, अनेन अनुषङ्गलोपः, सनीस्रस्यते, दनीध्वस्यते, भनीभ्रश्यते। अत्यर्थम् स्रंसते, ध्वंसते, भ्रंशते, यशब्दः, अनुषङ्गलोपः, द्विर्व, वन्चिस्रन्सिध्वन्सीतिनीरागमः, सर्वत्र नणकारेत्यगुणत्वम्। स्रस्तः, ध्वस्तः, भ्रष्टः। निष्ठेति क्तः, यण्वद्भावानाम् अगुणत्वम्। छशोश्चेति षः, अनिदनुबन्धानामिति किम्? वन्द्यते। वदि अभिवादन स्तुत्योः। इकारो नकारागमार्थः। अनिदनुबन्धानामिति प्रतिषेधकरणसामर्थ्यात् नकारागमः। अगुण इति किम्? स्रंसिता नन्वयमप्यगुणः, कुटादीनामस्मिन्परे गुणनिषेधस्य दृष्टत्वात् यणादयोऽपि अगुणत्वेन प्रसिद्धाः। तेऽपि क्वचिद् दृश्यन्ते गुणिनः जागर्यते इत्यादौ, इति सङ्कीर्णोऽयं गुणागुण व्यवहारः। तत्कथं व्यवस्थेयम्? उच्यते– प्रकृतिविशेषमनुपादाय यत्र प्रत्यये निषिध्यते गुणस्सः सामान्येन अगुणः, यथा, यणादि। यत्र तु उपादाय प्रकृतिं गुणनिषेधः स न अगुणः। लक्ष्यानुरोधाच्च समाश्रितो विशेषः। यस्त्वयं प्रमादादगुणः स गुणेन प्रमादादिकत्वम्। एवं न प्रसिद्धमिह सगुणत्वमगुणत्वं वा प्रत्ययस्य भिनत्ति। दन्भेः अनिटि सनि परे अनुषङ्गलोप इष्यते। धिप्सते, दन्भु दन्भेः, सन्, सन्ययं वेट् तृतीयादेर्घढधभेति दस्य धः, दम्भेरिच्चेति इत्वम्। अभ्यासलोपः। अघोषेष्वशिटामिति भस्य पः। अनिटीति किम्? दिदन्भिषति।

● न शब्दाच्च विकरणात् ३/६/२

अनिदनुबन्धानामगुणेति निवृत्तम्। न शब्दाद् विकरणात् परस्य अनुषङ्गस्य लोपो भवति। हिंस्ति हिंस्तः हिंसन्ति। तृहि हिसि हिंसायाम्, इकारो नकारागमार्थः। अनिदनुबन्धेति ज्ञापकात् नागमः। स्वराद्रुधादेरिति न शब्दः। रूधादेर्विकरणान्तलोपः। अनेन अनुषङ्गलोपः अनुस्वारः,

• षढोःकस्से ३/८/४

षकार ढकारयोः कत्वं भवति से सकारे परे, पेक्ष्यति, लेक्ष्यति, अपेक्ष्यत्, अलेक्ष्यत्, पिपिक्षति, लिलिक्षति। पिष्लृ संञ्चूर्णने, लिह् आस्वादने। लेढुमिच्छति, सण्, लिहे होढः, अनेन षढोः कः, षढोरिति किम्? लप्स्यति। डुलभष् प्राप्तौ, स इति किम्? पिनद्धि, स्वराद्रुधादेरिति न शब्दः, लेढि।

• तवर्गस्य षटवर्गाट्टवर्गः ३/८/५

षात् टवर्गाच्च परस्य तवर्गस्य टवर्गो भवति, षात्–पेष्टा वेष्टा, पिश्लृ सञ्चूर्णने, विश प्रवेशने, श्वस्तनी ता, छशोश्चेति षः, अनेन टः, टवर्गात् ईट्टे, ईड् स्तुतौ, अघोषेष्वशिटामिति डस्य टः, लेढि, लीढः ,लिह आस्वादने, होढः, तवर्गस्येति किम्? द्वेष्टि, षटवर्गादिति किम्? वेत्ति। टवर्गात्परस्य तवर्गस्य टवर्गे सिद्धे पुनर्विधानं वैचित्र्यार्थम्। तवर्गस्य षटवर्ग इति तु सूत्रं कर्तव्यम्।

• ढे ढलोपोदीर्घश्चोपधायाः ३/८/६

ढकारे परे ढकारस्य लोपो भवति, उपधायाश्च दीर्घः। लीढः, लीढवान्, गूढः गूढवान्। लिह् आस्वादने, गुह संवरणे, निष्ठेतिक्तः। छशोश्चेति, ढत्वादिषु कृतेषु ढे ढलोपो दीर्घश्च। एवम् अलीढ, अलीढत्। ढे इति किम्? आलिक्ष्यत्, लिह आस्वादने, दि, सन्, होढः, षढोः कः, उपधाग्रहणमाङ्पूर्वकस्यास्य विधेरनित्यत्वार्थम्। तेन ऋकारस्य दीर्घो न भवति, वृढः, वृहू उद्यमने।

• सहिवहोरोदवर्णस्य ३/८/७

ढलोपग्रहणमिहार्थवशात् सप्तम्यन्तं विज्ञायते, सहिवहोः ढलोपेसति अवर्णस्य ओकारो भवति, दीर्घापवादः, सोढा, वोढा, षह मर्षणे, वह प्रापणे, उत्पूर्वः, अद्यतनी, धुटश्च धुटीति सिज्लोपः, अस्य च दीर्घः, होढः, आकारस्य ओत्वम्, अवर्णस्येति किम्? ऊढः, वह प्रापणे, निष्ठेतिक्तः, स्वपिवचीति सम्प्रसारणम्, होढः। ढ लोप इति किम् ? सहते।

• धुटां तृतीयश्चतुर्थे ३/८/८

धुटां तृतीयो भवति चतुर्थे परे। अदुग्ध, अवुद्ध। चकाद्धि, चकासृ दीप्तौ, पञ्चमी, हि, हु धुड्भ्यां हेर्धिः, अनेन सस्य दः पुनर्वचनं धातुविषये चतुर्थ एव तृतीयो यथास्यादिति नियमार्थम्, तेनेह न भवति शक्यते।

• अघोषेष्वशिटां प्रथमः ३/८/६

धुटामित्येव। अशिटां शिड्वर्जितानां धुटां प्रथमो भवति अघोषेषु परेषु, भेत्ता, च्छेत्ता, बिभित्सति, चिच्छित्सति, अशिटामिति किम्? अस्ति।

• अस्य वमोर्दीर्घः ३/८/१०

अकारस्य वमोः परयोः दीर्घो भवति पचामि, पचामः, दीव्यामि, दीव्यावः, अस्येति किम्? ददवः, ददमः, डु दाञ् दाने, वस, मस, जुहोत्यादेश्चेति लुक्, जुहोत्यादीनामिति द्विर्व, अभ्यस्तानाम् आकारस्येत्यालोपः, यद्यत्र दीर्घो स्यात् आलोपो न भवेत. आदिति कर्तव्ये दीर्घग्रहणमुत्तरार्थम्।

• स्वरान्तानां सनि ३/८/११

स्वरान्तानां धातूनां सनि परे। दिदीषति, जुहूषति, चिकीर्षति। स्वरान्तानामिति किम्? पिपत्सति, सनीति किम्? धिनोति।

• हनिगमिङोरूपधायाः ३/८/१२

गमः इट्, हन्तेर्धातोः सनि इणिङोर्गमिरिति इङः स्थाने यो गम् तयोरूपधायास्सनि परे दीर्घो भवति। जिघांसति, अभ्यासाच्चेति घः, अनेन दीर्घः। अधिजिगांसते, इङ् अध्ययने, अधिपूर्वः, सनीणिङोर्गमिरिति गमिः, अनेनदीर्घः। इङ् ग्रहणं किम्? जिगमिषति। से गमः परस्मा इति इट् उपधाया एव दीर्धः सम्भवतीत्युपधाग्रहणं विशेषान्तानां सूचनार्थम्, तेन तनोतेरनिटि सनि दीर्घो वा भवति। तितांसति, तितंसति। तनोतेस्सनीड्विकल्पस्स्मर्यते, सेटि तु न सनि भवति। तितनिषति।

• नामिनोर्वोरकुर्च्छुरोर्व्यञ्जने ३/८/१३

व्यञ्जने परे यो रेफ कवारौ तयोः परयोः नामिनो दीर्घो भवति अकुरच्छुरोः कुरच्छुरावित्येतौ वर्जयित्वा। विगीर्यते, अवगूर्यते, आपूर्यते। गृ हिंसायाम् गुर्वी उद्यमने, पृ पालन पूरणयोः, यण्, ऋदन्तस्येर्, उरोष्ठ्योपधस्येत्युर्। अनेन दीर्घः। विशीर्यति, अवगूर्यात्, दीव्यति,सेव्यति, दिवादेर्यन्, एवं हूर्च्छिता, हूर्च्छ कौटिल्ये। नामिन इति किम्? स्मर्ता, गुणोऽर्तिसंयोगाद्योरिति गुणः, अकुरच्छुरोरिति किम्? कुर्यात्, डुकृञ् करणे, यास्, सिद्धः, करोतेरिति गुणाभावः, अस्योकारस्येत्युञ्, सप्तम्यां ये चेत्युकार लोपः, च्छुर्यात् च्छुरश्छेदने, आशीः त, कुर ग्रहणे कुरोग्रहणम्, न तु कुरु शब्द इत्यस्य। कुरीति इकारेण निर्देशकरणात्। ननु कुर्यादित्यत्र स्थान्यादेशपरिभाषया उकारलोपस्य स्थानिवद्भावात् द्विर्वचने परे रेफो नास्तीति प्राप्त्यभावादनर्थकः करोतेः प्रतिषेधः, अस्त्येतत्, दीर्घविधिं प्रति न स्थानिवदिति वचनात्। व्यञ्जन इति किम्? किरति, नुवति, कृ विक्षेपे, णु स्तवे, अन्वि, ऋदन्तस्येर्, स्वरादाविवर्णेति उव्।

• सस्यह्यस्तन्यां दौ तः ३/८/१४

ह्यस्तन्यां यो दि तस्मिन्परे सकारस्य तत्वं भवति, अचकात्, अन्वशात्। चकासृ दीप्तौ, शासु अनुशिष्टौ, अनुपूर्वः, ह्यस्तनी दि, व्यञ्जनादिदश्योरिति दि लोपः, अनेन सस्य तः, सस्येति सिज्लोपः, दुह प्रपूरणे, दादेर्धः, लोपे च दिश्योरिति दस्यधः, ह्यस्तन्यामिति किम्? अचकाशीत्, दि, सिच्, इट्, ईट्। साविति किम्? अचकास्ताम्, ह्यस्तन्यां सौ परे सस्य तत्वम् वा वक्तव्यम्। अचकात्त्वम्, अचकास्त्वम्, ह्यस्तनी, दि, सिच्, पूर्ववत् सिज्लोपः, वक्तव्यात् सस्य तत्वम्, ह्यस्तन्यां भिदेः सौ परे दस्य नत्वं वा वक्तव्यम्। अभिनत्त्वम्, अभिनस्त्वम्, अरूणत्त्वम्, अरूणस्त्वम्। भिदिर् विदारणे, रूधिर्, आवरणे, सि, स्वराद्रुधादेरिति न शब्दः। पूर्ववत् सिज्लोपः, वक्तव्याद्धेर्वा नत्वम्।

• अद्धात्वादिर्ह्यस्तन्यद्यतनी क्रियातिपत्तिषु ३/८/१५

धातोरादिरकारागमो भवति, ह्यस्तन्यद्यतनी क्रियातिपत्तिषु परे। अयजत् अपचत्, अयाक्षीत्, अपाक्षीत्, अस्य च दीर्घ इति दीर्घः।

भृजादीनां षः, अकरिष्यत्, अहरिष्यत्, हनृदन्तात्स्य इति इट्, धातुग्रहण ह्यस्तन्यादीनामागमत्व निवृत्त्यर्थम्।

स्वरादीनांवृद्धिरादेः ३/८/१६

स्वरादीनां धातूनामादिर्वृद्धिर्भवति ह्यस्तन्यादिषु परतः, अकारस्य बाधः। ऐक्षत, औहत, ईक्ष दर्शने, ऊह तर्के, ह्यस्तनी, स, वृद्धिः। ऐक्षिष्ट, औहिष्ठ। सिच्, इट्। ऐक्षिष्यत, औहिष्यत्।

अवर्णस्याकारः ३/८/१७

आदिरित्येव, आदेरवर्णस्याकारादेशो भवति ह्यस्तन्यादिषु परतः, आट, आटीत्, आटिष्यत्। अट पट् गतौ, अनेन आकारः। आप्नोत्, आप्लृ व्याप्तौ, नुस्स्वादेः, अकारस्याकारः आपत्, पुषादि सूत्रेणाण्, आप्स्यत्। ननु पूर्वेण अवर्णस्याकारो भविष्यतीति किं योगारम्भेण? सत्यम्। अवर्णः सर्वमुखस्थानमित्यत्र सर्वावर्णवर्णस्य वृद्ध्यादेः आकार एव यथा स्यात्, ऐ औ इत्येतौ मा भूताम् इति सार्थको योगारम्भः।

अस्तेः ३/८/१८

अस् भुवीत्यस्य यः अवर्णस्तस्य आकारादेशो भवति ह्यस्तन्यां परतः, अद्यतनी क्रियातिपत्ती तु नानुवर्तेते, तयोः परयोः त्वादेशे कृते अवर्णाभावाद् अस्तेरादेरिति लोपः प्राप्तः। आस्ताम्, आसम्। ह्यस्तनी ताम्, अन्, अनेन आकारः।

एतेर्ये ३/८/१६

आदिग्रहणमनुवर्तते, इण् गतावित्यस्य यो यकारस्तस्मिन् ये, आदिराकारागमो भवति। आयन्, इण् ग, ह्यस्तनी अन्, इणश्चेति यत्वम्, आकारागमः। य इति किम्? अगात्, इण्स्थादेरिति सिचो लुक्, इणो गा इति गादेशः।

● न मा मास्म योगे ३/८/२०

मा शब्देन मास्म शब्देन योगे सति अकारागमादयो न भवन्ति मा भवान् पाक्षीत्, मा स्म पाक्षीत्, अस्य च दीर्घः, मास्म मोक्षीत्। वृद्धिस्तु न भवति। एवं मा भवानटीदित्याद्युदाहार्यम्। मास्म अटम्, मास्म यम्, मास्म शब्देन साहचर्यात् माशब्दो निपातो गृह्यते, न तु त्वा मा इति द्वितीयायामित्ययम्। तेनेह प्रतिषेधो न भवति मा भवानपश्यत्, मां शब्दस्य त्वा मा इति मा आदेशः, अपश्यदिति दृशेः पश्यः।

● नाम्यन्ताद्धातोराशीरद्यतनी परोक्षासु धो ढः ३/८/२१

नाम्यन्ताद्धातोः परासु आशीरद्यतनीपरोक्षासु यो धकारस्तस्य ढत्वं भवति। चेषीढ्वम्, स्तोषीढ्वम्, कृषीढ्वम्। ऋदन्तानाञ्चेति धातोर्गुणा–भावः। अद्यतन्याम् अचेढ्वम्, अस्तोढ्वम् अकृढ्वम्। सिचो धकार इति सिचो लुक्, परोक्षायाम्, चिच्यिढ्वे, तुष्टुढ्वे, चकृढ्वे कृ सृ भृ वृ इति नियमात् धार्तोरिट्, य इवर्णस्येति यः। नाम्यन्तानामिति किम्? पक्षीढ्वम्, डुपचष् पा, आशीरद्यतनी परोक्षास्विति किम्? स्तुध्वे, वर्तध्वे। इटः परस्य धकारस्य आशीरद्यनीपरोक्षास्थितस्य ढत्वं वा वक्तव्यम्, लविषीढ्वम्, लविषीध्वम्, अलाविढ्वम्, अलाविध्वम्। सिचो धकारस्येति सिचो लोपः, लुलविढ्वे, लुलविध्वे, स्वरादाविवर्णेत्युव्।

● मर्जो मार्जिः ३/८/२२

मृजूष् शुद्धावित्यस्य गुणे धातोर्यन्मार्ज इति रूपम्, तस्य मार्जिरित्यादेशो भवति, मार्ष्टा, मार्क्ष्यति, मृजूष् शुद्धौ, स्यति, गुणः, अनेन मर्जो मार्जिः, भृजादीना षः, षढोकः। मर्ज इति किम्? मृष्टः, वर्त, तस्। स्वरादावगुणे मृजः मार्जिरादेशो वा वक्तव्यः। परिमार्जति, परिमृजति।

● धात्वादेष्षस्सः ३/८/२३

धातोर्य आदिष्षकारस्तस्य सत्वं भवति। सहते, सह म। सिञ्चति, षिच् क्ष, स्वरादेरागमो नकारः। धातोरिति किम्? षड्भिः। आदेरिति किम्? लषिता, लष कान्तौ। नामधातोः ष्वष्केश्च नेष्यते। षोडीयति। षोडशब्दाद् यिन्, ष्वष्कते, ष्वष्क गत्यर्थः। ष्ठिवु क्लमुचमामनीति दीर्घः, ष्ठिवः षकारात्परः

ठकारो थकारो वेत्याहुः चेक्रीयिते परे। यदा ठकारः तदा टेष्ठीव्यते। यदा थकारः तदा तेष्ठीव्यते, य शब्दः, नामिनोर्वोरिति दीर्घः, द्विर्वचनम्, द्वितीयचतुर्थेति ठस्य टः, थस्य तः। अथ सर्वे धातवः सकारादयः कस्मान्न पठ्यन्ते? नैवं शक्यम्। प्रत्यय विकारागमस्थ इति वचनात्। यद् विकार–सकारस्य षत्वं विधीयते तन्न स्यात्, विकार सकारस्य अभावात्, तेन निषेधः।

• णोनः ३/८/२४

धात्वादेरित्येव। धातोरादि णकारस्य नत्वं भवति। नमति, णम प्रह्वे नयत्ति, णीञ् प्रापणे, धात्वादेरिति किम्? भणति। भण शब्दे। नाम धातोः नेष्यते। णकारीयति।

• निमित्तात्प्रत्ययविकारागमस्थास्सिष्षत्वम् ३/८/२५

प्रत्ययविकारागमेषु तिष्ठतीति। नाम्निस्थाश्चेति तस्य निमित्तं कारणं हेतुः इत्यर्थः, निमित्तात् नामिकरात् परस्सकारः प्रत्ययस्थः विकारस्थः, आगमस्थः षत्वमापद्यते। नामिनः तावत् – चिचीषति, जुहूषति, स्वरान्तानां सनीति दीर्घः। कात्– शक्ष्यति, रात्–चिकीर्षति। विकारसकारः–सिषेच, सुष्वाप। षिच् क्षरणे–ञिष्वप, शयने, अण् परोक्षायां सत्यामस्येति सम्प्र, आगमसकारः, परिष्वप्ता, सुट्संपर्युवेभ्यः इति सुट्। निमित्तादिति किम्? दास्यति। प्रत्यय विकारागमस्थ इति किम्? समिस्यते। स्यमु, स्वन, सुन शब्दे, यशब्दः, स्वपिस्यमि व्येञां चेक्रीयित इति सम्प्र, सिद्धे षत्वे पुनर्वचनमुत्तरार्थम्। निमित्तात् शासिवसिघसीनां सिष्षत्वम् इत्येको योगो न कृतः वैचित्र्यार्थम्।

• शासिवसिघसीनाञ्च ३/८/२६

शासु अनुशिष्टौ, वस निवासे, वा परोक्षायामिति अदेर्यः घसिरादेशः एषां निमित्तात्परस्सकारः षत्वमापद्यते। अप्रत्ययविकारागमार्थम् वचनम्। शिष्यते, शासेरिदुपधायाः इति इत्वम्, अनेन षः। शिष्टः, शिष्टवान्, निष्ठेति क्तक्तवतू। उस्यते, वस निवासे, स्वपिवचीति सम्प्र, उषितः, उषितवान्, गत्यर्थाकर्मकेति क्तः, निष्ठेति क्तक्तवतू, पूर्ववत् सम्प्र, निष्ठायाञ्चेति इट्, जक्षतुः जक्षुः। वा परोक्षायामिति अदेर्घस्लृ आदेशः,

लृकारः पुषाद्यर्थः, गमहनेत्युपधा लोपः, अघोषेष्वशिटामिति घस्य कः, षत्वम्।

• स्तौतीन्नन्तयोरेव षणि ३/८/२७

स्तौतीत्युकारस्य वृद्धिः, व्यञ्जनादाविति वृद्धिः, षणीति, कृत षत्वस्सन्निर्दिश्यते, स्तौतेरिन्नन्तानाञ्च सकारः षत्वमापद्यते षणि परे, तुष्टूषति, सुष्वापयिषति, सिषेचयिषति, ष्टूञ् स्तुतौ, ञिष्वप् शयने, षिच् क्षरणे। स्वपन्तं प्रयोक्तुमिच्छति, एवं सिञ्चन्तम्। इन्, सन्, इट्, गुणः, द्युतिस्वाप्योरभ्यासस्येति सम्प्र, पुनरारम्भो नियमार्थः, षणि कृतषत्वे स्तौतीन्नन्तयोरेव षत्वम्, नान्यस्य, तेनेह न भवति, सुसूषति, षुञ् अभिषवे षणीति किम् तिष्ठासति, सनः अत्र षत्वं नास्तीति धातोः षत्वं न विहन्यते। ष्विदि, स्विदि सुहीनामिन्नन्तानां षणि षत्वं नेष्यते। सिस्वेदयिषति, सिस्वादयिषति, सिसाहयिषति। ष्विदा क्षरणे, ष्वद आस्वादने, सह मर्षणे, स्विद्यन्तं प्रयोक्तुमिच्छति, एवं स्वदमानं सहमानमिति।

• लुग्लोपे न प्रत्ययकृतम् ३/८/२८

लुका लोपः लुग्लोपः, प्रत्ययेन कृतं प्रत्ययकृतम्, लुक् शब्दोच्चारणेन यत्र लोपः, तत्र प्रत्ययकृतं प्राप्तम्। यत् तत् प्रकृतेर्न भवति प्रत्यय लक्षणेन प्राप्तः। अङ्गाः, अणः भढानां बहुत्व इति लुक्। अत्र वृद्धिरादौ सनीति वृद्धिः प्राप्ता, दुग्धः दुहन्ति, दुह प्र, तस् अन्ति, अन्वि अदादेर्लुक्, अत्र अनि च विकरण इति गुणः प्राप्तः, दादेर्घः।

• स्वरविधिस्स्वरे द्विर्वचननिमित्तेकृते द्विर्वचने ३/८/२९

स्वरस्यविधिः स्वर विधिः, द्विर्वचनस्य निमित्तं द्विर्वचननिमित्तम्, स्वरादौ प्रत्यये द्विर्वचननिमित्ते, पूर्वम् द्विर्वचने कृते सति पश्चात् स्वरस्य विधिः कार्यः भवति। पपतुः, पप्तुः, जग्मतुः, जग्मुः। पा पाने, गम्लृ गतौ, परत्वादत्रालोपोपधालोपौ स्याताम्, ततश्च नभवेद् द्विर्वचनम् एकस्वरा भावात्। अनेन तु पूर्वम् द्विर्वचनम् ततः स्वरविधिः, आलोपो सार्वधातुके तस्य लोपः गमहनेत्युपधालोपः, आटिटत्, आशिशत्, अट पट गतौ, अश भोजने। अटितवन्तं प्रयुङ्क्तवान् एवमशितवन्तम्। इन्, दीर्घादिः चण्,

परत्वात् कारितलोपः स्यात्। अनेन तु द्विर्वचनम्। स्वर विधिरिति किम्? आपिप्यत्, प्यायीपी, ओप्यायी वृद्धौ, परोक्षा, ए, अत्र परत्वात् प्यायः पी परोक्षायामिति पीरादेशः। ततो द्विर्वचनम्। स्वर इति किम्? जेघ्रीयते, घ्रा गन्धोपादाने य शब्दः, इरूरोरीरितीत्वम्, ततः द्विर्वचनम्। द्विर्वचन निमित्तमिति किम्? दुद्यूषति, दिवु क्रीडायाम्, सन्, च्छोश्शूटौ, पञ्चमे चेति वकारस्य ऊट्। अत्र तूकारस्स्वरः द्विर्वचननिमित्तम्, तेन पूर्वम् स्वरविधिः, यत्वम्, ततः द्विर्वचनम्। कृतग्रहणं क्वचित् स्वरविधेः पूर्वम् प्रवृत्त्यर्थम्। तेन अरिरिषति इत्यत्र द्विर्वचनात्पूर्वम् सिद्धो गुणः। ननु इटं विना अटि द्विर्वचनस्य दर्शनात् कथमिह इटः द्विर्वचनम् निमित्तंस्यात् ? अस्त्येतत्– इटः नास्ति निमित्ताभावः किन्तु अत्र सति इडागमे सेट्कस्सन् स्वरादिः द्विर्वचनस्य निमित्तम्, इति इडागमः। पक्षे द्विर्वचनं स्यात्, यदि सेटस्तूभयावयवत्वे सति द्विर्वचननिमित्तं न भवेत्। ददिथ इत्यादि न सिध्येत् प्राक्द्विर्वचनात् आलोपस्य प्रवृत्तेः। तस्मात् अरिरिषति इत्यत्र पूर्वम् गुणः प्रवृत्त्यर्थम् कर्तव्यं गुणग्रहणम्। डु दाञ् दान, परोक्षा, से, क्रादिनियमादिट्, द्विर्वचनम्, इनि चेत्यालोपः।

• अनुबन्धोऽप्रयोगी ३/८/३०

यश्शब्दः अप्रयोगी, यस्य शब्दस्य प्रयोगो नास्तीति स अनुबन्ध–संज्ञो भवति, डुकृञ् डु शब्दः ञकारानुबन्धो पूर्वाचार्य संज्ञाअङ्गीकरणं कार्यार्थमुच्चारितस्य संज्ञाप्रवृत्त्यर्थम्, तेन स्वपिवच्यादीनामिकारस्य प्रयोगित्वे संज्ञा न भवति, यदि च भवेत् नकारागमस्स्यात्। संज्ञायाः क्व प्रयोजनम्? ट्वनुबन्धादथुरित्यादिषु। वेपथुः, टु वेपृ, टु शब्दः ट्वनुबन्धादथुरित्यर्थः।

• शिडिति शादयः ३/८/३१

शादयः शषसहाः, शिट्संज्ञाः भवन्ति, शिट्संज्ञायाः क्वप्रयोजनम्? सणनिटश्शिडन्तादित्यादिषु, अलिक्ष, लिह, आ, दि, सण्, होढः, षढो कः।

• सम्प्रसारणं य्वृतोऽन्तःस्थानिमित्ताः ३/८/३२

इश्चउश्च ऋतश्चते य्वृतः, इकार उकार ऋकाराः सम्प्रसारण–संज्ञाः भवन्ति। सम्प्रसारणसंज्ञायाः क्व प्रयोजनम्?

सपरस्वरायास्सम्प्रसारणान्तस्थाया इत्यादिषु इङ्यृते इष्यते। अन्तस्था-निमित्ता इति किम्? समस्थित, स्थादेरिदद्यतन्यामिति इत्वम्। ह्रस्वश्चानिटीति सिज्लोपः, अस्योकारस्य यदि संज्ञास्यात् तद्दीर्घमन्त्यमिति दीर्घो भवेत्, तर्हि किमित्वेन कृतं स्यादिति चेत्? सिज्लोपः ततस्तुदीर्घो भवेत्।

• अर्पूर्वेसन्ध्यक्षरे गुणः ३/८/३३

अर् इत्ययं शब्दः, पूर्वे च अरः ये सन्ध्यक्षरे अवर्ण इवर्णे ए, उवर्णे ओ इत्येतत्सूत्रविहिते तानि गुणसंज्ञानि भवन्ति। गुणसंज्ञायाः क्व प्रयोजनम्? नाम्यन्तयोः धातुविकरणयोर्गुण इत्यादिषु। कर्ता, चेता, स्तोता।

• आरुत्तरे च वृद्धिः ३/८/३४

आर् इत्ययं शब्दः, उत्तरे च ये सन्ध्यक्षरे वर्णपाठापेक्षया ए ओ इत्येताभ्यां परे ऐ औ इत्येतानि वृद्धिसंज्ञानि भवन्ति। वृद्धिसंज्ञायाः क्व प्रयोजनम्? अस्योपधाया दीर्घो वृद्धिरित्यादिषु। चकार, चिचाय, लुलाव, स्वरविधिस्स्वर इति वचनात् पूर्वम् द्विर्वचनम् ततोऽस्योपधाया इति वृद्धिः।

भट्टोग्रभूति कृतायां शिष्यहितायां वृत्तावाख्यातप्रकरणे अष्टमः पादः।।

इति आख्यातप्रकारणं समाप्तम्।।

अथ कृत्प्रकरणे प्रथमः पादः

• सिद्धिरिज्वदञ्णनुबन्धे ४/१/१

इचीवेज्वत्। ञ्च ण् चेति ञ्णौ, तावनुबन्धौ यस्य प्रत्ययस्येति। सिद्धः। जागुः कृत्यशन्तृङ्व्योरित्यतः कृतीत्यनुवर्तते। ञकारानुबन्धे णकारानुबन्धे च कृति प्रत्यये परे धातोरिज्वत्कार्यम् भवति। इचि यदुक्तं तञ्ञकारणकारानुबन्धेऽपि परे भवतीत्यर्थः। पाचः, पाचकः, डुपचष् पाके, पाचनमिति भावे घञ्। पचतीति। वुण्तृचाविति वुण्, ञकारणकारौ इहार्थौ घकारः चजोः कगावित्यर्थः। युवुझामिति वोः अकादेशः, चजोः कगाविति चस्य कः, यथा इचि परे अस्योपधेति दीर्घः उक्तस्तयोः तथात्रापि भवति। कारः, कारकः। डुकृञ् करणमिति भावे घञ्, करोतीति पूर्ववत् वुण्, अकादेश्च। इज्वद् भावादस्योपधेत्यादिना वृद्धिः। दायः, दायकः। डुदाञ् दाने, दानमिति। भावे घञ्, ददातीति वुण्, इज्वद्भावादायिरिच्या–दन्तानामिति आयिः। सिद्धिग्रहणं मङ्गलार्थम्। ग्रन्थादौ मङ्गलार्थमितिवा।

• हन्तेस्तः ४/१/२

ञ्णनुबन्ध इति। धातो हन्तेर्नकारस्य तत्वं भवति ञकारणकारानुबन्धे च, कृति परे। घातः, घातकः, हननमिति भावे घञ्, हन्तीतिवुण्, अस्योपधेति दीर्घः, हस्य हन्तेरिति हस्य घः, अनेन नस्य तः, कृतीति किम्? वृत्रघ्नः।

• न सेटोऽमन्तस्यावमिकमिचमाम् ४/१/३

सेटो धातोः अमन्तस्य ञ्णनुबन्धे कृति परे इज्वत्कार्यम् न भवति, अवमिकमिचमाम् वमिकमिचमां प्रतिषेधोन भवति। शमः, शमकः, तमः, तमकः, शम उपशमे, तमु कान्तौ, शमनम् तमनम्, भावे घञ्, शाम्यतीति, वुण्तृचाविति वुण्, अकादेशः, इज्वद्भावप्रतिषेधाद् दीर्घाभावः। एवं शमी तमी, शमनं शीलः, तमनं तीलः इति। शमादीनामष्टानामिति घिनिण्, णकार इज्वद्भावार्थः, इकार उच्चारणार्थः। घकारश्चजोः कगावित्यर्थः। यद्यप्येतेषु उदाहरणेषु इडागमो नास्ति, तथापि सेड्ग्रहणेनात्र सेटो धातव उपलक्ष्यन्ते। सेट इति किम्? यामः, यामकः। यमनं यच्छतीति विग्रहः।

यद्येवम्, कथमुद्यमः उपरमः, वचियमिरमीति सेटः। सत्यम्–अत्र यम उद्यमे, यम उपरमे, इति णकार वचनात् प्रतिषेधो ....भविष्यति। अमन्तस्येति किम्? पाठः, पाठकः। अवमिकमि चमामिति किम्? वामः, कामः कामकः, आचामः आचामकः। टुवमु, उद्गिरणे, कमु कान्तौ, चमेः आङ्पूर्वः, वमनम् कमनम् आचामनम्, इति भावे घञ्, वसति, कामयते, आचामतीति, वुण्, आङ् पूर्वस्यैव चमेर्ग्रहणं स्मरन्ति, तेनेह न भवति? उच्यते–नेदं भौवादिकस्य अमगतावित्यस्य रूपम्। किं तर्हि? अमरोग इत्यस्य चौरादिकस्य, स्वरादेश्चेतीन्, अस्योपधेति दीर्घः, ततस्स्वर वृदृगमिग्रहामित्यल्, कारित लोपः। कथम्–विश्रामः, श्रमु तपसि खेदे च, वि पूर्वः, घञ्। उच्यते–असाधुरेषः प्रयोगः, विश्रम इत्येव भाव्यम्।

• दीधीवेव्योश्च ४/१/४

नेत्येव, दीधीङ् दीप्ति देवनयोः, वेवीङ् वेतिना तुल्ये, इत्येतयो इज्वत्कार्यम् न भवति। आदीध्यः, आदीध्यकः, आवेव्यः आवेव्यकः, आदीध्यनम्, आवेव्यनम् इति भावे घञ्, आदीधीते, आवेवीत इति। वुण्, य इवर्णस्येति यः।

• सार्वधातुकवच्छे ४/१/५

अनुबन्ध इत्यत्रानुवर्तते, उत्तरसूत्रयोश्च शकारानुबन्धप्रत्यये परे सार्वधातुकवद्भावो भवति। सार्वधातुकपरे यदुक्तं तच्छकारानुबन्धे भवतीत्यर्थः। जुह्वत्, हु दानादानयोः, वर्तमान शन्तृङ् इति शन्तृङ्, ङकारो ङेन्नगुणइत्यर्थः। ऋकार उदृकारेत्यर्थः, शकार इहार्थः, सार्वधातुकवद्भावादन्विकरणः, जुहोत्यादेश्चेति लुक्, जुहोत्यादीनां द्विर्व, जुहोतेस्सार्वधातुक इति वत्वम्, लोपोऽभ्यस्तादन्तिनः इति न लोपः। पचन् पठन्, पूर्ववच्छन्तृङ्, अन्वि, असन्ध्यक्षरलोपः।

• ङे न गुणः ४/१/६

ङकारानुबन्ध प्रत्यये परे गुणो न भवति। विदन्, लिहन्, सुन्वन्.। विद ज्ञाने, लिह आस्वादने। षुञ् अभिषवे, पूर्ववत् शन्तृङ्, अन्वि, तस्य अदादेर्लुक्, नुस्स्वादेः, नोर्वकारोविकरणस्येति वत्वम्।

● के यण्वच्च योक्तवर्जम् ४/१/७

ये उक्तम्, योक्तम्। वृजीवर्जने, वृजेश्चुरादित्वात् चुरादेश्चेतीन्, कृत्ययुटोऽन्यत्रापीति णम्, कानुबन्धप्रत्यये परे यण्वद्भावो भवति। योक्तवर्जम्—ये यकारे परे यदुक्तम् यणाशिषोर्य इत्यादि तद्वर्जित इत्यर्थः। कृतः कृतवान्, हृतः हृतवान्.। क्रियतेस्म, ह्रियतेस्म, करोतिस्म, हरतिस्म, इति। निष्ठेति क्तक्तवन्तू। यण्वद्भावादगुणत्वम्। गृहीतः गृहीतवान्, गृह्यतेस्म, गृह्णातिस्म। पूर्ववत् क्त क्तवन्तू, इट्, इटोदीर्घोग्रहेः इति इटो दीर्घः यणवद्भावाद्ग्रहिज्यावयीति सम्प्रसारणम्। योक्तवर्जमिति किम्? कृतः चितः। अत्र यणाशिषोर्ये नाम्यन्तानां यिणायिन्न.......श्चेक्रीयितेषु येदीर्घ इति यथाक्रममिकारागमोदीर्घश्च न भवति।

● जागुः कृत्य शन्तृङ्व्योः ४/१/८

जागर्तेः परस्मिन् कृति, शन्तृङ् इत्येतद्वर्जिते यण्वद्भावो भवति, जागरः, जागरिकः, जागरणमिति भावे घञ्, जागर्तीति वुण्, यणवद्भावाद् यणाशिषोर्य इत्यनेन गुणः, जागरितः, जागरितवान्, जागर्तिस्म, गत्यर्थाकर्मकेति क्तक्तवन्तू, इट्, पूर्ववद्गुणः, कृतीति किम्? जागृतः, वर्तमाना, तस्, अशन्तृङ्व्योरितिकिम्? जागृतः, वर्तमाने शन्तृङिति,अन्वि,अदादेलुर्क् शन्तृङ्? लोपोऽभ्यस्तादन्तिन इति नलोपः, जागृतिः, जागृ निद्राक्षयेः, कृ गृ शृ जागृभ्यः किति क्तिन्, घोषवत्योश्च कृतीङभावः।

● गुणीक्त्वा सेडरूदादिक्षुधकुशक्लिश गुध मृडमृदवद वसग्रहाम् ४/१/९

गुणोऽस्यास्तीति गुणी, रूद आदिर्येषां ते रूदादयः, तेषां क्षुधादिभिस्सह द्वन्द्वे कृते नञा समासः, धातोः परे क्त्वा प्रत्ययः सेट्, अरूदादि क्षुध कुष क्लिश गुध मृड मृद वद वस ग्रहाम्, रूदादीनाम्—रूदिर् अश्रुविमोचने, विद ज्ञाने, मुषस्तेये, इत्येतेषां यः क्त्वा तथा क्षुध बुभुक्षायाम्, कुष् निष्कोषणे, क्लिसी विवाधने, क्लिश उपतापे इति वा गुध परिवेष्टने, मृद क्षोभे मृड सुखने, वद व्यक्तायां वाचि, वस निवासे। रूदादयो रूदविदमुषां सनीत्यत्र ये पठ्यन्ते ते गृह्यन्ते। के

यण्वच्चेति गुणप्रतिषेधः प्राप्तः, वर्तित्वा, वर्धित्वा, देवित्वा.। वृतू वर्तने, वृधु वृद्धौ, दिवुक्रीडायाम्, वर्तनम्, वर्धनम्, देवनमिति। एककर्तृकयोः पूर्वकाल इति क्त्वाप्रत्ययः इट्, गुणः, शंसित्वा, शन्सु स्तुतौ, गुणित्वादनुषङ्लोपाभावः। क्त्वेति किम्? निकुचितिः, सङ्कुचितिः। कुच संकोचे, नि संपूर्वो, भावेऽर्थे स्त्रियां क्तिः, इट् घोषवत्योश्च कृतीट्प्रतिषेधोऽत्र न भवति। नञानिर्दिष्टमनित्यमिति वचनात्। सेडिति किम्? कृत्वा। अरूदादि क्षुधादीनामिति किम्? रूदित्वा, विदित्वा, मुषित्वा, क्षुधित्वा, कुषित्वा, गुधित्वा क्लिशित्वा, शुचित्वा, मृदित्वा, मृडित्वा, उदित्वा, उषित्वा, गृहीत्वा, स्वपित्वा। वदिवचीति वदिवच्योस्सम्प्रसारणम्, शासिवसीति षः, क्षुधिवसोश्चेति क्षुधिवसोः इट्, ग्रहि ज्येति सम्प्रसारणम्, वस आच्छादने, इत्यस्य न ग्रहणम् सम्प्रसारणाभावात्, गुणित्वे सत्यसति वा विशेषाभावात्।

• स्कन्दिस्यन्दोर्क्त्वा ४/१/१०

गुणीत्यनुवर्तते, ह्लादौ ह्रस्व इत्यतः प्राक्, स्कन्दिर् शोषणे, स्यन्दू प्रसवणे, इत्यनयोः क्त्वा प्रत्ययो गुणी भवति। असेड्र्थम् वचनम्। स्कन्त्त्वा, स्यन्त्वा एककर्तृकयोरिति क्त्वा। स्कन्दिस्तुतिनुदीत्यनिट, स्यन्दि तूदनुबन्धाच्चचेट्रहित–क्त्वाग्रहणम्, यबादेशेकृते गुणित्व निवृत्त्यर्थम्। स्थनिवद्भावाद्धिस्यात्, स्कन्द्य, प्रस्यद्य, समासे भाविनीति क्त्वा प्रत्ययस्य यप्, गुणित्वाभावादनुषङ्लोपः।

• व्यञ्जनादेर्व्युपधस्यावो वा ४/१/११

उश्च इश्च तो वी, वी उपधे यस्यासौ व्युपधः, अविद्यमानो वकारान्तो यस्यासौ अव् तस्यानः आदिलोपोऽन्तलोप इति वचनादन्त शब्दो लुप्यते व्यज्जनादेर्धातोः, इकारोकारोपधस्य अवकारान्तस्य क्त्वा प्रत्ययस्सेट वा गुणी भवति। गुणीक्त्वासेडिति नित्यं गुणित्वं प्राप्तम्, द्योतित्वा, द्युतित्वा, लेखित्वा लिखित्वा, वेदित्वा विदित्वा। व्यञ्जनादेरिति किम्? एषित्वा ओषित्वा, इषु इच्छायाम्, उष दाहे। व्युपधस्येति किम्? नर्तित्वा, नृती गात्रविक्षेपे। अव इति किम्? सेवित्वा, सर्वत्र क्त्वासेडिति गुणित्वम्। नुत्वा भित्वा, णुद प्रेरणे भिदिर् विदारणे। व्युपधस्येत्यत्र तूकारेकारयोर्ग्रहणम्। व्यञ्जनग्रहणं न भवति। लिलिखिषति लिलिखिषते। सेडिति किम्? बिभित्सति। भिदिर् विदारणे सन्।

• तृषि मृषि कृषि वञ्चि लुञ्च्यृतां च ४/१/१२

वेति वर्तते, शीङ्, पूङ् धृषीत्यतः प्राक्। ञितृषि पिपासायाम्, मृष तितिक्षायाम्, कृष तनूकरणे, वञ्चुगत्यर्थः, लुञ्च अपनये, ऋतिस्सौत्रो धातुः। एषां क्त्वा प्रत्ययः सेट् वा गुणी भवति। तर्षित्वा, तृषित्वा। मर्षित्वा मृषित्वा, कर्षित्वा, कृषित्वा, वञ्चित्वा, वचित्वा, लुञ्चित्वा, लुचित्वा, अर्तित्वा, ऋतित्वा। गुणित्व पक्षे गुणः। वञ्चि लुञ्च्योरनुषङ्लोपाभावः। सेडिति किम्? वक्त्वा, वञ्चु ग, लुक्त्वा, लुञ्च अ.। उदनुबन्धः पूङिति पाक्षिक इट्, गुणित्वाभावादनुषङ्गलोपः। ऋत इति लृकारान्ताः न गृह्यन्ते, व्याख्यानात्।

• थफान्तानाञ्चानुषङ्गिणाम् ४/१/१३

थकारान्तानां फकारान्तानां च धातूनामनुषङ्गिणाम्, सानुषङ्गाणां क्त्वा प्रत्ययस्सेट् वा गुणी भवति, श्रन्थित्वा, श्रथित्वा, ग्रन्थित्वा, ग्रथित्वा, गुम्फित्वा, गुफित्वा। श्रन्थ–ग्रन्थ सन्दर्भे, गुम्फ ग्रन्थे। ग्रन्थश्रन्थयोर्ग्रहणे थफान्तानामिति किम्? संसिथ, गुणी क्त्वा सेडिति, गुणित्वम्। अनुषङ्गिणामिति किम्? कोथित्वा, रेफित्वा। कुथ पूतीभावे रिफरिंफ हिंसायाम्।

• जान्तनशामनिटाम् ४/१/१४

अनुषङ्गिणामित्येव, जकारान्तानां नशामनिट धातूनां क्त्वा प्रत्ययः गुणी वा भवति। भङ्क्त्वा, भक्त्वा, रङ्क्त्वा, रक्त्वा, भञ्जो आमर्दने, रञ्ज रागे, गुणीक्त्वा भवतीति भावः। नशेः–नंष्ट्वा, नष्ट्वा। णश अदर्शने रुदादित्वादिड्विकल्पः। मस्जिनशोर्धुटीति नकारागमः। छशोश्चेति षः। गुणित्वाभावपक्षेऽनुषङ्गलोपः। जान्तनशामिति किम्? वक्त्वा, सुचित्वा, स्वपित्वा। अनुषङ्गिणामिति किम्? युक्त्वा। युजिर् योगे। अनिटामिति किम्? अञ्जित्वा, अञ्जू व्यति।

• शीङ्पूङ्धृषिक्ष्विदिस्विदिमिदां च निष्ठा सेट् ४/१/१५

शीङ् स्वप्ने, पूङ् पवने, ञिधृषा प्रागल्भ्ये, ञिक्ष्विदा स्नेहमोहनयोः। स्विदा गात्रप्रक्षरणे, ञिमिदा स्नेहने, एषां निष्ठाप्रत्ययः सेट् गुणी भवति।

द्वयोर्विकल्पयोर्मध्ये नित्याः विधयः स्मर्यन्त इति वचनात् के यण्वच्चेति निषेधः प्राप्तः। शयितः, शयितवान्। पवितः, पवितवान्। प्रधर्षितः, प्रधर्षितवान्। प्रक्ष्वेदितः, प्रक्ष्वेदितवान्। प्रस्वेदितः, प्रस्वेदितवान्। प्रमेदितः, प्रमेदितवान्। ञिधृषा इत्यादीनामाकारः आदनुबन्धश्चेत्यर्थः। शेतेः ञ्यनुबन्धसतीत्यनेन च शब्दात् वर्तमाने काले क्त क्तवन्तू। प्रधर्षितुं प्रवृत्त इत्यादि वाक्यम्। आदिकर्मणि क्तः कर्तरिचेति क्तः, पूङः पूङ्क्लशोर्वेति इट्। शेषाणां भावादि कर्मणां वेति इट्। सेडिति किम्? पूतः, प्रधृष्टः।

● मृषः क्षमायाम् ४/१/१६

क्षमायां वर्तमानात् मृष तितिक्षायामित्यस्मात् परो निष्ठाप्रत्ययस्सेट् गुणी भवति। मर्षितः, मर्षितवान्। मृषतेस्म, मृषतिस्म, निष्ठेति क्त क्तवन्तू, क्षमायामिति किम्? अपमृषितं वाक्यमाह।

● भावादि कर्मणोर्वोऽदुपधात् ४/१/१७

भावे आदिकर्मणिचार्थे निष्ठाप्रत्ययः अदुपधाद्धातोः परस्मै सेड् गुणी भवति। द्योतितम्, द्युतितम्। मोदितम्, मुदितम्.। द्युत दीप्तौ, मुदहर्षे। द्योतनं मोदनमिति नपुंसके भावे क्तः। आदिकर्मणि–प्रद्योतितः, प्रद्युतितः, प्रमोदितः, प्रमुदितः। द्योतितुं प्रवृत्तः, मोदितुं प्रवृत्तः इत्यादि कर्मणिक्तः। भावादि कर्मणोरिति किम्? मोदितः मुदित इति। गत्यर्थाकर्मकेति क्तः। अदुपधादिति किम्? लिखितम्। नपुंसके भावे क्तः। वा शब्दोऽत्र व्यवस्थित विभाषावाची, तेन येषामुपधानाम् अन्विकरणे गुणोदृष्टस्त इह गृह्यन्ते, तेनेह न भवति गुदितम्, गुद परिवेष्टने इत्ययं दैवादिकः, पूर्ववत् क्तः।

● ह्लादौ ह्रस्वः ४/१/१८

निष्ठाग्रहणं सम्बध्यते, तच्चार्थवशात्सप्तम्यन्तं विज्ञायते। ह्लादी, सुखे चेत्यस्य ह्रस्वो भवति निष्ठायां परतः। प्रह्लत्तः प्रह्लत्तवान्.। प्रह्लदते स्म। गत्यर्थाकर्मकेतिक्तः, निष्ठेति क्त क्तवन्तू, नडीङ्श्वीति इडभावः। अनेन ह्रस्वः। दात्पूर्वस्य च द इति निष्ठा नत्वम्। पूर्वस्य च दस्य नः। निष्ठायामिति किम्? प्रह्लादयति, प्रह्लादमानं प्रयुङ्क्ते। इन् प्रत्ययमपीष्यते। प्रह्लत्तिः, भावेऽर्थे स्त्रियां क्तिः।

• छादेर्घे ऽद्व्युपसर्गस्य ४/१/१९

छद संवरण इत्यस्येन्नन्तस्य घस् प्रत्यये परे ह्रस्वो भवति अद्व्युपसर्गस्य, द्व्युपसर्गस्य तु न भवति। प्रच्छदः, उरश्च्छदः दन्तच्छदः। छदिश्चुरादित्वादिन्नन्तः। प्रच्छाद्यतेऽनेन, दन्ताश्छाद्यन्तेऽनेनेति, पुंसि संज्ञायामिति घः। घकारश्चजोः कगावित्यर्थः, ह्रस्वः, कारितलोपः। अद्व्युपसर्गेति किम्? समुच्छादः, पूर्ववद्घः, अनेकोपसर्गस्य छादेर्ह्रस्वं नेष्यते। समुपाभिश्छादः।

• इस्मन्त्रृक्विप्सु च ४/१/२०

अद्व्युपसर्गस्येति निवृत्तम्। छादेर्ह्रस्वो भवति। इस् मन् तृ क्विप् इत्येतेषु परेषु। इस्–छदिः, छाद्यते ऽनेनेति। अन्वि, शुचिहुसृपि छादिभ्यः इति इस्, ह्रस्वः, कारितलोपः। मन्–छद्म, छदेर्मनिति मन्। तृ–छत्रम्, ष्ट्रन् इति ष्ट्रन्, षकार इकारार्थः। सूत्रे तृशब्दोच्चारणात् षत्वे निवृत्ते टत्वं निवर्तते। क्विप्–गृहच्छत्, गृहं छादयतीति क्विप्।

• दीर्घस्योपपदस्यानव्ययस्य रवानुबन्धे ४/१/२१

उपपदस्यानव्यय–अव्यय रहितस्य दीर्घान्तस्य ह्रस्वो भवति, रवानुबन्धे प्रत्यये परे। सतिं मन्याकुलटा, तरूणं मन्या वृद्धा। मन ज्ञाने, सती तरूणी शब्दौ पूर्वौ। सतीमात्मानं मन्यते, एवं तरूणीम्, खश्चात्मन इति खश्, शकारस्सार्वधातुक वच्छे इत्यर्थः। दिवोदर्यन्, स्त्रियामादाप्। उपपदस्य ह्रस्वः, ह्रस्वारूषोरिति मकारागमः। अनव्ययस्येति किम्? दिवामन्यारात्रिः। दोषामन्यमहः। दिवादोषाशब्दौ अव्ययौ पूर्वौ, दिवेवात्मानं मन्यते रात्रिः, दोषेवात्मानं मन्यते अहः इति पूर्ववत् रवश्, रवानुबन्धेति किम्? वधूं मन्यते।

• नामिनोऽम्प्रत्ययवच्चैकस्वरस्य ४/१/२२

उपपदस्ययानव्ययस्य खानुबन्ध इत्यत्रानुवर्तते, उत्तरत्र च नाम्यन्तस्य उपपदस्य अनव्ययस्य–अव्ययरहितस्यैकस्वरस्य रवानुबन्धे सति अमागमो भवति। स च प्रत्ययवत् उच्च्यते, अमः प्रत्यासन्नं प्रत्यय ग्रहणम्। अमेव प्रत्ययं प्रतिपादयति, प्रत्ययान्तरम्। एवमप्यमोग्रहणं द्वितीयैक

वचनस्य, कुतः? व्याख्यानात्। कथं पुनर्ज्ञायते अमागमो भवतीति? उच्यते। प्रत्ययवदतिदेशसामर्थ्यात्। यदि ह्ययमादेशस्स्यात् प्रत्ययभावस्य किं फलं स्यात्। गांम्मन्यः, स्त्रियम्मन्यः, स्त्रीम्मन्यः श्रियम्मन्यः, द्रवम्मन्यः, नरम्मन्यः, मनज्ञाने, गो, स्त्री, श्री, द्रू, नृ इति पूर्वाः। गामात्मानं मन्यते, इत्यादि विग्रहे कृते पूर्ववत् रवश्, अमागमः तस्य प्रत्ययवद्भावात् अम्शसोरा, अम्शसोरादिलोपम्। ईदूतोरियुवौ स्वरे घुटि चेत्येते विधयो भवन्ति। नामिन इति किम्? ज्ञम्मन्यः, जानातीति ज्ञः। नाम्युपधा पृ कृ गृ ज्ञो क इति कः। ज्ञमात्मानं मन्यते इति रवश्, दीर्घस्योपपदस्येति ज्ञा शब्दस्य ह्रस्वः। ह्रस्वारूषोरिति मागमः। यद्यागमस्स्यात्, ह्रस्वो न भवेत्, ह्रस्वस्य आगमेन वाधितत्वात्। एकस्वरस्येति किम्? सेनानिम्मन्यः। सेनान्यमात्मानं मन्यते इति रवश्, पूर्ववद् ह्रस्वो मागमश्च। अनव्ययस्येति किम्? सुमन्यः। शोभनमात्मानं मन्यत इति रवश् पूर्ववत् ह्रस्वः।

• ह्रस्वारूषोर्मो ऽन्तः ४/१/२३

ह्रस्वश्च अरूषश्च ते ह्रस्वारूषी, ह्रस्वान्तस्यानव्ययस्य अरूश्शब्दस्य च खानुबन्धे प्रत्यये सति मकारागमो भवति। अन्तशब्दः आगमत्वं द्योतयतीत्याहुः। स्तनन्धयः:, आस्यन्धयः। धेट् पाने, स्तनास्यौ पूर्वौ। स्तनन्धयति आस्यन्धयति इति। शुनी स्तन मुञ्जेति रवश्, अन्वि, ए आय्। असन्ध्यक्षरलोपः। अनेन मागमः। अरून्तुदः। तुद् व्यथने। अरूष् पूर्वः। अरूंषि तुदतीति वहविध्वरूस्तिलेषु तुदइति रवश्, अन्वि, मागमः संयोगादेर्धुट् इति स लोपः। अनव्ययस्येति किम्? सुरवङ्करः सुरवेन क्रियत इति ईषद्दुस्सुष्विति खल्, भावादिकर्मणोः कृत्यर्थ इत्यर्थः। रवकारो दीर्घस्योपपधस्येत्यर्थः। गुणः उष्णभद्रशब्दयोः करणशब्दे परे मागमो वक्तव्यः। उष्णस्य करणमुष्णङ्करणम्। एवं भद्रङ्करणम्।

• सत्यागदास्तूनाङ्कारे ४/१/२४

सत्यञ्च, अगदश्च, अस्तु च तानि सत्यागदास्तूनि। सत्य अगद अस्तु इत्येतेषां कार शब्दे परे मागमो भवति। सत्यङ्कारः, अगदङ्कारः, अस्तुङ्कारः, सत्यङ्करोति, अगदङ्करोति, अस्तुङ्करोति। कर्मण्यण्। अस्योपधेति वृद्धिः। मागमः, अस्तु शब्दो निपातोऽभ्युपगमे वर्तते।

• गिलेऽगिलस्य ४/१/२५

उपपदस्य अनव्ययस्येति वर्तते, ह्रस्वग्रहणञ्च। उपपदस्य अव्ययस्य ह्रस्वान्तस्यागिलस्य–गिलवर्जितस्य मकारागमो भवति गिलशब्दे परे। तिमिङ्गिलः, शत्रुङ्गिलः। गृनिगरणे तिमिशत्रु पूर्वौ। तिमिं गिलति, शत्रुं गिलति। मूलविभुजादिभ्यश्चेति कः, ऋदन्तस्येतीर्, वास्वर इति लत्वम्। अनेन मागमः। अनव्ययस्येति किम्? निगलः। निगलतीति नाम्युपध पृ कृ गृज्ञेति कः। ह्रस्वान्तस्येति किम्? उदिग्लः, उदिगरतीति, मूलविभुजादित्वात्कः। अगिलस्येति किम्? गिलगिलः। गिलं गिलतीति पूर्ववत्कः अर्थवतो गिलशब्दस्य ग्रहणम् तेनानर्थके न भवति, मधुगिलति।

• उपसर्गादसुदुर्भ्याम् लभेः प्राग्भात् खल् घञोः ४/१/२६

उपसर्गात्परस्य लभेः, भात् भकारात्प्राक् मकारागमो भवति, खलि घञि च परे, असुदुर्भ्याम्–सुदुर्भ्यान्तु उपसर्गाभ्यां परस्य न भवति। ईषत्प्रलम्भः, सुखेन प्रलम्भ्यत इति ईषद्दुस्सुष्विति खल्। अनेन मागमः। घञि, उपलम्भः, लभेर्भावे घञ्। उपसर्ग इति किम्? ईषत् लाभः, सुखेन लम्भ्यत इति पूर्ववत्खल्। अथेह रभिलभोरित्यनेन नकारागमः कस्मान्नभवति। उच्यते–यदि स्यात्, लम्भ इति रूपस्य कृते ईषद्दुस्सुष्वित्याद्युपसर्गग्रहणेन किं कृतं स्यात्। असुदुर्भ्यामिति किम्? सुलभः, दुर्लभः, खल्। यद्येवम्–कथं प्रलम्भः, दुष्प्रलम्भः? उच्यते–नात्रायं सुदुर्भ्यां परे खल्, किन्तर्हि? प्रशब्दात्। केवलाभ्यामेव सुदुर्भ्याम् प्रतिषेधः स्मर्यते, तेन अति सुलम्भः, अति दुर्लम्भः। यद्येवम्–कथमति सुलभम्, अति दुर्लभम्? उच्यते–सुलभ दुर्लभ शब्दौ संस्कृत्य पश्चादति शब्देन सम्बन्धः। अतिशयेन सुलभम्, एवमतिदुर्लभम्, आङः परस्यलभेर्यकारादौ प्रत्यये परे अकारागमो वक्तव्यः। आलम्भ्यः आलभनीय इति। शकिसहिपवर्गाच्चेति यः, यण्चेक्रीयितविधयः नेष्यन्ते। आलभ्यते, आलम्भ्यते। अत्यर्थम् लभ्यत इति य शब्दः।

• वा कृति रात्रेः ४/१/२७

रात्रि शब्दस्य मागमो वा भवति कृति प्रत्यये परे रात्रिञ्चरः–रात्रिचरः, रात्रौचरतीति चरेष्टः। एवं रात्रिमंटः, रात्र्यटः। रात्रावटतीति अस्मदादिभ्यश्च इत्यंच्। कृतीतिकिम्? रात्रि गार्ग्यः। कृतीत्यनुवर्तमाने कृद्ग्रहणादन्यत् क्वचिदकृत्यपि कार्यम् विज्ञायते, तेन वेत्यनेन मुत्वम्, यथा प्रखायम्, प्रखन्यते इत्यादि च भवति।

• पुरन्दरवाचंयमसर्वंसहद्विषन्तापश्च ४/१/२८

एते निपात्यन्ते, साधुत्वेन कथ्यन्ते चेत्यर्थः। पुरन्दरः, दृ भये, दृणन्तं प्रयुङ्क्ते, इन्, वृद्धिः, पुरपूर्वः। पुरन्दारयतीति कर्मण्यण्, कारित लोपः पूर्ववदस्य अमागमो निपात्यते। कृद्विषय एवायं च शब्दस्स्मर्यते, तेन अन्यत्र–वाग्यमः, द्विषन्तपः, तपिरित्यतः, द्विष् पूर्वः। द्विषं तापयतीत्यण्। ह्रस्वत्वममागमश्च निपात्यते।

• धातोस्तोऽन्तः पानुबन्धे ४/१/२९

ह्रस्वारूषो इत्यतः ह्रस्व इत्यनुवर्तते, ह्रस्वान्तस्य धातोः पकारानुबन्धः कृति परे तकारागमो भवति, पुण्यकृत्, पापकृत्। पुण्यं कृतवान्, पापं कृतवान् इति कृञस्सुपुण्यपापेति क्विप्, अनेन तकारागमः, प्रकृत्य, प्रस्तुत्य, भावेऽर्थे। एककर्तृकयोरिति क्त्वा, समासे भाविनीति यबादेशः। पकारो वैचित्र्यार्थः। ननु पानुबन्धे–कृता धातुराक्षिप्तस्तदनर्थकम् धातुग्रहणम्। असदेतत्–उपपद प्रकरणत्वादुपपदस्य ह्रस्वान्तस्य पानुबन्धे कृते सति विकारागमः सम्भाव्यते। यथा–ग्रामणीः। ग्रामं नयतीति क्विप्। ह्रस्वान्तस्येति किम्? आनीय, णीञ् प्रापणे, आङ्पूर्वः। क्त्वा, तस्य यप्। पानुबन्ध इति किम्? कृतः। अन्तग्रहणं वैचित्र्यार्थम्, ह्रस्वग्रहणवत् तदप्यनुवर्तिष्यते।

• ओदौद्भ्यां कृद्यस्स्वरवत् ४/१/३०

कृतो यः कृद्यः, ओकारादौकाराच्च परः कृत् प्रत्ययसम्बन्धियकारस्स्वरवद् भवति। जुहोतव्यम्, लव्यम्, हुदानादानयोः। लूञ् छेदने। हवनीयम्, लवनीयम्। स्वरादयः, गुणः, स्वरवद्भावादवादेशः। अवश्यलाव्यम्, अवश्यभाव्यम्, अवश्यलवनीयम्। अवश्यं लवनीयम्, अवश्यं भवनीयम् इति। उवर्णादावश्यके इति घ्यण्, वृद्धिः, स्वरवद्भावः, अवश्यमोवक्तव्यान्मलोपः। ओदौद्भ्यामिति किम्? चेयम्, चिञ् चये,

स्वरादयः गुणः। कृद्य इति किम्? उपोयते वेञ् तन्तु सन्ताने, उप पूर्ववत्, सार्वधातुके य, स्वपिवचीति सम्प्रसारणम्। नाम्यन्तानां यणायीति दीर्घः। उवर्णे ओ, उपौयत। वेञ् तन्तु, हयस्तनीत, सार्वधातुकेयण, वृद्धिः।

• जिक्ष्योःशक्ये ४/१/३१

जिजये, क्षिक्षये इत्यनयोरशक्येऽर्थे कृद्यकारः स्वरवद्भवति, जय्यः क्षय्यः, जेतुं शक्य इति स्वरादयः, गुणः, अय्। शक्य इति किम्? जेयः, जेतव्यः, क्षेयः, क्षेतव्य इत्यर्थः।

• क्रीञस्तदर्थे ४/१/३२

तस्य अर्थः तदर्थः डुक्रीञ्, परः कृद्यकारस्स्वरवद्भवति। तदर्थे–द्रव्य विनिमयेऽर्थे। तदिति डुक्रीञ् परामृश्यते, क्रय्यो गौः, स्वरादयः गुणः। तदर्थमिति किम्? क्रेयो गौः। न चास्ति मूल्येन गृहीतो गौः, न च पणेऽस्ति इति द्रव्यविनिमयाभावः।

• वेर्लोपोऽपृक्तस्य ४/१/३३

कृद ग्रहणं सम्बध्यते, क्विबादीना प्रत्ययानामनुबन्धानपास्य यद्वकारमात्रं तदिह गृह्यते, इकारस्तूच्चारणार्थः। अपृक्तस्य–वर्णान्तरेणायुक्तस्य कृत्संज्ञकस्य 'व' मात्रस्य लोपो भवति। अग्निचित्, अग्निं चितवान् इति, चेरग्नाविति क्विप्, अनुबन्ध लोपे कृते अनेन व लोपः। धतोस्तोऽन्तः, अर्थभाक्, भजसेवायाम्। अर्थम् भजत इति भजसहोर्विण्, अस्योपधेति दीर्घः, चवर्गदृगेतिगः, अपृक्तस्येति किम्? जागृविः, कृ गृ सृ जागृभ्यः क्विन् इति क्विन्। कृत्सञ्ज्ञकस्येति किम्? उपेयिवान्, इण गतौ, उप पूर्वः, क्वन्सुकानाविति क्वन्सुः। द्विर्व, दीर्घः इणपरोक्षायामिति अभ्यासस्य दीर्घः। अतींण्घसैकस्वरेति इट्, इणश्चेति यि, उपेयिवांसमाचष्टे, इन्कारितं चेति इन् लिङ्गस्येत्यन्त्यस्वरादेर्लोप मनिन्क्वनिप्वनिपश्चेति च शब्दात् विट्। कारितलोपः, ते धातवः इति धातुत्वात् वकारमात्रस्य कृत्संज्ञा नान्यस्य ।

• य्वोर्व्यञ्जने ४/१/३४

य्वोः–यकार वकारयोः, अये–यकार रहिते व्यञ्जनेपरे लोपो भवति। क्नूतः, क्नूतवान। क्ष्मातः, क्ष्मातवान्। क्नूयी शब्दे तर्दने च, क्ष्मायी

विधूनने। क्नूयते स्म, क्नूय्यते स्म। क्ष्मायतेस्म, क्ष्माय्यतेस्म, निष्ठेति क्तक्तवन्तू, यकारलोपः, देदिवान्, ससिवान्। दिवु क्रीडायाम्, षिवु तन्तुसन्ताने। क्वन्सुकानाविति क्वन्सुः, द्विर्व, व लोपः, व्यञ्जनइति किम्, क्नूयिता, क्ष्मायिता, देविता, तृच् इट्। अय इति किम्? प्रक्नूय्य, प्रक्ष्माय्य, प्रदीव्य, एककर्तृकयोरिति क्त्वा समासे भाविनीति यप्। नामिनोर्वोरिति दीर्घः।

• निष्ठे टीनः ४/१/३५

निष्ठायां यः, इट् तस्मिन् परे इनो लोपो भवति, कारितः, कारितवान्, हारितः, हारितवान्, कारि, हारि, कार्यतेस्म, कारयति स्म, हार्यतेस्म, हारयतिस्म, निष्ठेति क्त क्तवन्तू, इट् अनेन इलोपः, निष्ठेति किम्? कारयिता।

• नाल्विष्ण्वाय्यान्तेत्नुषु ४/१/३६

इन इत्येव, आलु, इष्णु, आय्य, अन्त, इत्नु इत्येतेषु परेषु इनो लोपो न भवति कारितस्यानामीति प्राप्तः। गृहयालुः, स्पृहयालुः। ग्रह ग्रहणे, स्पृह ईप्सायाम् चुरादेश्चेतीन्, अस्यचलोपः, दयि पदि ग्रहीत्यालुः, गुणः। धारयिष्णुः पारयिष्णुः। धृ धारणे, धृङ् अनवस्थाने, पृ पालने। धृयमानं प्रयुङ्क्ते, एव पारयिष्णुः, इन्, वृद्धिः, भ्राज्यलङ्कृञ् भू सहि इति इष्णुः। स्पृहयाय्यः। स्पृहेरिन्नन्तात् श्रि पृ दृ दक्षिस्पृहिभ्य इति आय्यः। मण्डयन्तः, मडिभूषायाम्, मण्डयन्तं प्रयुक्ते, इन्, कृ भू वहि वसीति कः प्रत्ययः। यु वु झामित्यनादेशः। स्तनयित्नुः, स्तनयत्यर्थः, स्वरादित्वादिन्, अस्य च लोपः। स्तनि इषि मुषीति इत्नुः।

• लघु पूर्वोऽय्यपि ४/१/३७

लघु पूर्वो यस्मादिनः इति विग्रहः। लघु पूर्वः, इन् अय् भवति यपि परे। प्रशमय्य, शमु उपसमे, प्रपूर्वः, प्रशाम्यन्तं प्रयुज्य। इन् दीर्घः, मानुबन्धानां ह्रस्वः, एक कर्तृकयोरितिक्त्वा, समासे भाविनीति यप्, अनेन अय्, एवं प्रदमय्य। गणेश्चुरादित्वादिन्, नन्वत्र पूर्वो नास्ति लघुत्वम्, इन्य... ... लघुपूर्वइति किम्? .... इनः यपि परे आप्यिष्यन्ते, प्रापय्य, प्राप्य, आप्लृव्याप्तौ, प्रपूर्वः, व्याप्नुवन्तं प्रयुज्यते।

● मीनात्यादिदादीनामाः ४/१/३८

मीनातिरादिः येषां ते मीनात्यादयः ततो द्वन्द्वः, यपीत्येव। मीनात्यादीनां मिनाति मिनोति दीङ् तथा घादीनामात्वं भवति दामागायतीति ईत्वं प्राप्नोति। प्रमाय, परिमाय, प्रदाय। मीङ् हिंसायाम्। डुमिञ् प्रक्षेपणे, दीङ् क्षये, क्त्वा यप्, अनेन आत्वम्............(त्रु० पाठः)

● क्षेर्दीर्घः[१] ४/१/३९

क्षेर्दीर्घो भवति यपि परे। प्रक्षीय, उपक्षीय। कथं प्रक्षिप्य गतः? क्षिप हिंसायामिति लाक्षणिकत्वात्।

---

१ दुर्गवृत्तिमनुसृत्य पाठः।

● निष्ठायाञ्च ४/१/४०

क्षेर्दीर्घः, भवति, निष्ठायां परतः, क्षीणः, क्षीणवान्, क्षयतिस्म। गत्यर्थाकर्मकेति क्तः। निष्ठे क्तक्तवन्तू, क्षेर्दीर्घादिति निष्ठा नत्वम्। दीर्घस्यानित्यत्वात् भावकर्मणोरर्थयोर्न भवति। क्षितम्, नपुंसके भावे क्तः, कर्मणि प्रक्षितः, प्रक्षीयतेस्म, निष्ठेतिक्तः। आक्रोश दैन्ययोस्तु विकल्पः, आक्रोशे—क्षीणायुस्त्वम्। क्षितायुस्त्वम्। दैन्ये—क्षीणोऽहम्, क्षितोऽहम्।

● स्फायस्स्फीः ४/१/४१

स्फायी, ओ प्यायी वृद्धौ, इत्यस्य स्फी आदेशः भवति, निष्ठायां परतः। स्फीतः स्फीतवान्, स्फायतेस्म, स्फायतिस्म, गत्यर्थाकर्मकेति क्तः।

● प्यायः पी स्वाङ्गे ४/१/४२

ओ प्यायी वृद्धावित्यस्य निष्ठायां पी आदेशो भवति स्वांगेऽभिधेये, स्वाङ्गमद्रवंमूर्तिमदिति परिभाषितम्। पीनं मुखम्, पीनमुरः। ल्वाद्योदनुबन्धादिति निष्ठानत्वम्। एवं पीनौ पयोधरौ। स्वाङ्गमद्रवंमूर्तिमदित्येव गृह्यते, न तु स्वमङ्गम्, इतरथा हि प्यानम् रुधिरमित्यादावपि पी आदेशः। प्यानमित्यत्र पूर्ववत्कृते निष्ठानत्वे य्वोर्व्यञ्जन इति य लोपः। कथं पीनो देवदत्तः? नह्यत्र प्यायिः स्वाङ्गे

वर्तते। सत्यम्—पीन शब्दमादौ स्वांगे संस्कृत्य पश्चाद् देवदत्तेन सम्बध्यते, न कार्यमुच्यते। पीनानि अंगानि विद्यन्ते यस्य सः। मन्त्वादित्वादकारे प्रत्यये कृते आङः परस्य प्यायः पी आदेशः इष्यते अन्धूधसोरर्थयोः, आपीनोऽन्धः आपीनमूधः। सिद्धेसत्यारम्भो नियमार्थः, आङ एवान्धूधसोर्यथास्यात्, इह मा भूत् प्रप्यानमूधः।

• शृतं पाके क्षीरहविषोः ४/१/४३

क्षीरहविषोरर्थयोः पाके गम्यमाने शृतमितिनिपात्यते। शृतं क्षीरम्, शृतं हविः, पक्वमित्यर्थः। डु पचष् पाके, श्रातिस्म गत्यर्थाकर्मकेति क्तः, धातोः शृ आदेशो निपात्यते, क्षीरहविषोरिति किम्? श्राणाः यवागूः, अतो ऽन्तस्थासंयोगादिति निष्ठा नत्वम्।

• प्रस्त्यः सम्प्रसारणम् ४/१/४४

ष्ट्यै स्त्यै शब्दसंङ्गा, तयोः स्त्यस्यप्रपूर्वस्य सम्प्रसारणम् भवति निष्ठायाम् परतः। प्रस्तीतः, प्रस्तीतवान्, प्रस्त्य इत्यस्य गत्यर्थाकर्मकेति क्तः, अनेन सम्प्रसारणम् तद्दीर्घमन्त्यमिति दीर्घः।

• द्रवघनस्पर्शयोः श्यः ४/१/४५

द्रवस्य घनः, द्रवघने स्पर्शे चार्थे श्यैङ् गतावित्यस्य सम्प्रसारणं भवति निष्ठायाम् परतः। द्रवघने तावत्—शीनं घृतम्, शीनं मेदः, श्यायते स्म, गत्यर्थाकर्मकेति क्तः, सम्प्रसारणम् तस्य च पूर्ववद्दीर्घः, श्यै स्पर्शे इति निष्ठा नत्वम्। स्पर्शे—शीतं जलम्, शीतो वायुः। द्रवघनस्पर्शयोरिति किम्? श्यानः मृत इत्यर्थः। अतो ऽन्तस्थासंयोगादिति निष्ठानत्वम्।

• प्रतेश्च ४/१/४६

प्रति शब्दात्परस्य श्यायतेः निष्ठायां परस्य सम्प्रसारणं भवति। अद्रवघनस्पर्शार्थम् वचनम्। प्रतिशीनः प्रतिशीनवान्।

• वाभ्यवाभ्याम् ४/१/४७

अभि अव इत्येताभ्यां परस्य श्यैङ् गतावित्यस्य सम्प्रसारणं वा भवति निष्ठायां परतः। अभिश्येनम्, अवश्येनम्, अभिश्यानम्, अवश्यानम्, वा सम्प्र, श्योऽस्पर्श इति निष्ठानत्वम्।

• न वेञ्ज्योर्यपि ४/१/४८

वेञ् ज्या इत्येतयोः सम्प्रसारणं न भवति यपि परे, वेञः यजादित्वात् प्राप्तम् ज्यायाश्च ग्रहादित्वात्। प्रवाय, प्रज्याय।

• व्येञ्च ४/१/४९

व्येञ् संविभक्तौ इत्यस्य सम्प्रसारणं न भवति यपि परे। यजादित्वात्प्राप्तम्। प्रव्याय, व्येञ् सन्ताने।

• संपरिभ्यां वा ४/१/५०

सम्परिभ्यां परस्य व्येञ् सम्प्रसारणं वा भवति यपि परे, संवीय संव्याय, परिवीय, परिव्याय। कृते सम्प्रसारणे तद्दीर्घमन्त्यमिति दीर्घः।

• तद्दीर्घमन्त्यम् ४/१/५१

अन्त्ये भवमन्त्यम्, तत्सम्प्रसारणमन्त्यञ्चेति दीर्घमापद्यते। प्रस्तीनः, प्रतिशीनः, आहूतः, जीनः, ष्ट्यै, स्त्यै शब्दे, श्यैङ् गतौ, ह्वेञ् स्पर्धायाम्, ज्या वयो हानौ, आहूयतेस्म, जिनातिस्म, गत्यर्थाकर्मकेति क्तः। एकस्य स्वपिवचीति सम्प्रसारणम् तस्यानेन दीर्घः। ल्वाद्योदनुबन्धेति निष्ठानत्वम्, अन्त्यमिति किम्? गृहीतः।

• वः क्वौ ४/१/५२

वेञः सम्प्रसारणम् दीर्घमापद्यते क्विपि परे ऊः, वेञ् तन्तु सन्ताने, वयतीति ऊः, क्विप्, स्वपि वचीति सम्प्रसारणम्, तस्य च दीर्घः। सिद्धेसत्यारम्भो नियमार्थः, वेञः सम्प्रसारणस्य क्वावेव दीर्घो यथा स्यात्, इह माभूत्, उतः, ऊयते स्मेति क्तः।

• पच्चमोपधायाः धुटि चागुणे ४/१/५३

पच्चमसु उपधा पञ्चमोपधा पञ्चमोपधस्य धातोः दीर्घो भवति क्वौ धुट्यगुणे च परे। प्रशान्, प्रतान्, शमु उपसमे, तमु कान्तौ प्रशाम्यति प्रताम्यतीति क्विप्, अनेन दीर्घः, मोनो धातोरिति मस्य नः। शान्तः,

शान्तवान्, तान्तः, तान्तवान्, शाम्यतिस्म, ताम्यतिस्म। गत्यर्थाकर्मकेति क्तः, न डीङ्श्वीतीड्भावः। पञ्चम ग्रहणं किम्? मङ्क्ता। धुटीति किम्? गम्यते, यण्। अगुण इति किम्? गन्ता। धुटादौ प्रत्यये परे क्रमो दीर्घो वा वक्तव्यः। क्रान्त्वा, क्रन्त्वा। उदनुबन्धः, धुटीति वा इट्। धुटादाविति किम्? क्रमित्वा। ऋजु तृणु घृणीनां दीर्घो नेष्यते। ऋतम्, तृतम्, घृतम्, ऋजु गतौ, तृणु अदने, घृणु दीप्तौ। ऋणोतिस्म, तृणोतिस्म, घृणोतिस्म। गत्यर्थेति क्तः, ऋणोतिस्म तृण्यतेस्मेति, निष्ठेति क्तः, वनतितनोत्यादीति पञ्चम लोपः।

• छ्वोश्शूटौ पञ्चमे च ४/१/५४

छकार वकारयोः यथासङ्ख्यं श ऊट् इत्येतावादेशौ भवतः क्वौ धुट्यगुणे पञ्चमे च परे। क्वौ तावत्—अक्षद्यूः, स्युः। दिवु क्रीडायाम्, षिवु तन्तुसन्ताने। अक्षैर्दीव्यति, सीव्यतीति क्विप्। वकारस्य ऊट्, ट्कारः अवर्णादूटो वृद्धिरित्यर्थः। वकारस्य शकारादेशः क्विपिनोदाहृतः। गोविट् इत्यादौ विशेषाभावात्। प्रच्छ ज्ञीप्सायाम्, पृच्छ्यतेस्म, क्तः, ग्रहिज्यावयीति सम्प्र, छशोश्चेति षः, पञ्चमे—प्रश्नः विश्नः। प्रच्छ ज्ञीप्सायाम्, विच्छ गतौ भावेऽर्थे, पृच्छनं विच्छनमिति। याचि विच्छि प्रच्छीति नङ्। अनेन अन्त्स्य छस्य शः, निमित्ताभाव परिभाषया पूर्वस्य चकारस्य निवृत्तिः, स्योमा। षिवु तन्तु सन्ताने। सीव्यतीति मन्निति मन्, वकारस्योट्, तस्य नाम्यन्तयोरिति गुणः, यत्वम्।

• श्रिव्यवि मवि ज्वरि त्वरामुपधाया अपि ४/१/५५

वकारोऽनुवर्तते ऊट्च। स्रिवु गतिशोषणयोः, अव रक्षणे, मव बन्धने, ज्वर, रोगे, ञित्वरा सम्भ्रमे, एषां वकारस्य ऊट् आदेशो भवति।

• उपधाया अपि क्वौ धुट्यगुणे पञ्चमे च परे ४/१/५६

श्रूः, ऊः, मूः, जूः तूः, श्रव्यति, अवति मवति ज्वरति त्वरतीति क्विप् वकारस्य उपधायाश्च ऊट्, दीर्घात्परलोपः धुट्यगुणे। स्रुतः, स्रुतवान्, स्रिव्यतेस्म, स्रिव्यतिस्म, निष्ठेति क्तक्तवन्तू। एवं श्रुतिः, ऊतिः, मूतिः, जूतिः, तूतिः। स्त्रियां क्तिः, अनेन ऊट्। पञ्चमे स्रोमा सीव्यतीतिमन्निति मन्, ऊट्। ओम्, अव रक्षणे अवतीत्योम्, अवतेष्टिलोपश्चेति मन्, अन्त्यस्वरादि लोपः, ऊट्, गुणः।

• राल्लोप्यौ ४/१/५७

रेफात्परौ छकारवकारौ लोप्यौ भवतः क्वौ धुट्यगुणे पञ्चमे च परे। हूः, धूः, हूर्छा कौटिल्ये, धुर्वी हिंसार्थः। भावेऽर्थे क्विप्। अनेन छ्वोः लोपः, इरूरोरीरूरौ, हूर्णः, धूर्णः, उक्तो धातु आदनुबन्धाच्च, नश्वीतीड्भावः, छ्वोर्लोपे कृते रान्निष्ठातो न इति नत्वम्। नामिनोर्वोरिति दीर्घः। एवं मूर्तिः, धूर्तिः। मूर्च्छा मोह समुच्छाययोः। धुर्वी हिंसार्थः, स्त्रियां क्तिः, पूर्ववद् दीर्घः, हूर्मा, धूर्मा, मन्नितिमन्।

• वनति तनोत्यादि प्रतिषिद्धेटां धुटि पञ्चमोऽच्चातः ४/१/५८

तनोतिरादिर्येषां ते तनोत्यादयः, प्रतिषिद्धः इट् येषाम्, ते प्रतिषिद्धेटः ततो द्वन्द्वः। अगुण ग्रहणं सम्बध्यते। वनते वन षण भक्तावित्यस्य तनोत्यादीनां तथा प्रतिषिद्धेटां पञ्चमो लोप्यो भवति धुट्यगुणे परे, अच्चातः, आकार स्य च अकारादेशः। वतिः, वन षण भक्तौ, स्त्रियां क्तिः, घोषवत्योश्च कृतीति इड्भावः। लोपस्वरादेशपरिभाषया पञ्चम लोपात्पूर्वम् पञ्चमोपधेति दीर्घः, ततोऽनेन पञ्चमलोपः आकारस्य च अकारादेशः। अन्यत्र युटादादिडागमो वनतेरस्तीति नासावुदाहृतः। तनोत्यादीनाम्—ततः, ततवान्, कृतः, कृतवान्। तनुविस्तारे, कृणुहिंसायाम्। तन्यते स्म, तनोतिस्म। कृण्यतेस्म, कृणोतिस्म। क्तक्तवन्तू, नडीश्वीति इड्भावः इति। कृतिः, स्त्रियां क्तिः। प्रतिषिद्धेटाम्—यतः रतः नतः गतः यच्छति स्म, रमते स्मः, नमति स्म, गच्छति स्म, गत्यर्थाकर्मकेति क्तः। एवं यतिः, रतिः, नतिः, गतिः। पञ्चम इति किम्? पक्वः, पच्यते स्म, क्तः, चवर्गस्य किः, क्षैशुषिपचां मकवाः इति वत्वम्। धुटीति किम्? हन्यते। अगुणे इति किम्? हन्ता। तृच् हन्तेः पञ्चमलोप इष्यते अद्यतन्यामात्मने पदे परे। आहत, आहताम् आहन्त। हन्ति आङ्पूर्वो रूदादिः। ह्रस्वश्चानिट इति सिज्लोपः पैशुन्ये गम्यमाने। यमेश्च। यमिः आङ्पूर्वो रूदादिः, उदायत, अद्यतने पूर्ववत् सिज्लोपः, पैशुन्यं कृतवानित्यर्थः। विवाहे गम्यमाने तु विकल्पः स्मर्यते। उपायत कन्याम्, उपायंस्त कन्याम्। अद्यतन्याशिषोश्चात्मने परे

गमेः पञ्चमलोपो वेष्यते। समगत, समगंस्त, गमिस्संपूर्वो रूदादिः। सिज्लोपः पूर्ववत्। संगमीष्ट, संगंसीष्ट।

• यपिच ४/१/५६

वनति तनोत्यादि प्रतिषिद्धेटां पञ्चमलोपो भवति यपि च परे। प्रवत्य प्रतत्य, प्रहत्य। एककर्तृकयोरिति क्त्वा, समासे भाविनीति यप्, पञ्चमे लुप्ते धातोस्तोऽन्तः यबादेशस्यान्तरङ्गत्वज्ञापनाय तथा वर्णाश्रयपरिभाषाया अनित्यत्व ज्ञापनार्थम्।

• वामः ४/१/६०

प्रतिषिद्धेटामकारः वा लोपो भवति यपिपरे। प्रयत्य, प्रयम्य, प्रणम्य।

• न तिकि दीर्घश्च ४/१/६१

वनतितनोत्यादि प्रतिषिद्धेटां पञ्चमलोपो न भवति तिकि परे दीर्घश्च न भवति। वन्तिः, तन्तिः, यन्तिः। वन्यात्, तन्यात्, यम्यात्। तिक्कृतौ च संज्ञायामिति तिक्।

• उन्देर्मनि ४/१/६२

उन्दी क्लेदन इत्यस्य मनि परे पञ्चम लोपो भवति। ओद्म, ओद्मनी।

• घञीन्धे ४/१/६३

इन्धे घञि परे पञ्चमलोपो भवति, एधः, इध्यतेऽग्निरिति। व्यञ्जनान्ताच्चेतिघञ्।

• स्यन्देर्जवे ४/१/६४

स्यन्दू प्रस्रवण इत्यस्य घञि परे पञ्चम लोपो भवति जवेऽर्थे। जवः वेगः, स्यदः स्यन्दनमिति भावेघञि, पञ्चम लोपः, नाम्योपधेति दीर्घो न भवति, संज्ञापूर्वको विधिरनित्य इति वचनात्। जव इति किम्? तैलस्य स्यन्दः। भावे घञ्। श्रवणमित्यर्थः।

• रञ्जेर्भावकरणयोः ४/१/६५

रञ्जेः पञ्चम लोपो भवति भावकरणयोरर्थयोः विदिते घञि परे। रञ्जनमिति भावे घञ्, चजोः कगाविति गः। करणे–रागः। रज्यते ऽनेनेति व्यञ्जनान्ताच्चेति घञ्, भावकरणयोरिति किम्? रङ्गः, रञ्जन्त्यस्मिन्निति पूर्ववदञ्।

● वुषिघिनिणोश्च ४/१/६६

रञ्जेरित्येव, वुषि घिनिणि च परे रञ्जेः पञ्चमलोपो भवति। रजकः। रञ्जनं शिल्पमस्येति शिल्पिनि वुष्। षकारष अनुबन्धेत्यर्थः। यु वु झामित्यकादेशः। घिनिणि–रागी। युजरूजभुजेति घिनिण्। णकारः इज्वद्भावार्थः, इकार उच्चारणार्थः, घकारश्चजोः कगावित्यर्थः।

● बृंहेस्स्वरेऽनिटि वा ४/१/६७

बृहि वृद्धावित्यस्य पञ्च लोपो वा भवति स्वरे ऽनिटि परे। बर्हकः बृहकः। बृहि वृद्धौ इकारो नुकारागमार्थः, अनिदनुबन्धेति ज्ञापकान्नागमः। बृंहतीति, वुष्, पञ्चमलोपः, एवं बर्हणम्, युट्चेति युट्, स्वर ग्रहणं किम्? बृंह्यते, यण्। अनिटीति किम्? बृंहिता, अट्, तृच्। बृहि दृहि वृद्धावेति धातुद्वयेन प्रयोगाणां सिद्धत्वाद्योगारम्भो न कर्तव्य इत्याहुः।

● यमि मनि तनि गमां क्वौ ४/१/६८

यमि मनि तनि गमि इत्येतेषां पञ्चमलोपो भवति क्वौ परे। संयत्, परिमत्, परीमत्, परीतत्, ग्रामगत्, संयच्छति, परिमन्यते, परितनोति, ग्रामं गच्छतीति क्विप्, पञ्चमे लुप्ते धातोस्तोऽन्तः। परिशब्दस्य क्वचिद् ह्रस्वस्य दीर्घतेति दीर्घः।

● विड्वनोरा ४/१/६९

पञ्चम इत्येव। पञ्चमस्य वा आत्वं भवति विडि वनिच परे दूरक्राः, अग्रगाः। क्रमु पाद विक्षेपे गम्लृ गतौ। इट अग्रेशब्दौ पूर्वौ, दूरं क्रामति, अग्रेगच्छति इति। विट्क्रमि गमि खनीति विट्, टकार इहार्थः। इकार उच्चारणार्थः वेर्लोपोऽपृक्तस्येति वकारलोपः। अनेन आत्वम्।

● धुटि खनि सनि जनाम् ४/१/७०

खनु अवदारणे, षणु दाने, जन जनने, जनी प्रादुर्भाव इति वा। एषां धुटि परे आत्वं भवति। खातः—खातवान्, सातः—सातवान्, जातः—जातवान्। खायतेस्म, खन्यतेस्म, खनतिस्म, सन्यतेस्म, सनोतिस्म। निष्ठेति क्तक्तवन्तू। जायते स्म। गत्यर्थाकर्मकेति क्तः, नडीश्वीतीड्भावः। अनेनात्वम्। एवं खातिः, सातिः, जातिः, स्त्रियां क्तिः, धुटीति किम्? खनिता, सनिता, जनिता,।

● येवा ४/१/७१

पञ्चमोपधेत्यतः अगुणइति वर्तते। खनि सनि जनां वा आत्वं भवति। वकारादावगुणे परे, प्रखाय, प्रसाय, प्रजाय, पखन्य, प्रसन्य, प्रजन्य। एककर्तृकयोरिति क्त्वा, समासे भाविनीति यप्, अनेन वा आत्वम्, एवं खायते खन्यते, सायते, सन्यते, जायते, जन्यते। यण् अगुण इति किम्? खन्यम् सन्यम् जन्यम्। ऋवर्णव्यञ्जनान्तादध्यण्।

● सनस्तिकि वा ४/१/७२

तनोतेर्यणि परे आत्वं वेष्यते, तायते, तन्यते।

● स्फुरिस्फुल्योर्घञ्योतः ४/१/७३

वेतिनिवृत्तम्, स्फर—स्फुर, स्फल—स्फुल चलन इत्येतयोः स्फुरि स्फुल्योः ओतः ओकारस्य आत्वं भवति घञि परे। विस्फारः विस्फालः। स्फुरि स्फुलि वि पूर्वो भावे घञ्, उपधागुणः, ओकारस्य आत्वम्।

● इज्जहातेः क्त्वि ४/१/७४

जहातेः ओहाक् त्यागे इत्यस्य आत्वं भवति क्त्वा प्रत्यये परे हित्वा, एककर्तृकयोरिति क्त्वा। जहातेरिति किम्? हात्वा। ओहाङ् गतौ।

● द्यतिस्यतिमास्थान्तेऽगुणे ४/१/७५

इदित्येव, दो अवखण्डने, षो अन्त कर्मणि, मा माने, माङ् माने, मेङ् प्रणिधान इति वा, ष्ठा गति निवृत्तौ, एषां तकारादावगुणे परे इत्वं भवति। द्यतेः दद्दोऽध इति ददादेशः प्राप्तः, स्यति मास्थांतु दामागायतीति इत्वम्। दितः—दितवान्, सितः—सितवान्, मितः—मितवान्,

स्थितः—स्थितवान्, दीयतेस्म, द्यतिस्म, यतिस्म, तिष्ठतिस्म, गत्यर्थाकर्मकेति क्तः, अनेन इत्वम्, दीयते, दामागायतीतीत्वम्। अगुण इति किम्? दाता।

वाच्छाशोः ४/१/७६

ते अगुण इत्यनुवर्तते, घञ्यलोरित्यतः प्राक्। छो छेदने, शो तनूकरणे इत्येतयोः तकारादावगुणे परे वा इत्वं भवति, छितः—छितवान्, छातः—छातवान्, शितः—शितवान्, शातः—शातवान्। छायतेस्म, छयतिस्म। शायतेस्म, शयतिस्म। शो तनूकरण इत्यस्य व्रतविषये नित्यमिष्यते, संशितो विप्रः, गृहीतव्रत इत्यर्थः।

दधातेर्हिः ४/१/७७

डुधाञ् दान धारणयोः इत्यस्य तकारादावगुणे परे हिरादेशो भवति। अनेकवर्णस्सर्वस्येति। हितः—हितवान्, धीयतेस्म—दधातिस्म, दधातेरिति निर्देशो धेटो निवृत्त्यर्थः। तेन धीतः—धीतवान्, धीयतेस्म, दधातिस्म, दामागायतीतीत्वम्।

चरफलोरूदस्य ४/१/७८

चरगत्यर्थः, फल निष्पत्तौ ञिफला विशरणइति वा, अनयोः अस्य उकारादेशो भवति तेऽगुणे परे च। चूर्तिः, प्रफुल्तिः। स्त्रियां क्तिः, अनेन इत्वम्, नामिनोर्वोरिति दीर्घः। प्रफुल्तः, फलितुं प्रवृत्त इत्यादि कर्मणि क्तः, कर्तरिचेति क्तः। भावादिकर्मणोर्वेति पाक्षिक इट्। उ इति किम्? चरितः फलितः। चरतिस्म, फलतिस्म। गत्यर्थाकर्मकेति क्तः।

दद्दोऽधः ४/१/७९

दा संज्ञकस्य अधः—धेट् वर्जितस्य दत् आदेशो भवति, ते अगुणे परे। दत्तः, दत्तवान्, दीयतेस्म, ददातिस्म। अनेन दत्। द इति किम्? दातं क्षेत्रम्। दाप् लवने। दायतेस्म। अधः इति किम्? धीतः धीतवान्। धेट् पाने। धीयतेस्म, धयतिस्म। अध इति प्रतिषेधो धेटो, न तु धाञः। तस्य हि दधातेर्हिरिति हिरादेशोऽस्ति।

स्वरादुपसर्गात्तः ४/१/८०

दा इत्येव। अध इति च। स्वरादुपसर्गादित्यस्य दा संज्ञकस्य धेङ् वर्जितस्य त्तकारादेशो भवति, तेऽगुणे परे। पूर्वेण ददादेशः प्राप्तः। प्रत्तम्, अपत्तम्। प्रकर्षेण दीयते स्म, अपदीयतेस्म। अनेन द्वितकारोऽयमादेशः अनेकवर्णस्सर्वस्येति वचनात्। अन्यथा उपसर्गात्परस्य दासंज्ञकस्य पर कार्यविकार्यादिरिति वचनात् दादेरादेशस्स्यात्। स्वरादाविति किम्? निर्दत्तम्। पूर्ववत् दद्, उपसर्गादिति किम्? श्रीदत्तः, श्रिया दीयतेस्म। अध इति किम्? प्रधीतः। धेट्पाने।

अनुदत्तं सुदत्तं प्रदत्तं चादिकर्मणि।

विदत्तमवदत्तञ्च, निदत्तमिति नेष्यते।

तकारादेशोऽत्र न भवतीत्यर्थः। प्रदत्तमित्येतत्त्वादिकर्मण्येव भवति। दातुं प्रवृत्तं प्रदत्तम्। अर्थान्तरे तु प्रत्तमिष्यते, अन्ये त्वनुदत्तादिषु विकल्पेन तकारादेशं मन्यन्ते।

• यपि चादो जग्धिः ४/१/८१

अदेः जग्धिरादेशो भवति तेऽगुणे परे यपि च। इकार उच्चारणार्थः। जग्धः—जग्धवान्। अद्यतेस्म—अत्तिस्म। जग्धिरादेशः। घढधभेभ्य इति धः, धुटां तृतीयः धस्य दः, एवं जग्ध्वा, क्त्वा अनित्यमागमशासनमिति वचनाद् इड्भावः। प्रजग्ध्य, क्त्वा—यप्।

• घञ्यलोर्घसिः ४/१/८२

घञि अलि च परे अदेर्घसिरादेशो भवति। इकार उच्चारणार्थः। घासः, अद्यत इत्यत्र कर्तरिचकारके इति घञ्, घसः भावेऽर्थे उपसर्गादित्यल्, लकार इहार्थः। अच्यपीष्यते। प्रात्तीत्यच्पचादिभ्य इत्यच्।

• क्त क्तवन्तू निष्ठा ४/१/८३

क्त क्तवन्तू इत्येतौ निष्ठासंज्ञौ भवतः। निष्ठासंज्ञायाः क्व प्रयोजनम्। रान्निष्ठातो न इत्यादिषु। कीर्णः—कीर्णवान् शीर्णः—शीर्णवान्। कॄ विक्षेपे शॄ हिंसायाम्। कीर्यतेस्म, किरतिस्म। शीर्यतेस्म श्रृणातिस्म। निष्ठेति क्तक्तवन्तू। न श्रयुवर्णेति इट् प्रतिषेधः। ॠदन्तस्येर्, नामिनोर्वोरितिदीर्घः। रान्निष्ठातो न इति निष्ठातकारस्य नकारः।

• क्त्वामसन्ध्यक्षरान्तोऽव्ययम् ४/१/८४

द्वन्द्वगर्भो बहुव्रीहिः, क्त्वान्तः, मान्तः सन्ध्यक्षरान्तश्शब्दः अव्ययसंज्ञो भवति। क्त्वान्तः–कृत्वा। मान्तः–स्वादुङ्कारम् भुङ्क्ते स्वादुकृत्वेति, स्वादौ चेति खमुञ्? खग्रहणं दीर्घस्योपधस्येत्यर्थः। उकार उच्चारणार्थः। अस्योपधेति वृद्धिः। ह्रस्वारुषोरिति मकारागमः। सन्ध्यक्षरान्तः–कर्तवै, तवैकेकैन्यत्वा इतितवैप्रत्ययः। सत्यामव्ययसंज्ञायामव्ययाच्चेति विभक्ति लोपः।

भट्टोग्रभूति कृतायां शिष्यहितायां वृत्तौ कृत्प्रकरणे इज्वत्पादः प्रथमः।

कृत्प्रकरणे द्वितीयः पादः

• धातोः ४/२/१

अधिकारोऽयम्, यानित ऊर्ध्वम् प्रत्ययाननुक्रमिष्यामस्ते धातोः परे भवन्तीति वेदितव्यम्। यु वु झामनाकान्ता इत्यतः प्राक् अयमधिकारः।

• सप्तम्युक्तमुपपदम् ४/२/२

सप्तम्या उक्तम्, सप्तम्युक्तम्। इह धात्वधिकारे यत्सप्तम्युक्तं सप्तम्यन्तमुच्चारितं तदुपपदसंज्ञो भवति। यथा कर्मण्यण्। अत्र कर्मणीत्युपपदम्। कुम्भकारः, कुम्भंकरोतीत्यण्। अस्योपधेति वृद्धिः सत्यां कुम्भशब्दस्योपपदसंज्ञायां, तस्य तेन समास इति कार शब्देन सहसमासः। ततस्थालोप्य इत्यमो लोपः। गुरूसंज्ञाकरणं धातुना सम्बन्धे सत्युपपद संज्ञार्थम्। तेनेह न भवति यथा—हरतेर्दृतिनाथयोः पशावित्यत्र। यद्यपि सप्तम्यन्ते द्वेऽपि भवतः तथापि दृतिनाथयोरूपपदसंज्ञा, न तु पशुशब्दस्य सप्तम्यन्तस्यार्थवाचकस्य। एवं से ....तच्चोपपदसंज्ञासम्बन्धादर्थ सम्बन्धो ऽन्तरंग इत्यतो लभ्यते। उपपदसंज्ञायाः क्वप्रयोजनम्? दीर्घस्योपपदस्येत्यत्र।

• तत्प्राङ्नामचेत् ४/२/३

तदुपपदं नाम लिङ्गः यदा भवति तदा प्रागेव प्रयोक्तव्यम्। कुम्भकारः, काष्ठदाहः, कर्मण्यण्।

• तस्य तेन समासः ४/२/४

तस्य नाम्नः उपपदस्य तेन कृत् प्रत्ययान्तेन सह समासो भवति। गोदः, कम्बलदः। गां ददाति, कम्बलं ददाति इति। आतोऽनुपसर्गाड्ड इति डः। समासे सति अमो लोपः।

• नाव्ययेनानमा ४/२/५

अव्ययेन कृदन्तेन सह तस्य नाम्नः उपपदस्य प्राग्भावसमासौ न भवतः अनमा—अमन्तेन अव्ययेन तु तौ भवतः। कालोभोक्तुम्, भोक्तुंकालः।

काल समय वेलाशक्यार्थेषु इति तुमुन्। अमेति किम्? कन्यादर्शम् वरयति। दृशिर् प्रेक्षणे, दृशो णं साकल्य इति णम्, गुणः।

• तृतीयादीनां वा ४/२/६

अव्ययेन इत्येव। अनमेति निवृत्तम्, तृतीयायामुपदंशेरित्यत आरभ्य यान्युपपदानि कर्तरि कृदित्यतः प्राक् वक्ष्यन्ते तानि तृतीयादीन्युच्यन्ते। तृतीयादीनामुपपदानां कृदन्तेनाव्ययेन सह प्राग्भावसमासौ वा भवतः। मूलकेनोपदंशं भुङ्क्ते। उपदंशं मूलकेन भुङ्क्ते। मूलकोपदंशं भुङ्क्ते। दंश दंशने, मूलक उप इत्येतौ पूर्वौ तृतीयायामुपदंशेरिति णम्, समास पक्षे विभक्ति लोपः। शय्यायाः उत्त्थाय धावति, उत्त्थायशय्यायाः धावति, शय्योत्त्थायं धावति। ष्ठा गतिनिवृत्तौ शय्या उत् एतत्पूर्वौ, अपादाने परीप्सायामिति णम्, आयिरिच्यादन्तानामित्यायिः, उदःस्था स्तम्भोः पूर्वस्येति लोकोपचारात्सस्य तः।

• कृत् ४/२/७

अधिकारोयम्। इत ऊर्ध्वम् ये प्रत्ययास्ते कृत्संज्ञाः वेदितव्याः। कृत् संज्ञाया क्व प्रयोजनम्। कर्तरिकृदित्यादिषु कारकः, कर्ता, करोतीति वुणतृचौ।

• वासरूपोऽस्त्रियाम् ४/२/८

समानं रूपं यस्यापवादस्य सः सरूपः, नसरूपः असरूपः उत्सर्गेण भिन्नरूपापवादः उत्सर्गस्य वा बाधको भवति, अपवादविषयेऽपि। पक्षे उत्सर्गः प्रवर्तत इत्यर्थः। अस्त्रियां स्त्रियांक्तिरित्यत्र प्रकरणे नित्यमपवादः उत्सर्गम् बाधते। वुणतृचावुत्सर्गौ, तयोर्नाम्न्युप पृ कृ गृ ज्ञां क इत्यपवादः वुणतृचौ वा बाधते। विक्षिपः, विक्षेपकः, विक्षेप्ता, विक्षिपतीति नाम्न्युपधेति कः, वुणतृचाविति वुणतृचौ। असरूप इति किम्? कर्मण्यणीत्युत्सर्गः तस्यातोऽनुपसर्गाड्डः। ननु भिन्नरूपौ डाणौ कथं सरूपौस्याताम्? असदेतत्—नानुबन्धकृतमसारूप्यमिति वचनात्कथमनुबन्धो नाम रूपभेदं कुर्यात्। अस्त्रियामिति किम्? स्त्रियां क्तिरित्युत्सर्गः तस्यशन्सुप्रत्ययाद इत्यपवादः सःनित्यं क्त प्रत्ययं बाधते। चिकीर्षा, कर्तुमिच्छेतिशन्सु प्रत्ययाद इति करोतेश्शन्सु अकारप्रत्ययः, अस्य च लोपः, स्त्रियामादाप्।

• तव्यानीयौ धातोः ४/२/९

तव्य अनीय इत्येतौ प्रत्ययौ भवतः, आसितव्यम्, आसनीयम्। कर्तव्यम्, करणीयम्। भिदेः कर्मकर्तरि अर्थे केलिम प्रत्ययो वक्तव्यः, भिदेलिमाः माषाः, स्वयमेव भिद्यन्त इत्यर्थः। भिदेः केलिम प्रत्ययः। ककारः के यण्वदित्यर्थः। वसेः कर्तर्यर्थे तव्यद् वक्तव्यः। वसतीति वास्तव्यः।

• स्वराद् यः ४/२/१०

स्वरान्ताद्धातोः य प्रत्ययो भवति, भव्यम्, लव्यम्, भवनीयम्, लवनीयम् इति य प्रत्ययः, गुणः, ओदुदभ्यां कृद्यस्स्वरवदिति स्वरवद्भावादव्। ननु व्यञ्जनान्ताद्घ्यणं वक्ष्यतीति सामर्थ्याद् य प्रत्ययः स्वरान्तादेव भवतीति स्वरग्रहणापार्थकम्? सत्यम्—सुखार्थम् तु।

• शकिसहिपवर्गान्ताच्च ४/२/११

शकि सहिभ्यां धातुभ्यां पवर्गान्ताच्च य प्रत्ययो भवति, ऋवर्ण व्यञ्जनान्तेति घ्यण प्रत्ययः, शक्यम्, सह्यम्, गम्यम्, लभ्यम्। तकि शसि यति चतीनां ते यते। तक्यम्, शस्यम्, यत्यम्, चत्यम्। तकि कृच्छजीवने, शसु हिंसायाम्, यती प्रयत्ने, चते, चदे च याचने।

• आत्खनोरीच ४/२/१२

आकारान्ताद् धातोः खनेश्च य प्रत्ययो भवति, ईकारादेशश्च, आकारान्ताद् य प्रत्ययः सिद्धः, ईत्वार्थम् वचनम्। खनेस्तूभयं विधीयते। देयम्, पेयम्, खेयम्। डु दाञ् दाने, पा पाने, खनु अवदारणे, य प्रत्ययः। अन्त्यस्य ईत्वम्, गुणः। खनेः अवर्ण इवर्णे ए। ननु तस्यापि गुणः कस्मान्नभवति? उच्यते—अन्तरङ्गत्वादेत्वं प्रवर्तते। वहिरङ्गः गुणः। कथं वहिरङ्गः इति चेत्, प्रत्ययापेक्षत्वाददीर्घोच्चारणं वैचित्र्यार्थम्।

• यमिमदिचरिगदां त्वनुपसर्गे ४/२/१३

यम् उपरमे, मदी हर्षे, चर गत्यर्थः, गद व्यक्तायां वाचि। एषामनुपसर्गे उपसर्गस्याभावे सति य प्रत्ययो भवति। यम्यम्, मद्यम्, चर्यम्, गद्यम्। अनुपसर्ग इति किम्? प्रयाम्यम्, प्रमाद्यम्, विचार्यम्, प्रगाद्यम्। ऋवर्ण व्यञ्जनेति घ्यण्।

• चरेराङिचागुरौ ४/२/१४

आङ्युपपदे परे चरेः य प्रत्ययो भवति, अगुरौ अर्थे। अचर्यः। अगुराविति किम्? आचार्यः। घ्यण्।

• पण्यावद्यवर्यविक्रेयुगर्ह्यानिरोधेषु ४/२/१५

पण्य, अवद्य वर्य इत्येते निपात्यन्ते, यथासङ्ख्यं विक्रेय गर्ह्ययोरर्थयोः अनिरोधे गम्यमाने। निरोधः प्रतिबन्धः। पण्यम् ताम्बूलम्। पण् व्यवहार इत्यस्माद् घ्यणि प्राप्ते य प्रत्ययो निपात्यते।शतेन वर्या कन्या, सहस्रेण वर्या। वृञ् वरणे, वृङ् सम्भक्तौ इति वा। वृञ् वृ दृ जुषीति क्यपि प्राप्ते, वृङोऽपि घ्यणि च प्राप्ते य प्रत्ययो निपात्यते गुणः, स्त्रियामादाप्। विक्रेय गर्ह्यानिरोधेष्विति किम्? पण्यः, अनुद्यः वृत्यः, वार्यः। पणि वृङो ऋवर्णव्यञ्जनान्ताच्चेति घ्यञ्। वृञो वृ दृ जुषीति क्यप्। वदेर्नाम्नि वद इति क्यप्। नञः स्वरेऽक्षर विपर्ययः वर्या इति स्त्रीलिङ्गेन निर्देशात् पुंसिनिपातनाभावः। वार्याः ऋत्विजः। अस्त्यत्रानिरोधः इति निपातनाद् य प्रत्ययस्स्याद्, वर्याशब्दःस्त्रीलिंगउपात्त इत्येतत्कथमिति चेत्? व्याख्यानात्।

• वह्यं करणे ४/२/१६

वह्यं शब्दो निपात्यते करणेऽर्थे, वह्यं शकटम्, उह्यते ऽनेनेति करणाधिकरणयोश्चेति युटिप्राप्ते य प्रत्ययो निपात्यते। करण इति किम्? वाह्यम्, घ्यण्।

• अर्यस्स्वामिवैश्ययोः ४/२/१७

अर्य शब्दो निपात्यते स्वामिवैश्ययोरर्थयोः। अर्यः स्वामी, अर्यः वैश्यः ऋ गतावित्यस्माद् घ्यणि प्राप्ते य प्रत्ययो निपात्यते। स्वामि वैश्ययोरिति किम्? आर्यः।

• उपसर्या काल्या प्रजने ४/२/१८

काल्या प्रजने इति द्वे पदे, उपसर्याशब्दो निपात्यते, प्रजने–गर्भग्रहणे या काल्या–प्राप्तकाला सा चेदभिधेया स्यात्। उपसर्या

गौः। सृगतावित्यस्मादुपपूर्वादघ्यणि प्राप्ते य प्रत्ययो निपात्यते। काल्या प्रजने इति किम्? उपसार्या शरदि वाराणसी, गन्तव्येत्यर्थः।

• अजर्यम् सङ्गते ४/२/१६

अजर्यम् शब्दो निपात्यते सङ्गमनेऽर्थे कर्तरि धात्वर्थस्य चेत् सङ्गतं कर्तृस्यात्। अजर्यं नोऽस्तु सङ्गतम्। जृष् वयोहानौ, नञ्पूर्वः, न जीर्यत इति यणादिषु प्राप्तेषु य प्रत्ययो निपात्यते। सङ्गत इति किम्? अजरितः कम्बलः, न जीर्यतीति तृच्।

• *नाम्निवदः क्यप्च ४/२/२०*

अनुपसर्ग इत्यत्रानुवर्तते। उत्तरसूत्रयोश्चनाम्नि लिङ्ग उपपदे ऽनुपसर्गे सति वदेः यः प्रत्ययो भवति, क्यप् च। सत्यवद्यम्—सत्योद्यम्। वदव्यक्तायां वाचि, सत्यं वदितव्यम्, यः प्रत्ययः, क्यप्च। क्यपि परे स्वपिवचीति सम्प्र, नाम्नीति किम्? वाद्यम्, घ्यण्। अनुपसर्ग इति किम्, प्रवाद्यम्। मृषा पूर्वाद्वदेः क्यप् वेष्यते। मृषा वेदितव्यम्, मृषोद्यम्। क्यपःपानुबन्धकरणं वृदृजुषीत्येतदर्थम्। तत्रहि सूत्रे पुनः क्यप् ग्रहणमित्यादिवद् वक्ष्यते। तदस्य क्यपः पानुबन्धे सत्युपपद्यते।

• *भावे भुवः ४/२/२१*

नाम्न्युपपदे अनुपसर्गे सति भुवः भावे ऽर्थे क्यप् भवति। ब्रह्मभूयं गतः, देवभूयंगतः, ब्रह्मणो भवनं, देवस्य भवनमिति क्यप्, भावकर्मणोः कृत्यर्थेति वचनाद्भावकर्मणोरर्थयोः क्यपा भवितव्यम्। तत्र भवतेरकर्मकत्वाद् भाव एव क्यभविष्यतीतिकिं भावग्रहणेन? सत्यम्—भू प्राप्तावित्यात्मने पदस्य ग्रहणं स्मर्यते, अस्य कर्मण्यपि प्राप्नोति, कर्मणि मा भूद्, भाव एव यथास्यादिति भावग्रहणम्। भू प्राप्तावित्यस्य स्वरादित्वादिन्नन्तस्य कथं भुव इति ग्रहणं सम्भाव्यत इति चेत्? असारमेतत्—अवृथाद्वेति वचनाद् विकल्पेन अस्मादिन्नेष्यते।

• *हनस्त च ४/२/२२*

भाव इत्येव, नाम्न्युपपदे अनुपसर्गे सति हन्तेः भावेऽर्थे क्यप् भवति तकारश्चान्त्यादेशः। श्वहत्या, वृषलहत्या। शुनो हननम्, वृषलस्यहननमिति क्यप्, नस्यतः, स्वभावादेतत्स्त्रियां वर्तते। नाम्नीति किम्? घातः। भावे घञ्,

हन्तेस्तः, हस्यहन्तेर्घिः, अनुपसर्ग इति किम्? अपघातः। नन्वसति क्यपि घ्यण् प्रत्युदाहतुर्म् युक्तः। अस्त्येतत्–किन्त्वनभिधानाद् भावेऽर्थे हन्तेः घ्यण् न दृश्यते, भावइति किम्? श्वघात्योमृगः श्वभिः हन्तव्य इति ऋवर्ण व्यञ्जनान्तेति कर्मणि घ्यण्।

• वृदृजुषीण्शासुस्तुगुहां क्यप् ४/२/२३

वृ इति वृञो ग्रहणम् स्मर्यते न वृङः। वृञ् व, दृङ् आदरे जुषीप्रीतिसेवनयोः, इण् गतौ अनुशिष्टौ, गुहू स्तुतौ, गुहू संवरणे, एषां क्यप् भवति। इणस्तुभ्यां स्वरादय इति यः प्राप्तः, शेषेभ्यश्च घ्यण्। वृत्यः, आदृत्यः, जुष्यः, इत्यः, शिष्यः, स्तुत्यः, गुह्यः। क्यप्, वक्तव्याद–वश्यमो लोपः, शन्सि दुहि गुहिभ्यो वा क्यप् वक्तव्यः। शस्यम्–शंस्यम्, दुह्यम् दोह्यम्, गुह्यम्–गोह्यम्।

• ऋदुपधाच्चाक्लृपिचृतः ४/२/२४

अक्लृपि चृतेरिति समाहारे द्वन्द्वगम्ये नञ् समासः। निर्देश सामर्थ्यादृकारस्य लृकारः, ऋकारोपधाद्धातोः अक्लृपिचृतेः क्लृपिचृतिवर्जितात् क्यप् भवति। वृत्यम्, वृध्यम,। वृतुवर्तने, वृधु वृद्धौ। अक्लृपि चृतेरिति किम्? क्लृप्त्यम्, चर्त्यम्, कृपू सामर्थ्ये, चृती हिंसायाम्। शकि सहि पवर्गेति क्लृपेः य प्रत्ययः, ऋते अवर्ण व्यञ्जनान्ताच्चेति घ्यण्, गुणः, कृपो रोलः, पणि पूर्वात् समवपूर्वाच्च सृजे, क्यप् नेष्यते। पाणिसर्गः, समवसर्गः, घ्यण्, गुणः, चजोः कगाविति गः।

• भृञोऽसंज्ञायाम् ४/२/२५

भृञः असंज्ञायां विषये क्यप् भवति। भृत्यः भ्रियत इति। असंज्ञायामिति किम्? भार्या नाम क्षत्रिया, भार्या वधूः, भरणीया इति घ्यण्। ननु भार्या वधूरित्यतः कथम् यावता–समजासनिषदेत्यनेन क्यपा भवितव्यम्। असदेतत्–भावे ह्यर्थे भृञः तेन क्यप् क्रियते, भार्या वधूरित्यत्र च कर्म रूपोऽर्थः प्रतीयते, तत्कथं शक्यस्स्यात् संपूर्वात् भृञो क्यबिष्यते। संभृत्या, संभार्या पक्षे घ्यण्।

• ग्रहोऽपिप्रतिभ्याम् ४/२/२६

अपिप्रतिभ्यां परस्मात् ग्रहेः क्यप् वा भवति। अपिग्रह्यम् अपि–ग्राह्यम्, प्रतिगृह्यम्, प्रतिग्राह्यम्।

• पदपक्ष्ययोश्च ४/२/२७

पदे पक्ष्ये चार्थे ग्रहे क्यप् भवति, प्रगृह्यं पदम्, यस्य स्वरेण सन्धिर्नास्ति। वासुदेवगृह्या, वासुदेवपक्ष्या इत्यर्थः। अस्वैरिवाह्ययोरप्यर्थयोरिष्यते, अस्वैरी परतन्त्रः, गृह्याः परतन्त्रा इत्यर्थः। ग्रामगृह्या सेना, ग्रामाद्वाह्येत्यर्थः।

• वौनीपूङ्भ्यां कल्कमुञ्जयोः ४/२/२८

वौ–विशब्दे उपपदे नी पूङ् इत्येताभ्याम् क्यप् भवति यथा सङ्ख्यम् कल्कमुञ्जयोः। विनीयः, विपूयः। कल्कमुञ्जयोरिति किम्? विनेयः, विपोयः। स्वरादयः। ओदुदभ्यां कृदय इति स्वरवदिति।

• कृ-वृ-मृजां वा ४/२/२९

डु कृञ् करणे, वृषु सेचने, मृजूष् शुद्धौ, एषां क्यप् भवति। करोतेः घ्यञ् प्राप्तः इत्यनयोस्तु ऋदुपधायाश्चेति नित्यं क्यप्। कृत्यम्, कार्यम् वृष्यम्, वार्ष्यम्, मृज्यम्, मार्ज्यम्। मृजः घ्यणि, मर्ज्जोमार्जिरिति मार्जिरादेशः। इकार उच्चारणार्थः। कगाविति गः।

• सूर्यरुच्याव्यथ्याः कर्तरि ४/२/३०

सूर्य रूच्य अव्यथ्य एते निपात्यन्ते कर्तर्यर्थे। वुणादीनां बाधः। सूर्यः। षू प्रेरणे, सुवति लोकमिति क्यप् निपात्यते, रेफागमश्च, सृ गतावित्यस्य वा, धातो ऊरादेशः, सरति भुवनमिति सूर्यः, रूच्यः, रूच दीप्तौ, रोचते इति क्यप् निपात्यते। अव्यथ्यः। व्यथ भयचलनयोः, नञ्पूर्वः। न व्यथत इति क्यप्।

• भिद्योद्ध्योनदे ४/२/३१

कर्तरीत्येव। भिद्य उद्ध्य एतौ निपात्येते नदः कर्तर्यर्थे। भिनत्ति कूलमिति क्यप्। उद्ध्यः। उज्झति उदकमिति क्यप्। जझकारयोर्यथाक्रमं दत्वधत्वे। नद इति किम्? भेत्ता, उज्झिता, तृच्।

● पुष्यसिद्धौ नक्षत्रे ४/२/३२

एतौ निपात्येते नक्षत्रे ऽर्थे। पुष्यः, सिध्यः। पुष्, पुष्टौ, सिधु संराद्धौ पुष्यन्ति अस्मिन्नर्थाः, सिद्ध्यन्ति अस्मिन्नर्थाः इत्यधिकरणे युटि प्राप्ते क्यप् निपात्यते। नक्षत्र इति किम्? पोषणः, सेधनः, युट्।

● युग्यं च पत्रे ४/२/३३

युग्यशब्दो निपात्यते पत्रेऽर्थे। पत्रं वाहनम्। युग्योऽश्वः। युजेः क्यपृगत्वं च। पत्रे इति किम्? योग्यो ब्राह्मणः। घ्यण्। चजोः कगावितिगः।

● कृष्टपच्यकुप्ये संज्ञायाम् ४/२/३४

कृष्टपच्यकुप्यौ निपात्येते संज्ञायाः विषये। कृष्टपच्याःशालयः। कृष्ट पूर्वात् पचे क्यप्। कुप्यम्। गुपू रक्षणे अस्मात् क्यप्, गस्य कत्वश्च। सुवर्णरजताभ्यां यदन्यत् तत् कुप्यम्। संज्ञायामिति किम्? कृष्टपाक्यः, गोप्ता, घ्यण्, य प्रत्ययः।

● अमावस्या वा ४/२/३५

अमावास्याशब्दो निपात्यते। वा ग्रहणेन च वसे रूपधायाः दीर्घो विकल्पते इत्याहुः अमावास्या वा अमावस्या। वसनिवासे अमा पूर्वः। अमाशब्दस्सहार्थे, तेन सह वसतश्चन्द्रार्कौ, तत्र अमा। अमावास्या, क्यप् निपात्यते, दीर्घश्च, सम्प्रसारणाभावश्च निपात्यते।

● ऋवर्णव्यञ्जनान्ताद्घ्यण् ४/२/३६

द्वन्द्वगर्भो बहुव्रीहिः, ऋवर्णान्तादधातोः व्यञ्जनान्ताच्च घ्यण् भवति। कार्यम्, तार्यम्, डुकृञ् करणे तृ प्लवन तरणयोः। कर्तव्यम्, तरितव्यम् इति घ्यण्, वृद्धिः, पाक्यम्, वाक्यम्। डुपुचष् पाके वच भाषणे, घ्यण्, चजोः कगाविति गः, अस्योपधेतिदीर्घः। आङ्पूर्वात् क्रमेः घ्यणिष्यते। आक्राम्यः, शकिसहीति य प्रत्ययः प्राप्तः।

• आसुयुवपिरपिलपित्रपिदभिचमीनाञ्च ४/२/३७

आङ् पूर्वात् सुनोतेः, युमिश्रणे, डुवप् वीज सन्ताने, रप लप व्यक्तायां वाचि, त्रपूष् लज्जायां–दभ्भु दम्भे, चमू अदने। एषां घ्यण् भवति, स्वराद्यः, शकिसहीति य प्रत्ययः। आसव्यम्, याव्यम्, वाप्यम्, राप्यम्, लाप्यम्, त्राप्यम्, दाभ्यम्, आचाम्यम्, दम्भेः कृत नलोपस्यैवोपोदानात् घ्यणि परेऽनुषङ्गलोपः। आङ्ग्रहणेन सुनोतिस्सम्बध्यते नान्यः आङिति निर्देशस्याकरणात्।

• उवर्णादावश्यके ४/२/३८

अवश्यमित्यस्य भावः, आवश्यकम्, अवश्यशब्दात् प्रकीर्तितग्रहणात् अकण्, अन्त्यस्वरादिलोपश्च, उवर्णान्ताद्धातोः आवश्यके सति घ्यण् भवति। लाव्यम्, पाव्यम्, अवश्यलाव्यम्, अवश्यपाव्यम्। लूञ् छेदने, पूङ् पवने, घ्यण्, वृद्धिः, ओदुद्भ्यां कृद्यस्स्वरवदिति स्वरवद्भावाद् आव्। वक्तव्यादवश्यमो मलोपः। आवश्यक इति किम्? लव्यम्, पव्यम्, स्वराद् य इति स्वरवद्भावादय्, कृत्यप्रत्यये सति अवश्यमो म लोपो वक्तव्यः अवश्यकार्यम्, अवश्यगन्तव्यम्, अवश्य कर्तव्यम्। कृत्य प्रत्यय इति किम्? अवश्यं गन्ता, तृच्। काममनसोस्तु परयोः म लोपः गन्तुं कामो यस्य सः गन्तुकामः। एवं कर्तुमनः।

लुम्पेदवश्यमः कृत्ये तुम् काममनसोरपि
समोवा हिततयोःमांसस्य पचि युड्घञोः।

काल समय वेलाशक्यार्थेष्वितिशब्दात् तुम्, हिततयो परयोस्समो वा, सहितः–संहितः, सततम्–संततम्, संधीयतेस्स्म, संतन्यतेस्मेति, क्तः दधातेर्हिः। वनति तनोत्यादि इति पञ्चम लोपः। पाक पचनयोः परयोः मांसस्यान्त लोपो वा वक्तव्यः, मांसस्य पाकः मांस्पाकः–मांसपाकः। मांसस्य पचनम्, मांस्पचनम्–मांसपचनम्। एतत्सर्वम् समास विषय इत्याहुः।

• पाथोन्मानसामिथेन्योः ४/२/३९

पा धा इत्येतयोः घ्यण्भवति, यथाक्रमं मानेऽर्थे सामिधेन्याञ्च। पाय्यम् मानम्, धाय्या सामिधेनी। मान सामिधेन्योरिति किम्? पेयम्, धेयम्, स्वराद्यः, आत्खनोः रीचेतीत्वम्, गुणः।

- **प्राङोर्नियोऽसम्मतानित्ययोस्स्वरवत् ४/२/४०**

प्र आङ् इत्येतयोरूपपदयोः णीञ् प्रापणे इत्येतस्माद् घ्यण् भवति, यथासंख्यम् असम्मते अनित्येच, सः घ्यण् स्वरवद्भवति। प्रणाय्यः असम्मत इत्यर्थः। आनाय्यः अनित्य इत्यर्थः। स्वरवद्भावादयादेशः। यद्यप्यनित्य इति सामान्येनोपात्तं तथापि दक्षिणाग्नावेवानित्ये प्रत्ययोऽयमिष्यते न तु सर्वस्मिन्ननित्ये। दक्षिणाग्नेरनित्यं कथमितिचेत्? नित्यं प्रजागरणात्। असम्मतानित्ययोरिति किम्? प्रणेयः, आनेयः, स्वराद्यः।

- **संचिकुण्डपः क्रतौ ४/२/४१**

स्वरवदित्येव, संपूर्वात् चितेः, कुण्डपूर्वात् पिबतेः क्रतावभिधेये घ्यण् भवति स च स्वरवत्। संचाय्यः, कुण्डपाय्यः। स्वरवद्भावाच्चिनोतेः आय्। क्रताविति किम्? संचेयः, कुण्डपेयः। स्वराद् यः, आत्खनो री चेतीत्वम्।

- **राजसूयश्च ४/२/४२**

अयं शब्दो निपात्यते क्रतावभिधेये। राजसूयः। राजपूर्वात् सुनोतेः घ्यण् दीर्घश्च।

- **सांनाय्यनिकाय्यौ हविर्निवासयोः ४/२/४३**

एतौ निपात्येते हविष्यर्थे निवासे च। सांनाय्यं, नयतेः सम् पूर्वात् घ्यण् आयादेशश्च, उपसर्गदीर्घः। निकाय्यः, चिनोतेः, नि पूर्वादघ्यण्, आयादेशः, कत्वञ्च। हविर्निवासयोरिति किम्? संनेयः, निचेयः।

- **परिचाय्योपचाय्यावग्नौ ४/२/४४**

इत्येतौ निपात्येते, अग्नावर्थे, परिचाय्यः, उपचाय्यः। परि–उपपूर्वात् चिनोतेः, घ्यण्, आयादेशश्च। अग्नाविति किम्? परिचेयः, उपचेयः,।

• चित्याग्निचित्ये ४/२/४५

चित्यः अग्निचित्य इत्येतौ निपात्येते अग्नौ विषये, चित्यः, चीयत इति चिनोतेः घ्यण् तकारागमो, गुणाभावश्च। अग्निचित्यः अग्नेश्चयनमिति तदेव घ्यण् निपात्यते। भावेऽर्थे निपातनमेतत्।

• तवैकेकेन्यत्वात् ४/२/४६

धातोः तवै के केन्य त्व, एते प्रत्ययाःभवन्ति। तवै–परिधातवै। के–अवगाहे, गाहूविलोडने। केन्य–शुश्रुषेण्यः, श्रुवस्सन्नन्तात् केन्यप्रत्ययः अस्य च लोपः। त्व–कत्वः छन्दोविषय एवैते प्रत्यया इत्याहुः।

• तेकृत्याः ४/२/४७

तच्छब्देन तव्य, अनीय, क्यप्, य, घ्यण्, तवै, के, केन्य त्व इत्येते परामृश्यन्ते। ते तव्यादयः कृत्यसंज्ञाः भवन्ति। कृत्य संज्ञायाः क्व प्रयोजनम्? भावकर्मणोः कृत्यर्थे इत्यत्र। कर्तव्यम्, करणीयम्,। तव्यादयः कृत्यत्वादभावे कर्मणि चार्थे भवन्ति।

• वुण्तृचौ ४/२/४८

धातोः वुण् तृच् इत्येतौ प्रत्ययौ भवतः, करोतीति कारकः, कर्ता। पचतीति पाचकः, पक्ता। यु वु झामिति वोरकारादेशः, तृचः चकारः धातोस्तृ शब्दस्यार् इत्यत्र तृचो ग्रहणार्थः असति चकारे निरनुबन्धत्वग्रहणे न सानुबन्धत्वस्येति वचनात् तृ प्रत्ययस्यैव ग्रहणम् स्यान्नतृचः।

• अच्पचादिभ्यश्च ४/२/४९

पचादिभ्यो धातुभ्य अच् प्रत्ययो भवति, नामगणमध्ये पच तप इत्यादयो ये शब्दाः पठ्यन्ते तेभ्यः धातूनुदधृत्य प्रकृतित्वेनात्र निर्दिश्यन्ते। धातुपाठस्थितास्तु न गृह्यन्ते पचादयः। इतरथा हि नामगणमध्ये पचादीनां पाठो निरर्थकस्स्यात्। एवमुत्तरसूत्रयोरपि नन्द्यादिग्रहादी गृह्येते। पचतीति पचः, पठः, पतः, वदः, भवः। पच पठ, पत, वद, भव, सूदद् गाहद्, चोरद्, देव, सेव, मेष, सर्प ...श्वपच्, जारभार, भर इत्यादयो पचादयः। आकृतगणोऽयम्।

• नन्द्यादेर्युः ४/२/५०

नन्द्यादेः धातुगणात् यु प्रत्ययो भवति, नन्दि, वासि, मदि, दूषि साधि वर्धि शोभिन रोचिभ्यः इन्नन्तेभ्य एव यु प्रत्ययो भवति। इन्नन्तानां ह्येषां नन्द्यादीनां नामगणे पाठःस्मर्यते। नन्दनः, वासनः, मदनः, दूषणः, साधनः, वर्धनः शोभनः, रोचनः। टुनदि समृद्धौ, वाश्रृ शब्दे, मदी हर्षे, दुष् वैकृत्ये, राधसाध संसिद्धौ, वृधु वृद्धौ, शुभ दीप्तौ, रूच दीप्तौ। नन्दन्तं प्रयुङ्क्ते, एवं वाशमानं, माद्यन्तं, दुष्यन्तम्, साधनवन्तम्, वर्धमानम्, शोभमानम्, रोचमानम् इति इन्, मानुबन्धानां ह्रस्वः। दुषेः कारित इति दुषे ऊत्वम्। नन्दयतीत्यादि वाक्ये कृते अनेन युः, अनादेशः, कारितलोपः। एव सहनः, तपनः, दमनः, षह मर्षणे, तप सन्ताने दमु उपशमे, सहते, तपति दाम्यतीति युः। नन्दि, वाशि, मदि, दुषि, साधि, वर्धि, शोभि, सहन, तपन, दमन, जल्पन्, तर्षण, (तर्दण) रमण, सङ्क्रन्दन, यवन, लवण, इत्याद्या नन्दयादयः। आकृतिगणोऽयम्। तेन विकरोतीति विकरणः।

• ग्रहादेर्णिनिः ४/२/५१

ग्रहादेर्धातुगणात् णिनि प्रत्ययो भवति। ग्राही, उत्साही, उद्भासी। ग्रह उपादाने, षह, मर्षणे, भासृ दीप्तौ, उत्पूर्वः, गृह्णाति, उत्सहते, उद्भासते, इति णिनिः, इकार उच्चारणार्थः, णकार इज्वद्भावार्थः। ग्रह, उत्साह, उद्भास, मन्तृ, संमर्द, निरक्ष, संव्यवहार, अध्याहार, अयाच, अभ्राज अव्राज, इत्याद्यः ग्रहादयः, स्वरान्तादचित्तवत्कर्तृकादिति ग्रहादि मध्ये सूत्रे पठ्यते, अस्यायमर्थः, स्वरान्ताद्धातोः अचित्तवत्कर्तृकात् यस्य चित्तवत्कर्ता न भवति तस्मात् णिनिर्भवति। अकारी घर्मस्य बालातपः। न करोतीति णिनिः, बालातपोऽत्र कर्ता, सः च अचित्तवान्।

• नाम्युपधप्रीकृगृज्ञां कः ४/२/५२

नाम्युपधा यस्य स नाम्युपधः, ततो द्वन्द्वः, नाम्युपधाद्धातोः प्रीञ् तर्पणे, प्रीङ् प्रीतौ, इति। कृ विक्षेपे, गृ निगरणे, ज्ञा अवबोधने, इत्येतेभ्यश्च क प्रत्ययो भवति। विक्षिपः, विलिखः। क्षिप प्रेरणे, लिख अवलेखने। विक्षिपति, विलिखति, इति कः, प्रीणाति, प्रियत इति वा, प्रियः, स्वरादाविवर्णेति इयू, किरतीति किरः, गिरतीति गिरः, जानातीति ज्ञः।

• मूलविभुजादिभ्यश्च ४/२/५३

मूल विभुज इत्येतदादिभ्यः कः प्रत्ययो भवति। मूलविभुजः काक–गुहः, कुमुदम्। भुजो कौटिल्ये, गूहू संवरणे, मुदहर्षे। मूलानि विभुजति, काकेभ्यो गूहति, कौ मोदते इति कः। गुहेःकर्मणि प्रत्ययं स्मरन्ति। मूल विभुजादिराकृतिगणः तेन स्त्रियामाचष्टे स्त्र्याख्यः। चक्षिङः ख्याञादेशे कृते क प्रत्ययः।

• उपसर्गेत्वातो डः ४/२/५४

उपसर्गे उपपदे आतः आकारान्ताद् धातोः डः प्रत्ययो भवति। सुग्लः, सुम्लः ग्लै हर्ष क्षये, म्लै गात्रविनामे, शोभनं ग्लायति, शोभनं म्लायति इति ड प्रत्ययः प्रत्ययान्तरकरणं ह्वयतेस्सम्प्रसारणाभावार्थम्। आह्वः, प्रह्वः। यदेवं प्रत्ययः तदा स्वपि वचि इति सम्प्रसारणे उवादेशे च कृते आहुवः प्रहुवः इत्यनिष्टं रूपं न भवेत्।

• धेट्-दृशि-पा-घ्रा-ध्मः शङ् ४/२/५५

उपसर्गे उपपदे धेट् पाने, घ्रा गन्धोपादाने, ध्मा शब्दे, इत्येतेभ्यः शङ् प्रत्ययो भवति। उद्धायः, उत्पश्यः, उत्पिवः, उज्जिघ्रः, उद्धमः, उद्धयतीति वाक्ये, कृते शङ्, अन्वि, असन्ध्यक्षरलोपः। उपसर्ग इति किम्? धाता। कथं पश्यः? कृत्ययुटोऽन्यत्रापीति वचनात्। जिघ्रतेस्संज्ञायां नेष्यते–व्याजिघ्रतीति व्याघ्रः। उपसर्गेत्वातो डः।

• साधिसाहिसातिचेदयुदेजिवेदिधारिपारिलिम्पविन्दात्वनुपसर्गे ४/२/५६

साध संसिद्धौ, षह मर्षणे, सातिस्सौत्रः चिती संज्ञाने, एजृ कम्पने, उत्पूर्वः, विदिः सामान्यः, धृङ् अनवस्थाने, इन्नन्तः, पारतीर कर्मसमाप्तौ, पृ पालन पूरणयोः इति वा। लिप उपलेपे, विद्लृ लाभे, अनयोर्मुचादित्वात्कृत नकारागमयोः, लिम्पविन्द इत्येतावनुकरणौ, एषां साध्यादीनामिन्नन्तानां लिम्पविन्दोश्चानुपसर्गे सति शङ्। साधयः, साहयः, सातयः, चेतयः, उदेजयः, वेदयः, धारयः, पारयः, लिम्पः, विन्दः। साध्नुवन्तं प्रयुङ्क्ते, एवं

सहमानम्, सातन्तं सतन्तं वा, चेतन्तम्, उदेजन्तम्, विदन्तम्, ध्रियमाणम्, पिप्रुतं, पिपूरतमिति वा इन्, पारयतीत्यस्मात्स्वरादित्वात् इन्, शङ्, अन्वि, गुणः। लिपिविदोः मुचादिरागमो नकारः। अनुपसर्ग इति किम्? प्रलिपः, नाम्युपधेति कः।

• दाञ्धाञोर्वा ४/२/५७

दाञ्धाञोरनुपसर्गे सति शङ् वा भवति, दिहि लिहीति णस्यापवादः। ददः, दधः, डुदाञ् दाने, डुधाञ् दानधारणयोः, शङ्, अन्वि, जुहोत्यादेश्च लुक्, जुहोत्यादीनामिति द्विर्व, अभ्यस्तानामाकारस्येत्यालोपः, पक्षे–दायः, धायः, दिहि लिहीति ण प्रत्ययः। अनुपसर्ग इति किम्? प्रलिपः। नाम्युपधेति कः।

• ज्वलादि दुणीभ्यो णः ४/२/५८

ज्वलादिभ्यः कस गतावित्येतदन्तेभ्यः, टु दु उपतापे, णीञ् प्रापणे इत्येताभ्यामनुपसर्गे वा प्रत्ययो भवति। ज्वालः–ज्वलः, चालः–चलः, पक्षे अच् प्रत्ययः। दायः, नायः अनयोर्नित्यं ण प्रत्ययः, अनुपसर्ग इति किम्? प्रज्वलः, अच्।

• समाङ्गो श्रुवः ४/२/५९

वेति निवृत्तम्, समाङ्गोरूपपदयोः, श्रूगतावित्यस्य ण प्रत्ययो भवति, संस्रावः आस्रावः। समाङोरिति किम्? श्रवः, अच्।

• अवे हृषोः ४/२/६०

अव शब्दोपपदे हृञ् हरणे, षोऽन्त कर्मणि इत्येताभ्यां ण प्रत्ययो भवति, अवहारः, अवस्यतीत्यवसायः।

• दिहिलिहिश्लिषिश्वसिव्यध्यतीणवश्यताञ्च ४/२/६१

दिह उपदेहे, लिह् आस्वादने, श्लिष् आश्लेषे, श्वस् प्राणने, व्यध ताडने, इण् गतौ, अति पूर्वः, श्यैङ् गतौ अवपूर्वः, एभ्यः आदन्तेभ्यश्चानुपसर्गे सति ण प्रत्ययो भवति। दिहि मिहि श्लिषीणां नाम्युपधेति क प्रत्ययः प्राप्तः अवश्यायते, उपसर्गे त्वातो डः इत्ययं प्राप्तः, शेषाणामप्यच्। देहः, लेहः, श्लेषः ,श्वासः, व्याधः, अत्यायः, अवश्यायः, दायः,

धायः, देग्धि, लेटि, श्लिष्यति, श्वसिति, विध्यति, अत्येति, अवश्यायते, ददाति, दधातीति गुणः। अनुपसर्ग इति किम्? प्रदहः। नाम्युपधेति कः।

• ग्रहेर्वा ४/२/६२

ग्रहेः गेहेऽर्थे अक् प्रत्ययो भवति। गेहम्, वेश्म। गृहं गृहं गृह्णाति इति अक्। ग्रहिज्येति सम्प्र, गृहस्थिताः दाराः गृहशब्देनोच्यन्ते। यथा–मञ्चाः क्रोशन्तीति।

• शिल्पिनिवुष् ४/२/६३

धातो शिल्पिन्यर्थे वुष् भवति, नृति, खनि, रञ्जिभ्य एव प्रत्ययं स्मरन्ति, नर्तकः–नर्तकी, खनकः–खनकी, रजकः–रजकी। नर्तनं शिल्पमस्यास्तीति विग्रहे कृते वुष्, षकारः इकारार्थः, युवुझामित्यकादेशः वुषिणिनोश्चेति रञ्जेः पञ्चम लोपः। षडनुबन्धात्त्वी इतीकारः।

• गस्थकः ४/२/६४

कै गै शब्द इत्यस्माच्छिल्पिन्यर्थे थक् प्रत्ययो भवति। गानं शिल्पमस्य गाथकः। शिल्पिनीति किम्? गाता, तृच्।

• ण्युट् च ४/२/६५

गायतेः शिल्पिन्यर्थे ण्युट् प्रत्ययो भवति, गायनः, ण्युट्, यु वु झामित्यनादेशः। आयिरिच्येत्यायिः। योगविभागः उत्तरार्थः।

• ह कालव्रीह्योः ४/२/६६

ह इति ओहाक् त्यागे, ओहाङ् गताविति वा। ह धातोः काले व्रीहौ चार्थे ण्युट् भवति। जिहीते, गच्छति इति वा, हायनः व्रीहिविशेष उच्यते। कालव्रीह्योरिति किम्? हाता, तृच्। ओ हाक् कानुबन्धग्रहणं ओहाङ् परिग्रहार्थम्। ककारे ह्यसति त्यागार्थस्यैव ग्रहणं स्यात् न तु गत्यर्थस्य एकानुबन्धग्रहणे न द्व्यनुबन्धकस्येति वचनात्।

• आशिष्यकः ४/२/६७

आशिषि गम्यमानायां धातोः अक् प्रत्ययो भवति। जीवतात् जीवकः। पठतात् पाठकः, नन्दतात् नन्दकः। आशिषीति किम्? जीविता।

• प्रूसृल्वां साधुकारिणि ४/२/६८

प्रू गतौ, सृगतौ, लूञ् छेदने, एषां क प्रत्ययो भवति साधुकारिणि कर्तर्यर्थे। साधु प्रवत इति प्रवकः, एवं सरकः, लवकः, साधुकारिणीति किम्? प्रोता।

भट्टोग्रभूति कृतायां शिष्यहितायां वृत्तौ कृत्प्रकरणे

द्वितीयः पादः।

कृत्प्रकरणे तृतीयः पादः

● कर्मण्यण् ४/३/१

कर्मण्युपपदे धातोः, अण् प्रत्ययो भवति। कुम्भकारः, काष्ठदाहः, वेदाध्यायः कुम्भं करोतीति, काष्ठानि दहति, वेदमधीते इत्यण् अस्योपधेति वृद्धि दीर्घौ। ग्रामं गच्छति, आदित्यं पश्यति, हिमवन्तं न शृणोति। इत्यत्र न भवति, अनभिधानात्।

● ह्वावामाश्च ४/३/२

कर्मण्युपपदे ह्वेञ् स्पर्धायाम्, वेञ् तन्तु सन्ताने, मा इति सामान्यः एभ्य अण् भवति। आतोऽनुपसर्गाड्डः इत्ययं प्राप्तः। स्वर्गह्वायः, तन्तुवायः, धान्यमायः। स्वर्गम् ह्वयति, तन्तुं वयति, धान्यं मिमीत इत्यण्।

● शीलिकामिचरिभक्षिभ्यो णः ४/३/३

शील उपधारणे, स्वरादित्वादिन्नन्तः, कमु कान्तौ, चर भ, भक्ष अदने, एभ्यः कर्मण्युपपदे ण प्रत्ययो भवति। मांसशीलः, धर्मकामः, कल्याणचारः, सर्वभक्षः। मांसंशीलयते, धर्मम् कामयते, कल्याणमाचरति, सर्वम् भक्षयतीति णः, कारितलोपः। प्रत्ययान्तरकरणं स्त्रियामी प्रत्यय भावार्थम्। अणि हि सति अण्येकादिति ई प्रत्ययस्स्यात्। मांसशीला, कर्मण्युपपदे ईक्षि क्षमिभ्यां णोवक्तव्यः। सुखप्रतीक्षा, बहुक्षमा, सुखं प्रतीक्षते, बहु क्षाम्यतीति णः। स्त्रियामादाप्।

● आतोऽनुपसर्गाड् डः ४/३/४

कर्मण्युपपदे आकरान्ताद्धातोः अनुपसर्गात् ड प्रत्ययो भवति। कर्मण्यण् इत्यण् प्राप्तः। गोदः, कम्बलदः, गां ददाति, कम्बलं ददाति, इति डः। अनुपसर्गादिति किम्? वडवासंदायः। वडवां सन्ददातीति कर्मण्यण्।

● नाम्निस्थश्च ४/३/५

ड इत्येव नाम्नि उपपदे, तिष्ठतेः ड प्रत्ययो भवति। समे तिष्ठतीति समस्थः एवं विषमस्थः, यत्रस्थः, तत्रस्थः। सर्वस्मादाकारान्ताद्धातोः

नाम्न्युपपदे तिष्ठतेः ड प्रत्ययं केचिदिच्छन्ति, तेन कच्छेन पिवतीति कच्छपः, द्वाभ्यां पिवति द्विपः, पादेन पिवति पादपः।

● प्रेदाज्ञः ४/३/६

कर्मणीत्येव, प्रशब्द परे कर्मण्युपपदे दा ज्ञा इत्येताभ्यां ड, प्रत्ययो भवति। प्रपा, प्रदा। पथि प्रज्ञाः प्रपां प्रददति, पन्थानं प्रजानाति इति डः, व्यञ्जने चैषां निरिति पन्थिशब्दस्य न लोपः। इति किम्? प्रपासंदायः, प्रपां संददातीति—कर्मण्यण्।

● समिख्यः ४/३/७

संशब्दे परे कर्मण्युपपदे ख्या इत्येतस्मात् ड प्रत्ययो भवति। ख्या इति चक्षिङःख्याञादेशो गृह्यतेः न तु ख्या प्रथन इति, अकर्मकत्वात्। गोसंख्यः, चक्षिङः ख्याञादेशः ततो गाम्संचष्टे इति डः एवमश्वसंख्यः।

● गष्टकः ४/३/८

अनुपसर्गादित्येव कर्मण्युपपदे अनुपसर्गात् कै गै इत्येतस्मात् टक् प्रत्ययो भवति, आतोऽनुपसर्गाड्ड इत्येतस्य बाधः। सामगः सामगीः, सामानि गायतीति टक्, आलोपो सार्वधातुक इत्यालोपः एवं मधुरगः, मधुरगीः, अनुपसर्गादिति किम्? सामसंगायः, साम गायतीत्यण्।

● सुराशीध्योः पिबतेः ४/३/६

अनुपसर्गात् पिबतेः टक् भवति, सुराशीः, कर्मणोरूपपदयोः, सुरां पिबतीति सुरापः, सुरापी, शीधुपः, शीधुपीः सुरासीध्वोरिति किम्? क्षीरपा स्त्री आतोऽनुपसर्गाड्डः। पिबतेरिति किम्? सुरां पातीति सुरापः वृषली, पा रक्षणे पूर्ववदातोऽनुपसर्गेति डः, अनुपसर्गादिति किम्? सुराप्रदायः, अण्।

● हृञोऽज्वयोऽनुदयमनयोः ४/३/१०

कर्मण्युपपदे अनुद्यमने अनुत्क्षेपणे वर्तमानात् हृञ् हरणे एतस्माद अच् भवति। वयसि गम्यमाने पृथक् वयो ग्रहणमुद्यमनेऽपि यथास्यात् अनुद्यमने तावत् अंशंहरतीति अंशहरः, रिक्थहरः, वयसि—अस्थिहरः श्वा, कवचहरः क्षत्रियकुमारः।

• आङि ताच्छील्ये ४/३/११

सः धात्वर्थः शीलं स्वभावः यस्यकर्तुः सः तच्छीलः, तस्य ताच्छील्यम्, आङि परे कर्मण्युपपदे कृञः अच् भवति ताच्छील्ये गम्यमाने। फलनिरपेक्षा प्रवृत्तिः ताच्छील्यम्। पुष्पाण्याहरतीति पुष्पाहरः। ताच्छील्य इति किम्? भारमाहरतीति भाराहारः, अण्?

• अर्हश्च ४/३/१२

आङि ताच्छील्य इति निवृत्तम्, कर्मण्युपपदे अर्हतेः अच् भवति। पूजामर्हतीति पूजार्हः, अणासिद्धत्वाद् योगारम्भः स्त्रियां विशेषार्थः। स्तम्बकर्णयोरूपपदयोः यथासङ्ख्यं रमिजपिभ्यामच् इष्यते हस्ति सूचकयोः। स्तम्वे रमतीति स्तम्वेरमः, कर्णे जपतीति कर्णेजपः।

• धृञः प्रहरणे चादण्डसूत्रयोः ४/३/१३

प्रहरणे कर्मण्युपपदे दण्डसूत्रवर्जिते धृङ् अनवस्थान इत्यस्मात् अच् भवति, व्रज्रंधारयतीति वज्रधरः, चक्रधरः, गदाधरः, इन्नार्थम् प्रयोज्यप्रयोजक भावमन्तर्भाव्य केवलस्यापि धृञो धारयतीति वाक्यं क्रियते अन्यथा ह्यर्थस्यासङ्गतिस्स्यात्। कौ पुनरत्र प्रयोज्यप्रयोजकावितिचेत्? ब्रूमः। वज्रं ध्रियते स्वरूपेणावतिष्ठते, तदवतिष्ठमानं यः प्रयोजयति सः प्रयोजकः वज्रं तु प्रयोज्यम्। अदण्डसूत्रयोरिति किम्? दण्डधारः, सूत्रधारः। सूत्रस्याप्रहरणस्यापि प्रतिषेधकरणाज्ज्ञायते धृङः क्वचिदप्रहरणे भवत्यजिति च। तेन जटाधरः, भूमिधरः।

• धनुर्दण्ड त्सरू लाङ्गूलाङ्कुशर्ष्टिशक्तितोमरेषु ग्रहेर्वा ४/३/१४

धनुष्, दण्ड, त्सरू, लाङ्गूल, अङ्कुश, ऋष्टि, शक्ति, तोमर, इत्येतेषु कर्मसु उपपदेषु ग्रहेः अच् भवति, समुच्चये वा शब्दः, धनुर्गृह्णातीति धनुर्ग्रहः, एवं दण्डग्रहः, लाङ्गूलग्रहः, अङ्कुशग्रहः, ऋष्टिग्रहः, शक्तिग्रहः, तोमरग्रहः, घटीघटयोरप्यजिष्यते—घटीग्रहः, धटग्रहः।

• सं पूर्वेभ्यस्संज्ञायाम् ४/३/१५

सं शब्दः पूर्वो येभ्यः धातुभ्यः ते संपूर्वाः, संपूर्वेभ्यो धातुभ्यः संज्ञाया विषये अच् भवति, सङ्करः, संवादः समिसंज्ञायामिति कर्तव्ये पूर्वग्रहण वैचित्र्यार्थम्। अधिकरणे उपपदे शीङ अच् भवति, खेशेते इति खशयः, एवं विलशयः पार्श्वादिषु करणेषूपपदेषु शीङः अच् इष्यते। पार्श्वाभ्यां शेते पार्श्वशयः उदरेण शेते उदरशयः। उत्तानादिषु कर्तृषु उत्तानश्शेते उत्तानशयः अवमूर्ध्नाशेते अवमूर्ध्नशयः।

• चरेष्टः ४/३/१६

अधिकरण उपपदे चरेः ट प्रत्ययो भवति। कुरूषु चरतीति कुरूचरः, मद्रेषु चरतीति मद्रचरः। प्रत्ययान्तकरणं स्त्रियामीकारार्थम्। कुरूचरी।

• अन्यत्रापि च ४/३/१७

अन्यस्मिन्नप्युपपदे परे ट प्रत्ययो भवति, भिक्षांचरतीति भिक्षाचरः सेनया चरतीति सेनाचर, आदायचरतीति आदायचरः। एष्वेवोपपदेषु ट प्रत्ययं स्मरन्ति।

• पुरोऽग्रतोऽग्रेषु सर्तेः ४/३/१८

पुरस्, अग्रतस्, अग्रे इत्येतेषूपपदेषु सृ गतावित्यस्मात् ट प्रत्ययो भवति। पुरस्सरतीति पुरस्सरः, एवमग्रतस्सरः, अग्रेसरः, अग्रेशब्दोऽव्ययम्।

• पूर्वे कर्तरि ४/३/१९

पूर्व शब्दे कर्तर्युपपदे सर्तेः ट प्रत्ययो भवति, पूर्वस्सरतीति पूर्वसरः कर्तरीति किम्? पूर्वदिशं सरतीति पूर्वसारः, अण्।

• कृञो हेतुताच्छील्यानुलोमेष्वशब्दश्लोककलह गाथावैरचाटुसूत्रमन्त्रपदेषु ४/३/२०

शब्दादि वर्जिते कर्मण्युपपदे कृञः ट प्रत्ययो भवति, हेतोः ताच्छील्ये अनुलोम्ये चं गम्यमाने। फल साधने योग्यः पदार्थो हेतुः। फलनिरपेक्षा प्रवृत्तिः ताच्छील्यम्। आनुलोम्यमनुकूलता। हेतौ तावत् विद्यायशस्करी, यशः करोतीति टः, यशसस्सकारस्य विसर्गः, अनव्यय

विसृष्टेति सत्वम्। ताच्छील्ये–श्राद्धकरः। आनुलोम्ये–आज्ञाकरः, अशब्दादिष्विति किम्? शब्दं करोतीति शब्दकारः श्लोककारः, कलहकारः गाथाकारः, वैरकारः, चाटुकारः, सूत्रकारः, मन्त्रकारः, पदकारः।

- **त्यदादिकारादयन्तानन्तबहुबाहुदिवानिशाप्रभाभाश्चित्त कर्तृनान्दीकिम्लिपिलिविबलिभक्तिक्षेत्रसङ्ख्यासु च। ४/३/२१**

कर्मण्येवानुवर्तते, त्यद् आदिर्येषां ते त्यदादयः, ततो द्वन्द्वः, त्यदादि, कार, आदि, अन्त, अनन्त, बहु, बाहु, दिवा, विभा, निशा, प्रभा, भास, चित्त, कर्तृ, नान्दी, किम्, लिपि, लिवि, बलि, भक्ति, क्षेत्र, सङ्ख्या, इत्येतेषु कर्मसूपपदेषु कृञः ट प्रत्ययो भवति। अहेत्वाद्यर्थम् वचनम्। त्यत्करोतीति त्यत्करः, तत्करः, यत्करः, कारकरः, आदिकरः, अन्तकरः, अनन्तकरः, बहुकरोतीति बहुकरः, बाहुकरः, दिवाकरोतीति दिवाकरः, विभाकरः, निशाकरः, प्रभाकरः, भास्करः, अनव्ययविसृष्टेति सत्वम्। चित्रकरः, कर्तृकरः, नान्दीकरः, किङ्करः, लिपिकरः, लिविकरः, बलिकरः, भक्तिकरः, क्षेत्रकरः, सङ्ख्याशब्देनार्थो गृह्यते–एककरः, द्विकरः, त्रिकरः, स्त्रियां तु त्यत्करोतीत्यादि भवति। कथं किङ्करा, तत्करा, यत्करा, बहुकरा, एककरा? उच्यते–अजादिगणमध्ये पठ्यते।

- **भृतौ कर्मशब्दे ४/३/२२**

कर्मशब्दे कर्मण्युपपदे कृञः ट प्रत्ययो भवति भृतौ गम्यमानायाम् भृतिः वेतनम्–कर्ममूल्यम्, करोते टः, कर्मकरः। भृताविति किम्? कर्मकारः शब्दग्रहणं कर्मशब्दस्य स्वरूपेण प्रग्रहार्थम्।

- **इस्स्तम्भशकृतोः व्रीहिवत्सयोः ४/३/२३**

स्तम्भशकृतोः कर्मणोरुपपदयो कृञः इस् प्रत्ययो भवति यथासङ्ख्यम् व्रीहौ वत्से चार्थे, स्तम्भकारिः व्रीहिः, शकृत्कारिः वत्सः, व्रीहिवत्सयोरिति किम्? स्तम्भकारः, शकृत्कारः।

- **हरतेः दृतिनाथयोः पशौ ४/३/२४**

दृतिनाथयोः कर्मणोरुपपदयोः पशावर्थे हृञः इस् भवति। दृतिहरिः पशुः, नाथहरिः पशुः।

• फले मलरजस्सुः ग्रहे ४/३/२५

फलानि गृह्णातीति फलेग्रहिः, एत्वं वक्तव्यम्। मलग्रहिः। रजोग्रहिः।

• देववातयोरापेः ४/३/२६

देववातयोः कर्मणोरुपपदयोः आप्नोतेः—आप्लृ व्याप्तावित्यस्य इस् भवति देवापिः। वातापिः।

• आत्मोदरयोः भृञः खिः ४/३/२७

आत्मन् उदर इत्येतयोः कर्मणोरुपपदयोः डुभृञः खि प्रत्ययो भवति आत्मानं बिभर्तीति आत्मम्भरिः, उदरम्भरिः। ह्रस्वारुषोरिति मागमः। कुक्षिशब्देऽपीष्यते। कुक्षिम्भरिः।

• एजेः खश् ४/३/२८

एजिरिन्नन्तो गृह्यते, कर्मण्युपपदे एजृ कम्पने इत्यस्मात् इन्नन्तात् खश् भवति।

• शुनीस्तनमुञ्जकूलास्यपुष्पेषुधेटः ४/३/२९

शुनिन्धयः, स्तनन्धयः, मुञ्जन्धयः, कूलन्धयः, आस्यन्धयः पुष्पन्धयः। धेट् पाने, शुन्यादीन्युपपदानि। शुनी शब्दस्य शुनीम् धारयतीति खश् दीर्घस्योपपदस्येति ह्रस्वः। ह्रस्वारुषोरिति मागमः।

• नाडीकरमुष्टिपाणिनासिकासु ध्मश्च ४/३/३०

एषु कर्मसूपपदेषु धेटः खश् भवति, ध्मः—ध्मा शब्दाग्निसंयोगयोरित्येतस्माच्च। नाडिन्धयः, करन्धयः, मुष्टिन्धयः, पाणिन्धयः, नासिकान्धयः ध्मश्च, नाडिन्धमः, करन्धमः, मुष्टिन्धमः, पाणिन्धमः धेट् पाने, ध्माशब्दाग्नि संयोगे। नाड्यादीन्युपपदानि। नाडीन्धमः। नाडीन्धमयतीति खश् अन्वि, ए अय् ध्मोधमः। पूर्ववन्नाडी नासिकाशब्दयोः ह्रस्वो मा गमश्च।

• वह विध्वरूस्तिलेषु तुदः ४/३/३१

वह, विधु, अरूस्, तिल इत्येतेषु कर्मसूपपदेषु तुदः खश् भवति, वहन्तुदः, विधुन्तुदः, अरून्तुदः, तिलन्तुदः। खश्, अन्वि, तुदादेरनीत्यगुणत्वम्। पूर्ववन्मागमः। संयोगादेर्वुट् इत्यरूषस्सलोपः, वातशरयोरूपपदयोर्यथासङ्ख्यम् अजिजहातिभ्यां खश् वक्तव्यः। वातमजतीति वातमजः, शरं जहातीति शरंजहः। अज गतिक्षेपणयोः, ओहाक्त्यागे, खश्, अन्वि, जुहोत्यादेर्लुक्, जुहोत्यादीनामिति, द्विर्व, जुहोतेरालोपो वक्तव्यः।

• असूर्योग्रयोः दृशः ४/३/३२

समाहारे द्वन्द्वः असूर्य, उग्र इत्येतयोः कर्मणोरूपपदयोः दृशः, खश् भवति, सूर्यम् न पश्यति, असूर्यम् पश्या राजदाराः, इत्यर्थः। उग्रंपश्यः।

• ललाटे तपः ४/३/३३

ललाटे कर्मण्युपपदे तपः खश्, ललाटं तापयतीति, ललाटन्तपः।

• मितनखपरिमाणेषु पचः ४/३/३४

एषु कर्मसूपपदेषु पचेः खश् भवति। परिमाण शब्देनार्थो गृह्यते मितम्पचः, नखम्पचः, प्रस्थम्पचः, आढकम्पचः, द्रोणम्पचः। लोकप्रसिद्धपरिमाणं गृह्यते, न तु येन परिच्छिद्यते तत्, तेनेह न भवति, अनभिधानात्।

• कूल उद्रुजोद्वहोः ४/३/३५

रूजोभङ्गे, वह प्रापणे इत्येताभ्याम् उत्पूर्वाभ्यां कूलशब्देकर्मण्युपपदे खश् भवति, कूलमुद्रुजतीति कूलमुद्रुजः, एवं कूलमुद्वहः, खश्, अन्वि, तुदादेरनीत्यगुणत्वम्।

• वहंलिहाभ्रंलिहेरम्मदाश्च ४/३/३६

वहं लिहः, अभ्रंलिहः, इरम्मद इत्येते निपात्यन्ते, लिहेः वह अभ्र इत्येवं पूर्वात् खश् निपात्यते, गुणाभावश्च, ह्रस्वारूषोरिति मागमश्च, इरम्मदः, मदीहर्षे, इरापूर्वः, इरयामाद्यतीति खश् निपात्यते, दिवार्देयन् इत्यस्याभावश्च, दीर्घस्योपपदस्येति इरा शब्दस्य ह्रस्वः।

● वदेः खश् प्रियवशयोः ४/३/३७

प्रिय वशयोर्कर्मणोरूपपदयोः वदेः खश् प्रत्ययो भवति, प्रियम्वदः, वशम्वदः, प्रत्ययान्तरकरणमुत्तरार्थम्। यदि ह्युत्तरत्र तपेः खश् प्रत्ययस्स्यात्, अन्विकरणे सति कारितलोपो न भवेत्।

● शत्रुपरयोस्तापे ४/३/३८

शत्रु परयोः कर्मणोरूपपदयोः तपेः इन्नन्तात् ख प्रत्ययो भवति। शत्रून्तापयतीति शत्रुन्तपः, परंतपः, खप्रत्ययः कारितलोपः निमित्ताभावपरिभाषया दीर्घ निवृत्तिः।

● सर्वकूलाभ्रकरीषेषु कषः ४/३/३६

एषु कर्मसूपपदेषु परेषु कष् हिंसार्थे इत्यस्मात् ख प्रत्ययो भवति सर्वङ्कषः अभ्रङ्कषः, कूलङ्कषः करीषङ्कषः।

● भयर्तिमेघेषु कृञः ४/३/४०

भय, ऋति, मेघ इत्येतेषु कर्मसूपपदेषु कृञः, ख प्रत्ययो भवति भयङ्कर, ऋतिङ्करः, मेघङ्करः।

● क्षेमप्रियमद्रभद्रेष्वण् च ४/३/४१

एषु कर्मसूपपदेषु कृञः ख प्रत्ययो भवति अण् च। क्षेमङ्करः, प्रियङ्करः, मद्रङ्करः, भद्रङ्करः। क्षेमकारः, प्रियकारः, मद्रकारः, भद्रकारः। आत्मग्रहणं कस्मान्न भवति, विकल्पिते हि ख प्रत्यये, सामान्येन प्राप्तोऽणो न भविष्यति, अत्र समाधिः, असति अण् ग्रहणे य......(त्रुटितः)........विवक्षायाम् कृञो हेत्विति ट प्रत्ययोऽपि स्यात्, स मा भूत् अणेव पक्षे यथास्यादित्यण् ग्रहणम्।

• भावकरणयोस्त्वाशिते भुवः ४/३/४२

आशितशब्दे उपपदे भावे करणे चार्थे भुवः ख प्रत्ययो भवति, आशितस्य भवनम् आशितम्भवः। आशितो भवत्यनेनेति आशितम्भवः ओदनः।

• नाम्नि तृभृवृजिधारिदपितपिसहिसंज्ञायाम् ४/३/४३

तृ प्लवनतरणयोः, डुभृञ् धा, वृ इति वृङ् वृञौ गृह्येते, जि जये, धृ इत्ययमिन्नन्तः, दम उपसमे, तप सन्तापे, षह मर्षणे, एभ्यः नाम्न्युपपदे संज्ञायां विषये ख प्रत्ययो भवति, रथन्तरम्, विश्वम्भरा, पतिम्वरा, धनञ्जयः, युगन्धरः, अरिन्दमः, अरातिन्तपः, सर्वम्सहः, ख प्रत्ययः, धारेः कारित लोपः, निमित्ताभावपरिभाषया वृद्धेर्निवृत्तिः, गुणः, नाम्नीत्यनुवर्तमाने पुनः नाम्नीत्येतद्विस्पष्टार्थम्।

• गमश्च ४/३/४४

नाम्न्युपपदे गमेः संज्ञायां विषये ख प्रत्ययो भवति, सुतङ्गमः, भुजङ्गमः, पृथग्योगः उत्तरार्थः।

• उरो विहायसोरूर विहौ च ४/३/४५

उरस् विहायस् इत्येतयोः उपपदयोः गमेस्संज्ञायां विषये ख प्रत्ययो भवति, उरो विहायसोर्यथासङ्ख्यम् उर, विह इत्येतावादेशौ भवतः, उरसा गच्छतीति उरङ्गमः, विहायसा गच्छतीति विहङ्गमः।

• डोऽसंज्ञायामपि ४/३/४६

नाम्न्युपपदे गमेः डो प्रत्ययो भवति, संज्ञायामसंज्ञायामपि, अन्तं गच्छीति अन्तगः, अत्यन्तगः, पूर्वसूत्रमनुवर्तते। तेन उरसागच्छतीति उरगः, विहायसा गच्छतीति विहगः।

• विहङ्गतुरङ्गभुजङ्गाश्च ४/३/४७

एते निपात्यन्ते, पूर्वेणैव सिद्धो ड प्रत्ययः, मकारार्थम् तु निपातनम्। विहङ्गः, तुरङ्गः, भुजङ्गः। गम्लृ गतौ, विहायसा गच्छति, तुरया गच्छति, भुजाभ्यां गच्छतीति डः। उरोविहायसोरिति विहायस शब्दस्य विह आदेशः।

• अन्यतोऽपि च ४/३/४८

गमेरन्यस्मादपिधातोः यथादर्शनं ड प्रत्ययो भवति। गिरौ शेते गिरिशः, शीङ् स्वप्ने, डः, कुञ्जेषु रमते कुञ्जरः, रमेः डः।

• हन्तेः कर्मण्याशीर्गत्योः ४/३/४९

आशीषि गतौ च वर्तमानात् हन्तेः ड प्रत्ययो भवति, शत्रुं वध्यात् शत्रुघ्नः, क्रोशं हन्ति क्रोशहः। कर्मग्रहणं मुखसुखार्थम्।

• अपात्क्लेशतमसोः ४/३/५०

क्लेशतमसोः कर्मणोरूपपदयोः, अपात् हन्तेर्डो प्रत्ययो भवति। क्लेशापहः, तमोऽपहः, क्लेशमपहन्ति, तमः अपहन्ति। कथं सुखावहः दुखावहः? उच्यते–अन्यतोऽपि चेत्यनेनात्र डः, योगारम्भस्तु प्रपञ्चार्थः।

• कुमारशीर्षयोर्णिनिः ४/३/५१

कुमारशीर्षयोः कर्मणोरूपपदयोः हन्तेः णिनिः प्रत्ययो भवति। कुमार घाती, शीर्षघाती, णिनिः। इकार उच्चारणार्थः, णकारः इज्वद्भावार्थः, हन्तेस्तः, हस्य हन्तेर्घिः।

• टगलक्षणे जायापत्योः ४/३/५२

लक्षणं चिह्नं विद्यते यस्य सः लक्षणः मन्त्वादित्वादकार प्रत्ययः, जायापत्योः कर्मणोःउपपदयोः हन्तेः टक् प्रत्ययोभवति, लक्षणे, लक्षणवति कर्तर्यर्थे। जायाघ्नः कुमारः, पतिघ्नी कुमारी, टक्, गमहनेत्युपधालोपः, लुप्तोपधस्येति घः।

• अमनुष्यकर्तृके च ४/३/५३

मनुष्यः कर्ता यस्य धात्वर्थस्य स मनुष्यकर्तृकः, ततो नञा समासः कर्मण्युपपदे मनुष्यकर्तृके धात्वर्थे वर्तमानात् हन्तेः टक् भवति। जायाघ्नः

तिलकः, पतिघ्नी रेखा, श्लेष्मघ्नं मधु, पित्तघ्नं घृतम्। अमनुष्यकर्तृक इति किम्? आखुघातः वृषलः, कर्मण्यण्। कथं कृतघ्नः खलः? कृत्ययुटोऽन्यत्रा–पीति वचनात्। हस्तिवर्जिते कर्तर्यमनुष्यनगर पूर्वात् हन्तेः टकं स्मरन्ति, तेनेह न भवति नगरघातो हस्ती।

• शक्तौ हस्ति कवाटयोः ४/३/५४

शक्ति कवाटयोरर्थयोः कर्मणोरूपपदयोः शक्तौ गम्यमानायां हन्तेः टक् भवति। मनुष्यकार्थम् वचनम्। हस्तिघ्नः, मनुष्यः, कवाटघ्नः। शक्ताविति किम्? विषेण हस्तिनं हन्ति हस्तिघातः।

• पाणिघताडघौ शिल्पिनि ४/३/५५

एतौ निपात्येते शिल्पिन्यर्थे, पाणि, ताड पूर्वात् हन्तेः टक् निपात्यते शिल्पिन्यर्थे। घत्वमन्त्यस्वरादिलोपश्च। पाणिघः, ताडघः, शिल्पिनीति किम्? पाणिघातः, ताडघातः।

• नग्नपलितप्रियान्धस्थूलसुभगाढ्येष्वभूततद्भावेषु कृञः ख्युट् करणे ४/३/५६

अभूतस्य तद्भावः अभूततद्भावः, अभूततद्भावे वर्तमाने नग्नादिषु कर्मसूपपदेषु कृञः करणेऽर्थे ख्युट् भवति। अनग्नो नग्नः क्रियतेऽनेनेति नग्नकरणं द्यूतम्। कृञो ञकारस्योपपदस्येत्यर्थः। युवुझामित्यनादेशः ह्रस्वारुषोरिति मागमः। एवं पलितङ्करणं तैलम्, प्रियङ्करणमनुवर्तनम्, अन्धकरणं शोकः, सूलङ्करणं दधि, सुभगङ्करणं रूपम्, आढ्यङ्करणं वित्तम्। अथाभूततद्भावेऽर्थे नग्नादिभ्यः च्विप्रत्ययः कस्मान्न भवति? उच्यते–ख्यूटः च्वि प्रत्यये सति मकारागमार्थेन किं कृतंस्यात्, नहि च्वि प्रत्ययान्ताः नग्नादयः मकारागमं लभन्ते, च्व्यन्तस्थानामव्ययत्वात्। अभूततद्भाव इति किम्? आढ्यं कुर्वन्ति तैलेन, धातूनाम–नेकार्थत्वात्करोतिरिहाभ्यङ्गे वर्तते।

• भुवः खिष्णुखुकञौकर्तरि ४/३/५७

अभूत तद्भावे वर्तमाने नग्नादिषूपपदेषु भुवः खिष्णु खुकञौ प्रत्ययौ भवतः कर्तर्यर्थे। नग्नं भविष्णुः, नग्नंभावुकः, पलितं भविष्णुः पलितं भावकः, प्रियं भविष्णुः प्रियं भावकः, अन्धं भविष्णुः अन्धं भावकः, स्थूलं भविष्णुः

स्थूलं भावकः, आढ्यं भविष्णुः आढ्यं भावकः। कर्तरिकृदिति वचनात् कर्तृ–ग्रहणे लब्धे पुनः कर्तृग्रहणं करणनिवृत्त्यर्थम्।

• भजसहो विण् ४/३/५८

नाम्नीत्यनुवर्तते, नाम्न्युपपदे भज सहिभ्यां विण् भवति। अर्धभाक् प्रभाक्, तुराषाट्। भजसेवायाम्, षहमर्षणे। अर्धम् भजते, प्रभजते, तुरा सहते इति विण्, णकारः इज्वद्भावार्थः। वेर्लोप इति व लोपः। अस्योपधेति दीर्घः।

• वहश्च नाम्न्युपपदे ४/३/५९

वहेः विण् भवति पष्ठवाट्, दिव्यवाट्। पष्ठं वहति, दिव्य वहति, इति विण्। अनकारान्त उपपदे वहेर्विण् न दृश्यते अनभिधानात्। तेनेह न भवति शालीर्वहति। योगविभागः उत्तरार्थः।

• अनसि डश्च ४/३/६०

अनसि उपपदे वहे विण् भवति अनसश्चान्त्यस्य डः। अनड्वान्, वह प्रापणे, अनस् पूर्वः, अनोवहतीतिविण्, सस्य डः, अस्योपधेति दीर्घः मोनुरिति नुकारागमः, संयोगान्तस्य लोपः, ड इत्ययमादेशः न प्रत्ययः अनडुहश्चेति ज्ञापकात्।

• ण्युटः कव्यहव्यपुरीषपुरीष्येषु ४/३/६१

एषु कर्मसूपपदेषु वहेः ण्युट् भवति। कव्यवाहनः, हव्यवाहनः पुरीषवाहनः, पुरीष्यवाहनः।

• अवयाः उक्थशाः पुरोडाश्श्वेतवाश्च ४/३/६२

एते निपात्यन्ते, अवयाः, उक्थशाः, पुरोडाः श्वेतवाः। यज देवता, शन्सु स्तुतौ, दाशृ दाने, वह प्रा। अव, उक्थ, पुरम्, श्वे इति पूर्वे। अवयजते, उक्थैः शंसति, पुरोदास्यते, श्वेतैरूह्यते इति डस् निपात्यते। अन्त्यस्वरादिलोपः, तस्य डत्वं निपात्यते। अन्त्वसन्तस्येति दीर्घः। आमन्त्रणविषये दीर्घत्वमपि निपात्यते, हे अवयाः, हे उक्थशाः, हे पुरोडाः हे श्वेतवाः।

• दुहेः को घश्च ४/३/६३

कर्मणीत्येव, कर्मण्युपपदे दुहेः क प्रत्ययो भवति, घकारादेशश्च, काम दोग्धीति कामदुघ्, कः, हस्य घः।

• विट् क्रमिगमिखनिसनिजनाम् ४/३/६४

नाम्न्युपपदे एषां विड्भवति। दूरक्राः, अग्रेगाः, बिसखाः, गोषाः अब्जाः। दूरं क्रामति, अग्रे गच्छति, बिसान् खनति, गां सनोति, अप्सु जायते इति विट्, टकारो विड्वनोरा इत्यर्थः, वेर्लोपः, विड्वनोरा इत्यात्वम्।

• अदो ऽनन्ने ४/३/६५

अनन्ने—अन्नवर्जिते नाम्न्युपपदे अदेः विट् भवति, आममत्तीति आमात्, सस्यात्। अनन्न इति किम्? अन्नादः कणान्नत्तीति कणादः इत्यनभिधानात्।

• क्रव्ये च ४/३/६६

क्रव्ये उपपदे अदेः विट् भवति, क्रव्यमत्तीति क्रव्यात्। पूर्वेणसिद्धत्वाद् योगारम्भः प्रपञ्चार्थः।

• मनिन् क्वनिन् वनिपश्चोपसर्गे ४/३/६७

उपसर्गे उपपदे धातोः मनिन् क्वनिप् वनिप् एते प्रत्ययाः भवन्ति, च शब्दो विटस्समुच्चयार्थः, अपिशब्दात् अनुपसर्गेऽपि। सुदामा, शोभनं दधातीति क्वनिप्, दामागायतीतीत्वम्, भूरिदामा, भूरिददातीति वनिप्, अनुपसर्गेऽपि धीवा, पीवा, क्वनिप्, पूर्ववदीत्वम्। कीलालपाः कीलालं पिवतीति विट्।

• क्विप्च ४/३/६८

क्विप् प्रत्ययो भवति, उखास्रत्, पर्णध्वत्, उखायाः, श्रंसते, पर्णानि ध्वंसते, इति क्विप्, अनिदनुबन्धेति न लोपः, श्रंसिध्वसोश्चेति दः, घृतस्पृक्। घृतं स्पृशतीति क्विप्, चवर्ग दृगेति गत्वम्।

● ऋत्विक्दधृक्स्रग्दिगुष्णिहश्च ४/३/६९

ऋत्विक्, दधृक्, स्रक्, दिक्, उष्णिह्, इत्येते निपात्यन्ते, ऋत्विक्, ऋतुपूर्वात् यजतेः, ऋतौ यजतीति क्विप्, स्वपिवचीति सम्प्र, अयं शब्दो निपात्यते विशिष्टविषये प्रवृत्त्यर्थम्। दधृक्, ञिधृषा प्रागल्भे, धृष्णोतीति क्विप्, द्विर्वचनं निपात्यते, दृगादित्वाद् गः, स्रक्, सृजविसर्गे, सृज्यत इति क्विप्, कर्मण्यर्थे निपात्यते, अकारागमः, उष्णिह्, ष्णिह्, प्रीतौ, उत्पूर्वः। उष्णिह्यतीति क्विप्, उदः तलोपो निपात्यते।

● कर्मण्युपमानेत्यदादौ दृशेस्टक्सकौ च ४/३/७०

कर्मण्युपमाने त्यदादावुपपदे दृशेः कर्मण्यर्थे क्विप् भवति, टक् सकौ च। त्यादृक् त्यादृक्षः, त्यादृशः। तादृक्, तादृक्षः, तादृशः। त्य इव दृश्यते, स इव दृश्यते इति दृशेः क्विप्, टक्सकौ च। क्विपि दृगादित्वाद् गः। छशोश्चेति षः, षढो कः, आसर्वनाम्न इत्यात्वम्, कर्मणीति किम्? तामिव पश्यति, अन्यशब्द उपपदे दृशेः क्विप्, टक् सकश्च वक्तव्याः। अन्य इव दृश्यते–अन्यादृक्, अन्यादृक्षः, अन्यादृशः। पूर्ववदात्वम्।

● नाम्न्यजातौ णिनिस्ताच्छील्ये ४/३/७१

अजातिवाचिनो नाम्न्युपपदे धातोः णिनि प्रत्ययो भवति, ताच्छील्ये गम्यमाने। उष्णभोजी, शीघ्रभोजी, उदासारी, प्रत्यासारी, सृज विसर्गे उत् आङ्, प्रति आङ् एते पूर्वाः णिनिः, वृद्धिः अजातादाविति किम्? ब्राह्मणान्निमन्त्रयिता। मत्रि गुप्त भाषणे। इकारो नकारागमार्थः। नि पूर्वः, चुरादित्वादिन्। तृन्निति तृन्, इट्, गुणः, ताच्छील्य इति किम्? शीघ्रं भुङ्क्ते, ग्रामं गमिष्यतीति। कथं साधुकारी, नह्यत्र ताच्छील्यं गम्यते? सत्यम्। तच्छील, तद्धर्म, तत्साधुकारिष्विति ज्ञापकाद्भविष्यति।

● कर्तर्युपमाने ४/३/७२

कर्तर्युपमाने धातोः णिनिः प्रत्ययो भवति। जात्यर्थम् ताच्छील्यार्थञ्चवचनम्। उष्ट्र इव क्रोशते उष्ट्रक्रोशी, क्रुशेर्णिनिः, ध्वाङ्क्ष इव विरौति ध्वाङ्क्ष– विरावी, रु शब्दे। कर्तरीति किम्? अप इव भक्षयति माषान्। भक्षे स्वरादित्वादिन्। उपमान इति किम्? उष्ट्रः क्रोशति।

● व्रताभीक्ष्ण्ययोश्च ४/३/७३

नाम्न्युपपदे धातोः णिनिर्भवति व्रते गम्यमाने आभीक्ष्ण्ये च, आभीक्ष्ण्यं पौनः पुन्यम्, व्रते तावत्–अश्राद्धभोजी, अलवणभोजी, श्राद्धं न भुङ्क्ते, लवणं न भुङ्क्ते, आभीक्ष्ण्ये–क्षीरपायिनः उशीनराः, कषायपायिनः गान्धाराः। क्षीरं कषायं पुनः पुनः पिबन्तीत्यर्थः।

● मनः पुंवच्चात्र ४/३/७४

नाम्न्युपपदे मनः णिनिर्भवति, अत्रैतस्मिंश्च णिनि प्रत्ययान्ते मन्यतौ परे पूर्वपदं पुंवद्भवति। सिद्धे पुंवद्भावे पुनः पुंवद्भावग्रहणमतुल्याधिकरणार्थम्। शोभनं मन्यते शोभनमानी, पट्वीमन्यते पटुमानी। पट्वीशब्दस्य पुंवद्भावः, भाषितपुंस्कस्यानूङन्तस्य चायं पुंवद्भावस्स्मर्यते, तेनेह न भवति–खट्वामानिनी, ब्रह्मबन्धूमानिनी, णिनिः, ऋन्नेभ्यस्त्वी।

● खश्चात्ममाने ४/३/७५

मननं मानः, आत्मनोमानः आत्ममानः, आत्ममाने वर्तमानात् मनः णिनिर्भवति, खश् प्रत्ययश्च। दर्शनीयमात्मानं मन्यते–दर्शनीयमानी, दर्शनीयम्मन्यः, पण्डितं मानी पण्डितंमन्यः, खशः दिवादेर्यन्, ह्रस्वारूषोरिति मागमः। आत्ममान इति किम्? पण्डितं देवदत्तं यज्ञदत्तो मन्यते।

● करणेऽतीते यजः ४/३/७६

करण उपपदे अतीतेकाले यजेः णिनिर्भवति अग्निष्टोमयाजी, अग्निष्टोमेनेष्टवानिति णिनिः। अतीत इति किम्? अग्निष्टोमेन यजते।

● कर्मणि हनः ४/३/७७

अतीत इति वर्तते, वर्तमाने शन्तृङ् इत्यतः प्राक् कर्मण्युपपदे हन्तेः णिनिर्भवति। अतीते काले–पितृव्यघाती, मातुलघाती, पितृव्यं हतवान् मातुलं हतवान्, इति, णिनिः। कुत्सायामिति कर्तव्यम्, तेनेह न भवति–चौरं

हतवान्, हन्तिस्मेति निष्ठेति क्तक्तवन्तू। वनति तनोत्यादीति पञ्चम लोपः।

● क्विब्ब्रह्म भ्रूणवृत्रेषु ४/३/७८

ब्रह्मन्, भ्रूण वृत्र इत्येतेषु कर्मसूपपदेषु हन्तेः क्विप् अतीते काले भवति। ब्राह्मणं हतवान्, ब्रह्महा। भ्रूणहा। वृत्रहा। इदं सूत्रे वक्ष्यमाणा त्रिसूत्री क्विप्चेत्यनेन सिद्धत्वाद्योगारम्भस्तस्यैव प्रपञ्चार्थः।

● कृञस्सुपुण्य पापकर्ममन्त्रपदेषु ४/३/७६

एषु कर्मसूपपदेषु कृञः क्विप् भवति। अतीते काले कर्मणीति सु शब्दस्य न विशेषणम्—असम्भवात्। शोभनं सुकृतवान् सुकृत्, पुण्यकृत्, पापकृत्, कर्मकृत्, मन्त्रकृत्, पदकृत्।

● सोमेसुञः ४/३/८०

सोमशब्दे कर्मण्युपपदे सुञः क्विप् भवति। सोमं सुतवान्, धातोस्तोऽन्तः।

● चेरग्नौ ४/३/८१

अग्नौ कर्मणि उपपदे चिनोते क्विप् भवति अतीते काले। अग्निं चितवान् अग्निचित्।

● विक्रिय इन्कुत्सायाम् ४/३/८२

कर्मण्युपपदे विक्रीतात् क्रीणातेः इन् भवति, अतीते काले कुत्सायां गम्यमानायाम्। लाक्षाविक्रयीब्राह्मणः, लाक्षां विक्रीतवान् इति गुणः। एवं लवण विक्रयी, अत्र स्मिजीक्रीडामिनीतीत्वं भवति। आख्यात प्रकरणस्यैव इनस्तत्र ग्रहणाद अस्योपधेति च वृद्धिर्न भवति, अला सहचरितस्येनस्तत्र ग्रहणात्। कुत्सायामिति किम्? लवण विक्रियो वणिक्।

● दृशेः क्वनिप् ४/३/८३

कर्मण्युपपदे दृशेः क्वनिप् भवति अतीते काले, मेरूदृश्वा, मेरूं दृष्टवानिति।क्वनिप्, पानुबन्धकरणमुत्तरार्थम्।

• सहराज्ञो युधः ४/३/८४

सह राजन् इत्येतयोः कर्मणोरूपपदयोः युधेः क्वनिप् भवति अतीते काले। कर्मणीत्यत्रानुवर्तते, तेन राजा विशेष्यते न सह शब्दः, अव्ययात्। कथ राजा युध्यते, न कर्मकस्य सम्बन्ध इति चेत्–इन्नन्तं प्रयोज्य–प्रयोजक भावमन्तर्भाव्य सह युद्धवान् सहयुद्ध्वा, राजानं योधितवान् राजयुद्ध्वा।

• कृञश्च ४/३/८५

सहराज्ञोरूपपदयोः कृञः क्वनिप् भवति, अतीते काले। सह कृतवान्, सहकृत्वा, राजानं कृतवान् राजकृत्वा, धातोस्तोऽन्तः।

• सप्तमी पञ्चम्यन्ते जनेर्डः ४/३/८६

द्वन्द्वगर्भो बहुव्रीहिः। सप्तम्यन्ते पञ्चम्यन्ते चोपपदे जनेर्डः प्रत्ययो भवति! अतीते काले। जले जातं जलजम्। सरसि जातं सरसिजम्। खेदाज्जातम् खेदजम्। ब्राह्मणाज्जातं ब्राह्मणजम्।

• अन्यतोऽपिच ४/३/८७

अन्यत्राप्युपपदे जनेः ड प्रत्ययो भवति अतीते काले। न जातः अजः। पुमांसमनुजातः पुमानुजः, द्विः जातो द्विजः।

• निष्ठा ४/३/८८

धातोः निष्ठा प्रत्ययो भवति, अतीते काले, कृतः, कृतवान्।

• ङ्वनिप् सुयजेः ४/३/८९

षुञ् यजि इत्येताभ्यां ङ्वनिप् भवति, अतीते काले, सुतवानिति सुत्वा, इष्टवानिति यज्वा, ङकारो ङे न गुण इत्यर्थः। धातोस्तोऽन्तः।

• जीर्यतेरन्तृन् ४/३/९०

जृष् वयो हानावित्यस्मात् अन्तृन् भवति, अतीते काले, नकारो वैचित्र्यार्थः। जरन्, जृष् वयो हानौ, जीर्णवानिति अन्तृन्। ऋकार उदृकार इत्यर्थः। गुणः जृष इति न कृतम्, वैचित्र्यार्थम्।

भट्टोग्रभूतिकृतायां शिष्यहितायांवृत्तौकृत्प्रकरणे

तृतीयः पादः

कृत्प्रकरणे चतुर्थः पादः

● क्वन्सुकानौ परोक्षावत् ४/४/१

धातोः अतीते काले क्वन्सुकानौ प्रत्ययौ भवतः, तौ परोक्षावद् भवतः, परोक्षायाञ्च परस्यां यदुक्तं तत्तयोः भवतीत्यर्थः। पेचिवान्, पेचानः। पचेः क्वन्सुकानौ परोक्षावद्भावाच्चणपरोक्षेति, द्विर्व, अस्यैकव्यञ्जनमध्य इत्येत्वाभ्यासलोपौ, अर्तीणघसेकस्वरेति इट्, जक्षिवान्, व्यतिजक्षिणः, अदेः क्वन्सुकानौ, वा परोक्षायमिति घसिः, द्विर्व, अभ्यासकार्यम्, पूर्ववदिट्, गमहनेत्युपधालोपः, अघोषेष्वशिटामिति घस्यकः, शासिवसीति षः, क्वन्सुरयं द्विककारः पठ्यते, तस्य प्रयोजनं शिशीर्वानित्यादौ ऋदन्तानाञ्चेत्यस्यापि गुणस्य प्रतिषेधार्थम्। कान् प्रत्ययस्याप्येतदर्थम् एव ककारः तेन व्यतिशिशिराणः। शृ हिंसायाम् क्वन्सुकानौ, ऋदन्तस्येर्, नामिनोर्वोरितिदीर्घः। द्विर्व—इदं च प्रयोजनं क्वन्सो द्विककारपाठस्य। भभज्वानित्यस्यादावनुपसर्गलोपो यथास्यात्, परोक्षायामिन्धीति हि नियमान्नप्राप्नोति।

● वर्तमानेशन्तृङ्ङानशावप्रथमैकाधिकरणामन्त्रणयोः ४/४/२

एकञ्च तदधिकरणमेकाधिकरणम्, तेन नञा समासे सति आमन्त्रण शब्देन सह द्वन्द्वः। वर्तमाने काले धातोः शन्तृङ् आनशित्येतौ प्रत्ययौ भवतः अप्रथमैकाधिकरणे आमन्त्रणेसति। प्रथमा अनेन शब्देन सामानाधिकरण्ये सति न भवतः आमन्त्रणे, आमन्त्रणविषये च भवतः इत्यर्थः, अप्रथमैकाधिकरण इत्ययं निषेधः आमन्त्रण ग्रहणेन बाध्यते। पचन्तं देवदत्तं पश्य, पचमानं देवदत्तं पश्य। पचेः शन्तृङ्ङानशौ, अन्वि, आन्मोऽन्त आन इति मकारागमः। एवं पचता देवदत्तेन कृतम्, पचमानेम देवदत्तेन कृतम्। आमन्त्रणे—हे पचन् देवदत्त! पचमान देवदत्त! अप्रथमैकाधिकरण इत्ययं प्रतिषेधो नञा निर्दिष्टस्यानित्यत्वादित्यनित्यः, तेन सन् ब्राह्मणः, विद्यमानो ब्राह्मणः, विद्यते ब्राह्मणः। अस् भुवि, विद स, शन्तृङ्ङानशौ, अन्वि, अदादेर्लुक्, दिवादेर्यन्, अस्तेरादेरित्यकारलोपः, आत्मनोऽन्त आन इति मागमः। यद्येवम्—प्रथमैकाधिकरणग्रहणमपार्थकम्।

मैवमवोचः, असत्यप्रथमैकाधिकरणे यथैवाप्रथमैकाधिकरणे नित्यं भवतः, तथैव, प्रथमैकाधिकरणेऽपिस्याताम्, विशेषाभावात्। तस्मात्तत्र नित्यं मा भूतामिति सार्थकम् अप्रथमैकाधिकरण ग्रहणम्।

● लक्षणेहेत्वोः क्रियायाः ४/४/३

वर्तमान इत्यनुवर्तते, भूत सङ्कीर्तनं यावत्। लक्ष्यते येन तल्लक्षणम्। हेतुः कारणम्। लक्षणे हेतौ चार्थे वर्तमानाद्धातोः शन्तृङ्ङानशौ भवतः, तौ चेल्लक्षणहेतुकियाविषयौ स्याताम्। क्रिया यदा लक्ष्यते क्रियायाश्च यदा हेतुर्भवतीत्यर्थः। लक्षणे तावत्–तिंष्ठन्तोऽनुशासति गणकाः। ष्ठा गति निवृत्तौ, शन्तृङ्, अन्वि, तिष्ठादेशः, जस्, अत्र स्थानेनानुशासनं लक्ष्यते, गणकाः यदातिष्ठन्ति तदा शिष्याननुशासतीत्यर्थः। एवं शयानाः भुङ्क्ते यवनाः, शीङ् स्वप्ने, आनश्, शीङ्स्सार्वधातुक इति गुणः। अत्र शयनेन भोजनं लक्ष्यते, यवना यदाशेरते तदा भुङ्क्त इत्यर्थः। हैतो–अर्जयन् भवति। अर्जप्रतियत्ने, चुरादित्वादिन्, शन्तृङ् अन्वि, गुणः, अत्रार्जनं वासस्यहेतुः, एवमधीयानो लभते कन्याम्। इङ् अध्ययने, अधिपूर्वः, आनश्, स्वरादाविवर्णेति इय्, अत्राध्ययनं कन्यालाभस्य हेतुः। लक्षणे हेत्वोरिति किम्? पचति, पठति च। नात्रपाकः पाठस्य हेतुः, नापि लक्षणम्। क्रियायामिति किम्? द्रव्यगुणयोर्माभूत्। यः कम्पते सः अश्वत्थः। कपि चलने। अत्रकम्पनं भवति लक्षणम्। तेन च अश्वत्थः द्रव्यं लक्ष्यते न तु क्रिया, यदुत्प्लवते। तल्लघु। इह कस्मान्न भवति–हन्तीतिप्लायते, वर्षतीतिधावतिदेवदत्तः। अत्र हन वर्षणे पलायनधावनयोर्हेतू। सत्यम्–इति शब्दो नात्र हेतुत्वमुक्तमिति प्रत्ययाभावः।

● वेत्तेश्शन्तुर्वन्सुः ४/४/४

विद् ज्ञाने इत्येतस्मात् परस्य शन्तृङः वन्सुरादेशोभवति। विद्वान्। वर्तमानेशन्तृङ्ङिति शन्तृङ् तस्यानेन वन्सुः, विकल्पेनायं स्मर्यते, तेन विदन्।

● आनोऽत्रात्मने ४/४/५

पदमित्येतल्लुप्तमिह द्रष्टव्यम्। अत्रेति पादान्तं प्रकरणं निर्दिश्यते। अत्रैतस्मिन् क्वन्सादिप्रकरणे य आनस्स आत्मनेपदसंज्ञो भवति। क्वन्सु शन्तृङौतु सामर्थ्यात्तु परस्मैपदसंज्ञावित्यर्थः। आत्मनेपदसंज्ञायाः

क्वप्रयोजनम्? आत्मने पदानि भावकर्मणोरित्यत्र। चक्राणः व्यतिबभूवानाः। डुकृञ् क, भू सत्ता, क्वन्सुकानाविति कानः, द्विर्व, भवतेरः, भुवोवोऽन्तः। प्रस्थीयमानः, ष्ठा गतिनिवृत्तौ, वर्तमाने शन्तृङ्ङानशावित्यानश्। सार्वधातुके यण्, दामागायतीति इतीत्वम्, आन्मोऽन्त आन इति मागमः। अधीयमानः, इङ् अध्ययने, अधिपूर्वः, पूर्ववत्, आनश्, यण् मागमश्च।

• ईतस्यासः ४/४/६

आसः परस्य तस्य आन् प्रत्ययस्य ईत्वं भवति, पर कार्येविकार्यादि रित्यकारस्य इकारः, आसीनः, आसत, वर्तमाने शन्तृङ्ङानशाविति आनश्, अन्वि। मागमः अनुबन्धकरणमुत्तरार्थम्, वर्तमाने शन्तृङ्ङानशावित्यस्यं प्रपञ्चः। शानङ् प्रत्ययस्तूत्तरत्र कर्तव्यः।

• आन्मोऽन्तः आने[1] ४/४/७

पचमानः, मागमः (अपूर्णपाठः।)

• पूङ् यजोः शानङ्[2] ४/४/८

पवमानः यजमानः। शानुबन्धकरणमुत्तरार्थम्। वर्तमाने शन्तृङ्ङानशावित्यस्यैवायं प्रपञ्चः।

• शक्तिवयस्ताच्छील्ये ४/४/९

शक्तौ वयसि ताच्छील्ये गम्यमाने धातोः शानङ् भवति, शक्तौ–कतीह निघ्नानः। हन्तिर्निपूर्वः। प्रहर्तुम् समर्थाः इति, शानङ्, गमहनेत्युपधालोपः, लुप्तोपधस्येति हस्य घः। वयसि–कवचंवहमानः। वहतीति शानङ् ताच्छील्ये–भूषयमानः, भूष अलंकरणे, चुरादित्वादिन्, भूषण इति शानङ्, अन्विगुणः, मागमः।

• इङ्धारिभ्यां शन्तृङ् कृच्छ्रे ४/४/१०

इङो धारेश्च शन्तृङ् भवति अकृच्छ्रे गम्यमाने, इङ आनश् प्राप्तः, धारेरपि शन्तृङ्ङानशौ। अधीयन् पारायणम्। इङ् अध्ययने, अधिपूर्वः। धारयन्, धृङ् अनवस्थाने। शन्तृङ्, अन्वि, अदादेलुर्क्, स्वरादाविवर्णेति इय्, गुणः। अकृच्छ्र इति किम्? कृच्छ्रेण अधीते, कृच्छ्रेण धारयति।

१–इदं सूत्र शिष्यहितायां वृत्तौ नोपलभ्यते, किन्तु शिष्यहितान्यासे वर्तते।
२–इदमपि वृत्तौ नास्ति, न्यासे तु विद्यते।

• द्विषश्शत्रौ ४/४/११

द्विषश्शत्रावर्थे शन्तृङ्ङानशौ प्राप्तौ, द्विष उभयपठितत्वात्, द्विषन्, अप्रीतौ–शन्तृङ्। शत्राविति किम्? द्वेष्टि पतिं भार्या।

• सुञो यज्ञसंयोगे ४/४/१२

यज्ञसंयोगे वर्तमानात् सुञः शन्तृङ् भवति, शन्तृङ्ङानशौ प्राप्तौ, स्वन्वन्, शन्तृङ्, नुस्स्वादेः, नोर्वकार इति वत्वम्। यज्ञसंयोग इति किम् सुनोति सुरां तोयेन।

• अर्हः प्रशंसायाम् ४/४/१३

प्रशंसा स्तुतिः, तस्यां गम्यमानायाम्, अर्हतेः शन्तृङ् भवति, अर्हन्। प्रशंसायामिति किम्, अर्हति चौरो वधम्।

• तच्छीलतद्धर्मतत्साधुकारिष्वाक्वेः ४/४/१४

क्विब्भ्राजीति क्विपं वक्ष्यति। आ एतस्मात् क्विप्संशब्दाद्यानितः ऊर्ध्वम् वक्ष्यामः ते तच्छीले तत्कर्मणि तत्साधुकारिणि च कर्तरि वेदितव्याः। तदिति धात्वर्थो निर्दिश्यते, स धावत्वर्थश्शीलं यस्य तच्छीलः स धात्वर्थो धर्मो यस्य स तद्धर्म, समासान्तगतेत्येतत्समासान्तः तं धात्वर्थम् साधुकरोतीति तत्साधुकारी। उत्तरसूत्रेषूदाहरिष्यामः।

• तृन् ४/४/१५

धातोः तृन् भवति तच्छीले तद्धर्मिणि तत्साधुकारिणि च कर्तरि। तच्छीले–कर्ता कटान्, वदिता नववादान्, करण शीलः वदनशीलः इति तृन्। अत्र कर्तृकर्मणोः कृतीति षण्ठी प्राप्ता, सा न, निष्ठादिष्विति प्रतिषेधात् तृनि न भवति। तद्धर्मिणि–मुण्डयितारः श्राविष्ठायनाः वधू मूढान्, उदकंप्रणेतारः बोल्वालाः, मुण्डि खण्डने, इन्, णीञ् प्रापणे प्र पूर्वः, मुण्डनधर्माणः, प्रणयनधर्माणः इति तृन्, इट्, गुणः, जस् धातोस्तृ शब्दस्यार। तत्साधुकारिणि–गर्ताखेलः साधुगच्छतीति तृन्, तृनोनकारः

धातोस्तृ शब्दस्येत्यत्र तृनो ग्रहणार्थः। अन्यथा निरनुबन्धकग्रहणे न सानुबन्धकस्येति तृचो ग्रहणं न स्यात्।

- **भ्राज्यलङ्कृञ्भूसहिरुचिवृतिवृधिचरि प्रजनापत्रपीनामिष्णुच्। ४/४/१६**

भ्राजृ दीप्तौ, अलं पूर्वः कृञ्, भूसत्तायाम्, षह मर्षणे, रुच दीप्तौ, वृतु वर्तने, वृधु वृद्धौ, चर गत्यर्थः, जनिः प्रपूर्वः, त्रपूष् लज्जायाम् अपपूर्वः, एभ्यः इन्नन्तेभ्यश्च इष्णुच्, भवति तच्छीलादिषु कर्तृषु। भ्राजिष्णुः भ्राजनशीलः, भ्राजनधर्मः, भ्राजनं साधु करोतीति इष्णुः, एवमलङ्करिष्णुः, भविष्णुः, सहिष्णुः, रोचिष्णुः, वर्तिष्णुः, वर्धिष्णुः, चरिष्णुः, प्रजनिष्णुः, अपत्रपिष्णुः, धारयिष्णुः, पारयिष्णुः नाल्विष्णवाय्यान्तेत्नुष्वितिकारित लोपाभावः, निरा पूर्वात् कृञोऽपीष्यते, निराकरिष्णुः।

- **मदिपदिपतिपचामुदि ४/४/१७**

उद्युपपदे मदी हर्षे, पद गतौ, पत्लृ गतौ, डु पचष् पाके एभ्यः इष्णुर्भवति, उन्मदिष्णुः, उत्पदिष्णुः, उत्पतिष्णुः, उत्पचिष्णुः।

- **जिभुवोस्स्नुक् ४/४/१८**

जि भू इत्येताभ्यां स्नुक्भवति, जिष्णुः, भूष्णुः नाम्न्युवर्णेति भवतेरिङभावः।

- **ग्लाम्लास्थाक्षिपचिपरिभृजां स्नुः ४/४/१६**

ग्लै हर्ष क्षये, म्लै गात्र विनामे, ष्ठा गतिनिवृत्तौ, क्षि क्षये, डुपचष् पाके, मृजूष् शुद्धौ एभ्य स्नुर्भवति। ग्लास्नुः, म्लास्नुः, स्थास्नुः, क्षेष्णुः पक्ष्णुः परिमाक्ष्णुः, मृजः मर्जोमार्जिः, भृजादित्वात्षः, षढोकः।

- **त्रसि गृधि धृषि क्षिपांक्नुः ४/५/२०**

त्रसी उद्वेजने, गृधू अभिकाङ्क्षायाम्, ञिधृषा प्रागल्भे, क्षिप् प्रेरणे एभ्यः क्नुर्भवति, त्रस्नुः, गृध्नुः, धृष्णुः, क्षिप्नुः, घोषवत्योश्च कृति इडभावः।

- **शमादीनामष्टानां घिनिण् ४/४/२१**

शमु उपशमे, कमु कान्तौ, दमु उपशमे, श्रमु तपसि खेदे च, भ्रमु अनवस्थाने, क्षमूष् सहने, क्लमु ग्लानौ, मदीहर्षे। एषां शमादीनामष्टानां घिनिण् भवति। शमी, तमी, दमी, श्रमी, भ्रमी, क्षमी, क्लमी, प्रमदी। न सेटोऽमन्तस्येति दीर्घाभावः। अष्टानामिति किम्? आसिता। असू क्षेपणे इन्।

- **युज रूज भज भुज द्विष द्रुह दुषाक्रीड त्यजानुरूधाङ्यमाङ्यसुरन्जाभ्यां हनां च ४/४/२२**

युजिर् योगे, युज समाधाविति वा, रूजो भङ्गे, भजसेवायाम्, भुज पालने, भुजो कौटिल्ये इति वा। द्विष अप्रीतौ, द्रुह जिहांसायाम्, दुष वैकृत्ये, क्रीडिराङ् पूर्वः, त्यज् हानौ, अनुरूध् कामे, यमु उद्यमे आङ् पूर्वः, यसु यत्ने आङ्पूर्वः, रञ्जरागे, हन्तिः अभ्याङ् पूर्वो, एभ्यः घिनिण् भवति। योगी, रोगी, भागी, भोगी, द्वेषी, द्रोही, आक्रीडी, त्यागी, अनुरोधी, आयामी, आयासी, रोगी अभ्याघाती, वृषिघनिणोश्चेति रञ्जेः पञ्चमलोपः।

- **समिसृजिपृचि ज्वराम् ४/४/२३**

समशब्द उपपदे सृज विसर्गे, पृची सम्पर्के, ज्वर रोगे, एभ्यः घिनिण् भवति। संसर्गी, सम्पर्की, सञ्ज्वरी।

- **वौविचकत्थस्रन्सुकषलषलसाम् ४/४/२४**

विशब्द उपपदे, विचिर् पृथग्भावे, कत्थ श्लाघायाम्, स्रन्सु विश्वासे, कष हिंसार्थः, लष कान्तौ, लस् श्लेषणक्रीडनयोः, एभ्यो घिनिण् भवति। विवेकी, विकत्थी, विस्रम्भी, विकाषी, विलाषी, विलासी। अपे च लष इष्यते। अपलापी।

- **प्रेद्रूमथवदवसरथलपाम् ४/४/२५**

प्र शब्द उपपदे द्रूगतौ, मथ विलोडने, वदव्यक्तायां वाचि, वस निवासे, रप लप–व्यक्तायां वाचि। एभ्यो घिनिण् भवति। प्रभावी, प्रमाथी, प्रवादी, प्रवासी, प्ररापी, प्रलापी।

- **परो सृदहोः ४/४/२६**

परिशब्द उपपदे सृ दहिभ्यां घिनिण् भवति, परिसारी, परिदाही।

• क्षिपरटवदवादिदेविविदभ्योवुण् च ४/४/२७

क्षिप प्रेरणे, रट परिभाषणे, वद व्य, वादिरिन्नन्तं, देवि, विद् च एभ्यः परिशब्द उपपदे तच्छीलादौ कर्तरि वुण् भवति, च शब्दाद् घिनिण् च। परिक्षेपी–परिक्षेपकः, परिराटी–परिराटकः, परिवादी–परिवादकः। ननु वुण्तृचाविति क्षिपादिभ्यो वुण्सिद्धः तदनर्थकं वुण्ग्रहणम्, तच्छीलादिष्वर्थेषु घिनिणा वुणो बाधस्स्यादिति चेत्? न। भविष्यति वा सरूपोऽस्त्रियामिति वचनात्। अत्रोच्यते–तच्छीलादिप्रकरणादि विहितानां प्रत्ययानाम् अतच्छीलादि प्रकरणविहितैः प्रत्ययैस्सहवासरूपविधिर्नास्तीति तेन क्षिपादिभ्यः तच्छीलादिष्वर्थे वासरूपविधिनेमे तृजादयः प्राप्ताः, ते न भवन्ति।

• निन्दहिंसक्लिशरवादानेकस्वरविनाशि व्याभाषासूयां वुञ् ४/४/२८

कण्ड्वादि यजन्तोऽसूयशब्दो स्वरस्सूत्रे गृहीतः। णिदि कुत्सायाम्, हिंसि हिंसायाम, क्लिशिस्सामान्यः, रवादृ भक्षणे एभ्यः तथानेक स्वरेभ्यः, नशे विपूर्वाद् इन्नन्तात्, व्याङ् पूर्वाच्च भाषेः, असूया शब्दाच्च कण्वादियजन्तात् वुञ् भवति। निन्दकः, हिंसकः, क्लेशकः, रवादकः, अनेक स्वरेभ्यः–दरिद्रायकः, गणकः, गणश्चुरादित्वात् इन् अस्य च लोपः, वुण्, आयिरिच्यादन्तेत्यायिः, कारित लोपः। विनाशकः क्लिश्यन्तं प्रयुङ्क्ते इतीन्, वुञ्। व्याभाषकः, असूयकः। असुशब्दात् कण्वादित्वाद्यण्। नाम्यन्तानां यणायीति दीर्घः, वुञ्, अस्य च लोपः। ननु विनाशि अनेक स्वरस्तदपार्थकं तस्य पृथगुपादानम्। सत्यम्–नियमार्थम् तु। इन्नन्तस्यानेकस्वरस्य विनाशेरेव यथा स्यात्, इह–माभूत्–कण्डूयिता। कण्डू शब्दाद् यण्, तृच्, इट्, अस्य च लोपः। वुणि। प्रकृते वुण् ग्रहणं घिनिणोऽप्यनुवृत्तिर्माभूदिति।

• दिवि क्रुशेश्चोपसर्गे ४/४/२९

उपसर्गे उपपदे दिवु क्रीडायामित्यस्मादिन्नन्तात्क्रुशेश्च वुण् भवति। आवेदकः, आक्रोशकः। उपसर्ग इति किम्? देवयिता, क्रोष्टा, तृच्।

• क्रुधिमण्डिचलिशब्दार्थेभ्यो युः ४/४/३०

द्वन्द्वगर्भो बहुव्रीहिः, क्रुध्यर्थेभ्यो धातुभ्यः मण्ड्यर्थेभ्यो धातुभ्यः चल्यर्थेभ्यो शब्दार्थेभ्यश्च युर्भवति। क्रुध्यर्थः–कोपनः, क्रोधनः, क्रुधकोपे, कुपक्रोधे। मण्ड्यर्थेभ्यश्च–मण्डनः, भूषणः। मडिभूषायाम्, भूष अलंकारे। चल्यर्थेभ्यः–चलनः, कम्पनः। चल कम्पने, कपि चलने। शब्दार्थेभ्यश्च–भरणः, रवणः, भणनः। रू शब्दो भणशब्दार्थः।

• रूचादेश्च व्यञ्जनादेः ४/४/३१

आत्मनेपदिनो ये धातवः, ते रूचादयः, रूचादेर्धातुगणाद् व्यञ्जनादेश्च युर्भवति। रोचनः, वर्तनः, वर्धनः, स्पर्धनः, जुगुप्सनः, मीमांसनः, यु प्रत्ययः अस्य च लोपः। रूचादिरिति किम्? भविता, तृन्। व्यञ्जनादेरिति किम्? एधिता।

• जुचङ्क्रम्य दंद्रम्यसृगृधिज्वलशुचां च। ४/४/३२

जु इति सौत्रोधातुः जवनः। चंक्रम्य, दंद्रम्य शब्दौ चेक्रीयितान्तौ, सृ गतौ, गृधू अभिकाङ्क्षायाम्, ज्वल दीप्तौ, शुच शोके, एभ्यो युर्भवति। जवनः, चक्रमणः, दंद्रमणः, सरणः, गर्धनः, ज्वलनः, शोचनः, कुटिलं क्रामति, एवं द्रामतीति य शब्दः, द्विर्व, अतोऽन्तोऽनुस्वारः, अनेन युः, अस्य च लोपः यस्याननीति य लोपः, जुचंक्रम्य, दंद्रम्य, सृ इत्येतेषां चलनार्थत्वात् क्रुधिमण्डीत्यनेन यु प्रत्यये सिद्धे पुनरूपादानं प्रपञ्चार्थम्।

• न यान्तसूददीपदीक्षायाम् ४/४/३३

यकारोऽन्तो येषां ते यान्ताः ततो द्वन्द्वः। यकारान्तेभ्यः षूद क्षरणे, दीपी दीप्तौ, दीक्ष मौण्ड्ये, इत्येतेभ्यश्च युर्न भवति, रूचादित्वात् प्राप्तः। क्नूयिता, क्ष्मायिता, सूदिता, दीपिता, दीक्षिता, तृन्।

• शृकमुगमहनवृषभूस्थालषलसपत पदामुकञ् ४/४/३४

शृ हिंसायाम्, कमु कान्तौ, गम्लृ गतौ, हन हिंसा गत्योः, वृषु सेचने, भू सत्तायाम्, ष्ठा गति निवृत्तौ, लष कान्तौ, लस श्लेष क्रीडनयोः, पत्लृ गतौ, पद गतौ, एषामुकञ् भवति। किंशारूकः, किमपि श्रृणातीति उकञ्। कामुकः, आगामुकः, अघातुकः, प्रवर्षुकः, प्रभावुकः, उपस्थापुकः, अभिलाषुकः, अपलासुकः, अपातुकः अपादुकः। अस्योपधेति वृद्धिदीर्घौ, हन्तेस्तः, हस्य हन्तेर्घिः, गुणः, आयिरिच्येत्यायिः।

• वृङ् भिक्षि लुण्टि जल्पि कुट्टां षाकः ४/४/३५

वृञ् वरणे, भिक्ष याच्ञायाम्, लुण्ट स्तेये, जल्प, जप व्यक्तायाम्, कुट्ट छेदने, लुण्टाकः, जल्पाकः, कुट्टाकः।

• प्रेजुसुवोरिन् ४/४/३६

प्र शब्दे उपपदे जु इत्येतस्मात् सौत्रात् षू प्रेरण इत्यस्माच्च इन्भवति। प्रजवी, प्रसवी।

• जीणदृङ्क्षि वि श्रि परिभूवमाव्यथाभ्यमाञ्च ४/४/३७

जि जये, इण् गतौ, दृङ् आदरे, क्षि क्षये, श्रिञ् सेवायाम्, परिपूर्वः, भू सत्तायाम्, परिपूर्वः टुवम् उद्गिरणे, व्यथिः नञ् पूर्वः, अम गतौ अभिपूर्वः, एषामिन् भवति। जयी, अयी, दरी, क्षयी, विश्रयी, परिभवी, वमी, अव्यथी, अभ्यमी।

• दयिपदिगृहिस्पृहिश्रद्धातन्द्रानिद्राभ्यः आलुः ४/४/३८

दयि दान गति रक्षणेषु, पद गतौ, गृह ग्रहणे, स्पृहि ईप्सायाम् त्रयश्चुरादित्वादिन्नन्ताः, श्रत् पूर्वो धाञ्, तन्द्रा इति सौत्रः आलस्येवर्तते। द्रा कुत्सायां गतौ निपूर्वः, एभ्यः आलुर्भवति। दयालुः, पदयालु गृहयालुः स्पृहयालुः। पदिगृहि स्पृहिभ्य इन अस्य च लोपः। नालिष्विवति कारितःलोपाभावः। श्रद्धालुः, तन्द्रालुः, शीङोऽपीष्यते।

• शीतोष्णाभ्याञ्चासहेः ४/४/३९

शीत उष्ण इत्येताभ्यां आलुर्भवति, असहे कर्तरि, न सहत इत्यसहः, पचादित्वादच्। शीतं न सहते शीतालुः, उष्णं न सहते उष्णालुः।

• शदिसदिधेट्दासिभ्योः रूः ४/४/४०

शदि, सदि, धेट् इत्येतेभ्यः, डुदाञ् दा, षिञ् बन्धन इत्येताभ्याञ्च रूः प्रत्ययो भवति। शद्रुः, सद्रुः, धारूः, दारूः, सेरूः।

• स्रदि घसाम्मरक् ४/४/४१

सृगतौ, अद भक्षणे, घसिस्सौत्रः, एषाम् मरक् प्रत्ययोभवति। सृमरः, अद्मरः, घस्मरः।

• मिदिभासिभञ्जां घुरः ४/४/४२

एषां घुर प्रत्ययो भवति। मेदुरः, भासुरः, भङ्गुरः, चजोः कगाविति गत्वम्, भञ्जेः कर्मकर्तरि प्रत्ययो ऽयं न कर्ममात्र इत्याहुः। एवमुत्तरत्र।

• छिदिभिदिविदाङ्कुरः ४/४/४३

छिदिर् द्वैधीकरणे, भिदिर् विदारणे विद्लृलाभे, एषामकुर भवति। छिदुरः, विदुरः, भिदुरः। विदिः ज्ञानार्थ एव गृह्यते नान्यः, अनभिधानात्।

• जागरूकः ४/४/४४

जागर्तेः रूक प्रत्ययो भवति जागरूकः।

• चेक्रीयितान्तानां यजिजपिदन्शिवदाम् ४/४/४५

यज देवता, जप मानसे, दन्श दन्शने, वद व्यक्तायां वाचि, एभ्यः चेक्रीयिंतान्तेभ्यः ऊक प्रत्ययो भवति, यायजूकः, जञ्जपूकः, दन्दशूकः, वावदूकः। अत्यर्थम् यजति, गर्हितं जपति, एवं दंशति। अत्यर्थम् वदति, य शब्दः। जपादीनाञ्चेत्यनुस्वारागमः, अनेन ऊकः, अस्य च लोपः, यस्याननीति य लोपः।

• तस्य लुगचि ४/४/४६

तस्य चेक्रीयितस्य लुग्भवति अचिपरे, लोलुवः, पोपुवः, अत्यर्थम् लुनाति, एवं पुनाति, य शब्दः, द्विर्वं, अच् पचादिभ्यश्चेत्यच्, अनेन य शब्दस्य लुक्, न णकारेति योगविभागाद् गुणाभावः, स्वरादाविवर्णोत्युव्।

तस्मात् चेक्रीयितान्तात् यातेः याया इत्येतस्माद् वर प्रत्ययो भवति, यायावरः कुटिलं यातीति वक्तव्याद् य शब्दः, अनेन वर प्रत्ययः, अस्य च लोपोय्वोर्व्यञ्जन इति य लोपः। ननु स्वरादेशपरिभाषया अकार लोपस्य स्थानिवद्भावाद् व्यञ्जनस्यापरभूतत्वात्कथं च लोपस्स्यात्, अस्त्येतत्। किन्तु यलोपविधिः प्रतिषिध्यते, स्थानिवद्भावः। य लोपविधिं प्रति न स्थानिवदिति वचनात्।

• कसिपिसिभासीशस्थाप्रमदाञ्च ४/४/४८

कसि गति शासनयोः, पिसृ पेसृ गतौ, भासृ दीप्तौ, ईश ऐश्वर्ये, ष्ठा गति निवृत्तौ, मदि प्रपूर्वः, एषां वरप्रत्ययो भवति। कस्वरः, पेस्वरः, भास्वरः, ईश्वरः, स्थावरः, प्रमद्वरः। घोषवत्योश्च कृतीतीड्भावः।

• सृजीण्नशां क्वरप् ४/४/४९

सृजि इण्, नश् एषां क्वरप् प्रत्ययो भवति। सृत्वरः–सृत्वरी, जित्वरः, इत्वरः, नश्वरः। धातोस्तोऽन्तः।

• गमस्त च ४/४/५०

गमः क्वरप् भवति, मकारस्य तकारादेशश्च। गत्वरः।

• दीपिकम्प्यजसिहिंसिकमिस्मिङ्णमां रः ४/४/५१

दीपी दीप्तौ, कपि चलने, जसु मोक्षणे, नञ् पूर्वः, हिसि हिंसायाम्, कमु कान्तौ, ष्मिङ् ईषद्धसने, णम प्रह्वीभावे, एषां र प्रत्ययो भवति। दीप्रः, कम्प्रः, अजस्रम्, हिंस्रः, कम्रः, स्मेरः, नम्रः, पूर्ववदिड्भावः।

• सन्नन्ताशंस भिक्षामुः ४/४/५२

सन्नन्ताद्धातोः आङ्पूर्वात् शसेः भिक्षेश्च ड प्रत्ययो भवति, कर्तुमिच्छुः चिकीर्षुः, पक्तुमिच्छुः पिपक्षुः, उ प्रत्ययः, अस्य च लोपः, आशंसुः, भिद्युः।

• विन्द्विच्छू च ४/४/५३

विन्दुः, इच्छुः इत्येतौ निपात्येते, इषेश्छत्वम्।

• आदृवर्णोपधालोपिनां किः द्वे च ४/४/५४

उपधालोपो विद्यते येषां ते उपधालोपिनः, आच्च, ऋवर्णश्च उपधालोपिनश्चेति द्वन्द्वः। आकारान्तेभ्य ऋवर्णान्तेभ्य उपधालोपिभ्यश्च कि प्रत्ययो भवति, एषां च द्वे रूपे भवतः, द्विर्वचनं भवतीत्यर्थः, आकारान्तेभ्यः पपिः, ददिः। पा पाने, डुदाञ् दाने, कि प्रत्ययः द्विर्व, आलोपस्सार्वधातुक इत्यालोपः। ऋवर्णान्तेभ्यः—चक्रिः, सस्रिः। डु कृञ् करणे, सृ गतौ, उपधा लोपिभ्यः—जज्ञिः, चख्निः। जनु जनने, खनु अवदारणे। गमहनेत्युपधालोपः। सह चलि, वदि, पदि, पतिभ्यः चेक्रीयितान्तेभ्यः किः वक्तव्यः। सासहिः, चाचलिः, वावहिः, वावदिः,पापतिः। षहमर्षणे, चल कम्पने, वह प्रवहने, वद व्यक्तायां वाचि, पत्लृ गतौ, य शब्दः, वक्तव्यात् किः, अस्य च लोपः, यस्याननीति य लोपः।

• तृषिवृषिस्वपां नजिङ् ४/४/५५

एषां नजिङ् प्रत्ययो भवति, तृष्णक्, वृष्णक्, स्वप्नक् पूर्ववदिङभावः।

• श्रृ वन्दिभ्यामारूः ४/४/५६

श्रृ हिंसायाम्, वन्दि, अभिवादनस्तुत्योः। आभ्यामारूः प्रत्ययो भवति। शरारूः, वन्दारूः।

• भियोरूग्लुकौ च ४/४/५७

ञि भी भये इत्येतस्मात् रूक् लुक् इत्येतौ प्रत्ययौ भवतः। भीरूः भीलुः। रूकलुकवपीष्येते। भीरूकः, भीलुकः।

• क्विब्भ्राजिपृधुर्वीऊर्जिग्रावस्तुदयुति भासाञ्च ४/४/५८

भ्राजृ दीप्तौ, पृ पालने, धुर्वी हिंसायाम्, ऊर्ज वल प्राणनयोः, चुरादित्वादिन्नन्तः। ष्टूञ् स्तुतौ, ग्रावपूर्वः, द्युत दीप्तौ, भासृ दी, एषां क्विप् भवति। विभ्राज्, हशषश्चेति डः, पूः—पुरौ—पुरः, राल्लोप्याविति व लोपः, ऊक्, क्विप्, कारित लोपः, चवर्गदृगेति गः, ग्रावस्तुत्, ग्रावाणं स्तौतीति क्विप्, धातोस्तोऽन्तः। विद्युत्, भाः। ताच्छीलाद्यर्थ विवक्षायां घिनिणा तृनो बाधः माभूदिति क्विप्प्रत्ययस्सिद्धोऽपि पुनर्विधीयते।

• द्युतिगमोर्द्वेच ४/४/५६

द्युति गतिभ्यां क्विब्भवति, द्वे रूपे च तयोः भवतः। दिद्युत्, जगत्। द्युति गमोः क्विप्, द्विर्व। द्युति स्वाप्योरभ्यासस्येति सम्प्र, यमि सनि तनि गमामिति पञ्चमलोपः, धातोस्तोऽन्तः।

• भुवोड्डु विसंप्रेषु ४/४/६०

वि, सम्, प्र, इत्येतेषूपपदेषु भवतेः डु प्रत्ययो भवति, विभुः, सम्भुः, प्रभुः। डु प्रत्ययः। अन्त्यस्वरादि लोपः।

• कर्मणिधेटष्ट्रन् ४/४/६१

धेटः कर्मण्यर्थेष्ट्रन् भवति, नकारो वैचित्र्यार्थः, धयन्ति तामितिधात्री, धेट् पाने, ष्ट्रन्, षकारः ईकारार्थः। षत्व निवृत्तौ टत्वं निवर्तते। इस्सन्त्रेति तकारोच्चारणात् षडनुबन्धेति ईकारः।

• नीदाप्शसुयुयुजस्तुतुदसिसिच्मिहपतदंश नहांकरणे ४/४/६२

णीञ् प्रणे, दाप् लवने, शसु हिंसायाम्, यु मिश्रणे, युजिर् योगे, ष्टूञ् स्तुतौ, तुद व्यथने, षिञ् बन्धने, षिच् क्षरणे, मिह सेचने, पत्लृ गतौ, दंश दंशने, णह बन्धने। एभ्यः करणेऽर्थे ष्ट्रन् भवति। नीयते ऽनेनेति नेत्रम्, दान्त्यनेनेति दात्रम्, शस्यतेऽनेनेति शस्त्रम्, युवन्त्यनेनेति योत्रम्, स्तुवन्त्यनेनेति स्तोत्रम्, तुदन्त्यनेनेति तोत्रम्, सिन्वन्त्यनेनेति सेत्रम्, सिञ्चन्त्यनेनेति सेकम्, अनित्य इडागमः, खिष्णोरकारकरणात्, दंश्यतेऽनया इति दंष्ट्रम्, छशोश्चेति षः, नह्यन्तेऽनया इति नद्धी, नहेर्धः, षढधभेभ्य इति धः, धुटां तृतीय इति दः, षडनुबन्धात्त्वी।

• अर्तिलूधूसूखनिसहिचरिभ्यइत्रन् ४/४/६३

ऋ गतौ, लूञ् छेदने, धू विधूनने, षू प्रेरणे, खन अवखनने, षह मर्षणे चर गत्यर्थः, एभ्यः इत्रन् भवति करणे ऽर्थे, नकारो वैचित्र्यार्थः।

अर्यतेऽनेनेति अरित्रम्। लूयतेऽनेनेति लवित्रम्, धुवन्त्यनेनेति धवित्रम्, सूयतेऽनेनेति सवित्रम्, खन्यते ऽनेनेति खनित्रम्।

- **पुवः संज्ञायाम् ४/४/६४**

इत्रन् भवति, पुनातीति पवित्रम्।

- **ऋषि देवतयोश्च कर्तरि ४/४/६५**

ऋषि पवित्रं रूद्रः। (भ्रष्टपाठः)

- **ञ्यनुबन्धमतिवृद्धिपूजार्थेभ्यश्च क्तः ४/४/६६**

ञि अनुबन्धो येषां ते ञ्यनुबन्धाः, मत्यर्थेभ्यः, वुद्ध्यर्थेभ्यः, पूजार्थेभ्यश्च वर्तमाने काले क्त प्रत्ययो भवति। मिन्नः, क्षिण्णः, ञिमिदा स्नेहने, ञिक्ष्विदा स्नेहनमोहनयोः। मेद्यति, क्ष्वेद्यतीति क्तः, आदनुबन्धाच्चेति इड्भावः, दात्पूर्वस्य च द इति निष्ठानत्वम्, तवर्गश्चटवर्गेति नस्यणः, मत्यर्थेभ्यः—राज्ञां मतम्, मन ज्ञाने, मन्यत इति क्तः, वनति तनोत्यादीति पञ्चमलोपः, वुद्ध्यर्थेभ्यः—राज्ञां वुद्धः, वुध अवगमने, वुध्यत इति क्त इष्यते। रक्षितः, रूष्टः, हृष्टः, तुष्टः, संयतः, उद्यतः, शयितः, तृप्तः, लिप्तः, बद्धः। रक्ष पा, रूष रोषे, हृष् तुष्टौ, तुष् प्रीतौ, यम उपरमे, समुत्पूर्वो, शीङ् स्वप्ने, तृप प्रीतौ, लिप उपदेहे, बध बन्धने, हृषेर्लोमस्विति हृषिर्वेट्। वनति तनोत्यादीति यमे पञ्चमलोपः, शीङ् पूङिति शीङो गुणः।

भट्टोग्रभूतिकृतायां शिष्यहितायां वृत्तौ कृत्प्रकरणे

चतुर्थः पादः।

कृत्प्रकरणे पञ्चमः पादः

• उणादयो भूतेऽपि ४/५/१

वर्तमाने काले धातोः उणादयः प्रत्ययाः भवन्ति। संज्ञायामित्यनुवर्तते, भूतेऽतीतेऽपि। वर्तमाने तावत्–करोतीति कारूः, वातीति वायुः, डुकृञ् करणे, वा गति ग, कृ वा पा जि मि स्वदि साध्य शूभ्यः उण् भूते। भसितं भस्म, चरितं चर्म, भस् भक्षण दीप्त्योः। चर ग, मनिति मन्, घोषवत्योश्च कृतीडभावः।

• भविष्यति गम्यादयः ४/५/२

गमीत्यादयः शब्दाः भविष्यति काले साधवो भवन्ति, पूर्वेण भूते वर्तमाने च प्राप्तः। गमिष्यतीति गमी, गमेरिन् इति इनिः, आगमिष्यतीति आगामी, भावी, प्रस्थायी, प्रयायी, प्रतिरोधी इति गम्यादयः।

• वुण्तुमौ क्रियायां क्रियार्थायाम् ४/५/३

क्रिया अर्थः प्रयोजनं यस्याः क्रियायाः सा क्रियार्था। भविष्यतीत्यनुवर्तते, घञ् कीर्तनात् प्राक् क्रियायां क्रियार्थायामुपपदे धातोः भविष्यति काले वुण् तुमौ भवतः। पाचको व्रजति, पक्तुं व्रजति, कारको व्रजति, कर्तुम् व्रजति। क्रियायामिति किम्? भिक्षिष्ये इत्यस्य जटा। अत्र जटा शब्दो भवत्युपपदम्, न तु क्रियावाचीति भिक्षेः प्रत्ययाभावः। भिक्षार्थत्वाज्जटानामिति क्रियार्थत्वमस्त्येव। क्रियार्थानामिति किम्? पतिष्यति ते धावतः दण्डः। अत्रधावन क्रिया भवत्युपपदम्, सा तु न, दण्डपातार्थे तु पतेः प्रत्ययाभावः। ननु सिद्धो वुण् प्रत्ययः, तदपार्थकं वुण् ग्रहणम्, तुमा बाधस्स्यादिति चेत्? न भविष्यति, अर्थभेदात्। अव्ययकृते भावे भवन्ति इति हि भावे प्रत्ययः वुणकर्तरि शन्त्राणाभ्यां तर्हि बाधस्स्यात् इति चेत्? वासरूपविधिना न भविष्यति। एवं तर्हि वुण् ग्रहणात्तु ज्ञायते नात्र क्रियोपपद प्रकरणे वासरूपविधिरस्तीति, यदिस्यात्, क्रियायाम् क्रियार्थायाम् भृजादयोऽपि भावे स्युः, अतश्च शन्त्राणाभ्यां माभूद् वुणो बाधः इति वुण् ग्रहणम्।

• भाववाचिनश्च ४/५/४

भावं ब्रुवन्तीति भाववाचिनः ब्रूञो बचिः, नाम्न्यजाताविति णिनिः, क्रियायां क्रियार्थायामुपपदे भविष्यति काले धातोः भाववाचिनः प्रत्ययाः यजादयो भवन्ति, भाव इत्यादिभिर्वाक्यैः। तदपार्थकोयोगारम्भः, नापार्थकः। वुण् तुमावित्यनेन हि तुमा घञादीनां बाधस्स्यात्, ततश्च क्रियोपपदेषु करणे घञादयो न स्युः।

• कर्मणि चाण् ४/५/५

क्रियायां क्रियार्थायाम् कर्मणि चोपपदे भविष्यति काले धातोः अण् प्रत्ययो भवति। काण्डलावो व्रजति, कर्मण्यणित्यणि सिद्धे अस्य वुण् तुमाविति वुणो बाधनिवृत्त्यर्थः।

• शन्त्राणौ स्यसंहितौ शेषे च ४/५/६

क्रियायां क्रियार्थायामुपपदे भविष्यति काले धातोः स्य संहितौ शन्तृङ्ञान इत्येतौ प्रत्ययौ भवतः शेषे च विषये, यत्र क्रिया क्रियार्थौ नोपपदे स शेषः, करिष्यन् व्रजति, करिष्यमाणो व्रजति, हनृदन्तात्स्य इतीट् आन्मोऽन्त इति मा गमः, शेषे च करिष्यन् करिष्यमाणः।

• पदरूजविशस्पृशोचां घञ् ४/५/७

पद गतौ, रूज भङ्गे, विश प्र, सपृश संस्पर्शने, स्पृश उपताप इति वा, उच समवाये, एषां घञ् भवति कर्तरि, कर्तरिकृदिति वचनात्। कर्तरि–पद्यते इति पादः, रूजन्तीति रोगः, विशतीति वेशः, स्पृशतीति स्पर्शः, उच्यत इति ओकः।

• सृस्थिरव्याध्योः ४/५/८

घञनुवर्तते, अण् कीर्तनात् प्राक्। सृ गतावित्यस्माद् घञ् भवति स्थिरे व्याधौ चार्थे, स्थिरे–सरतीति सारः, ह्रस्वस्य दीर्घता। मत्स्य बलयोरर्थयोः घञ् वक्तव्यः। विसारो मत्स्यः, सारं बलम्।

• भावे ४/५/९

भावेऽर्थे धातोः घञ् भवति, पचनं पाकः त्यजनं त्यागः। एवं पाकौ पाकाः। धात्वर्थ उच्यते। ननु धात्वर्थः क्रिया, तस्याश्चासिद्धरूपत्वात्कथं

सिद्धवस्तुविषये द्विवचनबहुवचनं स्याताम्? अस्त्येतत्–किन्तु द्वावंशौ धात्वर्थस्य, एकः साध्यरूपः, अन्यस्तु सिद्धरूपः। तत्र विधीयन्ते घञादयः प्रत्ययाः, तत्कथं द्विवचनबहुवचने न स्याताम्।

• अकर्तरि च कारके संज्ञायाम् ४/५/१०

अकर्तरि–कर्तृ वर्जिते कारके कर्मादावभिधेये धातोः संज्ञायां विषये घञ् भवति, प्रकुर्वन्ति तामिति प्राकारः, आहरन्ति तामित्याहारः, मधुराहारः, ह्रस्वस्य दीर्घतेति दीर्घः। अकर्तरीति किम्? नदतीति नदः, पचादित्वादच्, संज्ञायामिति किम्? कर्तव्यः, तव्यानीयाविति तव्यः, दृ जृभ्यां घञ्वक्तव्यः, दीर्यते एभ्य इति दाराः, जीर्यतेऽनेनेति जारः, दृभये, जृष् वयोहानौ। घञ्, वृद्धिः, पुंसि संज्ञायाममिति घ प्रत्ययो बाध्यते।

• सर्वस्मात्परिमाणे ४/५/११

परिमीयते ऽनेनेति परिमाणम्, भावे अकर्तरि च कारके द्वयमनुवर्तते कृत्ययुटो ऽन्यत्रापीति। अतः प्रागभिधानवशात् तु क्वचिद् भावे प्रत्ययः, क्वचित्तु कर्मादौ परिमाणे गम्यमाने सर्वस्माद्धातोः घञ् भवति, अलो बाधस्सर्वत्र। निचायः, निष्पावः, चिञ् चये, पूङ् पवने, निर् पूर्वः निरोरेफस्य विसर्गः, अनव्ययविसृष्टेति तु शब्दात् सत्वम्। आदौ पुरस्तादपवादाः अनन्तरान्विधीन्बाधन्ते इति घञ् प्रत्ययोऽयमनन्तरमणं वाधते न तु क्ति प्रत्ययम्, तेन स्त्रियां परिमाणे क्ति प्रत्यय एव भवति। उच्छ्रितिः, श्रिञ् सेवायाम् उत्पूर्वः, स्त्रियां क्तिः, सर्वग्रहणस्य प्रयोजनम् भाव्यम्, सामान्यापेक्षया क्ति प्रत्ययस्य बाधो मा भूदिति।

• इङाभ्याञ्च ४/५/१२

इङ आकारान्ताच्च घञ् भवति, अधीयत इत्यध्यायः, दायः, धायः।

• उपसर्गे रुवः ४/५/१३

उपसर्ग उपपदे रु शब्द इत्यस्मात् घञ् भवति, आरावः। उपसर्ग इति किम्? र वः। स्वरवृदृगमिग्रहामित्यल्। समिद्रवः सं शब्द उपपदे दु ञुपताप इत्यस्मात् घञ् भवति। संदावः।

● **युद्रुवोरुदि च ४/५/१४**

सं शब्द उपपदे उदितच्छब्दे च युद्रूभ्यां घञ् भवति। संयावः, सद्रावः, उद्यावः, उद्द्रावः।

● **श्रीणीभूभ्योऽनुपसर्गे ४/५/१५**

अनुपसर्गे श्रिणीभूभ्यो घञ्भवति। श्रायः, नायः, भावः। अनुपसर्ग इति किम्? प्रश्रयः, प्रणयः, प्रभवः। कथमनुभावः, प्रभावः? कृत्ययुटोऽन्यत्रापीतिक्वचनात्।

● **क्षुश्रुभ्यां वौ ४/५/१६**

वि शब्द उपपदे टु क्षु शब्दे श्रुगतावित्येताभ्यां घञ् भवति। विक्षावः, विश्रावः।

● **स्तृश्च प्रथनेऽशब्दे ४/५/१७**

वि शब्द उपपदे स्तृञ् छादन इत्यस्माद् घञ् भवति प्रथने—विस्तारे गम्यमाने अशब्दे। तच्च प्रथनं शब्द विषये न स्यात्। पटस्य विस्तारः। अशब्दे इति किम् वचसां विस्तरः। अल्।

● **छन्दो नाम्नि च ४/५/१८**

छन्दसां नाम छन्दो नाम, छन्दो नाम्नि विषये वि शब्द उपपदे स्तृणातेः घञ् भवति। छन्दश्शब्देन गायत्र्यादयो गृह्यन्ते न वेदः, नाम ग्रहणं ह्यनर्थकं स्यात्। विष्टरपङ्क्तिच्छन्दः, विस्तारपङ्क्तिच्छन्द इत्यादयः छन्दो नाम्नि। पूर्वचार्याः षत्वं न स्मरन्ति।

● **प्रेद्रुस्तु श्रुवः ४/५/१६**

प्र शब्द उपपदे द्रु स्रु स्तुभ्यां घञ्भवति। प्रद्रावः, प्रस्रावः, प्रस्तावः,।

● **नियोऽवोदोः ४/५/२०**

अव उत् इत्येतयो उपपदयोः नयतेः घञ् भवति। अवनायः, उन्नायः निष्पुवः, निः पूर्वात् पुवः घञ् भवति, निष्पावः, अभिपूर्वात् लूञः घञ्भवति अभिलावः।

• निरभ्यो पूल्वोः ४/५/२१

कथमुन्नयः ? कृत्य युटोऽन्यत्रापीति वचनादल्।

• उन्योर्ग्रिरः ४/५/२२

उत् नि इत्येतयोरूपपदयोः गॄ निगरणे इत्येतस्माद् घञ् भवति, उद्गारः निगारः। उन्योरिति किम्? गरः। गिरः इति निर्देशात् गॄ शब्दे इत्यस्य गृणातेर्न भवति।

• किरौ धान्ये ४/५/२३

उन्योरूपपदयोः धान्यविषये वर्तमानात् कॄ विक्षेप इत्यस्माद् घञ् भवति। उत्कारः, धान्यस्य निकारः, धान्यस्य विक्षेप इत्यर्थः। धान्य इति किम्? पुष्पनिकरः किर इति निर्देशात् कॄ हिंसायामित्यस्य कृणातेर्न भवति।

• नौ वृञः ४/५/२४

धान्य इत्येव निशब्द उपपदे वृ इत्येतस्माद् धान्येऽभिधेये घञ् भवति, नीवाराः नाम व्रीहयः, ह्रस्वस्य दीर्घतेति दीर्घः। धान्य इति किम्? निवरा कन्या।

• उदिश्रिपुवो ४/५/२५

उदि उपपदे, श्रि पु इत्येताभ्यां घञ् भवति। उच्छ्रायः, उत्पावः। कथं पतनान्तास्समुच्छ्रयः? अन्यत्रापीति वचनाद् अल् भविष्यति।

• ग्रहेश्च ४/५/२६

उदयुपपदे ग्रहेश्च घञ् भवति। उद्ग्राहः। भाषायामपीति मतम्।

• अवन्योराक्रोशे ४/५/२७

अव नि इत्येतयोरूपपदयोः ग्रहे धञ् भवति, आक्रोशे गम्यमाने। दुर्वचनमाक्रोशः। अवग्राहस्ते भूयात्, निग्राहस्ते भूयात्। आक्रोश इति किम्? अवग्रहः पदयोः, अवच्छेद इत्यर्थः। निग्रहः चौरस्य, अल्।

• समिमुष्टौ ४/५/२८

सम्युपपदे मुष्टिविषये धात्वर्थे वर्तमानाद् ग्रहेर्घञ् भवति। अहो मल्लस्य सङ्ग्राहः, दृढामुष्टिरित्यर्थः। मुष्टाविति किम्? संग्रहो धान्यस्य।

● वाव वर्षप्रतिबन्धे ४/५/२६

अव शब्द उपपदे ग्रहेः वा घञ् भवति वर्षप्रतिबन्धे अभिधेये। प्राप्त जलस्य वर्षस्य कुतश्चित् निमित्तादभावो वर्षप्रतिबन्धः। अवग्राहः, अवग्रहः, पक्षे अल्।

● प्रे रश्मौ ४/५/३०

वेत्येव, प्र शब्द उपपदे ग्रहेः वा घञ् भवति रश्मावभिधेये। अश्वादीनां संयमिनी रज्जुः रश्मिः। प्रग्राहः, प्रग्रहः।

● वृणोतेराच्छादने ४/५/३१

प्र इत्येव, प्र शब्द उपपदे वृञ् वरण इत्यस्माद् वा घञ् भवति आच्छादनेऽर्थे। प्रावारः, प्रवरः। ह्रस्वस्यदीर्घता, आच्छादन विशेषे उच्यते, न तु आच्छादनमात्रम्। आच्छादन इति किम्? प्रवरः, अल्।

● आङि रूप्लुवोः ४/५/३२

आङ्युपपदे रू शब्दे प्लुङ् गतावित्येताभ्याम्वा घञ् भवति। आरावः आरवः, आप्लावः, आप्लवः।

● परौ भुवोऽवज्ञाने ४/५/३३

परावुपपदे भवतेर्घञ् भवति वा, अवज्ञानेऽर्थे। परिभावः, परिभवः। परावेति किम्? सम्भवः। अवज्ञान इति किम्? सर्वतो भवनं परिभवः।

● चेस्तुहस्तादाने ४/५/३४

हस्तेन आदानम् हस्तादानम्। हस्तादान विषये चिनोतेर्घञ् भवति। पुष्पप्रचायः। फल प्रचायः। हस्तेनादानं ग्रहणम्। प्रत्यासन्नतामुपलक्षयति, तेनेह न भवति वृक्षे शिखरे फलप्रचयंकरोति। तु शब्दात् स्तेये न भवति, पुष्पप्रचयं करोति चौरः?

● शरीरनिवासयोः कश्चादे ४/५/३५

निवसन्त्यस्मिन् स निवासः, शरीरे निवासे चार्थे चिनोतेर्घञ् भवति, चिनोतेश्च य आदिस्तस्य कत्वम्। कायः, निकायः। राशीकरणेप्यर्थे

घञिष्यते, कत्वञ्च। गोमयः निकायः। कथंतर्हि–काष्ठनिचयः, उच्यते–बहुत्वमत्र विवक्षितम्, न राशीकरणम्।

• सङ्घे चानौत्तराधर्ये ४/५/३६

उत्तरञ्च, अधर्यञ्च, तदौत्तराधर्यम्, न औत्तराधर्यम्। अनौत्तराधर्ये संघे ऽभिधेये चिनोतेर्घञ् भवति, चिनोतेः य आदिस्तस्य कत्वञ्च। प्राणिनां समुदायः संघ उच्यते, स च द्वाभ्यां प्रकाराभ्याम् भवति। एकधर्मप्रवेशेन, औत्तराधर्येण वा। अनौत्तराधर्यपर्युदासादितरो गृह्यते तस्मिन्संघे वाच्ये अयम् प्रतिषेधः। ब्राह्मण निकायः। अनौत्तराधर्य इति किम्? श्वनिचयः, अल्।

• स्वर वृ दृ गमि ग्रहामल् ४/५/३७

स्वरान्ताद्धातोः वृ दृ गमि ग्रहिभ्यः अल् भवति। घञो. बाधः। स्वरान्तात्, क्षयः, चयः स्तवः, करः कृविक्षेपे, वरः दरः गमः ग्रहः। वृद्रोः स्वरान्तात् सिद्धे पुनरूपादानम् नियमार्थम्–ऋकारान्ताद् वृ दृभ्यामेवाल् भवति, नान्येषाम्। तेन कारः, हारः, डुकृञ् क, हृ ह। शृणोतेः वृ द्रोः पुनरूपादानम्। शारो वायुः। शारो बलः, नीशारः, ह्रस्वस्य दीर्घता।

• उपसर्गे ऽदः ४/५/३८

अलो ऽनुवर्तते, परो ड इत्यतः प्राक्, उपसर्गे उपपदे अदेः अल् भवति, प्रघसः, विघसः, घञलोर्घस्लृ इति घसिः। उपसर्गे इति किम्? घासः, घञ् पूर्ववदघसिः।

• नौण च ४/५/३९

नावुपपदे अदेर्वा ण प्रत्ययः भवति, निघासः, न्यदः, पक्षे अल्।

• मदे प्रसमोर्हर्षे ४/५/४०

मदेः अल् भवति हर्षेऽभिधेये, प्रसमयोरुपपदयोः, प्रमदः, सम्मदः, हर्ष इत्यर्थः। अन्यत्र प्रमादः, सम्मादः।

• व्यधजपोरनुपसर्गे ४/५/४१

अनुपसर्गे मदेः अल् भवति व्यधजपोश्च। मदः जपः, व्यधः। अनुपसर्गे इति किम्? प्रमादः, संमादः, आव्याधः उपजापः।

• स्वन हसोर्वा ४/५/४२

उपसर्गे सति स्वनहसोर्वा अल् भवति, स्वनः–स्वानः, हसः–हासः, अनुपसर्ग इति किम्? प्रस्वानः, प्रहासः।

• यमस्समुपनिविषु च ४/५/४३

उपसर्गे सति यमः वा अल् भवति, सम उप नि वि इत्येतेषूपपदेषु। यमः–यामः। संयमः–संयामः, उपयमः–उपयामः, नियमः–नियामः, वियमः–वियामः।

• नौ गदनदपठस्वनाम् ४/५/४४

नि शब्द उपपदे गदि नदि पठ स्वन इत्येतेभ्यः अल्। निगदः–निगादः, निनदः–निनादः, निघसः–निघासः, निपठः–निपाठः, निस्वनः–निस्वानः। अनुपसर्ग इति नानुवर्तते, अन्यथा हि स्वन हसोर्वेत्यत्र स्वन ग्रहणमपार्थकं स्यात्।

• क्वणो वीणायाञ्च ४/५/४५

नि पूर्व इति वर्तते, अनुपसर्ग इति च। नि उपपदे ऽनुपसर्गे सति क्वणो वा अल् भवति वीणायां विषये। वीणायाञ्चेति वचनादुपसर्गान्तरेऽपि क्वणः अल् भवति। निक्वणः–निक्वाणः, क्वणः–क्वाणः। कल्याणप्रक्वणा वीणा, कल्याणप्रक्वाणा। क्वण शब्दार्थः।

• पणः परिमाणे नित्यम् ४/५/४६

परिमाणेऽर्थे गम्यमाने पणेर्नित्यमल् भवति। पणः–मूलकादीनां संव्यवहारार्थम् परिमिता मुष्टिः उच्यते, तस्येदमभिधानम्। पणः, परिमाण इति किम्? पाणः।

• ग्लहोऽक्षेषु ४/५/४७

अक्षविषये धात्वर्थे वर्तमानात् ग्लह ग्रहणे इत्यस्मात् अल् भवति। ग्लहो ग्रहणमित्यर्थः, अर्थेष्विति किम्? पुत्रस्य ग्लाहः।

• सर्तेः प्रजने ४/५/४८

प्रजने—गर्भग्रहणे सर्तेः अल् भवति। गवामुपसरः, पशूनामुपसरः।

• ह्वो हुश्चाभ्युपनिविषु च ४/५/४९

अभि उप नि वि इत्येतेषूपपदेषु ह्वयतेः अल् भवति, हुरादेशश्च, अभिहवः, उपहवः, निहवः, विहवः।

• समुदोरजः पशुषु ४/५/५०

समुदोरूपपदयोः पशौ विषये अजेः अल् भवतिः। समजः पशूनां समुदाय इत्यर्थः। उदजः पशूनां प्रेरणमित्यर्थः। पशूनामिति किम्? समाजो ब्राह्मणानाम्, उदाजः क्षत्रियाणाम्।

• आङि युद्धे ४/५/५१

आङ्युपपदे युद्धेऽभिधेये ह्वयतेः अल् भवति, तस्य च हुरादेशः। आहूयन्ते यस्मिन् आहवः। युद्ध इति किम्? आह्वानमाहूयः, इङ्धारिभ्याञ्चेतिघञ्। निपाने हूयते। घञ् इष्यते हुरादेशश्च। निपानमुदकाधारः। आहावः। आहूयन्ते यस्मिन्निति विग्रहः।

• भावेऽनुपसर्गस्य ४/५/५२

ह्वयतेरनुपसर्गस्य भावे अर्थे अल् भवति, तस्य च ह्रस्वादेशः, ह्वानं हवः। अनुपसर्ग इति किम्? प्रह्वायः।

• हन्तेर्वधिश्च ४/५/५३

हन्तेरनुपसर्गस्य अल् भवति, वधादेशश्च भावे। हननं वधः। अनुपसर्गस्येति किम्? संघातः। कथम् हननम् घातः? अन्यत्रापीति वचनात्।

• मूर्तौ घनिश्च ४/५/५४

मूर्तिः काठिन्यम्, मूर्तौ अभिधेयायां हन्तेः अल् भवति घनिरादेशश्च। दधिघनम्, षष्ठीतत्पुरुषः, तत्पूर्वाद् हन्तेः अलिष्यते घनिरादेशश्च अभिधानेऽर्थे।

अत्याधाने ऽर्थे ४/५/५५

यस्मिन् काष्ठं स्थापयित्वा अन्यानि काष्ठानि तक्ष्यन्ते तदत्याधानम्, उद्घनः अंगदेशः, अपपूर्वाच्च हन्तेः–अपघनः। पाणिपादाभ्यामेवोच्यते नान्यदङ्गमित्याहुः।

प्राद्गृहैकदेशे ४/५/५६

प्र शब्दात्परस्य हन्तेः गृहैकदेशे वाच्ये अल् भवति घञ् च, घनिरादेशश्च, प्रघणः–प्रघाणः। गृहस्य द्विधा कृतस्य द्वारप्रकोष्ठाभ्यां यो वहिर्भूतः, तत्रापीति वचनाण्णत्वम्।

करणे ऽयोविद्रुषु ४/५/५७

एषूपपदेषु करणे हन्तेरल् भवति घनिरादेशश्च। अयोहन्यते ऽनेनेति अयोघनः। एवं विघनः, द्रुघनः। केचिदत्र णत्विमिच्छन्ति। द्रुघणः।

परौ डः ४/५/५८

परि शब्द उपपदे करणे ऽर्थे हन्तेः ड प्रत्ययो भवति घनिरादेशश्च। परिहन्यते ऽनेनेति परिघः।

समुदोर्गणप्रशंसयोः ४/५/५९

समुदोः उपपदयोः हन्तेर्ड प्रत्ययो भवति यथासंख्यम्, गणे ऽभिधेये प्रशंसायां गम्यमानायाम्, घनिरादेशश्च। संघः पशूनां समुदाय इत्यर्थः उद्घो मनुष्यः, प्रशष्य इत्यर्थः। गण प्रशंसयोरिति किम्? संघातः, उद्घात्।

उपात्क आश्रये ४/५/६०

उपात्परस्य हन्तेः, क प्रत्ययो भवति आश्रये ऽभिधेये। पर्वतोपघ्नं वसतिः। गमहनेत्युपधा लोपः, लुप्तोपधस्य चेतिघः। आश्रय इति किम्? उपघातः।

स्थाम्नापा व्यधि हनि युधिभ्यः ४/५/६१

एभ्यः क प्रत्ययो वक्तव्यः। प्रतिष्ठन्तेऽस्मिन्व्रीहय इति प्रस्थः। पृच्छन्तितत्रेति प्रश्नः, प्रपिबन्ति तस्यामिति प्रपा, आलोपो सार्वधातुक

इत्यालोपः। आविध्यते ऽनेनेति आविधम्, ग्रहिज्येति सम्प्र, विहन्यतेऽनेनेति विघ्नः। पूर्ववदुपधा लोपो घत्वञ्च। आयुध्यते ऽनेनेति आयुधम्।

• द्वनुबन्धादथुः ४/५/६२

टु शब्दानुबन्धेभ्यः अथुः प्रत्ययो भवति, वेपथुः, क्षवथुः वेपनम्, क्षवणमिति विग्रहः, टु वेपृ कम्पने, टु क्षु शब्दे, टु शब्द इहार्थः।

• ड्वनुबन्धात्त्रिमक् तेन निर्वृत्ते ४/५/६३

डुशब्दानुबन्धाद् धातोः त्रिमग्भवति, तेन धात्वर्थे निर्वृत्ते, पाकेन निर्वृत्तं पक्त्रिमम्, करणेन निर्वृत्तम् कृत्रिमम्, डुपचष् पाके, डुकृञ् करणे, डु शब्द इहार्थः।

• याचिविच्छिप्रच्छिस्वपिरक्षियजि यतिभ्योनङ् ४/५/६४

याचि विच्छि प्रच्छि स्वपि रक्षि यजि यति इत्येतेभ्यो नङ् प्रत्ययो भवति याच्ञा, विश्नः, प्रश्नः, स्वप्नः, रक्षः, यज्ञः, यत्नः। घोषवत्योश्चेत्यत्रस्वरः। च्छोश्शूठाविति छस्य शः।

• उपसर्गे दः किः ४/५/६५

उपसर्गे उपपदे दासंज्ञकात् कि प्रत्ययो भवति। आदिः आदीयते–प्रथमतः उपलभ्यत इत्यादि। विधानं विधिः। अन्तर् शब्देऽप्युपपदे किरिष्यते। अन्तर्धा–अन्तर्धिः।

• कर्मण्यधिकरणे च ४/५/६६

कर्मण्युपपदे दा संज्ञकात् किः प्रत्ययो भवति अधिकरणेऽर्थे। जलं धीयते यस्मिन्निति जलधिः, वालधिः, शरधिः।

• स्त्रियां क्तिः ४/५/६७

धातोः स्त्रियां विषये क्तिः प्रत्ययो भवति, घञलोर्बाधः। कृतिः, चितिः, स्तुतिः।

• साति हेति यूति जूति ऊति कीर्तयश्च ४/५/६८

एते निपात्यन्ते। सातिः–षोऽन्त कर्मणीत्यस्य। द्यतिस्यतीति इत्वं प्राप्तम्। तदभावो निपात्यते। हेतिः–हन्तेर्नकारस्य इत्वं निपात्यते। हि गतावित्यस्य वा गुणः। यूति जूतीति। यु मिश्रणे, जु इत्यस्य च सौत्रस्य दीर्घो निपात्यते। हेति कीर्त्योरनार्षः पाठः। ऊति शब्दोऽपि सृ व्यमिमवीत्यत्र सिद्धः कीर्ति शब्दोऽपि कीर्तीषोः क्तिश्चेत्यत्र।

• भावे पचिगापास्थाभ्यः ४/५/६९

स्त्रियामितिवर्तते, कृत्य युटोऽन्यत्रेत्यतः प्राक्। पचिगापास्थाभ्योः भावेऽर्थे क्तिः प्रत्ययो भवति। आतश्चोपसर्गे इत्यतः प्राप्तः, पचेरपि चानुबन्धत्वात्। पक्तिः, उद्गीतिः, प्रतीतिः, प्रस्थितिः, दामागायतीतीत्वम्। कृत्य युटोऽन्यत्रपीति वचनाद् अवेऽपि यथादर्शनं भवति। अवस्था, संस्था।

• व्रज यजोः क्यप् ४/५/७०

व्रजि यजिभ्यां क्यप् भवति, क्त प्रत्ययः प्राप्तः। व्रज्या, इज्या। स्वपिवचीति सम्प्र, पानुबन्धकरणमुत्तरत्र उकारागमार्थम्।

• समजासनिषदनिपतशीङ्सुविद्यटिचरि मनिभृञिणां संज्ञायाम् ४/५/७१

अजिस्संपूर्वः, आस उ, षद्लृ विशरणे, पत्लृ गतौ, नि पूर्वौ, शीङ् स्वप्ने, षुञ् अभिषवे, विद् ज्ञाने, इत्येतेभ्यः अटि, चरि, मनि, भृञ्, इञ् इत्येतेभ्यश्च संज्ञायां विषये क्यप् भवति। समज्या, आस्या, निषद्या, निपत्या, शय्या, अयीर्ये इत्यय्। सुत्या, विद्या, अटाट्या। आटश्चेक्रीयितान्ताद्य प्रत्ययो भवति तेन अटट्य शब्दात् क्यप्, अस्य च लोपः, यस्याननीति य लोपः। परिचर्या, परिपूर्वादेव चरेः। मन्या, भृत्या, इत्या। कथंतर्हिः भृतिः, मननं मतिः? भृतौ कर्मशब्दे मतिवुद्धीति ज्ञापकात्।

• कृञश्श च ४/५/७२

कृञः क्यप् भवति, श प्रत्ययश्च। क्रित्यः क्रियाकरणमिति। श प्रत्ययः, शकारस्सार्वधातुकवद्भावार्थः। यण्, यणाशिषोर्य इति इकारागमः कथं कृतिः? अन्यत्रापीति वचनात्।

● सर्तेर्य च ४/५/७३

सृ गतावित्यस्माद् य प्रत्ययो भवति। च शब्दो वैचित्र्यार्थः, परिसर्या, परिपूर्वादेव य प्रत्ययः। जागर्तेरपीष्यते। जागर्या। अकारोऽपि दृश्यते, जागरः।

● इच्छा ४/५/७४

अयं शब्दो निपात्यते इषे भावे ऽर्थे शकार प्रत्ययः, गुणाभावः, कत्वञ्च, नाम्नः आत्मेच्छायामित्यत्रेच्छाशब्दस्योच्चारणमस्त्येवमिति निपातनमनर्थकमित्याहुः।

● शन्सु प्रत्ययादः ४/५/७५

शन्सोः प्रत्ययान्ताच्च अकार प्रत्ययो भवति। आशंसा, चिकीर्षा, लिलूया। उत्तरसूत्रेण शन्सेः प्रत्ययो न सिद्धः, निष्ठायामनिट्त्वात्।

● गुरोश्च निष्ठायां सेटः ४/५/७६

गुरोः गुरूमतो धातोः निष्ठायां सेटः अकार प्रत्ययो भवति। ईहनमीहा, ऊहनमूहा। एवं कुण्डा, हुण्डा। कुडि दाहे, हुडि सङ्कोपने। गुरोरिति किम्? निगृहीतिः, इटोदीर्घोग्रहेरिति दीर्घः। निष्ठाया सेट इति किम्? राद्धिः।

● षानुबन्ध भिदादिभ्यस्त्वङ् ४/५/७७

षकारोऽनुबन्धो येषां ते षानुबन्धाः, भिद् आदिर्येषां ते भिदादयः, ततो द्वन्द्वः षानुबन्धेभ्यः धातुभ्यः भिदादिभ्यश्च अङ् भवति। क्तिप्रत्ययस्य बाधः। पचादित्वादिभदादयो गृह्यन्ते। त्रपूष् लज्जायाम्–त्रपा, जृष् वयो हानौ–जरा। जरा जरस्स्वरेवेति ज्ञापकात् गुणः। क्षमूष् सहने–क्षमा। कथं क्षान्तिः, क्षमिः क्षान्त्यामिति ज्ञापकात् क्षमेः स्त्रियां क्तिः। पञ्चमोपधेति दीर्घः। डुलभष् प्राप्तौ–उपलभा। रभिलभोरिति नकारागमस्य ङनुबन्धाल्लोपः। कथमुपलब्धिः, अर्थोपलब्धाविति ज्ञापकात्। अषानुबन्धा अपि घटादयः कार्यार्थम् षानुबन्धाः प्रतिज्ञायन्ते। तेन–घटा, व्यथा, प्रपा। भिदादिभ्यः–भिदा, छिदा, आरा–ऋगतौ, आङ् पूर्वः। शस्त्र्यामेवायं प्रयोगः। तेनेह न भवति आर्तिः। ऋशब्दे परे वक्तव्यादाङ्, आकारादेशो लोपश्च,

कारा, हारा। गणपाठ सामर्थ्याद् वृद्धिः। एवं धारा, प्रपा। अतएवायं प्रयोगः, तेनेह न भवति–धृतिः। भिदा, च्छिदा, आरा, कारा, धारा, क्षिप्रा वसा इत्यादयो भिदादयः।

- **भीषिचिन्तिपूजिकथिकुम्पिचर्चि स्पृहितोलिदोलिभ्यश्च ४/५/७८**

ञि भी–भये, हेताविन्नन्तः, चिति–स्मृत्याम्, पूज–पूजायाम्, कथ–वाक्य प्रतिबन्धे, कुपिच्छादने, चर्च अध्ययने, स्पृह ईप्सायाम्, तुल उन्माने, दुल उत्क्षेपणे, चुरादित्वादिन्नतेभ्यः एभ्यः अङ्भवति, ईषि श्रन्थ्यासीति युप्रत्ययः प्राप्तः। भीषा, चिन्ता, पूजा, कथा, कुम्पा, चर्चा, स्पृहा, तोला, दोला। बिभेते रिन्, भियष्षुग्वेति षुगागमः अङ् कारितलोपः। कथं तुला? तुलया सम्मित इति ज्ञापकात्।

- **आतश्चोपसर्गे ४/५/७६**

उपसर्गे उपपदे आतः अकारान्ताद्धातोः अङ् भवति। उपदा, उपधा, सन्धा, संस्था। उपसर्ग इति किम्? स्थितिः दयतिस्यतीति इत्वम्। कथं श्रद्धा? अश्रद्धेति ज्ञापकात्।

- **इषिग्रन्थ्यासिघट्टिवन्दि विदिकारितोऽन्तेभ्यो युः ४/५/८०**

इषि गतौ, इषु आभीक्ष्ण्य इति वा, ग्रन्थि संरम्भे, आस उपवेशने, घट्ट चलने, वदि अभिवादनस्तुत्योः, विदिस्सामान्यः, एभ्यः, कारितान्तेभ्यश्च यु प्रत्ययो भवति, एषणा, ग्रन्थना, आसना, घट्टना, वन्दना, विदना, कारणा, हारणा, इषेः अनिच्छार्थस्यायं प्रत्ययस्स्मर्यते। ग्रन्थिघट्टि भौवादिकौ न गृहयेते, न चौरादिकौ, कारितान्तत्वात् तयोस्सिद्धत्वात्।

- **कीर्तीषोः क्तिश्च ४/५/८१**

कीर्तयते इत्यस्मादिन्नन्तात् इषेश्च यु प्रत्ययो भवति, क्ति प्रत्ययश्च। कीर्तना–कीर्तिः, परीषणा–परीष्टिः, परिपूर्वाद् इषेः परिष्टा

प्रत्ययादिसंस्मरन्ति, कृतेश्चुरादित्वादिन्, सूत्रनिर्देशादृकारस्येट्, अनेन युक्तिश्च।

● रोगाख्यायां वुञ् ४/५/८२

रोगाख्यायां सत्यां धातोः वुञ् भवति। प्रवाहिका, विषूचिका, वह प्रापणे, सुच पैशुन्ये, प्र वि पूर्वौ, चुरादित्वादिन्, वुञ् अकारादेशः, स्त्रियामादाप्, के प्रत्यय इतीत्वम्, आख्याग्रहणं पदान्तर द्योत्यत्वं मा भूत्। बुभुक्षा भस्मकेनेति भुजेस्सन्नन्तात् शन्सु प्रत्ययाद इत्यकार प्रत्ययः, भस्मकशब्द सान्निध्यात् बुभुक्षा शब्दों रोगे वर्तते। यद्येवम्–इहापि प्राप्नोति, शिरोर्त्ति। अर्द हिसि हिंसायाम् शिरस्पूर्वः क्तिः। सत्यम्–अन्यत्रापीतिवचनात् न भविष्यतीति धात्वर्थमात्रे वुञिष्यते। आसिका, शायिका।

● संज्ञायाम् ४/५/८३

धातोस्संज्ञायां वुञ्भवति। उद्दालकपुष्पभञ्जिका, अत्युष्णखादिका, भञ्जो आमर्दने, खाद् भक्षणे, कयोश्चित् क्रीडनयोः अत्र संज्ञे।

● पर्यायार्हर्णेषु ४/५/८४

पर्याय, अर्ह, ऋण इत्येतेष्वर्थेषु वर्तमानाद्धातोः वुञ् भवति। भवतः शायिका, भवतः आसिका। शीङ् शये, आस उपवेशने, वुञ्। अर्हे–पयः, पायिका, पा पाने शब्दाद् वुञ् आयिरादेशः। ऋणे–इक्षुभक्षिकां मे धारयति। भक्षे श्चुरादित्वादिन्। उत्पत्तावपीष्यते–पयः पायिकामुदपादि।

● प्रश्नाख्यानयोरिञ्च वा ४/५/८५

प्रश्ने आख्याने च गम्यमाने धातोः वुञ् भवति, इञ्प्रत्ययश्च। तौ च वा। तेनान्येऽपि प्रत्ययाः यथा दर्शनं भवन्ति, प्रश्ने तावत्–कां त्वं कारिकामकार्षीः, कां त्वं कारिमकार्षीः। एवं कां क्रियां वक्ति। कृञश्शचेति श प्रत्ययः। कां कृत्याम्, क्यप्। कां कृतिं पक्ति। आख्यायाम्–सर्वाः कारिकाः अकार्षम्, सर्वाः क्रियाः, सर्वाः कृत्याः, सर्वाः कृतीः। सर्वत्र द्वितीयायाम्।

● नञ्यन्याक्रोशे ४/५/८६

नञुपपदे आक्रोशे गम्यमाने धातोः अनि प्रत्ययो भवति अकरणिस्तेस्यात्, भावेऽर्थे अनिः। अनञीति किम्? मृतिस्ते जाल्म! आक्रोश इति किम्? आकृतिस्तस्य कटस्य।

• कृत्ययुटोऽन्यत्रापि ४/५/८७

कृत्य च युट् च यत्रार्थे विहिताः ततोऽन्यत्रापि भवन्ति। भावकर्मणो कृत्याः उक्ता अर्थान्तरेऽपि भवन्ति। स्नात्यनेनेति स्नानीयम् चूर्णम्, करणे अनीयः। दीयत यस्मै दानीयः, सम्प्रदाने, अनीयः। भावे करणाधिकरणयोश्च युट् ततोऽन्यत्रापि भवति। अवसिञ्चति तदिति अवसेचनम्, षिच् क्षरणे, कर्मणि युट्। एवं राजभिः भुज्यन्ते इति राजभोजनाच्छालीयः। राजभिराच्छाद्यन्ते इति राजच्छादनानि वासांसि। छदेश्चुरादित्वादिन्, युट्, कारित लोपः। प्रपतन्ति यस्मात् प्रपतनम्। अपादाने युट्, कृद्ग्रहणे कर्तव्ये कृत्ययुड् ग्रहणस्य प्रयोजनं चिन्त्यम्, कृत्प्रत्ययान्ता अपि हि प्रयोगानुसारेण अर्थान्तरेऽपि दृश्यन्ते। पादाभ्यां ह्रियते पादहारकः, कर्मणि वुण्, अपिशब्दात्कृतो व्यभिचारार्थः, तथा चानुपसर्गाद् भवतेः घञ् उक्तः सोपसर्गादपि दृश्यते क्वचित्। अनुभावः, प्रभावः इति।

• नपुंसके भावे क्तः ४/५/८८

नपुंसकविषये भावे धातोः क्त प्रत्ययो भवति। शयितम् . स्थितम्, भवताकृतम्, प्राप्तमनेन इति।

• युट् च ४/५/८९

हसनम्, आसनम् टकारानुबन्ध उत्तरार्थः, योगविभागश्च।

• करणाधिकरणयोश्च ४/५/९०

करणे चाधिकरणे चार्थे धातोः युड् भवति। इध्मानि व्रश्चन्ते येन स इध्म व्रश्चनः। सक्तवो धीयन्ते यस्यां सा सक्तुधानी।

• पुंसि संज्ञायां घः ४/५/९१

धातोस्संज्ञायां विषये घ प्रत्ययो भवति पुंसि, विशिष्टयोः करणाधिकरणयोरभिधेययोः। व्यञ्जनान्ताद् घञं वक्ष्यतीति सामर्थ्यात् स्वरान्तादयं प्रत्ययः इति। ह्रस्वः। प्लवन्ते ऽनेनेति आप्लावः, प्लुङ् गतौ। एतस्मिन्कुर्वतीत्याकारः, कृञ् आङ् पूर्वाद् घः। पुंसीति किम्? प्रसाधनः, प्रसाध्यतेऽनेनेति पूर्वेण युट्।

• गोचरसंचरवहव्रजव्यजक्रमापणनिगमाश्च ४/५/६२

एते घ प्रत्यये सति निपात्यन्ते, पुंसि विशिष्टयोः करणाधिकरणयोः। व्रज व्यज्योश्चेति घञ् प्रत्ययः प्राप्तः। गावश्चरन्त्यत्रेति गोचरः। यद्यप्येषां व्युत्पत्तिः तथाप्ययं शब्दः प्रत्यासन्नतामाह, तथा च देवदत्तस्य गोचरो ऽनुवाक् इति प्रयोगः। सञ्चरन्त्यनेनेति सञ्चरः, वहन्त्यनेनेति वाहः, व्रजन्त्यनेनेति व्रजः, अजः। क्रामन्त्यनेनेति क्रामः। आपणायन्ते तत्रेति आपणः। निगच्छन्ति जानन्त्यनेनेति धर्मादीनीति निगमः। च शब्दात् कश निकषावपि। निकषन्ति तत्रेति निकषः।

• अवेः तृस्त्रोर्घञ् ४/५/६३

अव शब्दे उपपदे तृ स्तृभ्यां घञ् भवति पुंसिविशिष्टयोः करणाधिकरणयोरर्थयोः। घ प्रत्ययस्य बाधः। अवतरन्ति तेन तत्र व अवतारः, अवस्तृणोति तेन तत्र वा अवतारः। अनुबन्धकरणमुत्तरार्थम्।

• व्यञ्जनान्ताच्च ४/५/६४

व्यञ्जनान्ताद्धातोः घञ् भवति पुंसिविशिष्टयोः करणाधिकरणयोरर्थयोः। अपमृज्यन्ते ऽनेनेति अपामार्गः। मृजूष् शुद्धौ, अप् पूर्वः, घञ् मर्जोमार्जिः, चजोः कगाविति गः, ह्रस्वस्य दीर्घता इति दीर्घः! निषीदति पापमित्यस्मिन्निति निषादः। षद्लृ विशरणे, निपूर्वः। खनेर्घञ् नेष्यते, आखनन्त्यनेनेति आखनः, पक्षे घ प्रत्ययोऽपि दृश्यते, आखनन्त्यनेनेति आखः।

• अध्यायन्यायोद्यावसंहाराधारावायाश्च ४/५/६५

एते घञ् प्रत्ययान्ताः निपात्यन्ते। अधीयन्त्यस्मिन्नित्यध्यायः। अधिपूर्वाद् इङो घञ्। उदयुवन्ति तस्मिन्निति उद्यावः, यू मिश्रणे, उत् पूर्वः। संह्रियन्ते इति संहारः। आध्रियन्ते इति आधारः। आवयन्ति तस्मिन्निति आवायः। वेञ् तन्तु सन्ताने, घञ्, आङ्पूर्वः। आङ उपपदे जालेऽर्थे नयतेः घञ् वक्तव्यः आनीयन्ते ऽनेनेति आनायः, जाल इत्यर्थः। जाल इति किम्? आनयः, घ प्रत्ययः।

• ईषद्दुः सुषुकृच्छाकृच्छार्थेषु खल् ४/५/६६

कृच्छा कृच्छार्थेष्विति द्वन्द्वगर्भोवहुव्रीहिः। कृच्छ अकृच्छ इत्येतयो रूपपदयोः वर्तमानेषु ईषत्, दुः, सु इत्येतेषु उपपदेषु धातोः खल् भवति, लकारो भावकर्मणो कृत्यर्थखलर्थेभ्यश्च! कृच्छम्–दुःखम्, तद् द्वयोर्विशेषणम्। ईषत्करः, दुष्करः, सुकरः। दुःखेन क्रियते, सुखेन क्रियत इति खल्। एवम् ईषद्भोजः, दुर्भोजः, सुभोजः। ईषद् दुःसुष्विति किम्? ईषत्कार्यम् मनागित्यर्थः। नन्वेमदादीनामव्ययत्वान् मकारागमो न सम्भवति इति किम् खानुबन्ध करणेन, सत्यम्–उत्तरार्थन्तु।

• कर्तृकर्मणोस्तुभूकृञोः ४/५/६७

ईषद्दुस्सुषु कृच्छाकृच्छार्थेषु कर्तृकर्मसूपपदेषु यथासंख्यं भूकृञोः खल् भवति, सुखेन अनाढ्येन आढ्येन भूयते अथवा ईषदाढ्येन भूयते, ईषदाढ्यं भवम्, एवमीषदाढ्यङ्करः, दुराढ्यङ्करः, स्वाढ्यङ्करः।

• आतोऽय्वदरिद्रातेः ४/५/६८

ईषद् आदयोऽनुवर्तन्ते, कर्तृकर्मणीतिनिवृत्तः। ईषदादिषु कृच्छा कृच्छार्थेषूपपदेषु आतः–आकारान्ताद्धातोः यु प्रत्ययो भवति, दरिद्रादि वर्जितात्। सुखेन पीयत इति सुपानः, ईषत्पानः दुष्पानः। अदरिद्रातेरिति किम्? ईषद्दरिद्रः, खल्, दरिद्रातेस्सार्वधातुक इत्यालोपः।

• शासि युधि दृशि वृषि मृषिभ्योवा ४/५/६६

शासि युधि दृशि वृषिमृषीनां द्वन्द्वः एभ्यो धातुभ्यो वा यु प्रत्ययो भवति। सुखेन शिष्यन्ते सुशासनः–सुशासः, ईषच्छासनः–ईषच्छासः, दुश्शासनः–दुश्शासः। सुखेन योध्यते इति सुयोधनः–सुयोधः। ईषद्योधनः ईषद्योधः। दुर्योधनः–दुर्योधः। सुखेन दृश्यते–सुदर्शनः सुदर्शः, ईषद्दर्शनः–ईषद् दर्शः, सुवर्षणः–सुवर्षः, सुमर्षणः–सुमर्षः। वा ग्रहणं पक्षे खल् प्रवृत्त्यर्थम् असति हि तस्मिन् युप्रत्ययेन खल् बाध्यते। वासरूपविधिना बाधो न भविष्यतीति चेत्–तर्हि वाग्रहणमेतद् ज्ञापयति–स्त्र्यधिकारम् परेण नास्ति, वा सरूपविधिरिति यदि स्यात् नपुंसके भावे क्तः प्रत्ययवद्भावे घञपिस्यात्।

• इच्छार्थेष्वेककर्तृकेषु तुम् ४/५/१००

उभयत्रापि बहुव्रीहिपरक कर्तृकेषु समानकर्तृकेषु इच्छार्थेषूपपदेषु धातोः तु प्रत्ययो भवति। इच्छति भोक्तुम्, वाञ्छतिभोक्तुम्। वाञ्छि इच्छायाम् .....एक कर्तृकेष्विति किम्? देवदत्तं भुञ्जानमिच्छति यज्ञदत्तः। भुजेः वर्तमाने श इति आनश्। स्वराद्रुधादेरिति न शब्दः। नन्विच्छायाः भोजनार्थत्वात् वुण्तुमौ क्रियायामित्यनेन सिद्ध इति अनर्थकं वचनम्। अस्त्येतत्–किन्तु, तु प्रत्ययार्थः वुणपि स्यात्।

• कालसमयवेलाशक्यार्थेषु च ४/५/१०१

शकनं शक्यम्। शक्यमर्थोयेषां ते शक्यार्थाः, ततो द्वन्द्वः, काल, समय, वेला इत्येतेष्वर्थेषूपपदेषु शक्यार्थेषु समर्थेषु च धातोः तुम् प्रत्ययो भवति, भोक्तुं कालः, भोक्तुं समयः, भोक्तुं वेला, भोक्तुं समर्थः भोक्तुं पर्याप्तः। च शब्दाद्यथादर्शनमन्यत्रापि तुमिष्यते। हेतुकामः, भोक्तुमनाः। वक्तव्यात्तुमः मलोपः। प्रथमान्तेष्वेव कालादिषु प्रत्ययं स्मरन्ति, तेनेह न भवति–कालो भुङ्क्त इति।

• अर्हतेः तृच् ४/५/१०२

कर्तरि कृदिति वचनात् कर्तृ ग्रहणं लब्धम्, तस्येदमर्हतेरिति विशेषणं ज्ञायते। अर्हतेः य कर्ता तस्मिन् कर्तरि धातोः तृ प्रत्ययो भवति। कन्यायाः भवान् वोढा। वोढुमर्हतीत्यर्थः। होढ इत्यादिना कृतेषु ढत्वादिषु सहिवहोरोदवर्णस्येत्योत्वम्। वुण्तृचाविति सिद्धः योगारम्भोऽर्हेः कर्तरि सप्तम्यां बाधो माभूदिति। ननु वुणपिस्यात्? भवतु यद्यभिधानमस्ति।

• प्रैषातिसर्गप्राप्तकाले प्रकृत्याः ४/५/१०३

एषुगम्यमानेषु धातोः कृत्य प्रत्ययाः भवन्ति। अतिसर्गः कामचारः। भवता कटः कर्तव्यः, करणीयः, कार्यः, कृत्यः, अतिसर्गे–मया कटः कर्तव्यः, प्राप्तकाले–अधुनाकटः कर्तव्यः। प्रैषादिष्वाचार्याः पञ्चमीं स्मरन्ति। तथा कृत्यानां मा भूदिति सिद्धा अपि ते पुनर्विधीयन्ते।

● आवश्यकाधमर्ण्ययोर्णिनिः ४/५/१०४

अधमः ऋणेन अधमर्णाः, तस्य भाव आधमर्ण्यम्। आवश्यकाधमर्ण्ययोस्सतोः धातोः णिनिर्भवति। अवश्यं करोतीति अवश्यङ्कारी, अवश्यंदायी, शतंददातीति शतंदायी, सहस्रंदायी। च शब्देनात्र कृत्या अनुकृष्यन्ति इति केचन मन्यन्ते—तदसारम्। विहिता एव तैस्स्ववाक्यैः णिना बाधस्स्यादिति चेत्, न भविष्यत्यर्थभेदात् कर्तरि णिन्, भावकर्मणोस्तु कृत्याः।

● तिङ् कृतौ च संज्ञायामाशिषि ४/५/१०५

धातोः तिक् कृत् इत्येतौ भवतः संज्ञायां विषये आशिषि च। तनुतात् तन्तिः। सनुतात् सन्तिः। वा स्नः तिकि प्रत्यये परे लोपो भवत्यात्वं वा। सातिः सान्तिः। देवधनं देयासुः देवदत्तः, यज्ञधनं देयात् यज्ञदत्तः। वासुभूतिः,देवभूतिः, तनुभूतिः। कृतां पुनः विधानं विशेषविहितेन तिका बाधा निवृत्त्यर्थम्।

भट्टोग्रभूति कृतायां शिष्यहितायां वृत्तौ कृत्प्रकरणे

पञ्चमः पादः।

कृत्प्रकरणे षष्ठः पादः

• धातुसम्बन्धे प्रत्ययाः ४/६/१

साधुत्व व्याख्यानार्थमयं धातुशब्दो ऽत्र धात्वर्थे वर्तते, तेन धात्वर्थानां सम्बन्धे विशेषणविशेष्यभावलक्षणे सति कृत्संज्ञकाः प्रत्ययाः साधवो भवन्ति, भिन्नकालविहिताः धातुसम्बन्धे सति साधव इत्यर्थः। अग्निष्टोमयाजी पुत्रोऽस्य जनिता, अग्निष्टोमेनेष्टवानिति। करणेऽतीते यजेः अतीते काले णिनिः। जनितेति जनेः भविष्यति काले स्वस्तनी। अत्रातीतभविष्यतोः भेदाद् याजी जनिता शब्दयोः विशेषणविशेष्यभावस्याभावादसाधुत्वं प्राप्तम्, तत्रानेन साधुत्वं क्रियते, तच्च कथं भवति? यद्यग्निष्टोमयाजीत्येतद्विशेषणं स्वकालं परित्यज्य जनितेत्यस्य कालं समुपास्यते, तेनायमर्थः, तथाविधोऽस्य पुत्रो जनिता, योऽग्निष्टोमेन यष्टेति। ननु जनितेत्येतद्विशेष्यम् न तु याजीत्येतत्, कुतः? उच्यते—आख्यात पदं विशेष्यम्, क्रियाप्रधानत्वात्, कृत् तदन्तविशेषणम्। कृतां कर्तरि तु विधानात् कर्तुश्च क्रियापरतन्त्रत्वात् कृद्ग्रहणे कर्तव्ये कृदग्रहण प्रकरणान्तरविहितस्य प्रत्ययस्य परिग्रहार्थम्। तेनेहापि साधुत्वं भवति। गोमानासीत्। गोमान्भविता। गोमानिति वर्तमाने काले मन्तुः, आसीद् भवितेति भूते भविष्यति च प्रत्ययः। तत्र गोमानित्येतत्पदं विशेषणं वर्तमानकालत्यागेन भूतभविष्यत्कालतामाश्रयति, तथाविधो देवदत्त आसीद् यस्य गावः प्रभूताः तथाविधश्च यज्ञदत्तो भविता यस्य गावो भवितारः।

• अलंखल्वोः प्रतिषेधयोः क्त्वा वा ४/६/२

अलं खलु इत्येतयोः प्रतिषेधवाचिनोः उपपदयोः धातोः क्त्वा प्रत्ययो वा भवति। अलं कृत्वा, खलु कृत्वा। करणमत्र निषिध्यते। पक्षे अलम्, करणेन, खलु करणेन, तृतीयात्र प्रकृत्यादित्वात्। अलंखल्वोरिति किम्? मा कार्षीः। प्रतिषेधयोरिति किम्? अलङ्कारः, खलुकारः। अलंखलु शब्दाविह भूषण निश्चयार्थौ वाचक्षाते।

• एककर्तृकयोः पूर्वकाले क्त्वा ४/६/३

एकः, समानः कर्ता, ययोः धात्वर्थयोः तावेककर्तृकौ, पूर्वश्चासौ कालः पूर्वकालः। एककर्तृकयोः—समानकर्तृकयोः धात्वर्थयोर्मध्यात् पूर्वकाले

साध्ये धात्वर्थे वर्तमानाद्धातोः क्त्वा प्रत्ययो भवति। स्नात्वा ददाति पीत्वा शेते। द्विर्वचनमुपलक्षणार्थम्, तेन स्नात्वा, पीत्वा, भुक्त्वा व्रजति। मुखं पिधाय स्वपिति यज्ञदत्तः। निष्ठेति गमेः क्त क्तवतू, वनतितनोत्यादीति पञ्चमलोपः। पूर्वकाल इति किम्? पचति पठति।

• परावरयोगे च ४/६/४

परश्च अवरश्च तौ परावरौ, तयोर्योगः परावरयोगः। परस्य अवरेण योगे सति धातोः क्त्वा प्रत्ययो भवति। परस्यावरेणयोगे–अतिक्रम्य पर्वतं नदी, अवरेण पर्वतेन परस्याः नद्याः योगः। परेण अवरस्य योगे–अप्राप्यनदीं पर्वतः। परया नद्या अवरस्य पर्वतस्य योगः। आप्लृ व्याप्तौ, नञ् पूर्वः।

• णं चाभीक्ष्ण्ये द्विश्च पदम् ४/६/५

द्वौ वारौ–द्विः, एक कर्तृकयोः धात्वर्थयोर्मध्यात् पूर्वकालसाध्यधात्वर्थे आभीक्ष्ण्ये विषये वर्तमानाद्धातोः क्त्वा प्रत्ययो भवति णं प्रत्ययश्च। क्त्वा णमन्तञ्च पदं द्विर्भवति। भुक्त्वा–भुक्त्वा व्रजति, भोजं–भोजं व्रजति। पीत्वा–पीत्वा शेते, पायं–पायं शेते। आभीक्ष्ण्य इति किम्? पीत्वा याति। ननु क्त्वाणमन्ताच्चशब्दाद्विनाद्विर्वचनमाभीक्ष्ण्यं प्रतिपादयितुमशक्यत्वादिति सामर्थ्यादाभीक्ष्ण्ये तस्य द्विर्वचनं सिद्धमिति किम् द्विश्च पदमित्यनेन। एवं तर्हि यथा दर्शनमन्यत्रापि द्विर्वचनार्थम् द्विश्चपदमित्येतत्। तेन वीप्सायां पदस्य द्विर्भावः। ग्रामो ग्रामो रमणीयः। उपरि अधि अधस् इत्येतेषां सामीप्ये–उपर्युपरि ग्रामम्, अध्यधि ग्रामम्, अधोऽधो ग्रामम् उपर्यादिषु कृत द्वित्वेषु द्वितीयां स्मरन्ति। उपरि शिरसि घटं धारयतीत्यत्र तु द्विवर्चनं न भवति, सामीप्यस्य विवक्षितत्वात् परेः वर्जने द्विर्भावो वा भवति असमासे। परि परि त्रिगर्तेभ्योः वृष्टोदेवः, परित्रिगर्तेभ्योः वृष्टः। परित्रिगर्तमव्ययी भावः। इत्थमन्यत्रापि लक्ष्यानुसारेण द्विर्भावो बोद्धव्यः।

• कर्मण्याक्रोशे कृञः खमुञ् ४/६/६

कर्मण्युपपदे कृञ खमुञ् भवति, आक्रोशे गम्यमाने। चौरङ्कारमाक्रोशति, वृषलङ्कारमाक्रोशति। ह्रस्वारूषोरिति समासः। धातूनामनेकार्थत्वात् करोतिरिहोच्चारणे वर्तते, तेन चौरोऽसि, वृषलोऽसीत्येवमुच्चार्य क्रोशतीत्यर्थः।

• स्वादौ च ४/६/७

स्वादाविति स्वादवर्थशब्दो गृह्यते। स्वाद्वर्थे उपपदे कृञः खमुञ् भवति। स्वादुङ्कारं भुङ्क्ते। वेत्येव, तेन स्वादुकृत्वा भुङ्क्ते। च्विविषये स्त्रीविषये च खमुञ् नेष्यते–स्वादु कृत्य पयोभुङ्क्ते, स्वाद्वीकृत्वा यवागूं भुङ्क्ते। च्वौ परे। च्वौचेति लोकोपचाराददीर्घः। ड प्रत्ययो ऽप्यदन्तादगुणवाचिन इत्यनेन। अन्यथैवं कथमित्थमित्येतेषूपपदेषु कृञः खमुञ् वक्तव्यः, अन्यथा प्रयोगश्चेत् करोतिस्स्यात्। अन्यथाकारंभुङ्क्ते, एवङ्कारम् भुङ्क्ते, कथङ्कारं भुङ्क्ते, इत्थङ्कारं भुङ्क्ते। अत्र सर्वत्र करोतेरफलः प्रयोगः। अन्यथाकृत्वाशिरो भुङ्क्ते इत्यत्र असति हि करोतौ शिरसोभुजि क्रियायाः कर्मतास्यात्।

• दृशोणं साकल्ये ४/६/८

कर्मणीत्येव। साकल्य विशिष्टं कर्मण्युपपदे दृशो णं भवति। कन्यादर्शम् वरयति। यां यां कन्यां पश्यति तां तां वरयतीत्यर्थः। विदेरपि साकल्ये णं वक्तव्यः। ब्राह्मणवेदं भोजयति। यं यं ब्राह्मणं जानाति लभते विचारयति वा तं तं भोजयतीत्यर्थः। सत्तार्थो विदिः अकर्मकत्वान्न गृह्यते।

• यावतिविन्दजीवोः ४/६/९

विन्दतेः रूदादित्वात् कृतनकारागमस्यैकदेशो विन्द इत्यनुकृतः। यावच्छब्द उपपदे विद्लृ लाभ इत्यस्माज्जीवेः च णं भवति। यावद्वेदं भुङ्क्ते, यावज्जीवं शङ्करं पूजयामि।

• चर्मोदरयोः पूरेः ४/६/१०

चर्मोदरयोः कर्मणोरूपपदयो पूरेः इन्नन्तात् णं भवति। चर्मपूरं स्तृणाति, उदरपूरं भुङ्क्ते। पूरेः हेतावर्थे इन्नन्तः।

• वर्षप्रमाण ऊलोपश्च वा ४/६/११

कर्मण्युपपदे वर्षप्रमाणे गम्यमाने पूरेः णं भवति तस्य च वा ऊकार लोपः गोष्पदपूरं वृष्टो देवः, गोष्पदं प्रवृष्टः।

• चेलार्थे क्नोपेः ४/६/१२

चेलमर्थो यस्य स चेलार्थः, चेलार्थे कर्मण्युपपदे क्नूयी शब्द इत्यस्मादिन्नन्तात् णं भवति वर्षप्रमाणं चेत्स्यात्। चेलक्नोपं वृष्टः देवः, वस्त्रक्नोपम्। क्नुप इति पकारागमो यलोपो गुणश्च, अर्तिह्रीब्लीक्नूयी इत्यनेन।

• गात्र पुरुषयोष्णा ४/६/१३

गात्रपुरुषयोः कर्मणि उपपदयोः ष्णाशौच इत्यस्मात् णं भवति, वर्षप्रमाणं चेत्स्यात्। गात्रस्नायं वृष्टः, पुरुषस्नायं वृष्टः।

• निमूलसमूलयोः कषः ४/६/१४

निमूल समूलयोः कर्मणोरूपपदयोः कषेः, कष हिंसायां णं भवति। निमूलकाषं कषति, समूलकाषं कषति, समूलं कषतीत्यर्थः।

• शुष्कचूर्णरूक्षेषु पिषः ४/६/१५

शुष्कचूर्णरूक्षेषु कर्मसूपपदेषु पिषः णं भवति। शुष्कपेषं पिनष्टि, चूर्णपेषं पिनष्टि।

• जीवेग्रहेः ४/६/१६

जीवे कर्मण्युपपदे ग्रहेः णं भवति। जीवग्राहं गृह्णाति। अकृत समूलयोः कर्मणोरूपपदयोः कृञ्हन्तिभ्यां णं वक्तव्यः। अकृतकारं करोति, समूलघातं हन्ति।

• हन्तेः करणे ४/६/१७

हन्तेः करणे उपपदे णं भवति। पाणिघातं भूमिं हन्ति। पाणिभ्यां भूमिं हन्तीत्यर्थः, हिंसार्थाच्चैककर्तृकादिति सिद्धे वचनमहिंसार्थम्।

• स्नेहने पिषः ४/६/१८

स्निह्यते पिष्यते येन तत् स्नेहनम्। कर्मण इत्येव। स्नेहवाचिनि करणे उपपदे पिषः णं भवति। तैलस्य पेषं पिनष्टि, तेलेन पिनष्टीत्यर्थः एवं घृतपेषम्।

• हस्तार्थे ग्रहवर्तिवृताम् ४/६/१६

हस्तोऽर्थो यस्य स हस्तार्थः, हस्तार्थे करणे उपपदे ग्रहेः वृतेः इन्नन्तात् केवलाच्च णं भवति। हस्तग्राहं गृह्णाति, करग्राहम्, पाणि ग्राहम्। हस्तवन्तं वर्तते। एव पाणिवन्तम्, करवन्तम्। वृतमनार्षः पाठः।

• स्वार्थे पुषः ४/६/२०

स्वस्यार्थः स्वार्थः, स्वार्थवाचिनि करण उपपदे पुषेः णत्वं भवति, स्वपोषं पुष्णाति, गो पोषम्, पितृपोषम्, रैपोषम्।

• बन्धे ऽधिकरणे ४/६/२१

अधिकरण उपपदे बघ्नातेः णं भवति। चक्रबन्धं बघ्नाति, चक्रंबध्नातीत्यर्थः।

• कर्त्रोर्जीवपुरूषयोर्नशिवहिभ्याम् ४/६/२२

जीवपुरूषयोः कर्तृवाचिनोरूपपदयोः यथासंङ्ख्यं नशिवहिभ्यां णं भवति जीवनाशं नश्यति जीवो नश्यतीत्यर्थः। पुरूषवाहं वहति, पुरूषो वहतीत्यर्थेः। कर्त्रोरिति किम्? जीवेन नष्टः, पुरूषेण ऊढः, वहेः क्त प्रत्ययः, स्वपिवचीति सम्प्र, होढ इत्यादिना ढत्वादिः।

• ऊर्ध्वे शुषिपूरोः ४/६/२३

कर्तृ ग्रहणमनुवर्तते, ऊर्ध्व शब्दे कर्तर्युपपदे शुषि पूरिभ्यां णं भवति। ऊर्ध्वशोषं शुष्यति, ऊर्ध्वः शुष्यतीति। ऊर्ध्वपूरं पूरयति वा पूर्यत इत्यर्थः। कर्तरीति किम्? ऊर्ध्वेण शुष्यति, ऊर्ध्वेण पूर्यते।

• कर्मणि चोपमाने ४/६/२४

कर्तृवाचिन्युपमाने उपपदे कर्मणि च धातोः णं भवति, अजकनाश नष्टः अजक इव नष्टः इत्यर्थः। कर्मणि—रत्ननिधायं निहितः, रत्ननिहितमित्यर्थः डुधाञ् दाने, निपूर्वः। उपमान इति किम्? अजको नष्टः, घृतं हितम्, दधातेर्हिरिति धाञो हिरादेशः।

• कषादिषु तैरेवानुप्रयोगः ४/६/२५

निमूलसमूलयोः कष इत्यत आरभ्य ये धातव उक्ताः ते कषादयः, तैरनुप्रयोगः पश्चात्प्रयोगः तैरेव कषादिभिर्भवति। पूर्वमेवोदाहृतम्। णमन्तस्य शब्दार्थद्योतनार्थमनुप्रयोगो अवश्यं कर्तव्यः, स तु कषादिभिरेवकर्तव्यः न समानार्थेन धात्वन्तरेणेतिनियमार्थमिदम्, तेन निमूलकाषं कषतीति कषिः समानार्थः हिसिर्नानुप्रयुज्यते।

• तृतीयायामुपदंशे ४/६/२६

तृतीयायामुपपदे उपपूर्वात् दन्शेः णं भवति, मूलेकेनोपदंशंभुङ्क्ते। तृतीयादीनां वेति पाक्षिकः उपपदसमासः। वेतिवर्तते। तेन मूलकेन उपदश्य भुङ्क्ते।

• हिंसार्थाच्चैककर्तृकात् ४/६/२७

पदद्वयेन बहुव्रीहिः, तृतीयामुपपदे हिंसार्थाद्धातोः अनुप्रयुज्यमानेन धातुना एककर्तृकात् णं भवति, दण्डोपघातं गाः कलयति, दण्डेन उपघातम्। अत्रहन्तेः काले चैकं कर्मगावः। एवं दण्डताडं महिषं गमयति, दण्डेन ताडम्। एक कर्तृकादिति किम्? दण्डेनाहत्यचौरं गोपालको गाः कलयति। अत्रहन्तेश्चौरः कर्म, कालयतेर्गावः। हन्तेर्यपिचेति पञ्चम लोपः।

• सप्तम्याञ्च प्रमाणासत्त्योः ४/६/२८

तृतीयान्त उपपदे सप्तम्याञ्च सप्तम्यन्ते धातोः णं भवति, प्रमाणासत्त्योर्गम्यमानयोः। प्रमाणस्तु आयामः। आसत्तिः सन्निकर्षः। प्रमाणे तावत्–द्व्यङ्गुलोत्कर्षमिक्षुं भिनत्ति द्व्यङ्गुलेनोत्कर्षम्। कृष वि, उपपूर्वः,द्व्यङ्गुलं कर्म। द्व्यङ्गुलः उत्कर्षम्। आसत्तौ–केशग्राहं युध्यन्ते, केशैर्ग्राहम्–केशेषु ग्राहंयुद्धसंरम्भादत्यन्तं सन्निकृष्टं युध्यत इत्यर्थः।

• उपपीडरूधकर्षश्च ४/६/२९

तृतीया सप्तम्योरूपपदयोः उपपूर्वेभ्यः पीडरूध कृषिभ्यां णो वक्तव्यः। पार्श्वोपपीडम् शेते। पार्श्वाभ्यामुपपीडम् पार्श्वयोरूपपीडम्। व्रजोपरोधं गाश्चारयति, व्रजेनोपरोधम्। व्रजे उपरोधम्। पाण्युपकर्षम् धाना भक्षयति पाणिनोपकर्षम्। पाणावुपकर्षम्।

• अपादाने परीप्सायाम् ४/६/३०

अपादान उपपदे धातोः णं भवति परीप्सायां गम्यमानायाम्। परीप्सायाम्—शय्योत्थायंधावति, शय्याया उत्थायम्। ष्ठा गति, उत्पूर्वः, पूर्वस्येति लोकोपचारात् तिष्ठतेस्सकारस्य तः उत्पूर्वः। शय्याया उत्थाय धावति।

• द्वितीयायाञ्च ४/६/३१

द्वितीयान्ते उपपदे परीप्सायां गम्यमानायां णं भवति यष्टिग्राहं युध्यन्ते, लोष्ठग्राहं युध्यन्ते।

• स्वाङ्गेऽध्रुवे ४/६/३२

अध्रुवे स्वांगे द्वितीयान्ते उपपदे धातोः णं भवति। यस्मिन्नङ्गे च्छिन्ने प्राणी न म्रियते तदङ्गमध्रुवम्। अक्षिनिकोचं जल्पति, भ्रूविक्षेपं कथयति, कुच सं, क्षिप्र प्रे,। अध्रुव इति किम्? शिर उत्क्षिप्य कथयति। यद्येवम्, इह न प्राप्नोति, उरः प्रपेषं युध्यते, सत्यम्—अन्यत्रापीति वचनात् भविष्यति, व्याप्त्यासेवयोः गम्यमानयोः। द्वितीयान्ते उपपदे विशि पति पदि स्कन्दिभ्यो णं वक्तव्यः। विश्यादिभिः क्रियाभिः साकल्येन पदार्थानां सम्बन्धो व्याप्तिः। आसेवा—आभीक्ष्ण्यम्। व्याप्तौ तावत्—गेहंगेहमनु प्रवेशमास्ते, गेहंगेहमनुप्रपातमास्ते, गेहंगेहमनु प्रपादमास्ते, गेहं गेहमनुस्कन्दमास्ते। व्याप्त्यासेवे विना द्विर्वचनं न शक्ये प्रतिपादयितुमिति द्विवर्चनं कृतम्। तत्र व्याप्तौ—द्रव्यवाचिनो गेहस्य द्विर्वचनम्, तद्धि द्रव्यस्य सम्भवति न क्रियायाः, असिद्धरूपत्वात्। आसेवायां तु कियावाचिनामनु प्रवेशमित्यादीनां द्विवर्चनम्, तद्धि कियायास्सम्भवति न द्रव्यस्य सम्भवति, सिद्धरूपत्वात्। यदा तृतीयादीनामिति पाक्षिकस्समासः तदा तेनैव व्याप्त्यासेवयोरुक्तत्वान्नभवति द्विरुक्तिः। गेहानुप्रवेशमास्ते। कथं समासो व्याप्त्यामेव समर्थो वक्तुमिति चेत्? अनभिधानशक्तिस्वाभाव्यात्।

• तृष्यस्वोः क्रियान्तरे कालेषु ४/६/३३

क्रियामन्तरयतीति क्रियान्तरः। कालवाचिषु द्वितीयान्तेषूपपदेषु क्रियान्तरे क्रियाव्यवधायके धात्वर्थे वर्तमानात् तृषेरस्यतेश्च णं भवति।

द्वयहतर्षम् गाः पाययति द्वयहंतर्षम्, तर्षेणात्रपानक्रिया व्यवहिता। द्वयहात्यासं गाः पाययति द्वयहमत्यासम्। अत्राप्यत्यसने नास्ति गति व्यवधानम्। कालेष्विति किम्? योजनमन्यस्य गाः पाययति।

● नाम्न्यादिशिग्रहोः ४/६/३४

नाम शब्दे द्वितीयान्ते उपपदे आङ् पूर्वाद् दिशेः ग्रहेश्च णं भवति। नामादेशमाह्वयति नाम्न्यादेशम्, नामग्राहमाह्वयति नामानिग्राहम्।

● कृञोऽव्ययेऽयथेष्टाख्याने क्त्वा च ४/६/३५

यद्यदिष्टम्—यथेष्टम्। वीप्सायामव्ययीभावः। यथेष्टमाख्यानं यथेष्टाख्यानम्, ततो नञा समासः। अव्यय उपपदे कृञो णं भवति क्त्वा च अनभिप्रीतार्थे गम्यमाने। ब्राह्मण! कन्या ते गर्भिणीति कश्चिदुच्चैः कारमाचष्टे, उच्चैः कृत्य। अयथेष्टाख्यान इति किम्? ब्राह्मण! पुत्रस्ते जातः इति कश्चिदुच्चैः कृत्वाचष्टे। अत्रैककर्तृकेति क्त्वा यदित्यनेनस्यात्तृतीयादीनां वेति समासः विफली भवेत्।

● स्वाङ्गेतसिः ४/६/३६

क्त्वाणमौ त्वनुवर्तेते, तस्प्रत्ययान्ते स्वाङ्गे उपपदे कृञः क्त्वा णमौ भवतः। मुखतःकृत्वा, मुखतःकृत्य, मुखतःकारम्, मुखे मुख इत्याद्यादिभ्यस्तसिति तस्। स्वांग इति किम्? सर्वतः कृत्वा। तसीति किम्? मुखेन कृत्वा। तसः प्रत्ययस्य ग्रहणमव्ययग्रहणेन तसो विशेषणार्थम्। न च प्रत्ययं तसं विनाऽन्यस्य तसोऽव्ययत्वमस्ति, तेनेह न भवति मुखतः कृत्वा गतः। तसु उपक्षये इत्यस्मात् क्विप्।

● तिर्यच्यपवर्गे ४/६/३७

तिर्यच्यपवर्ग इत्यस्मात् क्विप् तिर्यगुपपदे समाप्तौ गम्यमानायां कृञः क्त्वाणमौ वक्तव्यौ। तिर्यक्कृत्वा गतः, तिर्यक्कृत्य, तिर्यक्कारम्, समाप्य गत इत्यर्थः। समाप्ताविति किम्? तिर्यक्कृत्वा लतांगतः।

● भुवस्तूष्णीमिति च ४/६/३८

तूष्णीमिति लुप्तसप्तमीकम्। तूष्णीं शब्द उपपदे भवतेः क्त्वाणमौ भवतः। तूष्णीं भूत्वा तिष्ठति, तूष्णीं भूय, तूष्णींभावम्। स्वाङ्गे तसीति

केचिदनुवर्तयिष्यन्ति। तेन मुखतो भूत्वा, मुखतो भूय, मुखतो भावम्। इति शब्द उपपदान्तरेऽपि क्त्वाणमोः प्रवृत्त्यर्थः। तेन नानाभूत्वा, नानाभूय नानाभावम्, विनाभूत्वा, विनाभूय, विनाभावम्। द्विधाभूत्वा, द्विधाभूय, द्विधाभावम्। एषूपपदेषु कृञोऽपि क्त्वाणमौ दृश्येते। नानाकृत्वा, नानाकृत्य, नानाकारम्, इत्याद्युदाहार्यम्।

• शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु ४/६/३९

अस्त्यर्थेषु विद्यमानार्थेषु च धातोः तुम् भवति। शक्नोति भोक्तुम्, धृष्णोति भोक्तुम्, जानाति भोक्तुम्, ग्लायति भोक्तुम्, घटयति भोक्तुम्, आरभते भोक्तुम्, आलभते भोक्तुम्, क्रमते भोक्तुम्, सहते भोक्तुम्, अर्हति भोक्तुम्, अस्ति भोक्तुम्, विद्यते भोक्तुम्, वुण्तुमाविति सिद्धे योगारम्भः णमो निवृत्त्यर्थः।

• कर्तरि कृत् ४/६/४०

ये कृतः कर्तरि ते भवन्ति। स्वार्थनिवृत्त्यर्थो योगारम्भः। अनिर्दिष्टा-प्रत्ययाः स्वार्थे भवन्ति, इति वचनात् स्वार्थ एव हि कृतस्स्युः। कारकः, कर्ता, कुम्भकारः। येषां प्रत्ययानामर्थादेशं नास्ति तेषामनेनार्थो विधीय आनन्तर्यार्थम् प्रति निराकाङ्क्षः। तेन नग्नपलितेत्ययं ख्यूट् करणे विहितः कर्तरि न भवति।

• भावकर्मणोः कृत्यक्तखलर्थाः ४/६/४१

खल इवार्थो विषयो यस्य स खलर्थः, कृत्यक्त खलर्थाः भावे कर्मणि च भविन्त, कर्तरि प्राप्ताः अर्थग्रहणे खल्। सहचरितासहचरितयो सहचरितस्य ग्रहणार्थम् भावे कृत्याः—आसितव्यं भवता, शयनीय भवता। कर्मणि—कृतः कटो भवता। भावे—खल्, ईषदाढ्यं भवं भवता, सुखेनाढ्येन भूयते इति कर्तृकर्मणोश्च भूकृञोरिति खल्, भावे युः। ईषत्स्थानं भवता सुखेनस्थीयत इति आतो यु दरिद्रातेरिति युः। कर्मणि खल्—ईषत् करणम् कटो भवता, सुखेन क्रियत इति पूर्ववद् युः।

• आदिकर्मणि क्तः कर्तरि च ४/६/४२

आदिभूतः क्रियाक्षणः आदिकर्म, तस्मिन्नादि कर्मणि यः क्त प्रत्ययो विहितः सः कर्तरि भवति। च शब्दात् भावकर्मणोः। कः पुनः आदिकर्मणि

क्तो विहित ? आदि कर्मण्यतीते सति निष्ठेत्यनेन। कर्तरि–प्रकृतः कटं देवदत्तः, कर्तुम् प्रवृत्तः। भावे–कृतं देवदत्तेन, कर्मणि–प्रकृतः कटो देवदत्तेन, कर्तुम् प्रतीतेस्म इत्यर्थः। प्र शब्दः आदिकर्मणि द्योतयति।

• गत्यर्थाकर्मक श्लिष् शीङ् स्था आस वस रुह जन जीर्यतिभ्यश्च ४/६/४३

गतिरर्थो येषां ते गत्यर्थाः, अविद्यमानं कर्म येषां ते अकर्मकाः, ततो द्वन्द्वः। गत्यर्थेभ्यः अकर्मकेभ्यः आङ् पूर्वात् श्लिषः, शीङ्, स्था, आस, वस, रुह, जन, जीर्यतीत्येतेभ्यः यः क्तः सः कर्मकर्तरि भवति, च शब्दात् यथा प्राप्तञ्च। कर्तरि–गतो ग्रामं देवदत्तः। भावे–गतं देवदत्तेन, कर्मणि–गतो ग्रामो देवदत्तेन। अकर्मकेभ्यः–ग्लानो भवान्। अतोऽन्तस्थेति नत्वम्, ग्लानं भवता। आश्लिषः–उपाश्लिष्टो गुरूं भवान्, उपाश्लिष्टो गुरूः भवता। द्यति स्यतीति इत्वम्, आसतः–उपासितो गुरूं भवान्, उपासितो गुरूः भवता। स्वपिवचीति सम्प्रसारणम्, निष्ठायां चेति इट्। रूह वीजजन्मनि। आरूढो वृक्षं भवान्, आरूढो वृक्षः भवता। होढ इत्यादिना ढत्वादि कार्यम्, जन जनने, अनुजातो माणवकः माणविकाम्, अनुजाता माणविकी माणवकेन, धुटिखनीत्यात्वम्। जीर्यति, अनुजीर्णोवृषलीं देवदत्तः, अनुजीर्णा वृषली देवदत्तेन। ऋदन्तस्येर्, रान्निष्ठेति नत्वम्, न श्व्युवर्णेतीडभावः। अकर्मका अपि धातवः सोपसर्गास्सकर्मकाः भवन्तीत्यकर्मकग्रहणेन श्लिषादीनां नास्ति सिद्धिरिति पृथक् श्लिषादि ग्रहणम्।

• दाशगोघ्नौ सम्प्रदाने ४/६/४४

एतौ सम्प्रदाने निपात्येते, दाश्यते यस्मै सः दाशः, दाशृ दाने, पचादित्वादच्, गाः घ्नन्ति यस्मै आगताय स गोघ्नः, गो पूर्वात् हन्तेः टक् निपात्यते, गमहनेत्युपधालोपः, लुप्तोपधस्येति घः, अतिथिः पूजार्ह उच्यते नान्यः, निपातनसामर्थ्यात्।

• भीमादयोऽपादाने ४/६/४५

अपादाने भीमादयो निपात्यन्ते। कृत्वात्कर्तरि प्राप्ताः, भीमः, भीष्मः। बिभेत्यस्मादिति भियष्षुग्वेति बिभेतेर्मक् याषुगागमः। भयानकः, बिभेत्यस्मादिति आनकः। भीशीङ्भ्यामानकः इत्यानकः प्रत्ययः। चरूः चरत्यस्मात् देवर्षिपितृभूतानीति चरूः। भृ सृ द्रूदरित्सरित रिसि

मार्जितरिति उप्रत्ययः। भीम भीष्म भयानक चरू स्रुव स्रुक इत्यादयो भीमादयः।

● ताभ्यामन्यत्रोणादयः ४/६/४६

ताभ्यां सम्प्रदानापादानभ्यामन्यत्रापि कारके उणादयो भवन्ति, कृत्वात् कर्तर्येव प्राप्तः कर्मादिष्वपि कथ्यन्ते। तन्तुः तन्यते इति, तनि सनि मनि सस्य विधाञ्क्रमिभ्यः तुनिति तुन्, कस्यत इति कसिः, इर् इतीन्।

● यु वु झामनाकान्ताः ४/६/४७

यु वु झामित्येतेषां स्थाने अन अक अन्त इत्येते आदेशाः यथा सङ्ख्यं भवन्ति, नन्द्यादेर्युः। नन्दयतीति नन्दनः युट्चेति युट्, आसनम्। वुण्तृचाविति वुण्, कारकः, निन्दहिंसीति वुञ्, निन्दकः। जॄष्विशिभ्यां झः, जीर्यन्तः, विशन्तः। जॄष् वयो हानौ, विश प्रवेशने। इह कस्मान्न भवति भुज्यः। भुजि वृङ्भ्यां युक्त्युकौ चेति युक्। उच्यते–नभवत्यौणादिकत्वात्। उणादिप्रत्यान्ताः संज्ञाशब्दाः, तेषां यदि वर्णविकारस्स्यात् संज्ञात्वं हीयते, एतत्प्रकरणविहितस्य युव्वोर्ग्रहणम्, तेनेह न भवति, ऊर्णा विद्यते यस्य स ऊर्णायुः, तस्यास्तीति युः प्रत्ययः।

● समासेभाविन्यनञ्क्त्वो यप् ४/६/४८

अनञ्, नञोऽन्यस्य नञ्सदृशस्याव्ययस्य यः समासः तत्र समासे भाविनि भविष्यति सति क्त्वाप्रत्ययस्य यबादेशो भवति। प्रकृत्य, आवृत्य, प्रणम्य। समास इति किम्? कृत्वा भाविग्रहणं समासात्प्राग् यबादेशार्थम्। असति तस्मिन्समासे सतियबादेश इत्यर्थस्स्यात्, ततश्च यावत्क्त्वान्तेन धातुनोपपदस्य समासः क्रियते तावत्प्रणम्येत्यादौ क्त्वा प्रत्ययमपेक्ष्यान्तरङ्त्वात्पञ्चमोपधेति दीर्घस्स्यात्, सति तु भाविग्रहणे क्त्वा प्रत्ययोत्पत्तिस्समनन्तरं यबादेशेकृते नास्ति दीर्घस्य प्रवृत्तिरभावाद्धुटः, तस्मात् कृते यबादेशे समासः। अनञ् इति–अकृत्वा, पर्युदासोऽयम्। तेन नञ् सदृशस्याव्ययस्य समासे यबादेशः, तेनेह न भवति। परमं कृत्वा।

● चजोः कगौ धुड्घानुबन्धयोः ४/६/४६

चकारजकारयोर्यथासङ्ख्यं कगावादेशौ भवतः, धुटि घानुबन्धे च परे। निमित्तं प्रति यथासङ्ख्यमनित्यत्वाद् यथासङ्ख्यपरिभाषायाः। पक्तुम्

पाकः, त्यक्तुमत्यागः, भग्नः, भुग्नः। भन्जो आमर्दने, भुजि कौटिल्ये, भजतेस्म, भुज्यतेस्म, क्तः प्रत्ययः, अनिदनुबन्धेति न लोपः, अनेन गः। ल्वाद्योदनुबन्धेति नत्वम्। ननु परत्वान्नित्यत्वाच्च नत्वं स्यात् ततश्च धुड्भावात्कथं नत्वं भवेत्? अस्त्येतत्–किन्तु नित्यादप्यन्तरङ्गः वलीयः, तदुक्तम्–

परं विदुः पूर्वपरोपपत्तौ परस्य नित्यस्य च नित्य एव।
नित्यान्तरङ्गोपगमान्तरङ्गस्तथा विदुः प्रातिपदो बलीयान्।।

प्रतिपदस्साक्षाद्विहितः अन्तरङ्गत्वात्पूर्वम् गत्वम्, ततो नत्वम्। कथमन्तरङ्गं गत्वमिति चेत्? प्रकृत्याश्रयत्वात्। एतदपि कथमपि चेत्? ब्रूमः–इह शब्दे व्युत्पत्तौ प्रथमं प्रत्ययनिरपेक्षा प्रकृतिस्स्युरिति प्रत्ययस्तु तामपेक्ष्यमाणः पश्चादन्यानपेक्षञ्च यस्य स्फुरणं तदन्तरङ्गम् तेन प्रकृत्याश्रयमन्तरङ्गम् प्रत्ययाश्रयं तु वहिरङ्गमिति प्रसिद्धिः।

• न्यङ्क्वादीनां हश्च घः ४/६/५०

चजोः कगावित्येव, न्यङ्कु इत्यादीनां चजोः कगौ भवतः, तेषां च यो हकारः तस्य घत्वम् न्यङ्कुः। अञ्चे निपूर्वात् नावञ्चेरूरित्युः प्रत्ययः, चस्य कत्वम्। भृगुः, मद्गुः। प्रथिमथि भ्रस्जां सम्प्रसारणं सलोपश्चेति भ्रस्जेः क्तः प्रत्ययः सम्प्र, सलोपः, अनेन घः। अवदाघः, निदाघः, ग्रहे घञ्, अनेन घः। न्यङ्कुः, भृगुः, मद्गुः, दूरेपाकः, फलेपाकः, व्यतिषङ्गः तक्रः वक्रः मेघः श्वपाकः, अवदाघ, निदाघ इत्यादयो न्यङ्क्वादयः।

• नकवर्गादि व्रजयजाम् ४/६/५१

कवर्गादेर्धातोः व्रजेः यजेश्च चजोः कगौ न भवतः। कूजः खञ्जः गञ्जः। कूज शब्दे, खञ्ज व्यथने, गर्ज शब्दे। घ्यण्–कूज्यम्, परिव्राजः, समाजः। घञ्चेति योगविभागः कर्तव्यः तेन यथादर्शनमन्यस्यापि प्रतिषेधः। भ्राजः, तर्जः। भ्राजृ दी, तर्ज त, घञ्। एवं शोच्यः त्याज्यः, शुच शोचने, त्यज् हानौ, घ्यञ्। कथं शोक्यः? शुक गतावित्यस्य रूपम्।

• घ्यण् आवश्यके ४/६/५२

आवश्यकेऽर्थे योघ्यण् तस्मिन्परे चजोः कगौ न भवतः, अवश्यपाच्यम्, अवश्ययाज्यम्। आवश्यकमिति किम्? पाक्यम्।

● प्रवच्यर्चिरूचियाचियजीनाञ्च ४/६/५३

प्र पूर्वस्य वचेः, अर्चि रूचि याचि यजीनां च घ्ये परे चजोः कगौ न भवतः, अनावश्यकार्थम् वचः, प्रवाच्यः, अर्च्यः, रोच्यः, वाच्यः, याज्यः। प्रवाच्य इति ग्रन्थविशेषस्यैषा संज्ञा। अनार्षः पञ्चमी निर्देशः, षष्ठी निर्देशस्य न्याय्यत्वात्।

● वचोऽशब्दे ४/६/५४

वचेः कत्वं न भवति घ्ये परे, अशब्द विषये। वाच्यम्। अशब्द इति किम्? वाक्यम्।

● निप्राभ्यां युजेश्शक्ये ४/६/५५

नि प्राभ्यां परस्य युजेः शक्येऽर्थे घत्वं न भवति घ्ये परे। नियोक्तुं शक्यः नियोज्यः। प्रयोक्तुं शक्यः प्रयोज्यः। शक्य इति किम्? नियोग्यः प्रयोग्यः।

● भुजेऽन्ने च ४/६/५६

अन्न विषये भुजेः घ्य परे गत्वं न भवति। भोज्य पायसम्, अन्न इति किम्? भोग्यश्शाटकः।

● भुजन्युब्जौ पाणि रोगयोः ४/६/५७

भुज न्युब्ज इत्येतौ यथा सङ्ख्यं निपात्येते। भुज कौटिल्ये, उब्ज आर्जवे, इत्यत्र नि पूर्वस्य घञि परे यत्व गुणयोरभावः, पाणि रोगयोरिति किम्? भोगः, न्युद्गः।

● दृग् दृशदृक्षेषु समानस्य सः ४/६/५८

समान शब्दस्य स इत्ययमादेशः भवति दृक् दृश दृक्ष इत्येतेषु परेषु। ननु समान शब्दात् परे दृगादयो न सन्तीति कथं तेषां निमित्तत्वं स्यात्? सत्यम्, इदमेव वचनं ज्ञापकम्, समानपूर्वाद् दृशेः क्विप् टक् सकाः भवन्तीति। सदृक्, सदृशः सदृक्षः। दृशिर् प्रेक्षणे समान शब्दपूर्वः, समान इव दृश्यते इति क्विप्, टक् सकाः। छशोश्चेतिषः, षढोकः।

इदमः ई ४/६/५६

इदमो दृग् दृश दृक्षेषु परेषु ईत्वं भवति, ईदृक्, ईदृशः ईदृक्षः। अयमिव दृश्यन्ते कर्मण्युपमान इत्यादाविव क्विप्टक्सकाः।

किं की ४/६/६०

किमः की आदेशो भवति दृक्दृशदृक्षेषु परेषु। कीदृक्, कीदृशः, कीदृक्षः। क इव दृश्यन्त इति पूर्ववत् क्विप्टक्सकाः।

अदसोऽमूः ४/६/६१

अदसः अमू आदेशो भवति, दृक्दृशदृक्षेषु परेषु। अमूदृक्, अमूदृशः, अमूदृक्षः। असाविव दृश्यन्त इत्यर्थः। आसर्वनाम्न इत्यात्वे कृते उत्वम्मादिति ऊत्वे च सिद्धान्यमू दृगादीनि इत्यपार्थको योगारम्भ इति केचित्।

आसर्वनाम्नः ४/६/६२

दृग्दृशदृक्षेषु परेषु सर्वनाम्न आत्वं भवति। तादृक्, तादृशः, तादृक्षः। यादृक्, यादृशः, यादृक्षः।

विश्वग्देवयोश्चान्त्यस्वरादेरद्र्यञ्चतौ क्वौ ४/६/६३

सर्वनाम्नः विश्वग्देवयोश्चयोऽन्त्यस्वरादिः तस्य अद्रि आदेशो भवति अञ्चतौ धातोः क्विप्रत्यये परतः। ताद्र्यङ् याद्र्यङ्, विश्वद्र्यङ्, देवद्र्यङ्, तमञ्चति, यमञ्चति, विश्वगञ्चति, देवमञ्चतीति क्विप्, अनेन अद्रिरादेशः। अञ्चताविति किम्? विष्वग्युक्, विश्वग्युनक्तीति युजेः क्विप्। क्वाविति किम्? विश्वगञ्चनम्, युट्।

सहसस्तिरसां सध्रिसमितिरयः ४/६/६४

सह सस् तिरस् इत्येतेषां यथासङ्ख्यं सध्रि समि तिरि इत्येते आदेशाः भवन्ति अञ्चतौ क्वौ परे। सह अञ्चति सध्र्यङ्, समञ्चति सम्यङ् तिरोऽञ्चति तिर्यङ्।

• रूहेर्धोवा ४/६/६५

क्वावित्ययम्, अञ्चतेरिति निवृत्तम्, रूहेर्वा धत्वं भवतिं क्वौ परे। वीरूत् वीरूधौ, विरोहतीति क्विप्, ह्रस्वस्य दीर्घः इति दीर्घः, वा शब्दो ऽत्र व्यवस्थितविभाषावाची तेन विपूर्वस्यैव रूहेः नित्यं धत्वम् अञ्चु पूर्वस्य तु न भवति, भूरूध्, भूरूहौ, भुवि रूहतीति क्विप्।

• मोनो धातोः ४/६/६६

धातोः मकारस्य क्वौ परे नत्वं भवति। प्रशान्, प्रतान्। शमु उपशमे, तमु काङ्क्षायाम्। अनेन मस्य नः। पञ्चमोपधेति दीर्घः। न लोपाभावो ऽत्र लाक्षणिकत्वाद् धातुग्रहणं वैचित्र्यार्थम्।

• वमोश्च ४/६/६७

मकारस्य वमोः परयोः नत्वं भवति। जगन्वान्। क्वन्सुकानाविति क्वन्सुः, द्विर्वचनम्, मस्य नत्वम्, जगन्मः, गमेः चेक्रीयितलुगन्तात् वर्तमानान्मस्। योगभेदो वैचित्र्यार्थः।

• स्वरे धातुरनात् ४/६/६८

अनादिति प्रथमान्तम्, न आत् अनात्, न इत्येवं नकारान्तशशब्दः स्वरपरे धातुवद् भवति। धातोर्यद्रूपं प्रागासीत् तन्नकारान्तस्य भवति इत्यर्थः। अनात् धातुवद्भावात् अकारोऽपिनिवर्तते इति प्रतिषेधः कृतः। अकारो न निवर्तत इत्यर्थः। प्रशामौ, प्रशामः, शमेः क्विप् पञ्चमोपधेति दीर्घः, मोनोधातोरिति मस्य नः, औ जस्। धातुवद्भावात्पुनर्मकारोऽवशिष्यते। स्वर इति किम्? प्रशान्भ्याम्। नकारान्ताच्छब्दादयस्स्वरः उत्पन्नस्तस्य प्रत्यासत्तेर्निमित्तत्वम्। तेनेह धातुवद् भावो न भवति। प्रशानत्र।

• अर्तीणघसैकस्वरातामिड्वन्सौ ४/६/६९

अर्ति इण् घस् एकस्वरान्तादित्येतेषां सम्बन्धिनि वन्सावादिरिडागमो भवति घोषवत्योश्च कृतीति निषेधः प्राप्तः। अर्ति–आरिवान्। ऋ गतौ, क्वन्सु, द्विर्व, अकारः ऋवर्णस्य अस्यादेस्सर्वत्रेति दीर्घः, इट्, नत्वम्। इण–ईयिवान्, इणः क्वन्सुः, द्विर्व, दीर्घः, इणः परोक्षायामित्यभ्यासदीर्घः,

इणश्चेति यत्वे, घस्। जक्षिवान्, अदेः क्वन्सुः, वा परोक्षायामिति घस्लृ, इट् गमहनेत्युपधालोपः, अधोषे प्रथमः इति कः, शासि वसि घसीति षः। एकस्वराणाम्–पेचिवान्, पेठिवान्, अस्यैकव्यञ्जनमध्ये इत्येत्वाभ्यासलोपौ आदन्तानाम्। पेचिवान्, ददिवान्, इट् इति चेत्यालोपः। नन्वन्त्यादय एकस्वरा इति किम् तेषां पृथगुपादानम्? सत्यम्–अन्त्यादि ग्रहणात्त्वेतद् ज्ञायते, ये कृत द्विर्वचनाः एक स्वरास्ते इहैकस्वर ग्रहणेन गृह्यन्ते इति। न च तथाविधा अन्त्यादयः किमर्थमेवमाश्रीयत इति चेत् बिभिद्वानित्यादाविडागमो न भवति, एकस्वराद्धि स्यात्।

● गमहनविदविशदृशां वा ४/६/७०

एषां वन्सावादिरिडागमो वा भवति, जग्मिवान्–जगन्वान्। गमहनेत्युपधालोपः, वमोश्चेति नः, जघ्निवान्–जघन्वान्, अभ्यासाच्चेति घः। विविदिवान्–विविद्वान्। विविशिवान्–विविश्वान्। ददृशिवान्–ददृश्वान् विदेर्लाभार्थस्य ग्रहणम्, विदिना तौदादिकेन साहचर्यात्।

● दाश्वान्साह्वान्मीढ्वांश्च ४/६/७१

दाश्वान्, साह्वान्, मीढ्वान् इत्येते निपात्यन्ते। दाशृदाने, क्वन्सुः, अभ्यासलोपो निपात्यते इडभावश्च। साह्वानिति सहेर्दीर्घत्वञ्च। मीढ्वानितिमिहेर्ढत्वदीर्घौ च।

● न श्रयुवर्णवृत्तां कानुबन्धे ४/६/७२

श्रिञः उवर्णान्तात् वृञ्वृङ्भ्याम् ऋदन्ताच्च परस्मिन् कानुबन्धे इडागमो न भवति, सामान्येन प्राप्तः। आश्रितः, आश्रितवान्, आश्रीयतेस्म, आश्रयतिस्म। युतः, युतवान्, युत्वा, यौतिस्म। गत्यर्थाकर्मकेति क्तः, निष्ठेति क्तक्तवन्तू, लूनः, लूनवान्, लूत्वा, लूयतेस्म, लुनातिस्म। ल्वाद्योदनुबन्धेति निष्ठानत्वम्। वृतः, वृतवान्, वृत्वा, वृयतेस्म, वृणोतिस्म, तीर्णः, तीर्णवान्, तीर्त्वा, तीर्यतेस्म, तरतिस्म। ऋदन्तस्येर्, रान्निष्ठात इति नत्वम्। कानुबन्ध इति किम्? आश्रयिता, श्रयत्यादीनामेकस्वराणां निषेधं स्मरन्ति, तेनेह न भवति–शेश्रियत, लोलुवितः। श्रिञ् सेवायाम्, लूञ् छेदने। चेक्रीयित लुकि सति क्त प्रत्ययः इट्। स्वरादाविवर्णेति इयुवौ। ऊर्णोतेः प्रतिषेधो वक्तव्यः। प्रोर्णुतः, प्रोर्णुवान्।

• घोषवत्योश्च कृदिति ४/६/७३

घोषवति कृति प्रत्यये च कृति इडागमो न भवति। ईश्वरः, नश्वरः। कसि पिसि भासीति वरप्रत्ययः। दीप्रः। दीपि कम्प्यजनीति रः। दीप्तिः। स्त्रियां क्तिः। कथं निगृहीतिः, भणितिः। नञानिर्दिष्टस्यानित्यत्वात् कृद् ग्रहणमिहैव कृतीत्यवधारणार्थम्।

• वेषु सहलुभरूषरिषां ते ४/६/७४

इषु इच्छायाम्, सह मर्षणे, लुभ गार्ध्ये रुष रिष हिंसायाम्। एषां तकारादौ वा इट् भवति। एष्टा–एषिता, सोढा–सहिता, लोब्धा–लोभिता, रोष्टा–रोषिता, रेष्टा–रेषिता।

• उदनुबन्धपूङ्क्लिशां क्त्वि ४/६/७५

उदनुबन्धानां पूङः क्लिशेश्च क्त्वा प्रत्यये परे इट् भवति। शमित्वा–शान्त्वा, पञ्चमोपधेति दीर्घः, पवित्वा–पूत्वा, क्लिशित्वा–क्लिष्ट्वा। क्लिशिस्तूपतापार्थो गृह्यते न विबाधनार्थः, सह स्वरतिसूतीति वचनाद् वा इट् एव।

• जॄ व्रश्चोरिट् ४/६/७६

वेति निवृत्तम्, जॄष्, व्रश्च इत्येतयोः क्त्वा प्रत्यये परे इड् भवति। जॄषः न श्र्युवर्णेति निषेधः प्राप्तः, व्रश्चेरप्युदनुबन्धत्वाद्विकल्पः। जरित्वा, व्रश्चित्वा, पुनरिड्ग्रहणं वैचित्र्यार्शम्।

• क्षुधिवशोश्च ४/६/७७

क्षुधिवशोः क्त्वा प्रत्यये परे इट् भवति राधिरूधीति, वसतिघसीति च निषेधः प्राप्तः। क्षुधित्वा, उषित्वा। स्वपिवचीति सम्प्र, शासिवसीति षत्वम्।

• निष्ठायाञ्च ४/६/७८

क्षुधि वसोर्निष्ठायामिड् भवति। क्षुधितः–क्षुधितवान्। उषितः–उषितवान्। गत्यर्थेति क्तः। सम्प्र।

• पूङ्क्लिशोर्वा ४/६/७६

पूङः क्लिशेश्चेड् वा भवति, उदनुबन्धः पूङ्क्लिशामिति क्त्वा प्रत्यये वेट्त्वान्नडीङ्श्वीदनुबन्धेति नित्यं निषेधः प्राप्तः। पूतः—पूतवान्। क्लिशितः—क्लिष्टः।

• नडीङ्श्वीदनुबन्धे वेटामपतिनिष्कुषोः ४/६/८०

ईत् अनुबन्धो येषां ते ईदनुबन्धाः, वा इट् येभ्यः ते वेटः, ततो द्वन्द्वः, अपति निष्कुषोरिति द्वन्द्वगर्भो नञ्समासः। डीङ् श्वि इत्येतयोः ईदनुबन्धानां च वेटां विकल्पेटां पति निष्कुषि वर्जितानां निष्ठायामिड् न भवति। डीनः—डीनवान्, शूनः—शूनवान्। डीयतेस्म, श्वयतेस्म, गत्यर्थाकर्मकेतिक्तः, स्वपिवचीति सम्प्र, तद्दीर्धमन्त्यमिति दीर्घः, ल्वाद्योदनुबन्धेति निष्ठा नत्वम्। ईदनुबन्धानाम्, दीप्तः—दीप्तवान्। दीपी दीप्तौ, दीप्यति स्म, पूर्ववत् क्तः। लग्नः—लग्नवान्। ओ लस्जी व्रीडने, लज्जतेस्म। स्को संयोगाद्योरति स लोपः। चजोः कगाविति गः, पूर्ववन्नत्वम्। उद्विग्नः—उद्विग्नवान्। ओ विजी उ, (उपताप), उत्पूर्वः अन्यत् पूर्ववत्। वेटाम्—वृत्तः—वृत्तवान्, शान्तः—शान्तवान्, वृतु वर्तने, शमु उपशमे, पञ्चमोपधेतिदीर्घः। अपतिनिष्कुषोरिति किम्? पतितः, निष्कुषितः, पतिस्सनिवेट्, निष्कुषिस्तु सर्वत्र वेटामेकस्वराणां प्रतिषेधः एकस्वरग्रहणानुवृत्तेः। तेनेह प्रतिषेधो न भवति, दरिद्रितः। दरिद्रातेस्सार्वधातुक इत्यालोपः, दरिद्रातिः सनिवेट्।

• आदनुबन्धाच्च ४/६/८१

आकारानुबन्धाद्धातोः निष्ठायामिट् न भवति। मिन्नः—मिन्नवान्, स्विन्नः—स्विन्नवान्। ञिमिदा स्नेहने, ञिष्विदा गा। मिद्यतिस्मेति ञ्यनुबन्ध मतीति क्तः, दात्पूर्वस्य च द इति निष्ठानत्वम्, पूर्वस्य च दस्य न, व्याङ्भ्याम् श्वसेः निष्ठायाः इत्वमिष्यते। विश्वसितः—विश्वस्तः, आश्वसितः—आश्वस्तः।

• भावादि कर्मणोर्वा ४/६/८२

आदनुबन्धाद्धातोः भावेऽर्थे आदिकर्मणि च या निष्ठा तस्यां वा इड् भवति। पूर्वेण निषेधः प्राप्तः। मिन्नम्—मेदितम्, स्विन्नम्—स्वेदितम्, नपुंसके

भावे क्तः, पूर्ववन्नत्वम्, प्रमिन्नः—प्रमेदितः, प्रस्विन्नः—प्रस्वेदितः। आदिकर्मणि क्तः, कर्तरिचेति क्तः।

• क्षुभिवाहिस्वनिध्वनिफणिकषिघुषां क्ते नेड् मन्थभृशमनस्तमोऽनायास कृच्छ्रावशब्दनेषु ४/६/८३

क्षुभ संक्षोभे, वाहि पुष्टौ, स्वनध्वन शब्दे, फण गतौ, कष हिंसायाम्, घुषिर् शब्दार्थः, एषां सम्बन्धिनि क्ते—क्त प्रत्यये इण् न भवति यथासङ्ख्यम् मन्थ, भृश, मनस्, तमस्, अनायास, कृच्छ, अवशब्दन इत्येतेषु अर्थेषु। क्षुब्धः, वाढम्, स्वान्तम्, ध्वान्तम्, फाण्टम्, कष्टम्, घुष्टम्। स्वनि ध्वनि फणीनां पञ्चमोपधेति दीर्घः। अनायासेन अप्रयत्नेन यत् सिद्धम् फाण्टम्, तदपिन सर्वम् किन्तु यदपक्वमवचूर्णितम् उदक् सम्पर्काद्विभक्तं रसं तत्। मन्थादिष्वितिकिम्? क्षुभितः, वाहितः, स्वनितः, ध्वनितः, फणितः, कषितः, घुषितः। कथं क्षुब्धस्समुद्रः? उच्यते—क्षुब्ध शब्दमादौ मन्थविषये संस्कृत्य पश्चान्क्षुब्ध इत्युपमानात् समुद्रवन्निष्यते। वाहेः इन्नन्तस्य ग्रहणं न भवति। अनिन्नन्तः, क्षुभ्यादिभिस्साहचर्यात्।

• लग्नम्लिष्ट विरिब्धास्सक्ताविष्पष्टार्थस्वरेषु ४/६/८४

एते यथासङ्ख्यं सक्ताविस्पष्टार्थस्वरेषु निपात्यन्ते। लग्नः, लगि सङ्गे, क्त प्रत्यये इडभावः नत्वञ्च निपात्यते। म्लिष्टम्, म्लेच्छ अव्यक्तायाम् नपुंसके भावे क्तः इडभावः, एकारस्य इत्वं निपात्यते। विरिब्धः रेभृशब्दे, विपूर्वः, पूर्ववन्निपातनम्। सक्ताविस्पष्टार्थम् स्वरेष्विति किम्? लगितम्, म्लेक्षितम्, विरेभितम्।

• परिवृढदृढौ प्रभुबलवतोः ४/६/८५

एतौ यथासङ्ख्यं प्रभौ अर्थे बलवति च निपात्येते। परिवृढः, वृहि वृद्धौ, परिपूर्वः क्तप्रत्यये परे। इडभावः नलोपश्च निपात्यते। इदनुबन्धत्वान्नलोपो न स्यात्। दृढः, दृह दृहि वृह वृहि वृद्धौ, पूर्ववन्निपात नम्। स्थूलेऽप्यर्थे दृढ शब्दो निपात्यते—दृढः स्थूलः। प्रभुबलवतोरिति किम्? परिवृंहितम्, परिदृंहितम्।

• सन्निविभ्योऽर्दः ४/६/८६

निष्ठायामित्येव, सं,नि,वि इत्येतेभ्यः परस्य अर्द गतौ याचने चेत्यस्य निष्ठायामिट् न भवति। सम्मर्ण्णः, न्यर्ण्णः, व्यर्ण्णः। अर्द गतौ सं नि वि पूर्वाः। क्त प्रत्ययः। दात्पूर्वस्येति नत्वम्, पूर्वस्य नकारस्य णत्वे कृते तवर्गश्चटवर्गेति परस्य नस्य णः। सन्निविभ्य इति किम्? अर्दितः।

• सामीप्येऽभेः ४/६/८७

अभि शब्दात्परस्यार्दः निष्ठायामिट् न भवति सामीप्येऽर्थे। अभ्यर्णो रूद्रप्रसादः, प्रत्यासन्नइत्यर्थः। सामीप्य इति किम्? अभ्यर्दितश्शीतेन।

• वा रूष्यमत्वरासंघुषास्वनाम् ४/६/८८

रूष रोषे, अम गतौ, ञित्वरा सं, घुषिस्संपूर्वः, स्वनिराङ्पूर्वः। एषां निष्ठायां वा इड्भवति। रूषितः–रूष्टः, अमितः–अन्तः, त्वरितः–तूर्णः, संघुषितः–संघुष्टः, आस्वनितः–आस्वान्तः। अमिस्वनोः पञ्चमोपधेति दीर्घः, त्वरे–सृव्यवि मवि ज्वरीति उपधायाः ऊठ्, रान्निष्ठात इति नत्वम्।

• हृषेर्लोमसु ४/६/८९

हृष तुष्टौ, हृषु अलीक इति लोमविषये धात्वर्थे वर्तमानात् हृषेर्निष्ठायां वा इट् भवति, हृष्टानि लोमानि–हृष्यन्तमेति, कर्तरि क्तः। हृष्टं लोमभिः, हृषितं लोमभिः, नपुंसके भावे क्तः। लोमस्विति किम्? हृष्टः छात्रः। हृषु अलीके, नडीङ्श्वीतीड्भावः। विस्मयप्रतिघातयोरपि हृषेर्विकल्प इष्यते–हृष्टो नरः, हृषितो नरः सविस्मय इत्यर्थः। हृष्टाः दन्ताः, हृषिताः दन्ताः प्रतिहता इत्यर्थः।

• वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्न ज्ञप्ताः ४/६/९०

एते शब्दाः क्त प्रत्यये सति वा निपात्यन्ते। दान्तः शान्तः। दमु तपसि खेदे च। शमु उपशमे। इन्, अस्योपधेति दीर्घः। मानुबन्धानां ह्रस्वः, क्त प्रत्ययः, इड्भावो वा निपात्यते। कारितलोपः। पञ्चमोपधेति दीर्घः। कारितलोपस्य स्थानिवद्भावोनास्ति, दीर्घविधिं प्रति न स्थानिवदिति वचनात्। पूर्णः, दस्तः, स्पष्टः, छन्नः, ज्ञप्तः। पूरी आ (आप्यायने), दसु उपक्षये, स्पश बाधने, छद संवरणे, ज्ञा अववोधने। ज्ञा इत्यस्य आर्ते ही

ब्ली इति पकारागमः, मानुबन्धानां ह्रस्वः दमिस्पसि छदादीनामुपधादीर्घः, क्त प्रत्ययः वा इट् निपात्यते, उपधा ह्रस्वश्च, कारितलोपः, पूरेः रान्निष्ठातो न इति नत्वम्, पक्षे दामितः, शामितः, पूरितः, दासितः, स्पाशितः, छादितः, ज्ञापितः।

• रान्निष्ठातो नोऽपॄमूर्च्छिमदिख्याध्याभ्यः ४/६/६१

रेफात्परस्य निष्ठातस्य नकारोभवति। पॄ मूर्च्छि मदि ख्या ध्याभ्यो तु परस्य न भवति। मदिख्याध्याभ्यस्तु दात्पूर्वस्य च दः, आतोऽन्तस्था संयुक्तादिति च न प्राप्तः। कीर्णः—कीर्णवान्, शीर्णः—शीर्णवान्, कॄ विक्षेपे, शॄ हिंसायाम्। श्रयुवर्णेतीडभावः। ॠदन्तस्येर्, अनेन नत्वम्नामिनोर्वोरिति दीर्घः। रादिति किम्? कृतः। निष्ठाग्रहणं किम्? कर्ता। अ पॄ मूर्च्छि मदि ख्याध्याम्य इति किम्? पूर्तः, मूर्तः, मत्तः, ख्यातः, ध्यातः। पॄ पालने, मूर्च्छा मोह, मदी हर्षे, ख्या प्रथने, ध्यै चिन्तायाम्। पॄ इत्यस्य उरोष्ठ्योपधस्येत्युर्। मूर्च्छे राल्लोप्याविति छ लोपः, नामिनोर्वोरिति दीर्घः। चरित इत्यादौ नत्वं नभवति, इटा तकारस्य व्यवधानात्। ननु तस्यै—वेट्क्रियत इति कथं व्यवधानम्? स्वावयवेन भवेत्। मैवम् वोचः, नहि तकारमात्रस्य कार्यिणः इट्क्रियते किंतर्हि? तकारसमुदायस्य निष्ठाप्रत्ययस्य। अतो निष्ठा प्रत्ययोऽयमिडागमः न व्यवदध्यात्। तकारमात्रं तु व्यवदधात्येव। कृतस्यापत्यं कार्तिरित्यत्रापि न भवत्यन्तरङ्गे नत्वे कर्तव्ये वाह्य तद्धितापेक्षित्वेन वहिरङ्गायाः वृद्धेरसिद्धत्वे सति रेफाभावात्।

• दात्पूर्वस्य च दः ४/६/६२

दात्परस्य निष्ठा तकारस्य नत्वं भवति, पूर्वस्य च दकारस्य। भिन्नः भिन्नवान्। पूर्वस्येति किम्? भिन्नवद्भ्याम्। भिदेः क्तः क्तवन्तू, अनेन नत्वम्, भ्याम्, धुटां तृतीय इति दत्वम्, अस्य दकारस्य नत्व भवति। लाक्षणिकान्नभविष्यतीति चेत्, लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्व दर्शनात्प्राप्नोति।

• आतोऽन्तस्थासंयुक्ताः ४/६/६३

आतः आकारान्ताद्धातोः अन्तस्थासंयुक्तात्परस्य निष्ठातकारस्य नत्वं भवति, निद्राणः—निद्राणवान्, ग्लानः—ग्लानवान्, द्रा कुत्सि, ग्लै हर्षक्षये, गत्यर्थाकर्मकेति क्तः। आत इति किम्? दयुतः।

अन्तस्थासंयुक्तादिति किम्? स्नातः, ष्णा शौचे, धातुना संयुक्ताः विशेषयितव्याः। तेनेह न भवति–नियतिः। या प्रापणे।

• ल्वादयोदनुबन्धाच्च ४/६/६४

लूञ् छेदने इत्यत आरभ्य यो मध्ये कृत् शब्दाः उदन्ता ल्वादयः ल्वादिभ्यो धातुभ्यः ओकारानुबन्धेभ्यश्च परस्य नत्वं भवति। ल्वादिभ्यः–लूनः–लूनवान्, जीनः–जीनवान्, जॄ वयोहानौ, अस्मादगत्यर्थाकर्मकेति क्तः, ग्रहिज्येति सम्प्र, तद्दीर्घमन्त्यमिति दीर्घः। ओदनुबन्धेभ्यः–उद्विग्नः–उद्विग्नवान्, ओ विजीभय। प्रसूनः–प्रसूनवान्, षूङ् प्राणिगर्भ विमोचने। स्वादयः। ओदिति इत्ययमनुबन्धः। एवं–दूनः–दूनवान्, दूङ् परितापे। पूञो विनाशे नत्वं वक्तव्यम्, पूनाः यथा विनष्टाः इत्यर्थः। विनाशइति किम्? पूतं धान्यम्, विवक्षीकृतामित्यर्थः। ऋकार ल्वादिभ्यः क्तिः निष्ठावदिष्यते–कीर्णिः, कॄ विक्षेपे, लूनिः, स्त्रियां क्तिः, निष्ठावदतिदेशात् रान्निष्ठात इति नत्वम्।

• व्रश्चेः क च ४/६/६५

व्रश्चेः निष्ठायां परस्य कत्वं भवति। वृक्नः, वृक्नवान्। ओ व्रश्चू छेदने, क्तः क्तवन्तू, ग्रहिज्यावयीति सम्प्र, व्रश्चिमस्जोर्धुटीत्यन्तलोपः, अनेन सस्य कत्वम्, ल्वादयोदनुबन्धादिति नत्वम्।

• क्षेर्दीर्घात् ४/६/६६

क्षि क्षये इत्यस्मात् कृतदीर्घात्परस्य नत्वं भवति। क्षीणः–क्षीणवान्, गत्यर्थाकर्मकेति क्तः। निष्ठायांचेति दीर्घः। दीर्घादिति किम्? क्षितम्। नपुंसके भावे क्तः, संज्ञापूर्वको विधिरनित्य इति वचनाद् दीर्घाभावः।

• श्योऽस्पर्शे ४/६/६७

श्यो गतावित्यस्मात् परस्य निष्ठातकारस्य नत्वं भवति न चेत्स्पर्शस्स्यात्। श्येनं घृतम्, श्येनं मेदः। गत्यर्थेति क्तः। द्रवघन–स्पर्शयोरिति सम्प्र, तद्दीर्घमन्त्यमिति दीर्घः। अस्पर्श इति किम्? शीतं जलम्।

• अनपादानेऽञ्चेः ४/६/९८

अञ्चू गतीत्यस्मात् परस्य निष्ठा तकारस्य नत्वं भवति, न चेद् अपादानम्। समक्नः संगत इत्यर्थः। अञ्चेः सम्पूर्वः क्त प्रत्ययः, अनुषंगलोपः, कत्वम्, अनेन नत्वम्, अपादान इति किम्? उदक्तमुदकम्, कूपादुद्धृतमित्यर्थः। अञ्चितः—अञ्चितवानित्यत्र न भवति, इड्—व्यवधानात्। नन्वञ्चिर्वेडिति कथमस्मादिडागमस्स्यात्? सत्यम्—पूजायामञ्चेरिट् प्रतिषेधो नेष्यते, नञानिर्दिष्टस्यानित्यत्वात्।

• अविजिगीषायां दिवः ४/६/९९

दिवु क्रीडायामित्यस्मात्परस्य निष्ठातकारस्य नत्वं भवति अविजिगीषायां सत्याम्। अद्यूनः, अविजिगीषुरित्यर्थः। च्छोशूटाविति वकारस्य ऊट्। नन्वसिद्धं वहिरङ्गमन्तरङ्गे इत्यन्तरङ्गे प्रकृत्याश्रयित्वे कर्तव्ये बहिरङ्गस्य निमित्तस्य ऊटोऽसिद्धत्वात्कथं यत्वं स्यात्? अस्त्येतत्—किन्तु स्वरानन्तर्ये बहिरङ्गपरिभाषा न प्रवर्तते, श्वयुवमघोनाञ्चेत्युत्वकरणात्। अत्र चेकारोकारयोस्स्वरयोरानन्तर्यात्। अविजिगीषायामिति किम्? द्यूतं वर्तते।

• ह्रीघ्रात्रोन्दनुदविदां वा ४/६/१००

ह्री लज्जायाम्, घ्रा गन्धोपादाने, त्रैङ् पालने, उन्दी क्लेदने, णुद प्रेरणे, विद विचारणे, एषां निष्ठातकारस्य नत्वं वा भवति ह्रीणः—ह्रीतः, घ्राणः—घ्रातः, त्राणः—त्रातः, समुन्नः—समुत्तः, नुन्नः—नुत्तः, विन्नः—वित्तः। विचारणार्थस्य विदेर्विकल्पं स्मरन्ति।

• क्षै शुषि पचां मकवाः ४/६/१०१

क्षि क्षये, शुष शोषणे, डुपचष् पाके, एषां निष्ठा तकारस्य यथासङ्ख्यम् म क वास्त्रय आदेशः भवन्ति। क्षामः, शुष्कः, पक्वः।

• वा प्रस्त्यो मः ४/६/१०२

प्र पूर्वस्य स्त्यायतेः प्रस्तीमः, प्रस्त्यस्य सम्प्रसारणमिति सम्प्र, तद्दीर्घमन्त्यमिति दीर्घः। अथ मत्वाभावपक्षे आतोऽन्तस्थासंयुक्तादिति निष्ठानत्वमिह कस्मान्नभवति, न भवत्यन्तरङ्गत्वात्सम्प्रसारणस्य प्रवृत्तेः।

• निर्वाणोऽवाते४/६/१०३

निर्वाण इति निपात्यते अवातविषये, निर्वाणोऽग्निः। वा गति इत्ययं निष्पूर्वः। आवात इति किम्? निर्वातं वातेन।

• भित्तर्ण वित्ताश्शकलाधमर्ण्यभोगेषु ४/६/१०४

भित्त, ऋण, वित्त इत्येते निपात्यन्ते यथासङ्ख्यम्—शकले, अधमर्ण्ये, भोगे च। भित्तम्, भिदेः क्त प्रत्ययस्य नत्वाभावो निपात्यते। ऋणम्—ऋ गतौ णत्वं निपात्यते। वित्तः, विद्लृ लाभे, नत्वाभावो—निपात्यते। अधमर्णग्रहणं कालान्तरदेयद्रव्योपलक्षणार्थम्, तेन उत्तमर्णविषयेऽपि ऋणशब्दस्साधुः। शकलाधमर्ण्यभोगेष्विति किम्? भिन्नम्, ऋतम्, विन्नम्।

• अनुपसर्गात्फुल्लक्षीव कृशोल्लाघाः ४/६/१०५

फुल्ल, क्षीव, कृश, उल्लाघ इत्येते निपात्यन्ते। अनुपसर्गात्परे स्युः, फुल्लः, ञिफला विशरणे, क्त प्रत्ययः, चरफलोश्च परस्येत्युत्त्वम्। तकारस्य लत्वं निणत्यते। क्षीवः, कृशः, उल्लाघः। क्षीवृ मदे, कृश तनू करणे, लाघृ सामर्थ्ये अयमुत्पूर्वः। क्त प्रत्ययः इट्, तस्मिन्कृते इट इत्येतस्य लोपो निपात्यते। अनुपसर्गादिति किम्? प्रफुल्लः, प्रक्षीवितः, प्रकृशितः, प्रोल्लाघितः। पूर्ववत्फलेरुत्वम्, उत् संपूर्वः तु फुल्ल शब्दो निपात्यते, उत्फुल्लः, संफुल्ल, पूर्ववन्निपातनम्।

• अवर्णादूटो वृद्धिः ४/६/१०६

अवर्णात्परस्य ऊटो वृद्धिर्भवति। भौः, यौः। भू सत्तायाम्, यु मिश्रणे, हेताविन्, वृद्धिः, क्विप्, क्विपो लोपः। अनेन स्वरादेशपरिभाषया कारित लोपस्य स्थानिवद्भावात् क्विप् प्रत्ययो न पर भूत इति कथं सूत्रादेशस्स्यात्? अस्त्येतत्–क्वौ लुप्ते निषिध्यते स्थानिवद्भावः, क्वौ लुप्ते न स्थानिवदिति वचनात्। अवर्णादिति किम्? ऊः, अव रक्षणे, सृव्यमिमवीत्युपधावकारयोः ऊट्। औरिति कर्तव्ये वृद्धि ग्रहणं मङ्गलार्थम्।

भट्टोग्रभूति कृतायां शिष्यहितायां वृत्तौ कृत्प्रकरणे

षष्ठः पादः

कृत्प्रकरणं समाप्तम्।

कृतिर्महाकवेरूग्रभूतिभदृस्य।

समाप्तश्चायं ग्रन्थः।।

।। श्रीः ।।

क्रमाङ्काः	सूत्राणि	सूत्राङ्काः
१	अं इत्यनुस्वारः	१.१.१६
२	अः इति विसर्जनीयः	१.१.१६
३	अकर्तरि च कारके संज्ञायाम्	४.५.१०
४	अकारः ऋवर्णस्य	३.३.१६
५	अकारादसंबुद्धौ मुश्च	२.२.७
६	अकारे लोपम्	२.१.१७
७	अकारो दीर्घं घोषवति	२.१.१४
८	अकृते स्थूलात्	२.७.३८
९	अग्निवच्छसि	२.१.६५
१०	अग्नेरमोऽकारः	२.१.५०
११	अघुट्स्वरादौ सेट्कस्यापि वन्से०	२.२.४५
१२	अघुट्स्वरे लोपम्	२.२.३६
१३	अघोषवतोश्च	१. ५. ८
१४	अघोषे प्रथमः	२.३.५८
१५	अघोषेष्वशिटां प्रथमः	३.८.६
१६	अच् पचादिभ्यश्च	४.२.४६
१७	अजर्यं संगते च	४.२.१६
१८	अजाद्यन्तादाप्	२.७.२
१९	अजेर्वी	३.४.६१
२०	अड् धात्वादिह्यस्तन्यद्यतनीक्रियाति०	३.८.१५
२१	अण्येकात्	२.७.१४
२२	अणि वचेरोदुपधायाः	३.६.१००
२३	अणसुवचिख्यातिलिपिसिचिह्वः	३.२.२७
२४	अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्य	३.३.३१
२५	अतः क्व च	२.६.३१
२६	अत् त्वरादीनां च	३.३.३८
२७	अत् पञ्चम्यद्वित्वे	२.३.१४
२८	अत्याधानेऽर्थे	४.५.५५
२९	अथ परस्मैपदानि	३.१.१
३०	अदसः पदे मः	२.२.४४
३१	अदादेर्लुग्विकरणस्य	३.४.९२

३२	अदाब् दाधौ दा	३.१.८
३३	अदेर्घस्लृ सनद्यतन्योः	३.४.७६
३४	अदोऽद्	३.६.६८
३५	अदोऽनन्ने	४.३.६५
३६	अदोऽमुश्च	२.१.५४
३७	अदसोऽमूः	४.६.६१
३८	अद्यतन्यां च	३.४.८३
३९	अद् व्यञ्जनेऽनक०	२.३.३४
४०	अध्यायन्यायोद्याव०	४.५.६५
४१	अन उस् सिजभ्यस्तविदादिभ्योऽभुवः	३.४.३१
४२	अनडुहश्च	२.२.४१
४३	अनतिक्रमयन् विश्लेषयेत्	१.१.२१
४४	अनन्तो घुटि	२.२.३५
४५	अनपादानेऽन्चेः	४.६.६८
४६	अनव्ययविसृष्टस्तु सकारं कपवर्गयोः	२.५.२
४७	अनश्च बहुब्रीहेः	२.७.७
४८	अनश्चाल्लोपि कर्णतः	२.७.२७
४९	अनसि डश्च	४.३.६०
५०	अनि च विकरणे	३.५.३
५१	अनिडेकस्वरादातः	३.७.१३
५२	अनिदनुबन्धानामगुणेऽनुषङ्गलोपः	३.६.१
५३	अनुनासिकाः ङञणनमाः	१.१.१३
५४	अनुपदिष्टाश्च	१.३.४
५५	अनुपसर्जनात्	२.७.११
५६	अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः	४.६.१०५
५७	अनुबन्धोऽप्रयोगी	३.८.३०
५८	अनुषङ्गश्चाकुञ्चेत्	२.२.३८
५९	अनेकाक्षरयोस्त्वसंयोगाद् यवौ	२.२.५८
६०	अन्चेरलोपः पूर्वस्य च दीर्घः	२.२.४८
६१	अन्जेः सिचि	३.७.८
६२	अन्तःस्थाः यरलवाः	१.१.१४
६३	अन्तर्स्वरप्रातर्पुनर्धोऽप्याहुः	१.६.२

६४ अन्तर्वतो नु० २.७.३१
६५ अन्तस्थो ङेर्षोः २.६.१६
६६ अन्त्यात् पूर्व उपधा २.१.११
६७ अत्वसन्तस्य चाधातोः सौ २.२.२०
६८ अन्यतोऽपि च ४.३.४८
६९ अन्यतोऽपि च ४.३.८७
७० अन्यत्रापि च ४.३.१७
७१ अन्यस्माल्लुक् २.४.३
७२ अन्यादेस्तु तुः २.२.८
७३ अन्वाद्याः कर्मप्रवचनीयाः० १.६.४
७४ अन् विकरणः कर्तरि ३.२.३२
७५ अपरो लोप्योऽन्यस्वरे यं वा १.५.६
७६ अपश्च २.२.१६
७७ अपां भेदः २.३.४०
७८ अपात् क्लेशतमसोः ४.३.५०
७९ अपादाने परीप्सायाम् ४.६.३०
८० अर्पूर्वे सन्ध्यक्षरे गुणाः ३.८.३३
८१ अभ्यस्तस्य च ३.४.१५
८२ अभ्यस्तस्य चोपधायाः नामिनः० ३.५.८
८३ अभ्यस्तादन्तिरनकारो वा नपुंसके २.२.२६
८४ अभ्यस्तानामाकारस्य ३.४.४२
८५ अभ्यस्तानामुसि ३.५.६
८६ अभ्यासस्यादिर्व्यञ्जनमवशेष्यम् ३.३.६
८७ अभ्यासस्यासवर्णे ३.४.५६
८८ अभ्यासाच्च ३.६.३५
८९ अमनुष्यकर्तृकेऽपि च ४.३.५३
९० अमन्त्रे तु कुण्डतः २.७.४१
९१ अमावस्या वा ४.२.३५
९२ अमौ चाम् २.३.८
९३ अमृशसोरा २.२.३४
९४ अमृशसोरादिर्लोपम् २.१.४७
९५ अयादीनां यवलोपः पदान्ते नवा० १.२.१६

९६	अयीर्ये	३.६.२२
९७	अर्डौ	२.१.६६
९८	अर्तिपिपर्त्योश्च	३.३.२५
९९	अर्तिलूधूसूखनिसहिचरेभ्य इत्रन्	४.४.६३
१००	अर्तिसर्त्योरणि	३.६.१४
१०१	अर्तिह्रीब्लीरीक्नुयीक्ष्माय्यादन्तानाम्०	३.६.२५
१०२	अर्तीणघ्सैकस्वराताम् इड्वन्सौ	४.६.६६
१०३	अर्तेर्ऋच्छः	३.६.८२
१०४	अर्पूर्वे द्वे सन्ध्यक्षरे	३.८.३३
१०५	अर्यः स्वामिवैश्ययोः	४.२.१७
१०६	अर्वन्नर्वन्तिरसावनञ्	२.३.२२
१०७	अर्हः प्रशंसायाम्	४.४.१३
१०८	अर्हतो तृच्	४.५.१०२
१०९	अर्हश्च	४.३.१२
११०	अलंखल्वोः प्रतिषेधयोः क्त्वा वा	४.६.२
१११	अलोपे समानस्य सन्वल्लघुनीनिचण्परे	३.६.३६
११२	अल्पस्वरतरं तत्र पूर्वम्	२.५.१२
११३	अल्पादेर्वा	२.१.३१
११४	अवन्योराक्रोशे	४.५.२७
११५	अवमसंयोगादनोऽलोपो०	२.२.५२
११६	अवयाः उक्थशाः पुरोडाश्श्वेतवाश्च	४.३.६२
११७	अवर्ण इवर्ण ए	१.२.२
११८	अवर्णस्याकारः	३.८.१७
११९	अवर्णादूटो वृद्धिः	४.६.१०६
१२०	अविजिगीषायां दिवः	४.६.६६
१२१	अवे तृस्त्रोर्घञ्	४.५.६३
१२२	अवे ह्रसोः	४.२.६०
१२३	अव्ययसर्वनाम्न स्वरादन्त्यात्०	२.२.६३
१२४	अव्ययाच्च	२.४.४
१२५	अव्ययीभावादकारान्ताद्०	२.४.१
१२६	अश्नोतेश्च	३.३.२१
१२७	अष्टनः सर्वासु	२.३.२०

१२८ असन्ध्यक्षरयोरस्य०	३.६.४६
१२९ असितादेश्चवर्णतः	२.७.४४
१३० असूर्योग्रयोर्दृशः	४.३.३२
१३१ अस्तेः	३.५.३६
१३२ अस्तेः	३.८.१८
१३३ अस्तेः सौ	३.६.४४
१३४ अस्तेरादेः	३.४.४१
१३५ अस्तेर्दिस्योः	३.६.६५
१३६ अस्तेर्भूरसार्वधातुके	३.४.८७
१३७ अस्थिदधिसक्थ्यक्ष्णाम्०	२.२.१३
१३८ अस्भुवौ च परस्मै	३.२.२३
१३९ अस्मद्युत्तमः	३.१.७
१४० अस्य च दीर्घः	३.६.६
१४१ अस्य च लोपः	३.६.५४
१४२ अस्यतेस्थोऽन्तः	३.६.१०१
१४३ अस्य वमोर्दीर्घः	३.८.१०
१४४ अस्यादेः सर्वत्र	३.३.१८
१४५ अस्यैकव्यञ्जनमध्ये०	३.४.५१
१४६ अस्योकारः सार्वधातुके०	३.४.३९
१४७ अस्योपधायाः दीर्घो०	३.६.६
१४८ अह्नः सः	२.३.५०
१४९ आकारस्योसि	३.६.४२
१५० आकारादट औ	३.५.४४
१५१ आकारो महतः कार्यः०	२.५.२०
१५२ आख्याताच्च तमादयः	२.६.३९
१५३ आगम उदनुबन्धः०	२.१.६
१५४ आङि ताच्छील्ये	४.३.११
१५५ आङि युद्धे	४.५.५१
१५६ आङि रूप्लुवोः	४.५.३२
१५७ आ च न संबुद्धौ	२.१.७०
१५८ आतश्चोपसर्गे	४.५.७९
१५९ आते आथे इति च	३.६.६८

१६० आतोऽनुपसर्गात् कः	४.३.४
१६१ आतोऽन्तःस्थासंयुक्तात्	४.६.६३
१६२ आतोय्वदरिद्रातेः	४.५.६८
१६३ आत्खनोरिच्च	४.२.१२
१६४ आत्मने चानकारात्	३.५.३६
१६५ आत्मनेपदानि भावकर्मणोः	३.२.४०
१६६ आत्मोदरयोः भृञः खिः	४.३.२७
१६७ आत्वं व्यञ्जनादौ	२.३.१८
१६८ आदनुबन्धाच्च	४.६.८१
१६९ आदातामाथामादेरिः	३.६.६७
१७० आदिकर्मणि क्तः कर्तरि च	४.६.४२
१७१ आदृवर्णोपधालोपिनां किर्द्वे च	४.४.५४
१७२ आधातोरघुट्स्वरे	२.२.५४
१७३ आन व्यञ्जनान्ताद्धौ	३.२.३६
१७४ आनोऽत्रात्मने	४.४.५
१७५ आन्मोऽन्त आने	४.४.७
१७६ आन् शसः	२.३.६
१७७ आप्लृतपितिपिस्वपि०	३.७.२४
१७८ आप्नोतेरीः	३.३.४२
१७९ आभोभ्यामेवमेव स्वरे	१.५.१०
१८० आमः कृञनुप्रयुज्यते	३.२.२२
१८१ आमन्त्रणे च	२.४.१८
१८२ आमन्त्रिते सिः संबुद्धिः	२.१.५
१८३ आमि च नुः	२.१.७२
१८४ आमि विदेरेव	३.५.२६
१८५ आयिरिच्यादन्तानाम्	३.६.२३
१८६ आय्यन्ताच्च	३.२.४४
१८७ आरुत्तरे च वृद्धिः	३.८.३४
१८८ आलोपोऽसार्वधातुके	३.४.२७
१८९ आवट्यादाप्	२.७.१६
१९० आवश्यकाधमर्ण्ययोर्णिनिः	४.५.१०४
१९१ आशिषि च परस्मै	३.५.२२

१९२ आशिष्यकः	४.२.६७
१९३ आशिष्येकारः	३.४.३०
१९४ आशीः	३.१.३१
१९५ आ श्रद्धा	२.१.१०
१९६ आ सर्वनाम्नः	४.६.६२
१९७ आसिदयुयायि०	३.२.१६
१९८ आसुयुवपिरपिलपि०	४.२.३७
१९९ आ सौ सिलोपश्च	२.१.६४
२०० इण्तः	२.७.५७
२०१ इकारो दरिद्रातेः	३.४.४५
२०२ इङः परोक्षायाम्	३.४.८५
२०३ इङाभ्यां च	४.५.१२
२०४ इङ्धारिभ्यां शन्तृङ्०	४.४.१०
२०५ इचस्तलोपः	३.४.३२
२०६ इचि वा	३.४.६७
२०७ इच्छा	४.५.७४
२०८ इच्छार्थेष्वेककर्तृकेषु तुम्	४.५.१००
२०९ इजात्मने पदे प्रथमैकवचने	३.२.२९
२१० इज्जहातेः क्त्वि	४.१.७४
२११ इटश्चेटि	३.६.५८
२१२ इटि च	३.४.२८
२१३ इटो दीर्घो ग्रहेरपरोक्षायाम्	३.७.१२
२१४ इडागमोऽसार्वधातुकस्यादि०	३.७.१
२१५ इणतः	२.६.५
२१६ इणश्च	३.४.५६
२१७ इणोऽनुपसृष्टस्य	३.४.७१
२१८ इणो गा	३.४.८४
२१९ इण्स्थादापिबतिभूभ्यः०	३.४.६५
२२० इतो लोपोऽभ्यासस्य	३.३.४०
२२१ इदंकिम्भ्यां थमुः कार्यः	२.६.३८
२२२ इदमियमयं पुंसि	२.३.३३
२२३ इदमः इ	४.६.५६

२२४ इदमो ह्यधुनादादानीमौ २.६.३४
२२५ इदुदग्निः २.१.८
२२६ इन टा २.१.२३
२२७ इनि लिङ्गस्यानेकाक्षरस्या० ३.२.१२
२२८ इन् कारितं धात्वर्थे ३.२.६
२२६ इन्–ञ्–यजादेरुभयम् ३.२.४५
२३० इन्यसमानलोपोपधायाः ३.५.४७
२३१ इन्हन्पूषार्यम्णां शौ सौ च २.२.२१
२३२ इरन्यगुणे ३.४.७३
२३३ इरूरोरीरूरौ २.३.४६
२३४ इरेदुरोज्जसि २.१.५५
२३५ इवर्णादश्विश्रिडीङ्शीङः ३.७.१४
२३६ इवर्णावर्णौ स्वरप्रत्यये च २. ६. ४३
२३७ इवर्णोऽयमसवर्णे न च परो लोप्यः १. २. ८
२३८ इषिश्रन्थ्यासिवन्दिविदि० ४. ५. ८०
२३६ इसुसदोषां घोषवति रः २. ३. ५६
२४० इस्मन्तृ क्विप्सु च ४. १. २०
२४१ इस्स्तम्भशकृतौ ब्रीहिवत्सयोः ४. ३. २३
२४२ ईकारान्तात् सिः २. १. ४८
२४३ ईकारे स्त्रीकृतेऽल्लोप्यः २. ४. ५०
२४४ ईङ्योर्वा २. २. ५३
२४५ ईड्जनोर्ध्वे च ३. ७. ५
२४६ ई तस्यासः ४. ४. ६
२४७ ईदूतोरियुवौ स्वरे २. २. ५५
२४८ ईदूत् स्त्र्याख्यौ नदी २. १. ६
२४६ ईप्सितं च रक्षार्थानाम् २. ४. ६
२५० ईयस्तु हिते २. ६. १०
२५१ ईशस्से ३. ७. ४
२५२ ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ४. ५. ६६
२५३ उकारलोपो वमोर्वा ३. ४. ३६
२५४ उकाराच्च ३. ४. ३५
२५५ उणादयो भूतेऽपि ४. ५. १

२५६ उतोऽयुरूणुस्नुक्षुक्ष्णुवः ३. ७. १५
२५७ उकारस्य वृद्धिर्व्यञ्जनादौ गुणिनि० ३. ६. ८६
२५८ उत्वं मात् २. ३. ३८
२५९ उदङ् उदीचिः २. २. ५०
२६० उदनुबन्धपूक्लिशां क्त्वि ४. ६. ७५
२६१ उदन्ताद्गुणवाचिनः २. ७. ४६
२६२ उदि श्रिपुवोः ४. ५. २५
२६३ उदृकारानुबन्धात्त्वी २. ७. ६
२६४ उन्देर्मनि ४. १. ६२
२६५ उन्योर्ग्रिरः ४. ५. २२
२६६ उपधाया अपि क्वौ घुट्यगुणे० ४. १. ५६
२६७ उपपीडरूधकर्षश्च ४. ६. २९
२६८ उपमानादाचारे ३. २. ७
२६९ उपमाने वतिः २. ६. १२
२७० उपसर्गादसुदुर्भ्याम्० ४. १. २६
२७१ उपसर्गेऽदः ४. ५. ३८
२७२ उपसर्गस्यायतौ ३. ६. १०५
२७३ उपसर्गे त्वातो डः ४. २. ५४
२७४ उपसर्गेऽदः ४.५.३८
२७५ उपसर्गे दः किः ४. ५. ६५
२७६ उपसर्गे रूवः ४. ५. १३
२७७ उपसर्या काल्या प्रजने ४. २. १८
२७८ उपात् क आश्रये ४. ५. ६०
२७९ उभयेषामीकारो व्यञ्जना० ३. ४. ४४
२८० उमकारयोर्मध्ये १. ५. ७
२८१ उरोविहायसोरूरविहौ च ४. ३. ४५
२८२ उरोष्ठ्योपधस्य च ३. ५. ४६
२८३ उवर्णस्त्वोत्वमापाद्यः २. ६. ४५
२८४ उवर्णगुणादिभ्यश्च ३. ७. ३२
२८५ उवर्णस्य जान्तःस्था० ३. ३. २७
२८६ उवर्णादावश्यके ४. २. ३८
२८७ उवर्णे ओ १. २. ३

२८८	उशनः पुरूदन्शोऽनेहसां सावनन्तः	२. २. २२
२८९	उषविदजागृभ्यो वा	३. २. २०
२९०	ऊङुतः	२. ७. ५६
२९१	ऊर्णोतेर्वा	३. ६. १३
२९२	ऊर्णोतेर्वा	३. ६. ६०
२९३	ऊर्ध्वेशुषिपूरोः	४. ६. २३
२९४	ऊष्माणःशषसहाः	१. १. १५
२९५	ऋकारे च	३. ३. २०
२९६	ऋच्छ ऋतः	३. ६. २०
२९७	ऋतः ईदन्तश्चिवचेक्रीयित०	३. ४. ७२
२९८	ऋतश्च संयोगादेः	३. ६. १८
२९९	ऋतोऽवृङ्वृञः	३. ७. १६
३००	ऋत्विग्दधृक्स्रग्दिगुष्णिहश्च	४. ३. ६६
३०१	ऋदन्तात् सपूर्वः	२. १. ६३
३०२	ऋदन्तानां च	३. ५. ११
३०३	ऋदुपधाच्चाक्लृपिचृतेः	४. २. २४
३०४	ऋदन्तस्येरगुणे	३. ५. ४५
३०५	ऋदन्तानां च	३. ६. १९
३०६	ऋन्नेभ्यस्त्वी	२. ७. ३
३०७	ऋमतो रीः	३. ३. ३४
३०८	ऋवर्णव्यञ्जनान्ताद् घ्यण्	४. २. ३६
३०९	ऋवर्णे अर्	१. २. ४
३१०	ऋषिदेवतयोः कर्तरि	४. ४. ६५
३११	लृवर्णे अल्	१. २. ५
३१२	ए अय्	१. २. १२
३१३	एककर्तृकयोः पूर्वकाले	४. ६. ३
३१४	एकारादीनि संध्यक्षराणि	१. १. ८
३१५	एकारे ऐ ऐकारे च	१. २. ६
३१६	एजेः खश्	४. ३. २८
३१७	एतेर्ये	३. ८. १९
३१८	एत्वमस्थानिनि	२. ३. १७
३१९	एदोत्परः पदान्ते०	१. २. १७

३२०	एद् बहुत्वे त्वी	२. ३. ३६
३२१	एयेऽकद्रवास्तु लुप्यते	२. ६. ४६
३२२	एवमेवाद्यतनी	३. १. २८
३२३	एषसपरो व्यञ्जने लोप्यः	१. ५. १५
३२४	एषां विभक्तावन्तलोपः	२. ३. ६
३२५	ऐ आय्	१. २. १३
३२६	ओ अव्	१. २. १४
३२७	ओकारे औ औकारे च	१. २. ७
३२८	औदोद्भ्यामिन्नायीस्वरवत्	३. ४. ६६
३२९	ओदन्ता अ इ उ आ निपाता०	१. ३. १
३३०	औदोद्भ्यां कृद्यस्स्वरवत्	४. १. ३०
३३१	ओसि च	२. १. २०
३३२	औ आव्	१. २. १५
३३३	औकारः पूर्वम्	२. १. ५१
३३४	औतस्माज्जस्शसोः	२. ३. २१
३३५	औपम्यसंहितात्	२. ७. ६२
३३६	औरीम्	२. १. ४१
३३७	औरीम्	२. २. ६
३३८	औ सौ	२. २. २६
३३९	क इति जिह्वामूलीयः	१. १. १७
३४०	कखयोर्जिह्वामूलीयं न वा	१. ५. ४
३४१	कतिपयात् कतेः	२. ६. २०
३४२	कतेश्च जस्शसोर्लुक्	२. १. ७६
३४३	करणाधिकरणयोश्च	४. ५. ९०
३४४	करणेऽतीते यजः	४. ३. ७६
३४५	करणेऽयोविद्रुषु	४. ५. ५७
३४६	करोतेः	३. ५. ४
३४७	करोतेः प्रतियत्ने	२. ४. ३८
३४८	करोतेर्नित्यम्	३. ४. ३७
३४९	कर्तरि कृत्	४. ६. ४०
३५०	कर्तरि च	२. ४. ३२
३५१	कर्तरि रूचादिङानुबन्धेभ्यः	३. २. ४२

३५२ कर्तर्युपमाने ४. ३. ७२
३५३ कर्तुरायिः सलोपश्च ३. २. ८
३५४ कर्तृकर्मणोः कृति नित्यम् २. ४. ४०
३५५ कतृकर्मणोश्च भुकृञोः ४. ५. ६७
३५६ कर्त्रोर्जीवपुरूषयोर्नशि० ४. ६. २२
३५७ कर्मणि चाण् ४. ५. ५
३५८ कर्मणि चोपमाने ४. ६. २४
३५९ कर्मणि धेटः ष्ट्रन् ४. ४. ६१
३६० कर्मणि हनः ४. ३. ७७
३६१ कर्मण्यण् ४. ३. १
३६२ कर्मण्यधिकरणे च ४. ५. ६६
३६३ कर्मण्याक्रोशे कृञः खमिञ् ४. ६. ६
३६४ कर्मण्युपमाने त्यदादौ० ४. ३. ७०
३६५ कर्मधारयसंज्ञे तु पुंवद्भावो विधीयते २. ५. १९
३६६ कर्मप्रवचनीयैश्च २. ४. २३
३६७ कर्मवत् कर्मकर्ता ३. २. ४१
३६८ कवर्गस्य चवर्गः ३. ३. १३
३६९ कषादिषु तैरेवानु० ४. ६. २५
३७० कसिपिसिभासीशस्था० ४. ४. ४८
३७१ कात्वीषदर्थेऽक्षे २. ५. २५
३७२ कादीनि व्यञ्जनानि १. १. ९
३७३ कामुकान्मैथुनेच्छायाम् २. ७. ३६
३७४ काम्य च ३. २. ६
३७५ कारयति यः स हेतुश्च २. ४. १५
३७६ कारितस्यानामिड्विकरणे ३. ६. ४९
३७७ कारिते च संश्चणोः ३. ४. १३
३७८ कार्यावव्वावावादेशावोकारौ० २. ६. ४७
३७९ कालभावयोः सप्तमी २. ४. ३३
३८० कालसमयवेलाशक्त्यर्थेषु च ४. ५. १०१
३८१ काले ३. १. १०
३८२ काले किंसर्वयदेकान्येभ्य० २. ६. ३३
३८३ किमः कुह २. ६. ३०

३८४	किं कः	२. ३. ३०
३८५	किं की	४. ६. ६०
३८६	किरो धान्ये	४. ५. २३
३८७	कीर्तीषोः क्तिश्च	४. ५. ८१
३८८	कुञ्जादेरायनण् स्मृतः	२. ६. ३
३८९	कुत्सितेऽङ्गे	२. ४. ३०
३९०	कुटादेरनिनिचट्सु	३. ५. २७
३९१	कुमारशीर्षयोर्णिनिः	४. ३. ५१
३९२	कुम्भात्	२. ७. ४३
३९३	कूल उद्रुजोद्वहोः	४. ३. ३५
३९४	कुषिताग्निः वृषाकपेः	२. ७. ५३
३९५	कृञः श च	४. ५. ७२
३९६	कृञः सुपुण्यपापकर्म०	४. ३. ७६
३९७	कृञश्च	४. ३. ८५
३९८	कृञोऽव्ययेऽयथेष्टा०	४. ६. ३५
३९९	कृञोऽसुटः	३. ७. ३६
४००	कृञो हेतुताच्छील्यानु०	४. ३. २०
४०१	कृत्	४. २. ७
४०२	कृत्ययुटोऽन्यत्रापि च	४. ५. ८७
४०३	कृपे रो लः	३. ६. १०४
४०४	कृवृषिमृजां वा	४. २. २६
४०५	कृसृभृवृस्तु द्रुस्रु स्रुव एव परोक्षायाम्	३. ७. ३४
४०६	कृष्टपच्यकुप्ये संज्ञायाम्	४. २. ३४
४०७	के प्रत्यये स्त्रीकृताकारपरे०	२. २. ६४
४०८	के यण्वच्च योक्तवर्जम्	४. १. ७
४०९	कोः कत्	२. ५. २४
४१०	कौरव्यासुरिमण्डूकात्	२. ७. १७
४११	क्तक्तवन्तू निष्ठा	४. १. ८३
४१२	क्त्वामसन्ध्यक्षरान्तोऽव्ययम्	४. १. ८४
४१३	क्रमः परस्मै	३. ६. ७३
४१४	क्रव्ये च	४. ३. ६६
४१५	क्रियाभावो धातुः	३. १. ६

४१६	क्रियासमभिहारे सर्व०	३. १. २१
४१७	क्रीञस्तदर्थे	४. १. ३२
४१८	क्रीतात्करणपूर्वात्	२. ७. ५१
४१९	क्रुधिमण्डिचलि०	४. ४. ३०
४२०	क्रोडादिबहुस्वरात्	२. ७. ३०
४२१	क्र्यादीनां विकरणस्य	३. ४. ४३
४२२	क्वचित्पूर्वः परो सर्गो	१. ६. ७
४२३	क्वणो वीणायां च	४. ५. ४५
४२४	क्वन्सुकानौ परोक्षावच्च	४. ४. १
४२५	क्विप् च	४. ३. ६८
४२६	क्विब्ब्रह्मभ्रूणवृत्रेषु	४. ३. ७८
४२७	क्विब्भ्राजिपृर्वीपृधु०	४. ४. ५८
४२८	क्षिपरटवदवादिदेविभ्यो०	४. ४. २७
४२९	क्षुधिवसोश्च	४. ६. ७७
४३०	क्षुभिवाहिस्वनिध्वनि०	४. ६. ८३
४३१	क्षुश्रुभ्यां वौ	४. ५. १६
४३२	क्षेमप्रियमद्रेष्वण् च	४. ३. ४१
४३३	क्षेदीर्घः	४. १. ३६
४३४	क्षेदीर्घात्	४. ६. ६६
४३५	क्षैशुषिपचां मकवाः	४. ६. १०१
४३६	खश्चात्मने	४. ३. ७५
४३७	गणेरीच	३. ३. ३६
४३८	गत्यर्थकर्मणि द्वितीया०	२. ४. २४
४३९	गत्यर्थाकर्मकश्लिषशीङ्०	४. ६. ४३
४४०	गमश्च	४. ३. ४४
४४१	गमस्त च	४. ४. ५०
४४२	गमहनजनखनघसामु०	३. ६. ४८
४४३	गमहनविदविशदृशां वा	४. ६. ७०
४४४	गमिषुयमां छः	३. ६. ७४
४४५	गर्गयस्कविदादीनां च	२. ४. ६
४४६	गष्टकः	४. ३. ८
४४७	गस्थकः	४. २. ६४

४४८	गात्रपुरुषयोष्णा	४. ६. १३
४४६	गिरतेश्चेक्रीयिते	३. ६. १०६
४५०	गिलेऽगिलस्य	४. १. २५
४५१	गुणश्चेक्रीयिते	३. ३. २८
४५२	गुणी क्त्वा सेडरूदादि०	४. १. ६
४५३	गुणोऽर्तिसंयोगाद्योः	३. ४. ७५
४५४	गुणोह्ययस्तन्याञ्च	३. ६. ६१
४५५	गुपूधूपविच्छिपणि०	३. २. १५
४५६	गुप्तिज्किद्भ्यः सन्	३. २. २
४५७	गुरोश्च निष्ठायां सेटः	४. ५. ७६
४५८	गोचरसंचरवहव्रज०	४. ५. ६२
४५६	गोरौ घुटि	२. २. ३३
४६०	गोश्च	२. १. ५६
४६१	गोहेरूदुपधायाः	३. ४. ६३
४६२	गौणादावपने	२. ७. ३६
४६३	गौरादेः	२. ७. २४
४६४	ग्रहगुहोः सनि	३. ७. ३१
४६५	ग्रहश्च	४. ५. २६
४६६	ग्रहादेर्णिनिः	४. २. ५१
४६७	ग्रहिज्यावयिव्यधिवष्टि०	३. ४. २
४६८	ग्रहिस्वपिप्रच्छां सनि	३. ४. ६
४६६	ग्रहेर्वा	४. २. ६२
४७०	ग्रहोऽपिप्रतिभ्यां वा	४. २. २६
४७१	ग्लहोऽक्षेषु	४. ५. ४७
४७२	ग्लाम्लास्थाक्षिपचि०	४. ४. १६
४७३	घञलोर्घस्लृ	४. १. ८२
४७४	घञीन्धेः	४. १. ६३
४७५	घढधभेभ्यस्तथोर्धोऽधः	३. ८. ३
४७६	घटाच्छिल्पिकृते	२. ७. ४२
४७७	घुटि च	२. १. ६७
४७८	घुटि चासम्बुद्धौ	२. २. १७
४७६	घुटि त्वै	२. २. २४

४८०	घोषवति लोपम्	१. ५. ११
४८१	घोषवत्योश्च कृति	४. ६. ७३
४८२	घोषवत्स्वरपरः	१. ५. १३
४८३	घोषवन्तोऽन्ये	१. १. १२
४८४	घ्यण्यावश्यके	४. ६. ५२
४८५	घ्राध्मोरी	३. ४. ७७
४८६	घ्रो जिघ्रः	३. ६. ७६
४८७	ङणनाः ह्रस्वोपधाः स्वरे द्विः	१. ४. ७
४८८	ङवन्ति यै–यास्–यास्–याम्	२. १. ४२
४८९	ङसिङसोरलोपश्च	२. १. ५८
४९०	ङसिङसोरूमः	२. १. ६२
४९१	ङसिः स्मात्	२. १. २६
४९२	ङसिरात्	२. १. २१
४९३	ङस् स्य	२. १. २२
४९४	ङिः स्मिन्	२. १. २७
४९५	ङिरौसपूर्वः	२. १. ६०
४९६	ङे च	२. १. ५७
४९७	ङे न गुणः	४. १. ६
४९८	ङेर्यः	२. १. २४
४९९	ङ्वनिप् सुयजोः	४. ३. ८९
५००	चं शे	१. ४. ६
५०१	चकासकासप्रत्ययान्तेभ्य०	३. २. १७
५०२	चक्षिङः ख्याञ्	३. ४. ८९
५०३	चजोः कगौ धुड्घानु०	४. ६. ४६
५०४	चण्परोक्षाचेक्रियितसन०	३. ३. ७
५०५	चतुरः	२. १. ७४
५०६	चतुरो वाशब्दस्योत्वम्	२. २. ४०
५०७	चरफलोरूच्च परस्यास्य	३. ३. ३३
५०८	चरफलोरूदस्य	४. १. ७८
५०९	चरेराङि चागुरौ	४. २. १४
५१०	चरेष्टः	४. ३. १६
५११	चर्मोदरयोः पूरेः	४. ६. १०

५१२	चवर्गदृगादीनां च	२. ३. ४५
५१३	चवर्गस्य किरसवर्णे	३. ६. ६०
५१४	च वा हा	१. ६. १
५१५	चादियोगे च	२. ३. ५
५१६	चायः किश्चेक्रीयिते	३. ४. १०
५१७	चित्याग्निचित्ये च	४. २. ४५
५१८	चुरादेश्च	३. २. ११
५१९	चेः कि वा	३. ६. ३७
५२०	चेक्रीयितान्तात्	३. २. ४३
५२१	चेक्रीयित लुगन्तात्	३. ६. ६४
५२२	चेक्रीयितान्तानां यजिजपि०	४. ४. ४५
५२३	चेक्रीयिते च	३. ४. ७६
५२४	चेरग्नौ	४. ३. ८१
५२५	चेलार्थे क्नोपेः	४. ६. १२
५२६	चेस्तुहस्तादाने	४. ५. ३४
५२७	छन्दोनाम्नि च	४. ५. १८
५२८	छशोश्च	३. ६. ६५
५२९	छादेर्घेऽद्व्युपसर्गस्य	४. १. १६
५३०	छिदिभिदिविदां कुरः	४. ४. ४३
५३१	छ्वोः शूटौ पञ्चमे च	४. १. ५४
५३२	जक्षादिश्च	३. ३. ६
५३३	जझञशकारेषु ञकारम्	१. ४. १२
५३४	जनिवध्योश्च	३. ४. ६८
५३५	जपादीनां च	३. ३. ३२
५३६	ज़रा जरस स्वरे वा	२. ३. २४
५३७	जसि	२. १. १५
५३८	जस्शसोः शिः	२. २. १०
५३९	जस्शसो नपुंसके	२. १. ४
५४०	जस् सर्व इः	२. १. ३०
५४१	जागर्तेः कारिते	१. ६. १५
५४२	जागुः कृत्यशन्तृङ्व्योः	४. १. ८
५४३	जागुरूकः	४. ४. ४४

५४४ जा जनेर्विकरणे ३. ६. ८६
५४५ जातेरयोपधात्स्त्रीतः २. ७. ५५
५४६ जान्तनशामनिटाम् ४. १. १४
५४७ जिक्ष्योः शक्ये ४. १. ३१
५४८ जिघ्रतेर्वा ३. ५. ५१
५४९ जिभुवोः स्नुक् ४. ४. १८
५५० जीर्णदृक्षिविश्रिपरिभू० ४. ४. ३७
५५१ जीर्यतेरन्तृन् ४. ३. ६०
५५२ जीवे ग्रहः ४. ६. १६
५५३ जुचंक्रम्यदंद्रम्य० ४. ४. ३२
५५४ जुहोतेः सार्वधातुके ३. ४. ६१
५५५ जुहोत्यादीनां सार्वधातुके ३. ३. ८
५५६ जुहोत्यादेश्च ३. ४. ६३
५५७ जूव्रश्चोरिट् ४. ६. ७६
५५८ जेर्गिः सन्परोक्षयोः ३. ६. ३६
५५९ ज्वलादिदुणीभ्योणः ४. २. ५८
५६० ज्ञश्च ३. ६. ८७
५६१ ञ्यनुबन्धमतिबुद्धि० ४. ४. ६६
५६२ टग् लक्षणे जायापत्योः ४. ३. ५२
५६३ टठयोः षकारम् १. ४. ६
५६४ टा ना २. १. ५३
५६५ टे ठे वा षम् १. ५. २
५६६ टौसोरनः २. ३. ३५
५६७ टौसोरे २. १. ३८
५६८ ट्वनुबन्धादथुः ४. ५. ६२
५६९ डढणपरस्तु णकारम् १. ४. १४
५७० डानुबन्धेऽन्त्यस्वरादेर्लोपः २. ६. ४१
५७१ डोऽसंज्ञायामपि ४. ३. ४६
५७२ ड्वनुबन्धात् त्रिमक्० ४. ५. ६३
५७३ ढे ढलोपो दीर्घश्चोपधायाः ३. ८. ६
५७४ णम् चाभीक्ष्ण्ये द्विश्च पदम् ४. ६. ५
५७५ णो नः ३. ८. २४

५७६ ण्य गर्गादेः २. ६. २
५७७ ण्यात् २. ७. १५
५७८ ण्युट् च ४. २. ६५
५७९ ण्युटः कव्यदृव्य० ४. ३. ६१
५८० तच्छीलतद्धर्मतत्साधु० ४. ४. १४
५८१ ततोयातेर्वरः ४. ४. ४७
५८२ तत्पुरूषावुभौ २. ५. ७
५८३ तत् प्राङ् नाम चेत् ४. २. ३
५८४ तत्र चतुर्दशादौ स्वराः १. १. २
५८५ तत्रेदमिः २. ६. २५
५८६ तत्स्था लोप्या विभक्तयः २. ५. २
५८७ तथयोः सकारम् १. ४. १०
५८८ तथा द्विगोः २. ५. १७
५८९ तथोश्च दधातेः ३. ६. ११०
५९० तदस्यास्तीति मन्त्वादयः २. ६. १५
५९१ तद् दीर्घमन्त्यम् ४. १. ५१
५९२ तनादेरूः ३. २. ३७
५९३ तयोस्तुडा २. ७. ८
५९४ तव मम ङसि २. ३. १३
५९५ तवर्गश्चटवर्गयोगे० २. ४. ४५
५९६ तवर्गस्य षट्वर्गाट्टवर्गः ३. ८. ५
५९७ तवै के केन्यत्वात् ४. २. ४६
५९८ तव्यानीयौ ४. २. ६
५९९ तस्मात् परा विभक्तयः २. १. २
६०० तस्माद् भिर् भिसः २. ३. ३६
६०१ तस्मन्नागमः परादिरन्तः० ३. ३. १६
६०२ तस्य तेन समासः ४. २. ४
६०३ तस्य लुगचि ४. ४. ४६
६०४ तहोः कुः २. ६. ३२
६०५ ता त्वौ भावे २.६.१३
६०६ ताभ्यामन्यत्रोणादयः ४. ६. ४६
६०७ तासां स्वसंज्ञाभिः काल० ३. १. १६

६०८	तिक्कृतौ संज्ञायामाशिषि	४. ५. १०५
६०९	तिर्यङ् तिरश्चिः	२. २. ४९
६१०	तिर्यच्यपवर्गे	४. ६. ३७
६११	तिष्ठतेरित्	३. ५. ५०
६१२	तुदमादिभ्य ईकारे	२. २. ३०
६१३	तुदि नुदि क्षुधि०	३. ७. २१
६१४	तुदादेरनि	३. ५. २५
६१५	तुभ्यं मह्यं ङयि	२. ३. १२
६१६	तुमर्थाच्च भाववाचिनः	२. ४. २७
६१७	तृतीयादीनां वा	४. २. ६
६१८	तृतीयादेर्घढधभान्तस्य०	३. ६. १०८
६१९	तृतीयादौ तु परादिः	२. १. ७
६२०	तृतीयायामुपदंशेः	४. ६. २६
६२१	तृतीयासमासे च	२. १. ३४
६२२	तृतीया सहयोगे	२. ४. २८
६२३	तृन्	४. ४. १५
६२४	तृषिधृषिस्वपां नजिङ्	४. ४. ५५
६२५	तृषिमृषिकृशिवञ्चि०	४. १. १२
६२६	तृष्यस्वोः क्रियान्तरे०	४. ६. ३३
६२७	तृहेरिड् विकरणात्	३. ६. ६२
६२८	तृफलभजत्रपश्रन्थि०	३. ४. ५३
६२९	ते कृत्याः	४. २. ४७
६३०	ते थे वा सम्	१. ५. ३
६३१	ते धावतः	३. २. १६
६३२	तेन दीव्यति संसृष्टम्०	२. ६. ८
६३३	तेभ्य एव हकारः पूर्वचतुर्थम्०	१. ४. ४
६३४	तेर्विंशतेरपि	२. ६. ४२
६३५	ते वर्गाः पञ्च पञ्चशः	१. १. १०
६३६	तेषां द्वौ द्वावन्योऽन्यस्य०	१. १. ४
६३७	तेषां परमुभयप्राप्तौ	२. ४. १६
६३८	तेषु त्वेतदकारताम्	२. ६. २७
६३९	तोपधातोः नकारश्च वा	२. ७. ४५

६४० तौ रं स्वरे २. ३. २६
६४१ त्यदादिकाराद्यन्ता० ४. ३. २१
६४२ त्यादादीनामविभक्तौ २. ३. २६
६४३ त्विषिपुष्यति ३. ७. २८
६४४ त्र सप्तम्याः २. ६. २६
६४५ त्रसिगृधिधृषिक्षिपां क्नुः ४. ४. २०
६४६ त्रिचतुरोः स्त्रियाम्० २. ३. २५
६४७ त्रीणि त्रीणि प्रथम० ३. १. ३
६४८ त्रेस्तृ च २. ६. १८
६४९ त्रेस्त्रयश्च २. १. ७३
६५० त्यदादिकाराद्यन्ता० ४. ३. २१
६५१ त्वन्मदोरेकत्वे ते मे० २. ३. ३
६५२ त्वमहं सौ सविभक्त्योः २. ३. १०
६५३ थफान्तानां चानुषङ्गिणाम् ४. १. १३
६५४ थलि च सेटि ३. ४. ५२
६५५ थलि च ३. ६. ४
६५६ थे थश्च ३. ५. ४३
६५७ थल्यृकारात् ३. ७. ३५
६५८ दद् दोऽधः ४. १. ७६
६५९ दधातेर्हिः ४. १. ७७
६६० दम्भेरिच्च ३. ३. ४३
६६१ दन्शिसन्जिस्वन्जि० ३. ६. ५
६६२ दयिपतिगृहिस्पृहि० ४. ४. ३८
६६३ दरिद्रातेरसार्वधातुके ३. ६. ३६
६६४ दश समानाः १. १. ३
६६५ दहिदिहिदुहिमिहि० ३. ७. ३०
६६६ दाञ्धाञोर्वा ४. २. ५७
६६७ दाणो यच्छः ३. ६. ८०
६६८ दादेर्घः ३. ६. ६२
६६९ दादेर्हस्य गः २. ३. ४४
६७० दात्पूर्वस्य चदः ४. ६. ६२
६७१ दामागायतिपिबतिस्था० ३. ४. २६

६७२	दाशगोघ्नौ सम्प्रदाने	४. ६. ४४
६७३	दाश्वान् साह्वान् मीढ्वांश्च	४. ६. ७१
६७४	दास्त्योरेऽभ्यासलोपश्च	३. ४. ५०
६७५	दिगितरर्तेऽन्यैश्च	२. ४. २१
६७६	दिगि दयते परोक्षायाम्	३. ३. ४४
६७७	दिव उद् व्यञ्जने	२. २. २५
६७८	द्विगोः	२. ७. २२
६७९	दिवादेर्यन्	३. २. ३३
६८०	दिशां वा	२. १. ३६
६८१	दिहिलिहिश्लिषिश्वसि०	४. २. ६१
६८२	दीङोऽन्तो यकारः स्वरादावगुणे	३. ४. २६
६८३	दीधीवेव्योरिवर्णयकारयोः	३. ६. ४५
६८४	दीधीवेव्योश्च	३. ५. १५
६८५	दीधीवेव्योश्च	४. १. ४
६८६	दीपिकम्प्यजहिंसि०	४. ४. ५१
६८७	दीर्घ इणः परोक्षायामगुणे	३. ३. १७
६८८	दीर्घमामि सनौ	२. २. १५
६८९	दीर्घस्योपपदस्यानव्य०	४. १. २१
६९०	दीर्घोऽनागमस्य	३. ३. २६
६९१	दीर्घो लघोः	३. ३. ३७
६९२	दुषेः कारिते	३. ४. ६४
६९३	दुहः को घश्च	४. ३. ६३
६९४	दुहितुः पुत्रोवा०	२. ७. ५४
६९५	दृग्दृशदृक्षेषु समानस्य सः	४. ६. ५८
६९६	दृशेः क्वनिप्	४. ३. ८३
६९७	दृशेः पश्यः	३. ६. ८१
६९८	दृशो णम् साकल्ये	४. ६. ८
६९९	देववातयोरापेः	४. ३. २६
७००	देविक्रुशोश्चोपसर्गे	४. ४. २६
७०१	दोऽद्वेर्मः	२. ३. ३१
७०२	द्यतिस्यतिमास्थां तेऽगुणे	४. १. ७५
७०३	द्यादीनि क्रियातिपत्तिः	३. १. ३३

७०४ द्युतिगमोर्द्वे च ४. ४. ५६
७०५ द्युतिस्वाप्योरभ्यासस्य ३. ४. १६
७०६ द्रवघनस्पर्शयोः श्यः ४. १. ४५
७०७ द्वन्द्वः समुच्चयो नाम्नोः० २. ५. ११
७०८ द्वन्द्वस्थाच्च २. १. ३२
७०९ द्वन्द्वैकत्वम् २. ५. १६
७१० द्वयमभ्यस्तम् ३. ३. ५
७११ द्वितीयचतुर्थयोः प्रथमतृतीयौ ३. ३. ११
७१२ द्वितीयातृतीयाभ्यां वा २. १. ४४
७१३ द्वितीयायां च ४. ६.३१
७१४ द्वितीयैनेन २. ४. २२
७१५ द्वित्वबहुत्वयोश्च परस्मै ३. ५. १६
७१६ द्विर्भावं स्वरपरश्छकारः १. ५. १८
७१७ द्विर्वचनमनभ्यासस्यैक० ३. ३. १
७१८ द्विवचनमनौ १. ३. २
७१९ द्विषः शत्रौ ४. ४. ११
७२० द्वेस्तीयः २. ६. १७
७२१ धनुर्दण्डत्सरुलाङ्गलाङ्कुशः ४. ३. १४
७२२ धातुविभक्तिवर्जमर्थवल्लिङ्गम् २. १. १
७२३ धातुसंबन्धे प्रत्ययाः ४. ६. १
७२४ धातोः ४. २. १
७२५ धातोर्यशब्दश्चेक्रीयितम्० ३. २. १४
७२६ धातोर्वा कर्मणःतुमन्तादिच्छति० ३. २. ४
७२७ धातोश्च हेतौ ३. २. १०
७२८ धातोस्तृशब्दस्याऽऽर् २. १. ६८
७२९ धातोस्तोऽन्तः पानुबन्धे ४. १. २६
७३० धात्वादेः षः सः ३. ८. २३
७३१ धुटश्च धुटि ३. ६. ५६
७३२ धुटां तृतीयः २. ३. ५७
७३३ धुटांतृतीयश्चतुर्थेषु ३. ८. ८
७३४ धुटिखनिसनिजनाम् ४. १. ७०
७३५ धुटि बहुत्वे त्वे २. १. १६

७३६	धुटि हन्तेः सार्वधातुके	३. ४. ४७
७३७	धुट्स्वराद् घुटि नुः	२. २. ११
७३८	धुड् व्यञ्जनमनन्तः स्था०	२. १. १३
७३९	धूञ्प्रीणात्योर्नः	३. ६. २७
७४०	धृञः प्रहरणे चादण्डसूत्रयोः	४. ३. १३
७४१	धेड्दृशिपाघ्राध्मः शः	४. २. ५५
७४२	ध्मो धमः	३. ६. ७७
७४३	न कवतेश्चेक्रीयिते	३. ३. १४
७४४	न कवर्गादिव्रज्यजाम्	४. ६. ५१
७४५	नग्नपलितप्रियान्धस्थूल०	४. ३. ५६
७४६	नञ्यन्याक्रोशे	४. ५. ८६
७४७	न डीङ्श्वीदनुबन्धवेटाम०	४. ६. ८०
७४८	न णकारानुबन्धचेक्रीयितयोः	३. ५. ७
७४९	न तिकि दीर्घश्च	४. १. ६१
७५०	नदाद्यन्चिबाह्व्यन्स्यन्तृ०	२. ४. ४६
७५१	नद्या ऐ आसासाम्	२. १. ४५
७५२	न नबदराः संयोगादयोऽये	३. ३. ३
७५३	न नामि दीर्घम्	२. ३. २७
७५४	न निष्ठादिषु	२. ४. ४१
७५५	नन्द्यादेर्युः	४. २. ५०
७५६	न पादादौ	२. ३. ४
७५७	नपुंसकात् स्यमोर्लोपो०	२. २. ६
७५८	नपुंसके भावे क्तः	४. ५. ८८
७५९	नमः स्वस्तिस्वाहास्वधा०	२. ४. २६
७६०	न मामास्मयोगे	३. ८. २०
७६१	न यान्तसूददीपदीक्षाम्	४. ४. ३३
७६२	न य्वोः पदाद्योर्वृद्धिरागमः	२. ६. ४६
७६३	नलोपश्च	३. ६. ५१
७६४	नवपराण्यात्मने	३. १. २
७६५	न वेञ्श्व्योरगुणे च	३. ४. ६
७६६	न विसर्जनीयलोपे०	१. ५. १६
७६७	न वेञ्योर्यपि	४. १. ४८

७६८	न व्यञ्जने स्वराः संधेयाः	१. २. १८
७६९	न व्ययतेः परोक्षायाम्	३. ४. २१
७७०	नशब्दाच्च विकरणात्	३. ६. २
७७१	न शसददवादिगुणिनाम्	३. ४. ५४
७७२	न शास्वृदनुबन्धानाम्	३. ५. ४८
७७३	न श्व्युवर्णवृत्तां कानुबन्धे	४. ६. ७२
७७४	न संख्यायाः	३. ७. ५
७७५	न संप्रसारणे	३. ४. १७
७७६	न संबुद्धौ	२. ३. ५४
७७७	न संयोगान्तलोपोऽलुप्तवच्च०	२. ३. ५५
७७८	न सखिष्टादावग्निः	२. २. १
७७९	न सेटोऽमन्तस्यावमि०	४. १. ३
७८०	नस्यतु क्वचित्	२. ६. ४४
७८१	नस्य तत्पुरूषे लोप्यः	२. ५. २२
७८२	नहेर्धः	३. ६. ६३
७८३	ना क्र्यादेः	३. २. ३८
७८४	नागात्स्थौल्ये	२. ७. ३७
७८५	नाडीकरमुष्टिपाणि०	४. ३. ३०
७८६	नान्तस्य चोपधायाः	२. २. १६
७८७	नान्यत् सार्वनामिकम्	२. १. ३३
७८८	नामिकरपरः प्रत्यय०	२. ४. ४६
७८९	नामिनः स्वरे	२. २. १२
७९०	नामिनश्चोपधायाः लघोः	३. ५. २
७९१	नामिनोऽम् प्रत्ययवच्चैक०	४.. १. २२
७९२	नामिनो र्वोरकुर्छुरोर्व्यञ्जने	३. ८. १३
७९३	नामिपरो रम्	१. ५. १२
७९४	नामिव्यञ्जनान्तादायेरादेः	३. ६. ४७
७९५	नाम्न आत्मेच्छायां यिन्	३. २. ५
७९६	नाम्नां समासो युक्तार्थः	२. ५. १
७९७	नाम्नि तृभृवृजिधारि०	४. ३. ४३
७९८	नाम्नि प्रयुज्यमानेऽपि	३. १. ५
७९९	नाम्नि वदः क्यप् च	४. २. २०

८००	नाम्नि स्थश्च	४. ३. ५
८०१	नाम्न्यजातौ णिनिः०	४. ३. ७१
८०२	नाम्न्यादिशिग्रहोः	४. ६. ३४
८०३	नाम्यन्तयोर्धातुविकरणयो०	३. ५. १
८०४	नाम्यन्ताद् धातोराशीर०	३. ८. २१
८०५	नाम्यन्तानां यणायि०	३. ४. ७०
८०६	नाम्यन्तानामनिटाम्	३. ५. १७
८०७	नाम्यादेर्गुरूमतोऽनृच्छः	३. २. १८
८०८	नाम्युपधप्रीकृगृज्ञां कः	४. २. ५२
८०९	नारी	२. ७. १२
८१०	नाल्विष्ण्वाय्यान्तेत्नुषु	४. १. ३६
८११	नावस्तार्ये विषाद् वध्ये०	२. ६. ६
८१२	नाव्ययेनानमा	४. २. ५
८१३	नासिकोदरकण्ठ०	२. ७. २८
८१४	निजिविजिविषां गुणः०	३. ३. २३
८१५	नित्यं शतादेः	२. ६. २२
८१६	निन्दहिंसक्लिशखादा०	४. ४. २८
८१७	निप्राभ्यां युजः शक्ये	४. ६. ५५
८१८	निमित्तात् प्रत्ययविकारा०	३. ८. २५
८१९	निमूलसमूलयोः कषः	४. ६. १४
८२०	नियोऽवोदोः	४. ५. २०
८२१	नियो ङिराम्	२. १. ७७
८२२	निरभ्योः पूल्वोः	४. ५. २१
८२३	निर्धारणे च	२. ४. ३५
८२४	निर्वाणोऽवाते	४. ६. १०३
८२५	निष्ठा	४. ३. ८८
८२६	निष्ठायां च०	४. १. ४०
८२७	निष्ठायां च	४. ६. ७८
८२८	निष्ठेटीनः	४. १. ३५
८२९	नीदापशसुयुयुजस्तु०	४. ४. ६२
८३०	नुः ष्वादेः	३. २. ३४
८३१	नृ वा	२. ३. २८

८३२	नेटि रधेरपरोक्षायाम्	३. ५. ३३
८३३	नोऽन्तश्चछयोः शकार०	१. ४. ८
८३४	नोर्वकारो विकरणस्य	३. ४. ६०
८३५	नोर्विकरणस्य	३. ४. ५७
८३६	नोश्च विकरणादसंयोगात्	३. ४. ३४
८३७	नौ गदनदपठस्वनाम्	४. ५. ४४
८३८	नौ ण च	४. ५. ३६
८३९	नौ वृञः	४. ५. २४
८४०	न्यङ्क्वादीनां हश्च घः	४. ६. ५०
८४१	पः पिबः	३. ६. ७५
८४२	प इत्युपध्मानीयः	१. १. १८
८४३	पङ्गुकद्रुतः	२. ७. ६०
८४४	पचिवचिसिचिरिचिमुचेश्चात्	३. ७. १८
८४५	पञ्चमी	३. १. २६
८४६	पञ्चमे पञ्चमांस्तृतीयान्न वा	१. ४. २
८४७	पञ्चमोपधायाः धुटि चागुणे	४. १. ५३
८४८	पञ्चम्यनुमतौ	३. १. १८
८४९	पञ्चम्यास्तस्	२. ६. २८
८५०	पञ्चादौ घुट्	२. १. ३
८५१	पणः परिमाणे नित्यम्	४. ५. ४६
८५२	पण्यावद्यवर्या विक्रेयगर्ह्या०	४. २. १५
८५३	पतिरसमासे	२. २. २
८५४	पतिवज्जीवभर्तरि	२. ७. ३२
८५५	पतेः पप्तिः	३. ६. १०३
८५६	पत्युर्नश्च	२. ७. ३३
८५७	पदपक्ष्ययोश्च	४. २. २७
८५८	पदरुजविशस्पृशोचां घञ्	४. ५. ७
८५९	पदान्ते धुटां प्रथमः	३. ८. १
८६०	पदे तुल्याधिकरणे०	२. ५. ५
८६१	पन्थिमन्थ्यृभुक्षिणां सौ	२. २. ३४
८६२	पफयोरुपध्मानीयं न वा	१. ५. ५
८६३	परकार्येविकार्यादिः	१. ६. ५

८६४ पररूपम् तकारो लटचवर्गेषु १. ४. ५
८६५ परावरयोगे च ४. ६. ४
८६६ परिचाय्यावग्नौ ४. २. ४४
८६७ परिवृढदृढौ प्रभुबलवतोः ४. ६. ८५
८६८ परोक्षा ३. १. १३
८६९ परोक्षा ३. १. २६
८७० परोक्षायां च ३. ५. २०
८७१ परोक्षायामगुणे ३. ६. १७
८७२ परोक्षायामभ्यासस्योभयेषाम् ३. ४. ४
८७३ परोक्षायामिन्धिश्रन्थि० ३. ६. ३
८७४ परो दीर्घः १. १. ६
८७५ परौ ङः ४. ५. ५८
८७६ परौ भुवोऽवज्ञाने ४. ५. ३३
८७७ परौ सृदहोः ४. ४. २६
८७८ पर्यपाङ्योगे पञ्चमी २. ४. २०
८७९ पर्यायार्हणेषु च ४. ५. ८४
८८० पाकाद्यन्तात् तथैव च २. ७. ५६
८८१ पाणिघताडघौ शिल्पिनि ४. ३. ५५
८८२ पातेर्लोऽन्तः ३. ६. २६
८८३ पात्पदं समासान्तः २. २. ५१
८८४ पादौ वा २. ७. १०
८८५ पाधोर्मानसामिधेन्योः ४. २. ३६
८८६ पिण्डादन्ने २. ७. ४०
८८७ पुंयोगात्तेन चेदारव्या २. ७. ५०
८८८ पुंवद्भाषितपुंस्कादनूङ० २. ५. १८
८८९ पुंसि संज्ञायां घः ४. ५. ६१
८९० पुंसोऽन्शब्दलोपः २. २. ३६
८९१ पुरन्दरवाचंयमसर्वसह० ४. १. २८
८९२ पुरस्तादादयश्च २. ६. ३६
८९३ पुरुषे तु विभाषया २. ५. २८
८९४ पुरोऽग्रतोऽग्रेषु सर्तेः ४. ३. १८
८९५ पुवः संज्ञायाम् ४. ४. ६४

८९६	पुषादिद्युताद्यलृकारानु०	३. २. २८
८९७	पुष्यसिध्यौ नक्षत्रे	४. २. ३२
८९८	पूक्लिशोर्वा	४. ६. ७९
८९९	पूङ्यजोः शानङ्	४. ४. ८
९००	पूतक्रतुमनोरैच	२. ७. ५२
९०१	पूर्व वाच्यं भवेद् यस्य०	२. ५. १४
९०२	पूर्वपरयोरर्थोपलब्धौ पदम्	१. १. २०
९०३	पूर्ववत् सनन्तात्	३. २. ४६
९०४	पूर्वे कर्तरि	४. ३. १९
९०५	पूर्वकार्ये त्य इष्यते	१. ६. ६
९०६	पूर्वोऽभ्यासः	३. ३. ४
९०७	पूर्वो ह्रस्वः	१. १. ५
९०८	प्यायः पिः परोक्षायाम्	३. ४. ११
९०९	प्यायः पीः स्वाङ्गे	४. १. ४२
९१०	प्रकारवचने तु था	२. ६. ३७
९११	प्रकृतिश्च स्वरान्तस्य	२. ५. ३
९१२	प्रच्छादीनां परोक्षायाम्	३. ४. १९
९१३	प्रच्छेश्छात्	३. ७. १९
९१४	प्रतेश्च	४. १. ४६
९१५	प्र परा नि	१. ६. ३
९१६	प्रत्ययः परः	३. २. १
९१७	प्रथमाविभक्तिर्लिङ्गार्थ०	२. ४. १७
९१८	प्रयोगतश्च	३. १. १७
९१९	प्रवचर्चिरूचियाचि०	४. ६. ५३
९२०	प्रश्नाख्यानयोरिञ्०	४. ५. ८५
९२१	प्रस्त्यः सम्प्रसारणम्	४. १. ४४
९२२	प्राङोर्नियोऽसम्मता०	४. २. ४०
९२३	प्राचामायन चागमः	२. ७. १६
९२४	प्राद् गृहैकदेशे घञ् च	४. ५. ५६
९२५	प्रुस्रुसृल्वां साधुकारिणि	४. २. ६८
९२६	प्रे जुसुवोरिन्	४. ४. ३६
९२७	प्रे दाज्ञः	४. ३. ६

६२८	प्रे द्रुमस्थवदवसलपाम्	४. ४. २५
६२९	प्रे द्रुस्तुश्रुवः	४. ५. १९
६३०	प्रे रश्मौ	४. ५. ३०
६३१	प्रैषातिसर्गप्राप्तकालेषुप्रकृत्या	४. ५. १०३
६३२	प्वादीनां ह्रस्वः	३. ६. ८८
६३३	फलेमलरजःसु ग्रहेः	४. ३. २५
६३४	बन्धोऽधिकरणे	४. ६. २१
६३५	बह्वादिभ्यः	२. ७. ४७
६३६	बहुवचनममी	१. ३. ३
६३७	बहुव्रीह्यूधसोऽनश्च	२. ७. २५
६३८	बहुव्रीहौ	२. १. ३५
६३९	बाह्वन्ताच्च संज्ञायाम्	२. ७. ६३
६४०	बाह्वादेश्च विधीयते	२. ६. ६
६४१	बृंहेः स्वरेऽनिटि वा	४. १. ६७
६४२	ब्रुव ईड् वचनादिः	३. ६. ६३
६४३	ब्रुवः पञ्चानामादितः आदिश्च	३. ५. ४२
६४४	ब्रुवो वचिः	३. ४. ८८
६४५	भजसहो विण्	४. ३. ५८
६४६	भयर्तिमेघेषु कृञः	४. ३. ४०
६४७	भवतेरः	३. ३. २२
६४८	भवतो वादेरूत्वं संबुद्धौ	२. २. ६२
६४९	भविष्यति गम्यादयः	४. ५. २
६५०	भविष्यतिभविष्यन्त्याशीः०	३. १. १५
६५१	भावकरणयोस्त्वाशिते भुवः	४. ३. ४२
६५२	भावकर्मणोः कृत्यक्तखलर्थाः	४. ६. ४१
६५३	भावकर्मणोश्च	३. २. ३०
६५४	भाववाचिनश्च	४. ५. ४
६५५	भावादिकर्मणोर्वा	४. ६. ८२
६५६	भावादिकर्मणोर्वोदुपधात्	४. १. १७
६५७	भावे	४. ५. ६
६५८	भावेऽनुपसर्गस्य	४. ५. ५२
६५९	भावे पचिगापास्थाभ्यः	४. ५. ६६

६६०	भावे भुवः	४. २. २१
६६१	भाषितपुंस्कं पुंवदायौ	३. ३. ६६
६६२	भाषितपुंस्कं पुंवद् वा	२. २. १४
६६३	भित्तर्णवित्ताः शकलाधमर्ण०	४. ६. १०४
६६४	भिद्योदध्यौ नदे	४. २. ३१
६६५	भियषुग्वा	३. ६. २८
६६६	भियो रूग्लुकौ च	४. ४. ५७
६६७	भिसैस् वा	२. १. १८
६६८	भीमादयोऽपादाने	४. ६. ४५
६६९	भीषिचिन्तिपूजिकथिकुम्बि०	४. ५. ७८
६७०	भीह्रीभृहुवां सार्वधातुकवच्च	३. २. २१
६७१	भुजन्युब्जौ पाणिरोगयोः	४. ६. ५७
६७२	भुजोऽन्ने च	४. ६. ५६
६७३	भुवः खिष्णुखुकञौ०	४. ३. ५७
६७४	भुवः सिज्लुकि	३. ५. १३
६७५	भुवः सिज्लुकि	३. ७. ३३
६७६	भुवस्तूष्णीमि च	४. ६. ३८
६७७	भुवो डुर्विशंप्रेषु	४. ४. ६०
६७८	भुवोनित्यम्	२. ७. ४८
६७९	भुवो वोऽन्तः परोक्षा०	३. ४. ६२
६८०	भूतकरणवत्यश्च	३. १. १४
६८१	भूरवर्षाभूरपुनर्भूः	२. २. ५७
६८२	भृग्वत्र्यङ्गिरसकुत्स०	२. ४. ७
६८३	भृजादीनां षः	३. ६. ६४
६८४	भृञोऽसंज्ञायाम्	४. २. २५
६८५	भृञ्हाङ्माङामित्	३. ३. २४
६८६	भृतौ कर्मशब्दे	४. ३. २२
६८७	भ्यसभ्यम्	२. ३. १५
६८८	भ्राज्यलंकृञ्भुसहि०	४. ४. १६
६८९	भ्रूर्धातुवत्	२. २. ५६
६९०	मदिपतिपचामुदि	४. ४. १७
६९१	मदेः प्रसमोर्हर्षे	४. ५. ४०

९९२ मनः ३. ७. ६
९९३ मनः पुंवच्चात्र ४. ३. ७४
९९४ मनिन् क्वनिप् वनिप० ४. ३. ६७
९९५ मनुष्य जातेरी २. ७. ५८
९९६ मनोरनुस्वारो घुटि २. ४. ४४
९९७ मन्यकर्मणि चानादरेऽप्राणिनि २. ४. २५
९९८ मर्जो मार्जिः ३. ८. २२
९९९ मस्जिनशोर्धुटि ३. ५. ३१
१००० मानुबन्धानां ह्रस्वः ३. ४. ६६
१००१ मान्बन्धदान्शान्भ्यो दीर्घ० ३. २. ३
१००२ मायोगेऽद्यतनी ३. १. २२
१००३ मास्मयोगे ह्यस्तनी च ३. १. २३
१००४ मितनखपरिमाणेषु पचः ४. ३. ३४
१००५ मिदिभासिभन्जां घुरः ४. ४. ४२
१००६ मिदेः ३. ५. ५
१००७ मीनातिमिनोतिदीङाम्० ३. ४. २२
१००८ मीनात्यादिदादीनामा ४. १. ३८
१००९ मुचादेरागमो नकारः स्वरा० ३. ५. ३०
१०१० मुहादीनां वा २. ३. ४६
१०११ मूर्तौ घनिश्च ४. ५. ५४
१०१२ मूलविभुजादिभ्यश्च ४. २. ५३
१०१३ मृषः क्षमायाम् ४. १. १६
१०१४ मोऽनुस्वारं व्यञ्जने १ ४. १५
१०१५ मो नो धातोः ४. ६. ६६
१०१६ म्नो मनः ३. ६. ७६
१०१७ यः करोति सः कर्ता २. ४. १४
१०१८ य आधारस्तधिकरणम् २. ४. ११
१०१९ यः इवर्णस्यासंयोगपूर्वस्या० ३. ४. ५८
१०२० यच्चार्चितं द्वयोः २. ५. १३
१०२१ यणाशिषोर्ये ३. ४. ७४
१०२२ यणाशिषोर्ये ३. ६. १६
१०२३ यण् च प्रकीर्तितः २. ६. १४

१०२४	यतौऽपैति भयमादत्ते वा०	२. ४. ८
१०२५	यत् क्रियते तत् कर्म	२. ४. १३
१०२६	यदुगवादितः	२. ६. ११
१०२७	यन्योकारस्य	३. ६. ४१
१०२८	यपि च	४. १. ५६
१०२९	यपि चादो जग्धिः	४. १. ८१
१०३०	यभिरभिलभेर्भात्	३. ७. २५
१०३१	यमः संन्युपविषु	४. ५. ४३
१०३२	यममनतनगमां क्वौ	४. १. ६८
१०३३	यमिमदिगदां त्वनुपसर्गे	४. २. १३
१०३४	यमिरमिनमिगमेर्मात्	३. ७. २६
१०३५	यमिरमिनम्यादन्तानां सि०	३. ७. १०
१०३६	यस्मै दित्सा रोचते०	२. ४. १०
१०३७	यस्यानति	३. ६. ५३
१०३८	यस्यापत्यप्रत्ययस्या०	३. ६. ५०
१०३९	याकारौ स्त्रीकृतौ०	२. ५. २७
१०४०	याचिविच्छिप्रच्छियजिस्वपि०	४. ५. ६४
१०४१	यास्युसोरियसियुसौ	३. ६. ७०
१०४२	यावति विन्दजीवोः	४. ६. ६
१०४३	या शब्दस्य च सप्तम्याः	३. ६. ६६
१०४४	यिन्यवर्णस्य	३. ४. ७८
१०४५	युगपद्वचने परः०	३. १. ४
१०४६	युग्यं पत्रे	४. २. ३३
१०४७	युजभजभुजद्विष०	४. ४. २२
१०४८	युजिरूजिरन्जिभुजि०	३. ७. २०
१०४९	युजेरसमासे नुर्घुटि	२. २. २८
१०५०	युट् च	४. ५. ८९
१०५१	युद्रुवोरूदि च	४. ५. १४
१०५२	यूनस्तिः	२. ७. १३
१०५३	युवावौ द्विवाचिनौ	२. ३. ७
१०५४	युवुझामनकान्ताः	४. ६. ४७
१०५५	युष्मदस्मदोः पदं पदात्०	२. ३. १

१०५६	युष्मदि मध्यमः	३. १. ६
१०५७	यूयं वयं जसि	२. ३. ११
१०५८	येन क्रियते तत् करणम्	२. ४. १२
१०५६	ये वा	४. १. ७१
१०६०	य्वोर्व्यञ्जनेऽये	४. १. ३४
१०६१	रथोरेतेत्	२. ६. २६
१०६२	रधिजभोः स्वरे	३. ५. ३२
१०६३	रञ्जेर्भावकरणयोः	४. १. ६५
१०६४	रप्रकृतिरनामिपरोऽपि	१. ५. १४
१०६५	रभिलभोरविकरण०	३. ५. ३४
१०६६	रमृवर्णः	१. २. १०
१०६७	रशब्द ऋतो लघो०	३. २. १३
१०६८	रषृवर्णेभ्यो नो णमनन्त्यः०	२. ४. ४७
१०६६	रसकारयोर्विसृष्टः	३. ८. २
१०७०	रागान्नक्षत्रयोगाच्च	२. ६. ७
१०७१	राजसूयश्च	४. २. ४२
१०७२	राधिरुधिक्रुधिक्षुधि०	३. ७. २२
१०७३	रान्निष्ठातो नोऽपूमूर्छि०	४. ६. ६१
१०७४	राल्लोप्यौ	४. १. ५७
१०७५	रि रेफौ च लुकि	३. ३. ३५
१०७६	रिशिरुशिक्रुशिलिशि०	३. ७. २७
१०७७	रुचादेश्च व्यञ्जनादेः	४. ४. ३१
१०७८	रुदविदमुषां सनि	३. ५. १६
१०७६	रुदादिभ्यश्च	३. ६. ६७
१०८०	रुधादेर्विकरणान्तस्य लोपः	३. ४. ४०
१०८१	रुहेर्धो वा	४. ६. ६५
१०८२	रुहेः पो वा	३. ६. ३०
१०८३	रूढानां बहुत्वेऽस्त्रियामप०	२. ४. ५
१०८४	रेफसोर्विसर्जनीयः	२. ३. ६०
१०८५	रैः	२. ३. १६
१०८६	रोगाख्यायां वुञ्	४. ५. ८२
१०८७	रो रे लोपं स्वरश्च०	१. ५. १७

१०८८	लक्षणहेत्वोः क्रियायाः	४. ४. ३
१०८९	लग्नम्लिष्टविरिब्धाः०	४. ६. ८४
१०९०	लघुपूर्वोऽय् यपि	४. १. ३७
१०९१	लम् लृवर्णः	१. २. ११
१०९२	ललाटे तपः	४. ३. ३३
१०९३	लुग्लोपे न प्रत्ययकृतम्	३. ८. २८
१०९४	लुप्तोपधस्य च	३. ६. ३४
१०९५	ले लम्	१. ४. ११
१०९६	लोकोपचाराद् ग्रहणसिद्धिः	१. १. २३
१०९७	लोपः पिबते रीचाभ्यासस्य	३. ५. ४६
१०९८	लोपः सप्तम्यां जहातेः	३. ४. ४६
१०९९	लोपे च दिस्योः	३. ६. १०९
११००	लोपोऽभ्यस्तादन्तिनः	३. ५. ३८
११०१	लोहितादिकतन्तः	२. ७. १८
११०२	ल्वाद्योदनुबन्धाच्च	४. ६. ६४
११०३	वः क्वौ	४. १. ५२
११०४	वचोऽशब्दे	४. ६. ५४
११०५	वतण्डी च	३. ७. २०
११०६	वदव्रजरलन्तानाम्	३. ६. ११
११०७	वदे खश् प्रियवशयोः	४. ३. ३७
११०८	वनतितनोत्यादिप्रतिषिद्धे०	४. १. ५८
११०९	वनोरच	३. ७. ४
१११०	वन्चिस्रन्सिध्वन्सि०	३. ३. ३०
११११	वमुवर्णः	१. २. ९
१११२	वमोश्च	४. ६. ६७
१११३	वयसिप्रथमे	२. ७. २१
१११४	वर्गप्रथमाः पदान्ताः स्वर०	१. ४. १
१११५	वर्गप्रथमेभ्यः शकारः स्वर०	१. ४. ३
१११६	वर्गाणां प्रथमद्वितीयाः शषसा०	१. १. ११
१११७	वर्ग्ये तद्वर्गपञ्चमं वा	१. ४. १६
१११८	वर्गे वर्गान्तः	२. ४. ४४
१११९	वर्तमाना तिस् अन्ति०	३. १. २४

११२० वर्तमाने शन्तृङानशाव०	४. ४. २
११२१ वर्षप्रमाणऊलोपश्च वा	४. ६. ११
११२२ व लोपश्श्वसुरस्य च	२. ७. ६४
११२३ वशेश्चेक्रियते	३. ४. १८
११२४ वसतिघसेः सात्	३. ७. २६
११२५ वहंलिहाभ्रंलिह०	४. ३. ३६
११२६ वहश्च नाम्न्युपपदे	४. ३. ५६
११२७ वहविध्वरूषस्तिलेषु तुदः	४. ३. ३१
११२८ वह्यं करणे	४. २. १६
११२६ वा कृति रात्रेः	४. १. २७
११३० वा चित्तविरागे	३. ४. ६५
११३१ वाचेक्रीयितस्य	३. ४. ६४
११३२ वा छाशोः	४. १. ७६
११३३ वा ज्वलादिदुनीभुवो णः	४. २. ५८
११३४ वाणपत्ये	२. ६. १
११३५ वा तृतीयासप्तम्योः	२. ४. २
११३६ वा दान्तशान्त पूर्ण०	४. ६. ६०
११३७ वा परोक्षायाम्	३. ४. ८०
११३८ वान्यपूर्वोपसर्जनात्	२. ७. ३५
११३६ वा परोक्षायाम्	३. ४. ६०
११४० वा प्रस्त्यो मः	४. ६. १०२
११४१ वाऽभ्यवाभ्याम्	४. १. ४७
११४२ वा मः	४. १. ६०
११४३ वांनौ द्वित्वे	२. ३. २
११४४ वाम्या	२. २. २७
११४५ वाऽमृशसोः	२. २. ६१
११४६ वा रूष्यमत्वरसंघुषास्वनाम्	४. ६. ८८
११४७ वा विरामे	२. ३. ५६
११४८ वाव वर्षप्रतिबन्धे	४. ५. २६
११४६ वासंयोगोपधाच्चाङ्गात्	२. ७. २६
११५० वाऽसरूपोऽस्त्रियाम्	४. २. ८
११५१ वा स्वरे	३. ६. १०७

११५२	वाहेर्वाशब्दस्यौत्वम्	२. २. ४७
११५३	विक्रिय इन्कुत्सायाम्	४. ३. ८२
११५४	विजेरिटि	३. ५. २८
११५५	विट् क्रमिगमिखनिसनिजनाम्	४. ३. ६४
११५६	विड्वनोरा	४. १. ६६
११५७	विदिक् तथा	२. ५. १०
११५८	विध्यादिषु सप्तमी च	३. १. २०
११५९	विध्वरूस्तिलेषु तुदः	४. ३. ३२
११६०	विन्दिच्छू च	४. ४. ५३
११६१	विभक्तयोद्वितीयाद्या०	२. ५. ८
११६२	विभक्तिसंज्ञा विज्ञेया वक्ष्यन्ते०	२. ६. २४
११६३	विभाष्येते पूर्वादेः	२. १. २८
११६४	विरामव्यञ्जनादावुक्तं०	२. ३. ६१
११६५	विरामव्यञ्जनादिष्वन०	२. ३. ४१
११६६	विंशत्यादेस्तमट्	२. ६. २१
११६७	विशेषणे	२. ४. ३२
११६८	विष्वग्देवयोश्चान्त्य०	४. ६. ६३
११६९	विसर्जनीयश्चे छे वा शम्	१. ५. १
११७०	विहङ्गतुरङ्गभुजङ्गाश्च	४. ३. ४७
११७१	वुण्तुमौ क्रियायाम्०	४. ५. ३
११७२	वुण्तृचौ	४. २. ४८
११७३	वुषघिनिणोश्च	४. १. ६६
११७४	वृङ्भिक्षिलुण्टिजल्पि०	४. ४. ३५
११७५	वृञ्दृजुषीण्शासु०	४. २. २३
११७६	वृणोतेराच्छादने	४. ५. ३१
११७७	वृद्धिरादौ सणि	२. ६. ४८
११७८	वेञश्च वयिः	३. ४. ८१
११७९	वेत्तेः शन्तुर्वन्सुः	४. ४. ४
११८०	वेत्तेस्सम्प्रति परस्मै व त्यादयः	३. ५. ४१
११८१	वेर्लोपोऽपृक्तस्य	४. १. ३३
११८२	वेषुसहलुभरूषरिषां ते	४. ६. ७४
११८३	वौ नीपूञ्भ्यां कल्क०	४. २. २८

११८४	वौ विचकत्थश्रन्भु०	४. ४. २४
११८५	व्यञ्जनमस्वरं परं वर्णं नयेत्	१. १. २२
११८६	व्यञ्जनाच्च	२. १. ४६
११८७	व्यञ्जनाच्च	४. ५. ६४
११८८	व्यञ्जनादेर्व्युपधस्यावो वा	४. १. ११
११८९	व्यञ्जनाद् दिस्योः	३. ६. ५२
११९०	व्यञ्जनान्तस्य यत्सुभोः	२. ५. ४
११९१	व्यञ्जनान्तानामनिटाम्	३. ६. ८
११९२	व्यञ्जनान्नोऽनुषङ्गः	२. १. १२
११९३	व्यञ्जने चैषां निः	२. २. ३७
११९४	व्यधजपोश्चानुपसर्गे	४. ५. ४१
११९५	व्येञ्च	४. १. ४६
११९६	व्रजयजोः क्यप्	४. ५. ७०
११९७	व्रताभीक्ष्ण्ययोश्च	४. ३. ७३
११९८	व्रश्चिमस्जोर्घुटि	३. ६. ४०
११९९	व्रश्चेः क च	४. ६. ६५
१२००	शंसुप्रत्ययादः	४. ५. ७५
१२०१	शक धृष ज्ञा ग्ला०	४. ६. ३६
१२०२	शकिसहिपवर्गान्ताच्च	४. २. ११
१२०३	शकेः कात्	३. ७. १७
१२०४	शक्तिवयस्ताच्छील्ये	४. ४. ६
१२०५	शक्तौहस्तिकवाटयोः	४. ३. ५४
१२०६	शत्रुपरयोस्तापे	४. ३. ३८
१२०७	शदिसदिधेड्दासिभ्यो रुः	४. ४. ४०
१२०८	शदेः शीयः	३. ६. ८४
१२०९	शदेरगतौ तः	३. ६. ३१
१२१०	शन्त्रानौ स्यसंहितौ०	४. ५. ६
१२११	शमादीनां दीर्घो यनि	३. ६. ७१
१२१२	शमामष्टानां घिणिन्	४. ४. २१
१२१३	शरीरनिवासयोः कश्चादेः	४. ५. ३५
१२१४	शसि सस्य च नः	२. १. १६
१२१५	शसोऽकारः, सश्च नोऽस्त्रियाम्	२. १. ५२

१२१६	साच्छासाह्वाव्यावेपामिनि	३. ६. २४
१२१७	शा शास्तेश्च	३. ५. ३७
१२१८	शासिवसिघसीनां	३. ८. २६
१२१६	शासुयुधिदृशिधृषिमृषां वा	४. ५. ६६
१२२०	शासेरिदुपधाया अण्०	३. ४. ४८
१२२१	शिट्परोऽघोषः	३. ३. १०
१२२२	शिडिति शादयः	३. ८. ३१
१२२३	शिन्चौ वा	१. ४. १३
१२२४	शिल्पिनि वुष्	४. २. ६३
१२२५	शीङः सार्वधातुके	३. ६. २१
१२२६	शीङ्पूङ्धृषिक्ष्विदि०	४. १. १५
१२२७	शीतोष्णाभ्याञ्चासहेः	४. ४. ३६
१२२८	शीलिकामिचरि०	४. ३. ३
१२२६	शुनीस्तनमुञ्जकूलास्य०	४. ३. २६
१२३०	शुष्कचूर्णरूक्षेषु पिषः	४. ६. १५
१२३१	शृतं पाके	४. १. ४३
१२३२	शृकमगमहनवृषभू०	४. ४. ३४
१२३३	शृवन्द्योरारूः	४. ४. ५६
१२३४	शेतेरिदन्तेरादिः	३. ५. ४०
१२३५	शेषात्कर्मकरणसम्प्रदान०	२. ४. १६
१२३६	शेषात् कर्तरि परस्मैपदम्	३. २. ४७
१२३७	शे षे से वा वा पररूपम्	१. ५. ६
१२३८	श्योऽस्पर्शे	४. ६. ६७
१२३६	श्रद्धायाः सिर्लोपम्	२. १. ३७
१२४०	श्रिद्रुश्रुकमिकारितान्ते०	३. २. २६
१२४१	श्रिणीभूभ्योऽनुपसर्गे	४. ५. १५
१२४२	श्रिव्यविमविज्वरि०	४. १. ५५
१२४३	श्रुवः शृ च	३. २. ३५
१२४४	श्वयतेरः	३. ६. १०२
१२४५	श्वयतेर्वा	३. ४. १२
१२४६	श्वयुवमघोनां च	२. २. ४६
१२४७	श्वस्तनी	३. १. ३०

१२४८ शिवजाग्रोर्गुणः ३. ६. १२
१२४९ षडनुबन्धत्वात्त्वी २. ७. २३
१२५० षडाद्याः सार्वधातुकम् ३. १. ३४
१२५१ षडो णो ने २. ४. ४२
१२५२ षढोः कः से ३. ८. ४
१२५३ षष्ट्याद्यतत्परात् २. ६. २३
१२५४ षष्ठी हेतुप्रयोगे २. ४. ३६
१२५५ षानुबन्धभिदादिभ्य० ४. ५. ७७
१२५६ ष्वपिस्यमि० ३. ४. ७
१२५७ ष्ठिवुक्लम्वाचमामनि ३. ६. ७२
१२५८ सख्यशिष्योः २. ७. ४६
१२५९ संख्यापूर्वो द्विगुरिति ज्ञेयः २. ५. ६
१२६० संख्यायाः पूरणे डमौ २. ६. १६
१२६१ संख्यायाः ष्णान्तायाः २. १. ७५
१२६२ संघे चानौत्तराधर्ये ४. ५. ३६
१२६३ संचिकुण्डपः क्रतौ ४. २. ४१
१२६४ संज्ञापूरणीकोपधास्तु न २. ५. १९
१२६५ संज्ञायां च ४. ५. ८३
१२६६ संपरिभ्यां वा ४. १. ५०
१२६७ संप्रति वर्तमाना ३. १. ११
१२६८ संप्रसारणं य्वृतोऽन्तः० ३. ८. ३२
१२६९ संपूर्वेभ्यस्संज्ञायाम् ४. ३. १५
१२७० संबुद्धावुभयोर्ह्रस्वः २. २. ४३
१२७१ संबुद्धौ च २. १. ३९
१२७२ संबुद्धौ च २. १. ५६
१२७३ संबुद्धौ ह्रस्वः २. १. ४६
१२७४ संयोगादेर्धुटः २. ३. ५२
१२७५ संयोगान्तस्य लोपः २. ३. ५१
१२७६ संसार्यं योगसाधनम् १. ६. ८
१२७७ सखिपत्योर्ङिः २. १. ६१
१२७८ सख्युश्च २. २. २३
१२७९ सजूषाशिषो रः २. ३. ४८

१२८०	सणनिटः शिडन्तान्ना०	३. २. २५
१२८१	सणोऽलोपः स्वरेबहुत्वे	३. ६. ३८
१२८२	सत्यागदास्तूनां कारे	४. १. २४
१२८३	सदेः सीदः	३. ६. ८५
१२८४	सद्यआद्याः निपात्यन्ते	२. ६. ३५
१२८५	सनन्ताशंसिभिक्षामुः	४. ४. ५२
१२८६	स नपुंसकलिङ्गं स्यात्	२. ५. १५
१२८७	सनस्तिकि वा	४. १. ७२
१२८८	सनि चानिटि	३. ५. ६
१२८९	सनिच दीङः	३. ४. २३
१२९०	सनि मिमीमारदारभलभ०	३. ३. ४१
१२९१	सन्निविभ्योऽर्देः	४. ६. ८६
१२९२	सनीणिङोर्गमिः	३. ४. ८६
१२९३	सन्ध्यक्षरान्तानामाकारो०	३. ४. २०
१२९४	सन्ध्यक्षरे च	३. ६. ४३
१२९५	सन्यवर्णस्य	३. ३. २६
१२९६	सपरस्वरायाः संप्रसारण०	३. ४. १
१२९७	सप्तमी	३. १. २५
१२९८	सप्तमीपञ्चम्यन्ते जनेर्डः	४. ३. ८६
१२९९	सप्तम्यां च	३. ५. २३
१३००	सप्तम्यां च प्रमाणासत्त्योः	४. ६. २८
१३०१	सप्तम्यां ये च	३. ४. ३८
१३०२	सप्तम्युक्तमुपपदम्	४. २. २
१३०३	सफलक्षणवामादेरूरौ	२. ७. ६१
१३०४	समजासनिसदनिपति०	४. ५. ७१
१३०५	समर्थनाशिषोश्च	३. १. १९
१३०६	समाङोः स्रुवः	४. २. ५६
१३०७	समानः सवर्णे दीर्घोभवति०	१. २. १
१३०८	समानादेर्गणात् परो यः	२. ७. ३४
१३०९	समासान्तगतानां वा०	२. ६. ४०
१३१०	समासे भाविन्यनञः०	४. ६. ४८
१३११	समि ख्यः	४. ३. ७

१३१२ समि मुष्टौ ४. ५. २८
१३१३ समि सृजिपृचिज्वरि० ४. ४. २३
१३१४ समुदोरजः पशुषु ४. ५. ५०
१३१५ समुदोर्गणप्रशंसयोः ४. ५. ५६
१३१६ संप्रसारणं य्वृतोऽन्तः स्थानिमित्ताः ३. ८. ३२
१३१७ सर्तेः प्रजने ४. ५. ४८
१३१८ सर्तेर्धावः ३. ६. ८३
१३१९ सर्तेर्यश्च ४. ५. ७३
१३२० सर्वकूलाभ्रकरीषेषु कषः ४. ३. ३६
१३२१ सर्वत्रात्मने ३. ५. २१
१३२२ सर्वनाम्नस्तु ससवो० २. १. ४३
१३२३ सर्वस्मात् परिमाणे ४. ५. ११
१३२४ सर्वेषामात्मने सार्व० ३. ५. १८
१३२५ सविद्यमाननञः० २. ७. २६
१३२६ सस्य सेऽसार्वधातुके तः ३. ६. ६६
१३२७ सस्य ह्यस्तन्यां दौ तः ३. ८. १४
१३२८ सहराज्ञोर्युधः ४. ३. ८४
१३२९ सहसंतिरसां सध्रिसमि० ४. ६. ६४
१३३० सहिवहोरोदवर्णस्य ३. ८. ७
१३३१ सांनाय्यनिकाय्यौ हवि० ४. २. ४३
१३३२ सातिहेतियूतिजूतयश्च ४. ५. ६८
१३३३ सान्तमहतोर्नोपधायाः २. २. १८
१३३४ सामाकम् २. ३. १६
१३३५ सामीप्येऽभेः ४. ६. ८७
१३३६ सार्वधातुकवच्छे ४. १. ५
१३३७ सार्वधातुके यण् ३. २. ३१
१३३८ सार्वधातुके रूदादेः ३. ७. ३
१३३९ सावौ सिलोपश्च २. ३. ३७
१३४० साधिसाहिसातिवेद्युदेजिचेति० ४. २. ५६
१३४१ सिचः ३. ६. ६६
१३४२ सिचि परस्मै स्वरा० ३. ६. ७
१३४३ सिचो धकारे ३. ६. ५५

१३४४	सिचद्यतन्याम्	३. २. २४
१३४५	सिजाशिषोश्चात्मने	३. ५. १०
१३४६	सिद्धिरिज्वद् ञ्णानुबन्धे	४. १. १
१३४७	सिद्धो वर्णसम्नायः	१. १. १
१३४८	सुञो यज्ञसंयोगे	४. ४. १२
१३४९	सुट् सम्पर्युपेभ्यः करोतौ भूषणे०	३. ७. ३७
१३५०	सुधीः	२. २. ५६
१३५१	सुरामि सर्वतः	२. १. २६
१३५२	सुरासीध्वोः पिबतेः	४. ३. ६
१३५३	सूतेः पञ्चम्याम्	३. ५. १४
१३५४	सूर्यरूच्याव्यथ्याः०	४. २. ३०
१३५५	सृजिदृशोरागमोऽकारः	३. ४. २५
१३५६	सृजीण्नशां क्वरप्	४. ४. ४६
१३५७	सृ स्थिरव्याध्योः	४. ५. ८
१३५८	से गम परस्मैः	३. ७. ६
१३५९	सेटोर्वा	३. ६. १०
१३६०	सोमे सुञः	४. ३. ८०
१३६१	सौ च मघवान् मघवा वा	२. ३. २३
१३६२	सौ नुः	२. २. ४२
१३६३	सौ सः	२. ३. ३२
१३६४	स्कन्दस्यन्दोः क्त्वा	४. १. १०
१३६५	स्कोः संयोगाद्योरन्ते च	३. ६. ५६
१३६६	स्तूसुधूञ्भ्यः परस्मै	३. ७. ६
१३६७	स्तौतीनन्तयोरेव सनि	३. ८. २७
१३६८	स्तृश्च प्रथनेऽशब्दे	४. ५. १७
१३६९	स्त्रियाम्	२. ७. १
१३७०	स्त्रियां क्तिः	४. ५. ६७
१३७१	स्त्रियामादा	२. ४. ४८
१३७२	स्त्री च	२. २. ६०
१३७३	स्त्री नदीवत्	२. २. ३
१३७४	स्त्र्यत्र्यादेरेयण्	२. ६. ४
१३७५	स्त्र्याख्यावियुवौ	२. २. ४

१३७६ स्थस्तिष्ठः ३. ६. ७८
१३७७ स्थादोरिरद्यतन्यामात्मने ३. ५. २६
१३७८ स्थादोश्च ३. ५. १२
१३७६ स्थाम्नापाव्यधि० ४. ५. ६१
१३८० स्नुक्रमिभ्यां परस्मै ३. ७. २
१३८१ स्नेहने पिषः ४. ६. १८
१३८२ स्फायः स्फीः ४. १. ४१
१३८३ स्फायेर्वादेशः ३. ६. २६
१३८४ स्फुरिस्फुल्योर्घञ्योतः ४. १. ७३
१३८५ स्मिङ्पूङ्रन्ज्वशूकग० ३. ७. ११
१३८६ स्मिञ्जिक्रीङामिनि ३. ४. २४
१३८७ स्मृत्यर्थकर्मणि २. ४. ३७
१३८८ स्मेनातीते ३. १. १२
१३८६ स्मै सर्वनाम्नः २. १. २५
१३६० स्यदो जवे ४. १. ६४
१३६१ स्यसंहितानि त्यादीनि० ३. १. ३२
१३६२ स्यातां यदि पदे द्वे तु० २. ५. ६
१३६३ स्रदिघसां मरक् ४. ४. ४१
१३६४ स्रसिध्वसोश्च २. ३. ४२
१३६५ स्वनहसोर्वा ४. ५. ४२
१३६६ स्वपिवचियजादीनां यण० ३. ४. ३
१३६७ स्वरविधिः स्वरे द्वि० ३. ८. २६
१३६८ स्वरवृदृगमिग्रहामल् ४. ५. ३७
१३६६ स्वरादाविवर्णोवर्णान्त ३. ४. ५५
१४०० स्वरादीनां वृद्धिरादेः ३. ८. १६
१४०१ स्वरादुपसर्गात् तः ४. १. ८०
१४०२ स्वरादेर्द्वितीयस्य ३. ३. २
१४०३ स्वराद् यः ४. २. १०
१४०४ स्वराद् रूधादेः परो न शब्दः ३. २. ३६
१४०५ स्वरान्तानां सनि ३. ८. ११
१४०६ स्वरेऽक्षरविपर्ययः २. ५. २३
१४०७ स्वरे धातुरनात् ४. ६. ६८

१४०८	स्वरोऽवर्णवर्जो नामी	१. १. ७
१४०९	स्वरो ह्रस्वो नपुंसके	२. ४. ५१
१४१०	स्वस्रादीनां च	२. १. ६६
१४११	स्वाङ्गेऽध्रुवे	४. ६. ३२
१४१२	स्वाङ्गे तसि	४. ६. ३६
१४१३	स्वादौ च	४. ६. ७
१४१४	स्वापेश्चणि	३. ४. ८
१४१५	स्वामीश्वराधिपति०	२. ४. ३४
१४१६	स्वार्थे पुषः	४. ६. २०
१४१७	हः कालव्रीह्योः	४. २. ६६
१४१८	हचतुर्थान्तस्य धातो०	२. ३. ४७
१४१९	हनस्त च	४. २. २२
१४२०	हनिगमिङोरूपधायाः	३. ८. १२
१४२१	हनिमन्यतेर्नात्	३. ७. २३
१४२२	हनृदन्तात् स्ये	३. ७. ७
१४२३	हनेर्हेर्घिरूपधालोपे	२. २. ३१
१४२४	हन्तेः कर्मण्याशीर्गत्योः	४. ३. ४६
१४२५	हन्तेः करणे	४. ६. १७
१४२६	हंन्तेर्ज हौ	३. ४. ४६
१४२७	हन्तेर्वधिराशिषि	३. ४. ८२
१४२८	हन्तर्वधिश्च	४. ५. ५३
१४२९	हन्तेस्तः	३. ६. ३२
१४३०	हन्तेस्त	४. १. २
१४३१	हरतेर्दृतिनाथयोः पशौ	४. ३. २४
१४३२	हशषछान्तेजादीनां डः	२. ३. ४३
१४३३	हस्तार्थे ग्रहवर्तिवृताम्	४. ६. १९
१४३४	हस्य हन्तेर्घिरिनिचोः	३. ६. ३३
१४३५	हिंसार्थाच्चैककर्मकात्	४. ६. २७
१४३६	हिंसार्थानामज्वरेः	२. ४. ३९
१४३७	हुधुड्भ्यां हेर्धिः	३. ५. ३५
१४३८	ह्वञोऽज् वयोऽनुद्यमनयोः	४. ३. १०
१४३९	ह्वषेर्लोमसु	४. ६. ८९

१४४० हेत्वर्थे	२. ४. २६
१४४१ हेरकारादहन्तेः	३. ४. ३३
१४४२ हो जः	३. ३. १२
१४४३ हो ढः	३. ६. ६१
१४४४ हौ च	३. ५. २४
१४४५ ह्यस्तनी	३. १. २७
१४४६ ह्रस्वः	३. ३. १५
१४४७ ह्रस्वनदीश्रद्धाभ्यः सि०	२. १. ७१
१४४८ ह्रस्वश्च ङवति	२. २. ५
१४४९ ह्रस्वस्य दीर्घता	२. ५. २८
१४५० ह्रस्वाच्चानिटः	३. ६. ५७
१४५१ ह्रस्वारुषोर्मोऽन्तः	४. १. २३
१४५२ ह्रस्वोऽम्बार्थानाम्	२. १. ४०
१४५३ ह्रीघ्रात्रोन्दनुदविन्दां वा	४. ६. १००
१४५४ ह्लादौ ह्रस्वः	४. १. १८
१४५५ ह्वयतेर्नित्यम्	३. ४. १४
१४५६ ह्वावामाश्च	४. ३. २
१४५७ ह्वो हुश्चाभ्युपनिविषु च	४. ५. ४६